LALITĀSAHASRANĀMA

(OF THE SECOND PART OF BRAHMĀṆḌAPURĀṆA.)

With the Saubhāgya-Bhāskara Bhāṣya of Bhāskararāya.

Revised

BY

WĀSUDEV LAXMAṆ SʹĀSTRĪ PAṆSʹIKAR.

Fourth Edition.

PUBLISHED

BY

PĀNDURANG JĀWAJĪ,

PROPRIETOR OF THE 'NIRṆAYA-SĀGAR PRESS,

BOMBAY.

1935.



श्रीः ।

ब्रह्माण्डपुराणोत्तरभागीय

ललितासहस्रनाम ।

भास्करराययप्रणीतसौभाग्यभास्कराख्यभाष्योपेतम् ।

भाष्यमिदं

श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्र-
श्रीमद्गम्भीरराययदीक्षितसूरिसूनुना भारत्युपाख्येन
श्रीभास्करराययेण भासुरानन्दनाथेति
दीक्षानामशालिना प्रणीतम् ।

(चतुर्थं संस्करणम् ।)

इदं

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा
संस्कृतम् ।

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये
मुद्रयित्वा प्रकाशितम् ।

शाके १८५७, सन १९३५.

मूल्यं [illegible] रूप्यकः ।

अथ किंचित्प्रास्ताविकम्—

इह खलु वसुंधरामण्डलवर्त्यखिलजनाभिलषणीयः सुखविशेष एव पुरुषार्थो नाम। स च पुरुषार्थः पुनः कृत्रिमाकृत्रिमेत्युभयप्रकारो यथाक्रमं काममोक्षपदाभ्यां व्यपदिश्यते। तदुभयसाधनत्वाद्धर्मः सकलाभिलषितो धर्मसाधनत्वादर्थोऽपि सर्वाभ्यर्थनीय एवेत्यन्योन्यं तरतमभावापन्ना अपि विशेषतः पुरुषैरर्थ्यमानत्वाविशेषात्प्राप्तत्वारोऽपि पुरुषार्थशब्दवाच्या एवेति निर्विचिकित्सः सिद्धान्तः। अथ ते पुरुषार्था अपि तादृशज्ञानविज्ञानसाध्याः। ज्ञानविज्ञाने अपि तादृशतादृशचित्तैकसाध्ये। ततश्च विविधकर्मपरिपाकायत्तविविधचित्तवृत्तिशालिनो जनाननुजिघृक्षुः परमकारुणिको भगवान् परस्परविलक्षणा अपि साक्षात्परम्परया वा परमपुरुषार्थैकप्रयोजनिका विविधा विद्याः—वेद-शास्त्र-स्मृति-पुराण-तिहासाद्याः—प्रवर्तयामास। ततश्चाखिलानामपि विद्यानां भगवत्प्रणीतत्वाविशेषेणाधिकारिभेदेन प्रामाण्यं सिद्धम्।

तत्र तावत्कर्ममार्ग–ब्रह्मविज्ञानेति पूर्वोत्तरभेदेन संविभक्तं भूमिकाद्वयं सिध्यति। यैस्तावदपरिमितजन्तुभिरुपार्जितपुण्यपुञ्जभरेणोत्तरभूम्यालम्बनेन ब्रह्मणो निरतिशयानन्दज्ञानरूपामृतास्वादो लब्धस्ते चतुर्थपुरुषार्थभाक्त्वेन कृतकृत्या एवेति तत्रास्मादृशामल्पप्रज्ञानां वाग्व्यापारो न प्रसरति। अथ येऽर्वाञ्चः पूर्वभूम्यालम्बनास्तेष्वपि कतिचन सुकृतिन एवानल्पपुण्यसंचयेन वैदिककर्ममार्गानुसारिणो भवन्ति। केचित्तु वैदिकेऽनतिलालसास्त्रैविद्यावलम्बिनः श्रीमद्गुरुचरणपरिचरणसमासादितश्रीमत्त्रिपुरसुन्दरीसमाराधनप्रवणाः संपद्यन्ते। उभयेऽपि ह्यैहिकामुष्मिकनिरवधिसुखभाजः सन्तो निःसीमनिजनिजपथावलम्बनेन कालेनोत्तरभूमिकारूढा भवेयुः। तत्रच त्रिपुरसुन्दर्या अपि सेतिकर्तव्यताकां भक्तिमेदंपर्येण निरूपयितुं सुन्दरीतापिनीपञ्चकं भावनोपनिषत्कौलोपनिषद्वह्योपनिषन्महोपनिषच्चेत्यादयो वेदशिरोभागाः प्रवृत्ताः। तत्रापि पूर्वकाण्डस्य शेषभूततयाऽऽश्वलायनादिकल्पसूत्राणां मन्वादिस्मृतीनां च प्रवृत्तिवदुपनिषत्काण्डशेषत्वेन परशुरामादिकल्पसूत्राणां यामलादितन्त्राणां च प्रवृत्तिः। अष्टादशपुराणानां तु काण्डद्वयं प्रत्यपि शेषत्वेनैव प्रवृत्तिः। ततश्च सर्वेषां स्मृतितन्त्रपुराणानां वेदमूलकत्वेनैव प्रामाण्यं सेत्स्यति।

तदेतत्सर्वमाकलय्य निखिलपुरुषार्थसाधनभूते श्रीमद्भगवत्याराधनेऽभ्यर्हिततमस्य मन्त्रशास्त्रसर्वस्वस्य **श्रीललितासहस्रनाम्नो** रहस्यतरसद्गुरुसंप्रदायैकवेद्यस्वरूपत्वेन तांस्तान्संप्रदायान्भक्तानुजिघृक्षया स्फुटं दिदर्शयिषुः पदवाक्यप्रमाणपारावारपारीणधुरीणः सर्वतन्त्रस्वतन्त्रः श्रीमन्नृसिंहयज्वगुरुचरणाराधको भारत्युपनामकः श्रीमद्रम्भीररायदीक्षितसूरिसूनुः सुगृहीतनामधेयो **भास्कररायः** भासुरानन्दनाथेतिदीक्षानामशाली **सौभाग्यभास्कराख्यं** द्वादशकलाप्रविभागभिन्नं भाष्यं प्रसन्नगम्भीरमरीरचत्।

पुरा किल श्रीविद्योपासकाग्रेसरो महागुनिरगस्त्यः श्रीमद्भगवतो देशिकेन्द्रस्य **हयग्रीवाख्यस्य** मुखाद्ब्रह्माण्डपुराणीयैर्मन्त्र-जप-न्यास-पूजा-पुरश्चरण-होम-रहस्य-

स्तोत्राख्यैः सप्तभिः खण्डैः श्रीमातुः प्रादुर्भावादिरहस्यजातमाकर्ण्य एतावन्तं कालं श्रुतादपि परं परमरहस्यं ललिताम्बानामसहस्रमस्तीति तपोबलादेव निश्चित्य तद्रहस्यमेकान्तभक्तायापि मे किमिति गुरवस्तिरश्चक्रुरित्यनुपदेशनिमित्तांशे संदिहानो यथावद्रहस्यबुभुत्सुर्भगवन्तं हयग्रीवं परमादरेण सविनयं पप्रच्छ । ततश्चास्य रहस्यश्रवणपात्रतामाकलय्य ब्रह्माण्डपुराणोत्तरभागं प्रक्रम्येदं ललितासहस्रनामागस्त्यायात्यन्तरहस्यतममप्युपदिदेश हयग्रीवो भगवानिति ब्रह्माण्डपुराणादेव ज्ञायते । यस्तत्रैव मध्यभागे—

"इत्येवं नामसाहस्रं कथितं ते घटोद्भव ।
रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ॥
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ।
सर्वरोगप्रशमनं सर्वसंपत्प्रवर्धनम् ॥"

इत्याद्युपसंहारफलश्रुतिः ।

यद्यप्यन्यानि नैकशः सन्ति सहस्रनामानि, समादियन्ते च तत्तदुपासकैस्तत्तत्सपर्याङ्गपत्रपुष्पार्पणनित्यस्तोत्रपाठादिषु, परं तानि नैतस्य तुलामर्हन्ति शब्दार्थगाम्भीर्यालंकारादिपुष्ट्यदोषताऽगौरवादिभिः । विष्णुसहस्रनामस्तोत्रस्यातिप्रौढतायामपि तत्र "पूतात्मा परमात्मा च" "क्षेत्रज्ञोऽक्षर एव च" इत्यादौ सन्ति निरर्थकाव्यप्रयोगास्तथा कियतां नाम्नां द्विरुक्तिस्त्रिरुक्तिरपि । न तादृश्यत्र ललिताम्बासहस्रनामस्तोत्रे प्रायः स्तोभप्रयोगपुनरुक्तिरव्ययादैः पूर्तिर्वा क्वचन विद्यते । यद्यपि श्रीभगवत्पादैर्विष्णुसहस्रनामभाष्ये नाम्नां द्विरुक्तिस्थले तत्रतत्रार्थभेदो वर्णितस्तथार्थभेदेऽपि नाम्नां भेदाङ्गीकारो नानार्थोच्छेदापत्त्याऽनन्यगतिकः अर्थाभेदेऽप्युच्चारणभेदाद्वैदापत्तिश्चेति न तथात्रांण्वपि वैगुण्यं दृश्यते । अत्र पुनर्विशेषश्चक्रहस्यमन्त्रोद्धारादिरूपरहस्यार्थान्तराणामपि भूरिचमत्कृतानि गुम्फितानि विलसन्ति । तथाचात्र प्रसङ्गमनुसृत्य तान्त्रिकहृद्यमार्गावलम्बिनां विविधाः परापरादिपूजाभेदाः कौलाद्या न्यासानुष्ठानप्रकाराः पुरश्चरणादिविधयः सहस्रभोजनाद्यङ्गकलापविवरणानि नैकग्रन्थालोडनवेद्यानि च सन्ति संदर्भितानि । तानि यद्यपि गुरुमुखादेव वेद्यानि तथापि विद्वच्चित्तचमत्काराय क्वचित्क्वचिद्दिङ्मात्रेणात्र भाष्ये प्रतिपादितान्येव भास्कररायेण, परंच गूढमन्त्रगोपनहानभियाखिलविवरणान्ते तत्रतत्र 'इदं गुरुमुखैकवेद्यं', 'इदं गुरुकुलाज्ज्ञेयम्', 'अत्र रहस्यं देशिकवरादवगन्तव्यं' इत्यादिसंकेतगोपनेन मन्त्रमञ्जूषा नैवोद्घाटितेत्यहोऽस्य मान्त्रिकधुरीणतासरणिः ।



श्रीः

इतः पूर्वं द्वित्रिवारं मुद्रिते ललितासहस्रनामभाष्यग्रन्थे केवलं यथाश्रुतं श्रीमद्भास्कररायचरितमस्माभिरुपन्यस्तम् । परं तदानीं ग्रन्थकर्तुः कालस्यानिर्धारणात् भाष्यान्ते ग्रन्थप्रशस्तौ "मोदच्छाया (संवत १७८५) मितायां" इति पद्ये सुस्पष्टतया कालनिर्धारणाच्च तन्न रुचिरमिति तदविच्छिन्नगुरुपरंपराप्राप्तविद्येभ्यः सांप्रदायिकेभ्यो वास्तविकं सप्रमाणं च यच्चरितमुपलब्धं तदत्र सहृदयहृदयाल्हादाय सप्रमोदं संगृह्यते ॥

श्रीमद्भास्कररायभारतीदीक्षितचरणानां संक्षिप्तमैतिह्यम् ।

स्वोपासनासिद्धिरहस्यसारसत्सम्प्रदायप्रथनायनूनम् ।
आविर्भवन्ती **गुरुभास्कराख्या** पायादपायात्परदेवता माम् ॥ १ ॥

श्रीमद्भास्कररायभारतीदीक्षितचरणास्तावत् दक्षिणप्रान्तीय"**वीजापुर**"-निकटवर्तिकर्णाटकदेशाभिजना आसन् । एतेषां पितृपादाः **श्रीगम्भीररायभारती-दीक्षिता** महाविद्वांसः सोमयाजिनः नानाशास्त्रग्रन्थनिर्माणकुशलाः प्रसिद्धा राज-नीतिधुरीणा **बीजापुरीय**यवनराज**सचिवा** आसन् । यवनाधीशादेशेन कृत्वं महा-भारतं पारसीक (फारशी) भाषायां परिवर्त्य "भारती" इत्यन्वर्थं बिरुदं लेभिरे । वर्णितं चैतच्छंदःकौस्तुभे **भास्कररायैः**—

"प्रख्यातो **विजयापुरीनरपतेर्**यः सेवया फारशी-
भाषाष्टादशपर्वभारतकृतिं सर्वां विपर्यासयत् ।
आचान्ताखिलशास्त्रवारिधिमिमं दृष्ट्वैव वाचंयमाः
पाराशर्यकणादजैमिनिमुखा अद्यापि चान्तर्हिताः ॥ १ ॥

यः शास्त्राम्बुनिधीन् प्रमथ्य कृतवान् ग्रन्थाननन्योपमा-
नग्निष्टोमसुखैर्मखैः सुरपतिं तुष्टं गृहेऽवासयत् ।
यः काश्यां चरमायुरौज्झदमलः साम्बादभेदेन तं
तातं भारतिदीक्षितोत्तरपदं **गम्भीरराजं** नुमः ॥ २ ॥

भारत्युपाख्यबुधमण्डनसोमपीथी **गम्भीररायसुतभास्कररायशैवः** ।
छन्दांसि वक्ति सगणानि सलक्षणानि सप्रत्ययानि समतानि सयुक्तिकानि ॥ ३ ॥

इति श्रीशारदोपास्तिलब्धधीर्दीक्षितोऽभिचित् ।
वभाषे शिवतोषाय भाष्यं भास्करभारती" इति ॥ ४ ॥

गम्भीररायैः स्वकृतस्य श्लोकात्मकविष्णुसहस्रनामपद्यप्रसूनांजलिनिबन्धस्योपोद्घाते स्ववंशक्रमश्चेत्थं प्रदर्शितः—

"मन्मातुःप्रपितामहो हि भिषजां वर्यो बुधो **मुद्गलः**
श्रीवत्सान्वयसंभवो गुणनिधिर्**नारायण**स्तत्सुतः ।
तस्याण्णाज्ञिबुधः सुतः क्लिल पुनर्**नारायण**स्तत्सुत-
स्तं वन्दे गुरुमागमांश्च सकलान् योऽध्यापयन्मातुलः ॥ १ ॥
विश्वामित्र इति प्रसिद्धमहिमा मूर्ध्वा तपोऽग्निं त्यजन्
त्रैलोक्यं सचराचरं स सहसा संतापयन् तापसः ।
यो ब्रह्मेन्द्रमहेशमुख्यविबुधैः संप्रार्थितः पूजितो
ब्रह्मर्षित्वमवाप कोऽपि मुनिराट् पायात्पुनः सृष्टिकृत् ॥ २ ॥
तद्गोत्रोद्भव **एकनाथ** इति च **श्रीमानुदारः** शुचिः
स्तत्पुत्र**स्तुकदेव**पण्डित इति प्रौढः प्रतापोच्छ्रितः ।
तत्सूनुश्च **यमाजिपण्डित** इति ख्यातः सतां संमतो
जाया तस्य सती सतीजननुता स्या**च्चन्द्रमा**नामतः ॥ ३ ॥
दमवांश्चन्द्रमाख्यायां **यमाजि**र्यमजीजनत् ।
स सूरिशिक्षादीक्षावान् कविर्**गम्भीरभारती**" इति ॥ ४ ॥

विश्वामित्रगोत्रे मूलपुरुष **एकनाथः**, तस्मात्**तुकदेवः**, ततो **यमाजिपण्डितः**, अस्मादेव विदुषश्चन्द्रम्माम्बायां **गम्भीररायः** समभूत् । श्रीगम्भीररायो भागवतसम्प्रदायवंश्योऽपि श्रीवत्सगोत्रसंभूताद्विजापुरराजवैद्य**मुद्गलभट्टवंश्या**दागमाचार्या**न्नारायण**नामकात्स्वमातुलात्कृत्स्नमागमशास्त्रं जग्राह । **श्रीमान् गम्भीररायः** प्रायः राजकार्यानुरोधेन **विजापुर**मध्यवसत् । कदाचित्कार्यवशात् **भागानगरा**-पराभिधेय (दक्षिणहैद्राबाद) इति प्रसिद्धं नगरं सपत्नीको जगाम । तदानीमेव तत्सहधर्मचारिणी पतिव्रता सुशीला **कोनमाम्बाख्या** प्राचीदिग्बालभास्करमिव **बालभास्करं** प्रासूत । बाल्ये पितुरेव वाग्देवतामनुभवाप्य तत्साधनादवाप्तसारस्वतानुभावो **भास्कर**स्तेजसा शास्त्रेषु कृतश्रमानपि विदुषोऽतिशेते स्म । तीर्थयात्राप्रसङ्गतः काशीक्षेत्रं गतै**र्गम्भीररायै**स्तत्रैव स्ववैभवानुरूपसम्भारै**र्भास्कर** उपनीयते स्म । ततः परं **नारायणपेठ** इति प्रसिद्धनगरसमीपे **लोकापल्लीग्रामे** निवसतामशेषविद्याकूपारपारदृश्वनां साक्षात्कृतपरदेवतानां **श्रीनृसिंहयज्वनां** सकाशादल्पावकाशेनैव गृहीताष्टादशविद्यो **भास्करो** गगनमध्यगताम्बरमणिरिव विबुधमण्डले **दिदीपे** । तदनु गुर्जरमण्डलमण्डनायमानात् **सूरत**नगरवास्तव्यात् **"प्रकाशानन्दनाथदीक्षानाम्नः शिवदत्तशुक्लख्या"**दुपासनामार्गप्रवर्तकपरमाचार्यशिरोमणेः पूर्णाभिषेकदीक्षामवाप्य तदनुज्ञया साक्षात्कृतपरदेवतात्मा **भास्करो** जगदुद्धारार्थमखिलं भारतमण्डलं पर्यटितुमारभत ।

"यत्तु **वैदिककोश** इत्याख्यं श्रीभास्कररायप्रणीतं ग्रन्थं संमुद्य तदुपोद्घाते प्रसिद्धैः संप्रति स्वकर्मानुरूपलोकान्तरवासिभिः **"आर्. जी. भाण्डारकर"** इत्या-

ख्यैरांग्लशिक्षामण्डितपण्डितप्रकाण्डैर्भास्करायविषये समुपन्यस्तम्,—"अयं **बीड** निवासी **सांगली**निवासी वा कश्चित्कुष्ठमहारोगाक्रान्तो माधुकरीवृत्तिलब्धान्नभुक् भिक्षुक आसीत् । कुष्ठमहारोगनिवृत्तयेऽनेन सूर्याराधनं कृतम् । **तृचभास्करनामकं** ग्रन्थं च प्रणीतवान्" इति । तत् भास्करायैतिह्यानाकलनमूलकम्, अद्याऽपि विदुषां समाजे तिलकायमानानां श्रीमद्भास्करायशिष्यप्रशिष्यसम्प्रदायानुगानामरुन्तुदमप्रमाणं **चेत्यनादयमेव** ।

तृचभास्करग्रन्थप्रणयनस्य वास्तविक इतिहासस्त्वित्थम्—महाराष्ट्रसम्राजः **श्रीशिवराज**पौत्रस्य **शाहूराजस्य** सेनापतिर्धनाजीजाधवः तत्पुत्रश्चन्द्रसेनजाधवो भास्कररायाणां प्रियशिष्य आसीत् । अपुत्रतया खिद्यमानमानसः स एकदा स्वभार्यया सह गुरोर्दर्शनाय समागतः सन् "भगवन् सभार्यस्य पुत्रकामस्य भवत्प्रसादेन मगेप्सितसिद्धिर्भवतु" इति **श्रीभास्कररायगुरुं** प्रार्थयामास । कृपानिधिर्गुरुर्**भास्करो**ऽपि तदभिप्रायमवगम्य "ममाशीर्वचनात् पुत्रस्ते भविष्यति" इत्युक्त्वा प्रसादं च प्रदत्तवान् । अथ गुरुवचनं शिरसाऽऽदाय सभार्यश्चन्द्रसेनः स्वराज्यं जगाम । **भास्कररायो**ऽपि निजसङ्कल्पानुसारयोग्येषु धर्मप्रचारार्थं संचचार । **श्रीभास्कररायाशिषाममो**घतया चन्द्रसेनभार्या त्वरितं गर्भं दधार । अत्रान्तरे श्रीभास्कररायकृपाप्राप्तमन्त्रः **नारायणदेवनामा** भ्रमराम्बिकामाराध्य लब्धवाक्सिद्धिर्भालकीसंज्ञकां चन्द्रसेनराजधानीमाजगाम । श्रुततत्प्रभावश्चन्द्रसेनस्तमुपेत्य निजभार्यायां किंसंतानं भवेदिति इत्यपृच्छत् । स तु यदृच्छयापुत्रीभविष्यतीत्यवोचत् । अथ चन्द्रसेनः पुनस्तमब्रूत "कथमुच्यते भवता पुत्रीति, अस्मद्गुरुभिः **श्रीभास्कररायै**स्तु पुत्रो भविष्यतीत्युक्तम्" श्रीभास्कररायाणां नाम श्रुत्वैव गुरुं संस्मृत्य साष्टाङ्गं प्रणमन् स सिद्धश्चन्द्रसेनं निर्भर्त्स्य सक्रोधमवादीत्-'मूर्ख ! किं कृतं भवता? अहमप्यस्मि श्रीभास्कररायाणामेव शिष्यस्तैरेव सानुग्रहमुपदिष्टोऽहं तत्प्रसादादेव वाक्सिद्धिमवाप्नवम् । सा मे वाक्सिद्धिर्गुरुवचसो व्यर्थीकरणाय भवता प्रवर्तिता अथैतस्य पाप्मनः फलमपि भुज्यताम् । गुरुभिरुक्तं पुत्र इति, मयोक्तं पुत्रीति, तदुभयमपि विफलं भवेत्, नपुंसकं ते सन्तानं भविष्यति, इत्युक्त्वा स सिद्धस्त्वरितं ततो निरगात् । अथ तत्कथनानुसारं चन्द्रसेनस्य **रामचन्द्र**नामकं नपुंसकं सन्तानं बभूव । कतिपयैरब्दैः पुनरपि **भालकी**संज्ञकां चन्द्रसेनराजधानीं समागते गुरौ **भास्कररायै** सापत्यकलत्रश्चन्द्रसेनस्तद्दर्शनायाऽऽगमत् । प्रणमन्तं चन्द्रसेनतनयं नपुंसकलक्षणोपेतं दृष्ट्वा विस्मितो गुरुः किमेतदित्यपृच्छत् । लज्जितश्चन्द्रसेन आत्मनश्चापलमूलकमपराधं निवेद्य नारायणदेवशापवृत्तं चाख्याय भूयोऽपि गुरुचरणौ शरणीचकार । कृपानिधिर्गुरुराजो **भास्कर**स्तं तस्यापराधं विदन्नपि स्ववचोऽमोघत्व-

---

१ पेशवेकुलालंकारेण **बाळाजीविश्वनाथ**सूनुना **बाजीरावनाम्ना** तदानींतनशाहूसम्राजः प्रधानेन सह जाधवकुलोत्पन्नस्य **चंद्रसेनस्य** केनापि कारणेन विरोधः समजनि । अतश्चंद्रसेनः दिल्लीपतिं यवनराजं शिश्राय । तेन च निजमाण्डलिकात् निजामराजसकाशात् करभारं ग्रहीतुं नियुक्तः सन् कर्णाटकप्रदेशे **भालक्या**ख्यां स्वराजधानीं स्थापयामास ।

रक्षणाय तं **रामचन्द्रजाधवं** स्वेन सहोदराय तस्य पौरुषप्राप्तये **मूलहद इत्याख्ये** सम्प्रति कर्णाटकभाषायां "**मुलीमडु**" इति प्रसिद्धे कृष्णातीरवर्तिनि पुण्यक्षेत्रे **निवासं** कृतवान् । तत्र कृष्णायां तृचार्घ्यदानाऽनुष्ठानमारब्धवांश्च । निवाससदनादूरवर्तिं कृष्णाप्रवाहं पादचारेणैव गतवतो गुरोः पादयोः शोथं दृष्ट्वा पादसंवाहकाः **शिष्याः** कृष्णातीर एव शिबिरसन्निवेशाय गुरुं प्रार्थयामासुः । तेषां तादृशीं प्रार्थनामाकर्ण्य विनोदरसिको गुरुः—"निवाससदननिकट एव कृष्णाप्रवाहोऽत्रैव आनीयतामिति कथं न प्रार्थ्यत" इत्युक्तवान् । "समर्थानां श्रीपादानां न तदपि दुष्करम्" इति शिष्याः प्रत्यूचुः । तत्तेषां प्रतिवचनं श्रुत्वा यदृच्छया निवाससदननिकट एव कृष्णापाथः-प्रवाहानयनाय कृतपणो गुरुराद्य भास्करः परेद्युः प्रातस्त्रैवासनं बद्ध्वा सूर्यमाजुहाव । सद्यः पुरः आविर्भवन्तं गगनदीपनं भास्करं भूचरो भास्करो बभाषे—"भगवन् ! भुवनपालक ! रामचन्द्रजाधवस्य पौरुषप्राप्तये मया कृष्णाप्रवाहे तृचार्घ्यदानानुष्ठानमा-रब्धम्, इतो मम निवाससदनात् दूरे कृष्णा प्रवाहः तद्भवता ममानुष्ठानसम्पत्तयेऽत्र मन्निवाससदनस्याविदूर एव कृष्णाप्रवाह आनेतव्यः। इदं किल भवत्प्रीतयेऽनुष्ठानमारब्धम् तत्सौकर्यसम्पादनं च भवत एव कर्तव्यकोटीमाटीकत इति भवानेवात्र मयाऽऽऽया-स्यते" इति । तच्छ्रुत्वा सूर्योऽब्रूत–"पण्डितेन्द्र ! उपासकशिरोमणे ! **किंभवान् न जानाति** भगवतो हिरण्यगर्भस्य सङ्कल्पम्? सृष्टेरादौ यासां यासामापगानां यो योऽध्वा निश्चितः, ताभिस्ताभिस्तेनतेनैवाध्वना प्रयातव्यम् । तत्परिवर्तनं दुष्करमेव । किंच रामचन्द्र-जाधवस्य पौरुषप्राप्तिरेव भवदभीष्टा चेत् सा मया दृक्पातेनैव साधयिष्यते, तदर्थं तृचार्घ्यदानानुष्ठानं कृष्णापाथःप्रवाहपरिवर्तनं च नावश्यकम्," इति । सूर्यस्येत्थं निगदि-तमाकर्ण्य **गुरुर्भास्करः** सकोपमाह "सूर्य ! किं मां भिक्षुकं मन्यसे । रामचन्द्रजाधवस्य पौरुषप्राप्तिः **किं मया स्वबलेनैवसम्पादयितुं** न शक्यते ? आगन्तुको दोष आगन्तुके-नैवोपायेनापनेय इति मे मनीषा । तद्यदि भवान् जगति स्वोपासनामार्गमक्षुण्णं रक्षितु-मिच्छति, तर्हि मदनुष्ठानसौकर्याय कृष्णाप्रवाह इहानीयतां भवता । नोचेत् नानावि-धोपायैः यथा भवदुपासनामार्गः सर्वथा जगतीतलान्निर्मूलयिष्यते तथा प्रयतनमेव मदीयं मुख्यतमं कर्तव्यं भवेत् । कर्तुमकर्तुमन्यथाकर्तुमसमर्थस्योपासनाखण्डनमेव युक्तम्" इति ।

भास्कररायोक्तिं श्रुत्वा व्याकुलोऽशुमाली श्रीभास्कररायजीवितावधि कृष्णापाथः प्रवाहपरिवर्तनमन्वमन्यत । **भास्करोऽपि** तत्तथेत्यङ्गीकृतवान्। अथ तृचार्घ्यदानानु-ष्ठानेन रामचन्द्रस्य पौरुषमुदभूत् । भास्कररायजीवितावधि च मध्येवनं कृष्णापाथःप्र-वाहः प्रादुरासीत्। अद्यापि तत्र मध्येवनं सैकतपङ्क्तिमसम्बद्धां लोकाः साश्चर्यं पश्यन्ति। किंच स **मूलहदाख्यो** ग्रामस्तदनु चन्द्रसेनेन **श्रीभास्कररायेभ्यः** समर्पितः । भास्कररायैश्च स तत्रत्यविप्रेभ्योऽग्रहारीकृतः । तत्र बहवश्चिञ्चावृक्षाः सन्ति येषां चिञ्चाफलानि मूल्यमन्तरैव विप्रेरुपभोग्यानीति भास्कररायाणां मनीषानुमीयते । काल-क्रमेण स ग्रामो निजामराज्याधीनो जातः, यदि कोऽपि निजामराजपुरुषस्तानि चि-ञ्चाफलानि विक्रीय धनमर्जयितुमिच्छति, तदैव तेषु चिञ्चाफलेषु कृमयः सम्पद्यन्ते इत्यद्यापि जागर्ति तत्र **श्रीभास्करायगुरोराख्या** । ततः परं श्रीभास्कररायै-

र्जगदुपकाराय तृचभास्करः प्रणीतः । आत्मनः सूर्येण सह योद्धृत्वं च श्रीभास्कररायैः स्वप्रणीते श्रीगुरुस्तवारातिके इत्थमुल्लिखितम्—

"जय नाथ जय नाथ जय सद्गुरुमूर्ते ।
हर मम मतिमिह वार्ते परिहृतभवजूर्ते ॥ ध्रु० ॥ जय० ॥

उन्मन्या अपि परतो निवसत्यतिकूटे । दशशतदलसरसीरुहशशिमयकरहाटे ।
अकथादिकरेखात्रिककलिते शृंगाटे । अन्तःकोणत्रयगतलक्षद्वयपीठे ॥ १ ॥
नाथ वराभयवितरणमुद्राकलितकरा । न भवति देवान्तरवन्मम देवी त्रिपुरा ।
तन्मुद्रे तदभिन्ने त्वयि सति किमिति परा । तस्मादेशिकवर मयि कथमिव जन्मजरा ॥
तव पादाम्बुजमध्वास्वादनतो बुद्धा । योनेर्मुद्रां बद्धा पवनावपि रुद्धा ।
अहमभवं शिववद्धावेशोत्थषडध्वाऽऽमर्शात्यक्तकदध्वा भास्करसह युद्धा ॥

इदमित्थं **तृचभास्करग्रन्थनिर्माणे** वृत्तम् । **आर. जी. भाण्डारकर**महोदयैस्त्विमं वास्तविकमितिहासमविदद्भिर्ग्रन्थान्ते **श्रीभास्कररायैः** फलश्रुतिमुखेनोल्लिखितानां श्लोकार्थानां विपर्यासः कृतः । ते च श्लोका इत्थम्—

"सञ्चाराद्बहुदेशानां रोगैर्बहुभिरर्दितः ।
रसायनानि भूयांसि सिषेवे वत्सरत्रयम् ॥ १ ॥
अमोघैरपि तैस्तेषां न च लोमाऽप्यमीयत ।
तदा भास्कररायोऽस्तौद् **भास्करं** लोकभास्करम् ॥ २ ॥
बाह्यान्तरतमोजाड्यरोगपातकघातकम् ।
स्मृतमात्रः कर्मसाक्षी धियमेतामचोदयत् ॥ ३ ॥
तृचार्घ्यदानतो रोगाः प्रणश्यन्त्यचिरादिति ॥"

इत्थं सूर्यप्रेरणया तृचार्घ्यदानमनुतिष्ठतो **भास्कररायस्य**—

"दशमे दिवसे तस्य रोगाः सर्वे लयं गताः ।
इत्थमल्पद्भुतं दृष्ट्वा ये प्रत्याख्यातभास्कराः ।
भिषजस्ते भेषजानि व्यर्थान्येवेति मेनिरे ॥" इति **(तृचभास्करान्ते)**

इत्युल्लिखता **भास्कररायेण** स्वोदाहरणोपन्यासेन सूर्यसेवासमर्थनमेव कृतम् । एतादृशानां महापुरुषाणां कुष्ठमहारोगाक्रान्तिः स्वप्नेऽपि न सम्भाव्यते अतो महापुरुषान्निन्दन् **भाण्डारकरमहोदय** अश्रद्धेय एव । इत्थमेव बहून्यन्यान्यपि परमाश्चर्यकराण्यावेदनानि **श्रीभास्कररायाणां** प्रसिद्धानि सन्ति तानि यथासम्भवं सप्रमाणानि साहित्याचार्य**खिस्ते** इत्युपाह्व**श्रीनारायणशास्त्रि**प्रणीते **"श्रीभास्करचरितचम्पूग्रन्थे"** सविस्तरं प्रपञ्चयिष्यन्ते । **श्रीभास्कररायैः** प्रायः कृत्स्नं भारतवर्षं भूयः सञ्चारेण पवित्रीकृतम् । तत्समसामयिकाः सर्वेऽपि राजानस्तेषां शिष्यभूता एवाऽऽसन् । तथाचोक्तं श्रीभास्कररायशिष्येण **जगन्नाथेन** स्वकीये कल्पसूत्रनिबन्धे, **भास्करविलासे** च—

"यस्याऽदृष्टो नास्ति भूमण्डलांशो यस्याऽदासो विद्यते न क्षितीशः" ॥ इति ॥

तथाच—

"श्रेयोमार्गनिरूपणायशरणापन्नेषु वद्धादरा
दुर्वारप्रतिवादिचक्रविमदीकारप्रकारोत्तराः।
साष्टाङ्गं प्रणतत्ररेन्द्रमुकुटीरत्नप्रभाभेदुरा
श्रीमद्भास्करभारतीपदनखज्योत्स्नाङ्कुराः पान्तु नः॥" इति च।

यत्त्वस्माभिर्निर्णयसागरमुद्रणालये १८३६ परिमितात् शालिवाहनशकाब्दाद्द्वित्रिवारं मुद्रिते ललितासहस्रनामभाष्यपुस्तके अष्टमपत्रे "अथकदाचिद्भास्कररायः" इत्यारभ्य दशमपत्रे "सहागतैरखिलैः पण्डितैः सह जगाम गृहान्" इत्युपन्यस्तं तत्सर्वं विपर्यस्तकिंवदन्तीमूलकमेव। तथा च श्रीमद्भास्कररायचरणाः न वामाचारिणः किंतु श्रुत्यविरुद्धमतानुसारिण एव यतस्तैरेव प्रकृतग्रन्थे १८३ पृष्ठे सव्यापसव्यमार्गस्थेति नामनिर्वचनाऽवसरे वाममार्गमुद्दिश्य ईदृशमार्गे देवर्षिपितृणामृणशोधनाऽभावजन्यं पातकमिति। दक्षिणमार्गमुद्दिश्य तत्तद्देवताविषयकतन्त्रेषु यानि कर्माणि विहितानि तानि तदङ्गत्वेनैवेति सर्वकर्मणामुपरोधाऽभावादस्मिन्मार्गे तादृशं पातकं नास्तीति झटिति मोक्षः। वाममार्गे तु विलम्बितः। अस्मिन्नेव प्रकरणे स्थलान्तरे "यथा तथा प्रकारेण दाक्षिण्येनैव पूजयेत्। यो दाक्षिण्यं विनाभावं महामायामिहार्चति। स पापः सर्वलोकेभ्यश्च्युतो भवति रोगधृक्।" इति कालिकापुराणश्लोकमुपन्यस्य श्रौतमार्गानुयायिनां वाममार्गाश्रयणं बहु निन्दितम्। भास्कररायास्तु स्वोपज्ञग्रन्थेषु स्थले स्थले, सोमपीथी, महाग्निचिदित्याद्युपपदपूर्वकं स्वनामोल्लेखनं चक्रुः। कथमेतादृशाः सत्यनिष्ठाः शिष्टाः स्वनिन्दितं मार्गमनुतिष्ठेरन्? स्वीये सौभाग्यभास्करे यैर्यैः साधनैर्भिन्नभिन्नाधिकारिभिर्विविधपथेषु परदेवता यथायथोपास्यते तथा तथा तत्तदधिकार्यभिमतसंभवदखिलार्थान्संकलय्य भाष्यकारैर्दर्शिताः। अतो ये ये नामार्था भाष्ये लिखितास्तेते सर्वेऽपि भाष्यकारैरनुष्ठिता इति न भ्रमितव्यम्। मुद्रितायां किंवदन्त्यां यदुक्तं कमलाकरभट्टपितामहनारायणभट्टाः श्रीभास्कररायाणां समकालीना इति तदपि भाष्यसमाप्तिकालः मोदच्छायामितायांशरदीतिविक्रमसंवत् १७८५ परिमितः श्रीभास्कररायैः स्पष्टं निर्दिष्टः नारायणभट्टस्य पौत्रः कमलाकरभट्टः वसुऋतुऋतुभू (१६६८) मिते गतेऽब्दे "नरपतिविक्रमतोऽथ याति रौद्रे तपसि शिवतिथौ समापितोऽयमिति" निर्णयसिन्धुनिर्माणकालं स्पष्टं लिलेख, निर्णयसिन्धुललितासहस्रनामभाष्यकालयोरन्तरं सप्तदशोत्तरशतवर्षीयं स्पष्टमेव। किं पुनः निर्णयसिन्धुप्रणेतुः पितामहस्य नारायणभट्टस्य भास्कररायाणां समागमवर्णनजल्पेन। अतस्सर्वापि सा किंवदन्ती सुधीभिरश्रद्धेया एव, सप्तशतीटीकायां गुप्तवत्यामपि "ब्राह्मणो मदिरादानाद्ब्राह्मण्यादेव हीयते" तथाच भाट्टचन्द्रोदये प्रथम मयूखे "धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्" इति सूत्रे दीपिकाव्याख्याने ताराभक्तिसुधार्णवकारस्य वचनमुपन्यस्य "क्षीरेण ब्राह्मणैस्तर्प्या घृतेन नृपवंशजैः। माक्षिकैर्वैश्यवर्णैश्च आसवैः शूद्रजातिभिः। वर्गाऽनुक्रमयोगेन द्रव्यभेदा भवन्ति हि।" इति तन्त्रवचनैरेव श्रुतिस्मृतिसंमताचारः सिद्धान्ततः।

मुद्रिते **भास्करविलासे**—

"वादे **मस्करिणं माध्वं** विधूयामुष्य बन्धुजाम् ।
पार्वतीं व्यवहत् कीर्त्या समं सत्यप्रतिश्रवाः ॥" इति ॥

तथा च

"ध्वान्तेषु वर्यैर्वेदान्ते. नितान्तेडितनैपुणः ।
अंतनोदान्तरध्वान्तखण्डकं **चण्डभास्करम्** ॥" इति च ॥

भास्कररायाणां साक्षाच्छिष्यस्य. जगन्नाथस्योक्त्या स्पष्टमेव **श्रीभास्कररायैः माध्वमतखण्डनपूर्वकं श्रीशाङ्करमतमेव** प्रवर्तितम् । मध्वमठाधिष्ठितसत्यबोधयतिं वादे निर्जित्य तद्भ्रातृकन्यकां तन्मुद्राङ्कितां प्रायश्चित्तैर्विंशोद्ध्य स्मार्ताचार्यद्वारा कन्यादानं स्वीकृत्य तां व्यवहत् । अतस्तैर्मध्वानुयायिभिर्द्वेषबुद्ध्या **श्रीभास्कररायाणां** निन्दाव्यञ्जकानि वस्तुस्थितिविपर्यासमूलकान्यसत्यचरितानि कल्पितानि तानि सुधीभिरश्रद्धेयान्येव ।

द्वैतवादिनां ध्वान्तानां श्रुतिस्मृतिपुराणादिष्वपि वास्तविकसत्यवचनोत्पाटनपूर्वकं स्वकपोलकल्पितासत्यवचनप्रक्षेपणचातुर्यसाहसं पुराणप्रसिद्धमेव (बेळगांवसमाचारमुद्रणालये १८०७ शालिवाहनशकाब्दे पार्थिवनामसंवत्सरे) मुद्रितसटीक-**ईशानस्तुतौ**—

"कुर्वन्नन्धान्समस्तान्विकलमतियुतानन्धको मूकदैत्यः
सर्वेशानस्य शूलाहतिहतवदनो द्वेषयुक्तः कलौ सः ।
उत्पन्नो **मध्वनामा** शिवगुरुवचनक्रोधकस्तन्त्रकर्ता
ह्यासीत्तस्य प्रकृष्टप्रलपनकुमतध्वंसकृद्दीक्षितोऽभूत्" ॥ (श्लो० ३५)

इत्यस्य पद्यस्य व्याख्यानावसरे **स्कान्दान्तर्गतकेदारखण्डस्थैकषष्टितमाध्यायान्तर्गतयुगधर्मप्रस्तावे** कलियुगधर्मनिरूपणावसरे गरुडं प्रति भगवतोक्तं सङ्गृहीतं चैतट्टीकाकृता विस्तरेण

तद्यथा—

"क्रोधः कर्णाटदेशीयः कामशास्त्रं समीक्ष्य च ।
स्वयं व्याख्यास्यते पुत्र तद्विरुद्धमते स्थितः ॥ १ ॥
तत्त्ववादसमाख्यां च कृत्वा तस्मिन्निजागमे ।
श्रुतिस्मृतिपुराणानि भञ्जयिष्यति सर्वशः ॥ २ ॥
स्वयं करिष्यते पुत्र पुराणानि श्रुतिस्मृतीः ।
अष्टादशपुराणेषु स्मृतिष्वष्टादशस्वपि ॥ ३ ॥
अद्वैतनिरतं सर्वं वाक्यमुत्पाटयिष्यति ।
कारयिष्यति पुंड्राणि वेणुपत्राकृतीनि च ॥ ४ ॥
स्वकल्पितपुराणानि ख्यापयिष्यति भूतले ।
तत्त्ववादमते स्थित्वा केचिद्ब्राह्मणबान्धवाः ॥ ५ ॥
दाहयिष्यन्ति गात्राणि तत्तत्तैर्द्विजाधमा" इति ॥

कैमुतिकन्यायेन **माध्वादि**प्रतिवादिमतध्वंसबद्धपरिकराणां श्रीमद्भास्कररायाणां चरिते निन्दाव्यञ्जकानि वचनान्येवंविधाः साहसिकाः कथं न कल्पयेयुः ?

एतादृशान्येव ध्वान्तजल्पितानि वचनानि विश्वस्य **धर्मसिन्धुकारो**ऽपि बभ्राम, इत्यनुमीयते । यत्तेन नवरात्रप्रकरणे **"नवीनतराः भास्कररायप्रभृतयोऽपि"** इत्यादिनोपक्रम्य **"तन्न वयं तत्त्वं जानीमः"** इत्यन्तेन **श्रीभास्कररायचरितं** कलुषीकर्तुं प्रयतितं तदन्तिमवाक्यादेव तेनाऽपि यथाश्रुतमेव जल्पितमिति प्रतिभाति ।

वस्तुतस्तु काशीक्षेत्रमुपागतैः **श्रीभास्कररायैस्त्रयैव** श्रीपरदेवताज्ञया **ललितासहस्रनामस्तोत्रे** सौभाग्यभास्करं नाम भाष्यमुपनिबद्धम् । अनेकग्रन्थप्रणयनप्रसिद्धैः श्रीमच्छंकराचार्यनवावतारैः **श्रीविद्यारण्यस्वामिचरणै**र्ललितासहस्रनामभाष्ये चिकीर्षिते सति श्रीललिताम्बया स्वयं प्रादुर्भूय तथाविधभाष्यकरणात् ते प्रत्याख्याताः । अथाऽपि तैरायहाद्भाष्ये कर्तुमारब्धे सति तेषां बुद्धिः कुण्ठिताऽभूत् नेत्रज्योतिश्च मन्दमभूत् । तदृष्ट्वा भाष्यकरणान्निवृत्य श्रीललिताम्बां शरणं गत्वा पूर्ववदासन्निति तदानींतनविद्वन्मण्डले प्रसिद्धाऽऽसीदियमाख्यायिका । **श्रीभास्कररायैः** परदेवताज्ञया ललितासहस्रनामभाष्यं विरचितमिति तस्य प्रामाणिकत्वे सन्दिहानाः काशिकास्तदानींतना विद्वांसः **श्रीभास्कररायाणां** परीक्षां कर्तुमैच्छन् । काशिकतात्कालिकविद्वत्प्रमुखप्रसिद्धश्रीकुङ्कुमानन्दस्वामिनामादेशमनुसरन्तः काशिका विद्वांसः **श्रीभास्कररायान्**पृच्छन्–"यदि भवद्भिः परदेवताज्ञयैव भाष्यमिदं प्रणीतं, तर्हि "महाचतुःषष्टिकोटियोगिनीगणसेविता" इति नाम्नि निर्दिष्टानां चतुःषष्टिकोटियोगिनीनां नामानि चरितानि च वर्णयन्तु भवन्तः" इति । **श्रीभास्कररायास्तु** तेषां वचनान्युररीकृत्य तान् सायन्तनहोमानन्तरं गङ्गातीरे संघशः समेतुं समादिशन् । अथ सायन्तनमाह्निकं समाप्य गङ्गातीरेऽसंख्यैः पण्डितैः सह **भास्कररायेषु** समुपविष्टेषु एकः पण्डितश्चतुःषष्टिकोटियोगिनीगणचरितनामादिकथनाय तान्प्रार्थयामास । **श्रीभास्कररायास्तु** तान् "सावधानीभूय शृण्वन्तु भवन्तः" इत्युक्त्वा क्रमशो योगिनीचरितानि कथयितुमारेभिरे । तदानीमसंख्येभ्यः कण्ठेभ्यो युगपदेवासंख्ययोगिनीचरितानि साश्चर्यं शृण्वन्तः पण्डिताः **"कथमसावेक एव युगपदनेकयोगिनीचरितानि वर्णयती"**ति चमत्कारकारणजिज्ञासया **श्रीकुङ्कुमानन्दस्वामिपादान्** पप्रच्छुः । स्वामिनश्च विहस्य स्वकमण्डलूदकैस्तेषां चक्षूंषि प्रक्षालयामासुः । अथ ते सर्वे पण्डिता गङ्गायां गगनमण्डले च स्वस्ववाहनेष्ववस्थिताश्चतुःषष्टिकोटियोगिनीः स्वचरितानि स्वमुखेनैव वर्णयन्तीरपश्यन् । **श्रीभास्कररायाणां** दक्षिणस्कन्धे **श्रीललिताम्बां**, वामस्कन्धे च **श्यामलाम्बा**मवस्थितां प्रत्यक्षीचक्रुः । इत्थमत्यद्भुतं दृष्ट्वा विगलिताभिमानाः सर्वे पण्डिताः **श्रीभास्कररायाणां** परदेवतात्मत्वं, तत्प्रणीतललितासहस्रनामभाष्यस्य प्रामाणिकत्वं च गाढं प्रतिपेदिरे । **ललितासहस्रनामभाष्यावसाने** "श्रीविश्वामित्रवंश्य" इति पद्ये श्रीभास्कररायैस्तत्प्रणयनसमयो **विक्रमशकः** १७८५ उपन्यस्तः । नर्मदोत्तरतीरे विक्रमसंवदाख्यस्यैव प्रचलितत्वात् काश्यां सौभाग्यभास्करप्रणयनात्तदन्ते विक्रमकालोल्लेखः समुचित एव । **"गोमान्तकप्रान्तीयसप्तकोटीश्वरक्षेत्रे"** (संप्रति **नारवें** इति प्रथितग्रामे) **प्रणीते सेतुबन्धे तु** तद्देशरीत्यनुसारेण **शालिवाहनशक** १६५५ (शर्मचाप इति) एव समुदलेखि ।

काश्यामेव भास्कररायैः सोमयागःकृत इत्यपि प्रसिद्धमस्ति । काश्यां **अन्नपूर्णामन्दिरमुख्यद्वारकोणे चक्रेश्वरनामकं** श्रीचक्राङ्कं शिवलिङ्गं तैरेव स्थापितमस्तीत्यपि तच्छिष्यप्रशिष्यपरंपरासु प्रसिद्धमस्ति ।

इत्थमखिलं भारतवर्षं सद्भ्यैः पावयन्तो भास्कररायाश्चरमे वयसि **मध्यार्जुनक्षेत्रे** योगपथेन देहं व्यसृजन् । **ई० सन १७५०** समयात्परं तेषां निर्याणसमय इति प्रतीयते ।

असंख्याः पुनः श्रीभास्कररायाणां शिष्याः, तेषां परम्परा अपि संख्यातिगा एव, तथापि **कौण्डिन्यगोत्रजावान्तरसर्वज्ञब्रह्माख्यस्वपुरोहितवंशीयश्रीकालदीक्षितपुत्रो गणेशदीक्षितो भास्कररायाणां** प्रियतमः शिष्य आसीत् । यस्य दीक्षानाम **उमापत्यानन्दनाथ** इति । अस्यैव विद्यावंशोऽद्यापि विद्यया तपसा परदेवतानुग्रहेण च विशिष्टतया विराजते । यैरेवाद्याऽपि **श्रीभास्कररायाणां सम्प्रदायः** सुरक्षितः समभिवर्धते । इति शिवम् ।

अखिलविद्वद्वेकान्तवशंवदः

पणशीकरोपाह्वो वासुदेवशर्मा.

चतुर्थावृत्तावीषत्प्रास्ताविकम् ।

अस्मिन् पुनर्मुद्रणावसरे (चतुर्थावृत्तौ) साहित्याचार्यसाहित्यवारिध्यादिविविधबिरुदावल्यलङ्कृतपण्डितप्रकाण्डैः काशीस्थसरस्वतीभुवनसंस्कृतग्रन्थालयाधिकारिभिः **खिस्ते इत्युपाह्वनारायणशास्त्रिमहोदयैः** तथा सूर्यपुर (सूरत) निवासिभिर्ज्योतिर्विद्भी **रैकोपनामकैः केशवरामतनूजैः कृष्णशंकरशर्मभिः** तथा प्रतिपदसमुद्भूतशङ्काऽऽकरनिरसनदृढबद्धपरिकरैः श्रीमद्भास्कररायादृतोपासनामार्गेऽतीव बद्धादरैश्च यत्तत्र तत्र प्रस्तावनालेखनादावतीव साहाय्यं कृतं तदुपकृतिभरं नैव विस्मरिष्यामः ।

एवमनल्पपरिश्रमेण यथामति संस्कृतेऽप्यस्मिन् ग्रन्थे गच्छतः स्खलनन्यायेन दग्दोषाल्पप्रेक्षानवधानाक्षरयोजकनिबन्धनं मानुषशेमुषीसुलभं स्खलितं दृष्टिसरणिमापतितं निसर्गकरुणावरुणालया निबन्धसंशोधनपरिश्रमविदुषो विदुषो मार्जयेयुरहमपि पुनर्मुद्रणावसरे मार्जयेयेति सप्रश्रयं विज्ञापयति.

ग्रन्थसंस्कर्ता.

श्रीभास्करविलासकाव्यम् (भुवनाभोगाख्यम्)।

भास्कररायान्तेवासिविश्वामित्रगोत्रश्रीजगन्नाथप्रणीतम्।

श्रीः ।: श्रेयोमार्गनिरूपणाय शरणापन्नेषु बद्धादरा
दुर्वारप्रतिवादिचक्रविमलीकारप्रकारोत्तराः ।
साष्टाङ्गप्रणमन्नरेन्द्रमुकुटीरत्नप्रभामेदुराः
श्रीमद्भास्करभारतीपदनखज्योत्स्नाङ्कुराः पान्तु नः ॥ १ ॥

पश्यतु पदेन वेदान्व्यस्यतु वल्मीकतोऽप्युदेत्वथवा ।
अस्य भुवि भास्करेन्दोः कस्य न जिह्वेतु धीर्गुणान्गातुम् ॥ २ ॥

क्काहं मन्दतमप्रज्ञः क्व गुरोर्गुणगौरवम् ।
तथाप्युपश्लोकयामि तन्वानः सफलां गिरम् ॥ ३ ॥

गम्भीरसत्त्वः कुशिकान्ववाये गम्भीररायोऽजनि गेयकीर्तिः ।
श्रुतेन शीलेन धिया नयेन श्रिया च यः स्वं गुरुमन्वकार्षीत् ॥ ४ ॥

विजयपुरसार्वभौमो विवृतमहाभारतस्तदुक्त्या यः ।
विद्यासु भारती सन्नुपनाम्नाप्यत्र भारती ववृते ॥ ५ ॥

तेनाभिपन्ने तनुजेऽभ्यहारे कोनाम्बिकायां किल मध्यरत्नम् ।
प्रकाशको भास्करवज्जगत्याः प्रधीरभूद्भास्कररायनाम्ना ॥ ६ ॥

प्रादुर्भूतः सैष भागानगर्यां पुर्यां काश्यां तातपादोपनीतः ।
अन्तेवासी सन्नृसिंहाध्वरीन्दोरस्माद्विद्याः प्रापदष्टादशापि ॥ ७ ॥

स बालभावे जनकोपदिष्टसारस्वतोपासनया नयाढ्यः ।
विद्याः समस्ताः सकलाः कलाश्च विनापि यत्नेन वशे चकार ॥ ८ ॥

सप्तवर्षोऽपि युक्त्या यः सभेश्वरपतेर्मनः ।
सभेशभक्तो भूपालसभे कस्मिन् जयी न सः ॥ ९ ॥

शृण्वन्नेत्रस्य वीप्सा खलु पदविषयेऽपश्यदद्वैर्विभाषा
न्याये नव्येऽप्यनव्येऽप्यथ च परिणतिर्जैमिनेर्वाक्यजाते ।
छन्दोऽशे पिङ्गलोऽन्यः श्रुतिशिखरमते सत्यवत्यास्तनूज-
स्तन्त्रेष्वेष स्वतन्त्रा गिरिशगुणनिका कीर्त्यते कीर्तनीयैः ॥ १० ॥

त्यक्तन्यग्रोधमूलः किमु शशिमुकुटः किंस्विदेकास्यशेषो
नागः शेषोऽयमाहो गुरुरमृतभुजामाद्दतक्ष्माविहारः ।
किं विद्यानां समष्टिर्जगति विविधतां भेजुषीणामुदञ्चत्
पुंभावा भारती वेत्यखिलबुधजनैर्भावितो भारतीन्दुः ॥ ११ ॥

महः कापिलं सांख्यतन्त्रे फणिभ्यामनन्यं च योगे विधौ छन्दसां च ।
कृतं संख्यया सर्वविद्यानिधत्यां यमाहुर्महीमण्डले पण्डितेन्द्राः ॥ १२ ॥

चार्वाक्यगोक्तिरर्वागजनि समकुचद्बौद्धराद्धान्तभङ्गी
भाट्टो हट्टो विनष्टो व्यरमदथ कथा पश्य पश्यत्पदस्य ।
योगोऽभूदस्तयोगत्रिजगति फणितिः कापिली सापि लीना
ध्वान्तश्च ध्वंसिताध्वा श्रुतिशिखरमतस्थापके **भास्करार्ये** ॥ १३ ॥

प्रतिद्वन्द्विसूरिच्छटावादकण्डूविलोपैकलीलाभृदन्तेवसन्तम् ।
उपन्यारावाटीविधूतामरेड्यं विजेतुं तगीष्टां विपश्चिद्व्रजे कः ॥ १४ ॥

संक्षुद्य खण्डमसकृत्सिक्त्वा मधुना विधिः कवेरस्य ।
किं निरमिगीत रसनामिति माधुर्या यदुल्लसन्ति गिरः ॥ १५ ॥

माध्वी साध्वी न जज्ञे जगति परिणता गोस्तनी चास्तनीचा
न्यक्कारं शर्कराऽगान्मधुरिमणि भृशं भिक्षुतां प्रापदिक्षुः ।
प्रक्षीणा क्षीरकाङ्क्षा समजनि मधुनो माधुरी चाधुरीणा
मोचाप्याचान्तदर्पा भणितिषु मखिनो **भारतीख्यातिभाजः** ॥ १६ ॥

यस्याऽदृष्टो नास्ति भूमण्डलांशो यस्याऽदासो विद्यते न क्षितीशः ।
यस्याऽसाध्या नास्ति विद्या किमन्यैर्यस्याऽऽकारः सा परा शक्तिरेव ॥ १७ ॥

आ प्राचः कामरूपाद्धुहिणसुतनदश्लाविताद प्रतीचो
गान्धारात्सिन्धुसार्द्राद्रघुवरचरिताद च सेतोरपाचः ।
आ केदारादुदीचस्तुहिनगहनतः पुण्यदेशानशेषां-
स्तीर्थान्यश्याणि पीठान्यपि च दिविषदां सैष साक्षादकार्षीत् ॥ १८ ॥

कामरूपात्परं नामरूपाभिधं दृष्टवान्नीवृतं दूरतः केवलम् ।
पापभीरुर्यदा भूपतेरासते तत्र नार्यः पुमांसोऽपि दिग्वाससः ॥ १९ ॥

स एष **गङ्गाधरवाजपेयि**सकाशतः साधितगौडतर्कः ।
गङ्गावगाहाद्विरजाः पितॄणां गतोऽनृणत्वं सुकृती गयायाम् ॥ २० ॥

शिवभक्त्यामुपमन्युः शिवापदाब्जार्हणे हयग्रीवः ।
यः पुण्डरीकनयनोपास्ताविह जगति पुण्डलीकोऽभूत् ॥ २१ ॥

साचालोऽखिलतीर्थेष्वाचारो वृद्धिमान्प्रचारणया ।
आत्मविचारः संततमव्यभिचारः शिवेऽस्य भावोऽभूत् ॥ २२ ॥

आनन्दी परिणिन्येऽसावानन्दीनामिकां प्रियाम् ।
सानन्दयन्मनो भर्तुर्मानं दत्त्वा तु पृष्ठतः ॥ २३ ॥

सावरणापत्रपया सालंकारा शुभेन शीलेन ।
सापत्न्या शिष्यैरपि साध्वीनां स्तूयते हि धुर्येषा ॥ २४ ॥

अन्तरंगमतयाऽथ तयासावन्तरङ्गविहृतिं विदधानः
पाण्डुरङ्गमभजत्सुतमाशाः पाण्डुरं गमयति स्म यशो यः ॥ २५ ॥

त्रयीमधीत्याधिगतार्थगेष त्रेता यथाकालमथादधानः ।
आम्नायमाथर्वणमप्रचारमध्यैष्ट चाध्यापिपदप्रजातीन् ॥ २६ ॥

देवीभागवतं नाम पुराणं प्रोक्तलक्षणम् ।
आनीय प्रकटीचक्रे दानी पात्रेष्वदाम्भिकः ॥ २७ ॥
सारल्यशालिचेताः सारं श्रीरामभद्रचरितस्य ।
अष्टममद्भुतकाण्डं स्पष्टदृशां प्रापयत्खिलीभूतम् ॥ २८ ॥
भासुरानन्दनाथाख्याद्भासुरो दीक्षया स्वयम् ।
पद्मावत्यम्बिकेत्याख्यां चकार सुदृशः सुधीः ॥ २९ ॥
शिवदत्तशुक्लचरणासादितपूर्णाभिषेकसाम्राज्यः ।
गुर्जरदेशे विदधे जर्जरधैर्यं स वल्लभाचार्यम् ॥ ३० ॥
वादे मस्करिणं माध्वं विधूयामुष्य बन्धुजाम् ।
पार्वतीं व्यवहत् कीर्त्या समं सत्यप्रतिश्रवाः ॥ ३१ ॥
आसृष्टेरनुवर्तमानमभितः श्वश्रूस्नुषाभावजं
वैमुख्यं परिहृत्य तादृशमिह स्वस्मिन्स्वकीयेषु च ।
अन्योन्यं कमलाविरिञ्चिसुदृशोरातन्वतः संगतं
श्रीमद्वास्करयज्वनश्चतुरता वाचा कथं वर्ण्यते ॥ ३२ ॥
काश्यां जज्ञे सोमपीथी यथावत्कालं कंचित्तत्र कृत्वा विहारम् ।
शिष्यस्यासौ चन्द्रसेनस्य राज्ञः सेवातुष्ट्योवास कृष्णोपकण्ठम् ॥ ३३ ॥
यादववंशैकमणिर्यो भोसलभूभृतश्चमूनाथः ।
श्रीगुरुचरणोपास्तौ स्वयमेव प्रापदुपमितिं स्वस्य ॥ ३४ ॥
अनेकाग्रहारप्रतिष्ठागरिष्ठः शिवश्रीधरायालयोल्लासनिष्ठः ।
अजस्रप्रवृत्तान्नसत्रो वसिष्ठः स पूर्तानि चक्रे बहून्यार्तबन्धुः ॥ ३५ ॥
चक्रेशमस्थापयदेष काश्यां गम्भीरनाथं किल कोङ्कणेषु ।
मूलह्रदे श्रीमति पाण्डुरङ्गं वज्रेश्वरं नाम च सेतुबन्धे ॥ ३६ ॥
संनतिमान्नाथपदोः संनतिनाम्नेह विश्रुते क्षेत्रे ।
चक्रे स मन्दिरं श्रीचक्राकारेण चन्द्रलाम्बायाः ॥ ३७ ॥
वहोः कालात्किलाशेषमदश्चोलेषु नीवृति ।
कहोळेशमसौ चक्रे महोत्सवनिरन्तरम् ॥ ३८ ॥
साध्वी तदग्रसुदती सह्यसुतातीरभूपरिष्कारे ।
भास्करपुरेऽग्रहारे बद्धावृति भास्करेश्वरं न्यधित ॥ ३९ ॥
यदि श्रीर्नो विद्या भवति यदि सा नैव विनयः
स चेन्नो दातृत्वं तदपि यदि न स्यान्मृदु वचः ।
इति स्मायं लोके नियतमसमानाधिकरणो
गुणग्रामः पूर्णो जगति वव्रृधे भास्करबुधे ॥ ४० ॥
नवस्यन्दिमाध्वीकधारानुकारप्रकारोल्लसत्साहितीसौहितीकः ।
विनिःश्वासकल्पं भुवः कल्पशाखी ववन्ध प्रबन्धान्प्रबन्धास नैकान् ॥४१॥

---

१ 'निवासम्' इति पाठः.

दान्तेषु वर्यैर्वेदान्ते नितान्तेडितनैपुणः ।
अतनोदान्तरध्वान्तखण्डकं **चण्डभास्करम्** ॥ ४२ ॥
लीलामात्रेरितया नीलाचलपूर्वया चपेटिकया ।
विमताद्दतं **प्रहस्तं** व्यतनिष्ट विहस्तमब्जनिभहस्तः ॥ ४३ ॥
पूर्वमीमांसकाग्रेसरैः श्लाघितः पूर्वमीमांसयोद्दामकक्ष्याकुलम् ।
वादकौतूहले नाम चक्रे कृती वादकौतूहली सूनुनाऽसौ गुरोः ॥ ४४ ॥
चन्द्रोदयं च **भाट्टोपपदं** भट्टारकः प्रवीणानाम् ।
मध्यायाः कौमुद्या अपि टीकां **रसिकरञ्जनीं** विदधे ॥ ४५ ॥
प्रतिवादिशिरोघट्टकुट्टाकप्रतिभाभरः ।
तार्किकाणां मण्डनं स ततान **न्यायमण्डनम्** ॥ ४६ ॥
छन्दसि **सौत्रं भाष्यं छोटीवृत्तिं** प्रवृत्तिमान्धर्मे ।
वार्तिकराजं वृत्तोपपदं चन्द्रोदयं च चक्रेऽसौ ॥ ४७ ॥
वस्तुमहौं धुरि सतां वस्तुतः पिङ्गलापरः ।
स स्तुतं प्राणयच्छन्दःकौस्तुभं विबुधोत्तमैः ॥ ४८ ॥
विद्वन्मनोनन्दनचन्द्रशालां तद्वत्प्रणिन्ये खलु **चन्द्रशालाम्** ।
प्रधीः **कटोरी**मपि लोभनीयपदार्थपूर्णामिह लब्धवर्णः ॥ ४९ ॥
मधुराम्लं व्यधात्काव्यं मधुराम्लरसप्रियः ।
सुभाषितं भास्कराङ्कं बभाषे मृदुभाषितः ॥ ५० ॥
प्रचण्डं दुरितव्रातखण्डने **शिवदण्डकं** ।
मुक्तकानि च पद्यानि मुक्तावद्यान्ययं जगौ ॥ ५१ ॥
तत्त्वज्ञः **स्मृतितत्त्वाख्यां** कृतिं सत्त्वगुणाश्रयः ।
मर्मविद्धर्मशास्त्रस्य कर्मठः सैष निर्ममे ॥ ५२ ॥
सहस्रब्राह्मणभुजिविधिखण्डस्य विश्रुतः ।
बौधायनप्रणीतस्य बुधो **व्याख्या**मरीरचत् ॥ ५३ ॥
शङ्खचक्राद्यङ्कनस्य स शङ्खलिखितोपमः ।
प्रायश्चित्तं जगा**दैकादश्या** अपि **विनिर्णयम्** ॥ ५४ ॥
प्रदोषभास्करं चक्रे **तृचभास्कर**मप्यसौ ।
कुण्डभास्करसंज्ञां च कृतिं भास्करपण्डितः ॥ ५५ ॥
नानाविधैरसौ वृत्तैर्नाम्नामष्टोत्तरं शतम् ।
अष्टमूर्तेरतिस्पष्टं व्याचष्टेस्म विशिष्टधीः ॥ ५६ ॥
गणेशनामसाहस्रव्याख्यां विख्यातिमान्गुणैः ।
खद्योतनाम्नीं निष्पाद्य व्यद्योतिष्ट स भास्करः ॥ ५७ ॥
स्कान्दीयं चन्द्रलाम्बायाश्चन्द्रोपममुखद्युतिः ।
माहात्म्यं ख्यातमाहात्म्यो व्याचख्यावतिविस्तृतम् ॥ ५८ ॥

मत्तप्रतिवदवदनप्रत्तजनानुत्तरत्नमुद्राकः ।
नाथनवरत्नमालामञ्जूषां मञ्जुलां जुगुम्फासौ ॥ ५९ ॥
भावनोपनिषद्भाष्यं सप्रयोगं स भाविकः ।
चक्रे **श्रीसूक्तभाष्यं** च चिरं परिचितः श्रिया ॥ ६० ॥
कौलोपनिषद्भाष्यंकुलजैः सेव्यो जनैश्चकारासौ ।
त्रैपुरमहोपनिषदं त्रैपुरसिद्धान्तविद्विवत्रे सः ॥ ६१ ॥
ललितानामसाहस्रभाष्यं भाष्यकृतां समः ।
सौभाग्यभास्कराख्यं स भाग्यलब्धं व्यधात्सुधीः ॥ ६२ ॥
सौभाग्यरत्नाकरभाग्यहेतुं **सौभाग्यचन्द्रोदय**मागमज्ञः ।
श्रीरामवन्निर्धुतपापबन्धं चकार चात्यद्भुत**सेतुबन्धम्** ॥ ६३ ॥
भास्करकुलजेन पुरा बद्धः सेतुः स्वयं तरितुमब्धिम् ।
भास्कररायेण जगत्तारयितुं भवपयोधिरयमरचि ॥ ६४ ॥

वरिवस्यारहस्यं च वरिवस्याप्रकाशकम् ।
वरिवस्यापरैरेव वरिवस्यमचीकरत् ॥ ६५ ॥
जामदग्न्योपज्ञ**कौलकल्पसूत्रस्य** सूत्रवित् ।
रत्नालोकाभिधां वृत्तिं यत्नादेष विना व्यधात् ॥ ६६ ॥
मालामन्त्रोद्धारं गुणमणिमालापरिष्कृतोऽव्याख्यत् ।
गुप्तवतीं सप्तशतीटीकामपि लुप्तसंशयां विदधे ॥ ६७ ॥

सर्वज्ञो विशदां सप्तशतीमन्त्रविभाजिकाम् ।
प्रणिनाय **शतश्लोकीं** पुण्यश्लोकपदोचितः ॥ ६८ ॥
असंख्याता हि कृतयः संख्याता अपि विष्टपे ।
संख्यातुं केन शक्यन्ते संख्यावच्चक्रवर्तिनः ॥ ६९ ॥

इत्येवं श्रीमद्भास्कररायप्रणीतानां केषांचिद्ग्रन्थानां निर्देशः ।

श्रीमद्भास्कररायकृतपद्यसंग्रहः

तत्सार्वज्ञ्योपज्ञकानि प्राज्ञहृद्यानि कानिचित् ।
अद्याहमनवद्यानि पद्यानि प्रतिपादये ॥ ७० ॥

"श्रीरामं प्रतिपुष्कराभिधमहायज्ञेन **वेदत्रय-**
व्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे ।
एतां धेनुमुपह्वयामि सुदुघामित्यृग्गतं **शंकरा-**
चार्य शिष्यचतुष्टयेन सहितं वन्दे गुरूणां गुरुम् ॥ ७१ ॥
वर्षेष्वतीतेषु शकेषु षट्सु तिष्येऽवतीर्णं भुवि **शंकरार्यम्** ।
शिष्यैश्चतुर्भिः सहितं शिवादिपारम्परीकावधिमानमामः ॥ ७२ ॥

हन्ताहन्ताहन्तान्तर्वाणिगणस्य तत्त्वभुवि रन्ता ।
ध्वन्यध्वन्यध्वन्यः **श्रीनरसिंहाध्वरी** गुरुर्धन्यः ॥ ७३ ॥
साक्षाद्राक्षासमक्षापतदमृतझरीमाधुरी साधुरीति-
मैल्लीवल्लीमतल्लीकुसुमपरिमलाखर्वगर्वापहन्त्री ।
भाषा येषामशेषा विनटदजजटाजूटसंभ्रान्तगङ्गा-
तुङ्गत्वङ्गत्तरङ्गध्वनिमधरयते तानुमः **श्रीनृसिंहान्** ॥ ७४ ॥
विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः ।
जगदम्ब तव त्वयं क्रमः क्षणमुद्दालकपुष्पभञ्जिका ॥ ७५ ॥
शिरःस्थशशलक्षणं त्रिपुरदैत्यसंतक्षणं
दुरन्तविषभक्षणं सुरनिकायसंरक्षणम् ।
नरीनरविलक्षणं रविकृशानुचन्द्रेक्षणं
स्मरार्दनविचक्षणं **परशिवं** भजेऽनुक्षणम् ॥ ७६ ॥
चायं चायं दुरितनिचयं सीदतां वत्तयुपायं
पायं पायं शमितकलुषं कार्ष्णमम्भोऽनपायम् ।
ध्यायं ध्यायं विषयकटुतां भोश्चिरायोरुगायं
गायं गायं विहरत विभुं **वेणुगोपालनाट्यम्** ॥ ७७ ॥
इदमहमोरुभयोरपि यदस्ति नियतावभासकं भानम् ।
तस्यापि साक्षिणी चित्तदुपाधिविनाकृताप्यस्ति ॥ ७८ ॥
तद्दत्तैश्वर्यभाजः परमशिव कथंकारमन्यानमर्त्यान्
याचे देहीति विष्णुद्रुहिणहरिमुखान्भिक्षुकान्भिक्षुकोऽहम् ।
यत्तावद्वादशाहक्रतुविकृतिशतोक्थ्याङ्गभूतोऽपि चोक्थ्यो
ज्योतिष्टोमोक्तधर्मानभिलषति नतु द्वादशाहोक्थ्यधर्मान् ॥ ७९ ॥
आलोलोच्यकि सूरिसंप्रतिपनीपन्नांश्चनीकारयन्
शब्दान्संसदि बम्भणीतकितरां यश्चर्करीतानपि ।
कीर्त्तिस्तस्य वरीवधीतकि जनाः सर्वेऽपि चाकत्थति
स्वर्गं चाभिपनीपदीतकि न चैतेभ्यः सनीस्रस्यते ॥ ८० ॥
भ्रश्यत्कूलकुकूहनाथ हरिणा जालमत्वमध्यापितात्
धिग्दण्डाजिनिकान्धकीद्धकिदिहायश्शूलिकान्पार्श्वकान् ।
ब्रह्मात्मैक्यपुरो नु योऽनुरहसं यायावरः सस्यको
मर्त्यत्रा समयाकरोति विधिवत्तेनास्तवर्जयं मम ॥ ८१ ॥
द्रव्याश्रयी गुणोऽथच दुःखध्वंसो विमुक्तिरिति च मुनिः ।
ऋतमाह गौतमोऽसौ त्रिभुवनमपि साक्षि यदिह **सानुभवम्** ॥ ८२ ॥
द्वित्रप्रस्तरखण्डगर्भकुतुपध्वानभ्रमाधायिवाक्
चेद्वैयाकरणो मनागपि रसं काव्यस्थितं विन्दति ।
तन्वाने रसितार्भटीं गतरसां मध्येनभः शारदे
निर्घातैर्बधिरीकृतश्रुतिपुटे को वापराधोऽम्बुदे ॥ ८३ ॥

शुष्कोदर्ककुतर्ककर्कशगिरा चोद्यानि ये कुर्वते
साहित्येऽनुभवैकगोचररसे स्युस्तेऽपि चेत्पण्डिताः ।
को मन्तुर्महिलां निहत्य कुचयोरन्त्राणि संप्राश्नतां
वृक्षाणां कुसुमानि मर्षितवतां शाखामृगाणामपि ॥ ८४ ॥

वित्ते तत्पुरुषे तु तत्पुरुषति त्वन्नाम्नि शैवाग्रणी-
रल्पः कोऽपि समाश्रयन्निह बहुव्रीहिं बहुव्रीहिभाक् ।
श्रीरामेश्वरकर्मधारयमुनीकुर्वन्कविर्भास्करः
कस्मादप्यपि कर्म धारयति न द्वन्द्वेऽपि निर्द्वन्द्वति ॥ ८५ ॥

कावेरि त्वं सरस्वत्यनवरतसमाविष्टचित्ता तथाहं
न क्रोधस्ते ममापि त्वमहमपि कवेरात्मजत्वं प्रपन्नौ ।
भूमि न्यञ्चत्कबन्धा त्वमहमपि यदा जीवनं पातुमीहे
त्वं मे पातुं यदिच्छस्यनितरगुणयोरावयोः को विशेषः ॥ ८६ ॥

'गयाप्रयाग' द्वितयं वैपरीत्येऽपि तादृशम् ।
'काशिका' पि तथैवातस्त्रिस्थली स्तूयते बुधैः ॥ ८७ ॥

त्वद्भालेऽग्निशिखालेपात्तद्भालेऽग्निशिखा भवेत् ।
गङ्गे शिवोऽपि न त्वत्तः कृतप्रतिकृते कृती ॥ ८८ ॥

तवाङ्घ्रौ यः प्रणिपतेत्तस्याङ्घ्रौ निपतस्यहो ।
गङ्गे शिवोऽपि न त्वत्तः कृतप्रतिकृते कृती ॥ ८९ ॥" इति ।

जायात्मजाभ्यां च विधीश्वराभ्यां विष्णोः समाहारयुगं निबद्धम् ।
अस्तीह ते विन्दति शाब्दिकस्तदिति प्रतिज्ञा कविभास्करस्य ॥ ९० ॥

न स्याच्चेदिति वाक्यस्य कोऽर्थः कस्मिन्पिकभ्रमः ।
आन्ध्रीगीर्वाणभाषाभ्यामेकमेवोत्तरं वद ॥ ९१ ॥ काकपोते ।

कमले कमलोत्पत्तिः श्रूयते न च दृश्यते ।
दृष्टं शंभोः पदाम्भोजे विष्णुलोचनपङ्कजम् ॥ ९२ ॥

मर्त्य मर्त्यां गिरिं शुल्वं शब्दशास्त्रं च वर्णय ।
कविभास्कर एवात्र ब्रूते धातुगुणास्पदम् ॥ ९३ ॥

वीर श्रीकामरूपक्षितिरमणयशोनाशिना नायकेन
त्रैलोक्ये श्वेतिमानं कलयति यमुनाप्यत्यजन्नैजरूपम् ।
संदिग्धस्तीर्थराजोऽप्यभवदथ पुनः सा नदी त्वत्प्रतापा-
दामूलाग्रं यथावत्समजनि यवनीसंघदङ्वीरपूरैः ॥ ९४ ॥

प्रस्तौमि प्रतिहार्यैव जनैरुद्गीयतेऽखिलैः ।
निधनोपद्रवैर्हीनं साम तेऽन्यादृशं नृप ॥ ९५ ॥

रुद्रभूप भद्रमस्तु यद्रिपूनुपद्रवैरिह द्रुतं प्रविद्रवय्य काद्रवेयपूर्दरीम् ।
तद्रमाविनिद्रणेन मुद्रिता दरिद्रता दरिद्रतान्तदद्रिभिद्वनद्रुमान्नचाद्रिये ॥ ९६

श्रीभास्करेणैव भुवि स्थितानि छत्राणि सर्वाण्यधरीकृतानि ।
छायां त्वदीयामभिवाञ्छतिस्म श्रीभास्करश्छत्रपतिस्ततस्त्वम् ॥ ९७ ॥

भोः पद्मपत्र भवतां यदपां कणोऽपि न स्पृश्यते समुचितैव परस्वभीः सा ।
एवं धिया त्वयि धृते निहते सति त्वमाषाढभूतिनिपतद्विलसीति युक्तम् ॥ ९८ ॥

कूपाकूपारकुल्यास्वथ च नदनदीखेयकासारवापी-
ष्वापातालं प्रविष्टैर्दशशतगुणितैरंशुभिर्वारि भूरि ।
ग्राहं ग्राहं निधिभ्यन्नवसि दिनपते विश्वमेतत्समस्तं
तत्ते किं वर्णयामो निरुपधिकरुणां दानशौण्ड्यं च भूयः ॥ ९९ ॥

भूषावानखिलैर्गुणैः स्वकृतिभिः संतानवान्भूयसा
विद्याभिर्धनवान्सुधाधवलया कीर्त्या चिरं देहवान् ।
पित्रा दैवतवानभूत्सुकृतवॉल्लोकोपकारेण यः
साधर्म्यं लभतामनेन भुवि कः **श्रीभारतीयज्वना** ॥ १०० ॥

श्रीमद्भास्कररायनैकजनिषु त्वद्दानतोयैर्भृता-
दासर्गं जलधेरवाप्तजनुषः स्वःशाखिनो गौश्च सा ।
औदार्यं भजते हि कारणगुणाः कार्येषु न स्युः किमि-
त्येनं पूर्णमनोरथाः प्रतिदिशं सर्वेऽर्थिनोऽप्यस्तुवत् ॥ १०१ ॥

नाद्वह्यत्कस्या अपि नास्मार्षीच्चेतसाऽपि परदारान् ।
नास्पृहयत्पररायें **भास्कररायो** मखी धन्यः ॥ १०२ ॥

अदीधरच्चेतसि चन्द्रचूडमबीभरद्बन्धुजनं स दीनम् ।
अचीकरत्किंच मखानशेषानतीतरत्संसृतिमात्मभक्तान् ॥ १०३ ॥

पद्मोल्लासैकहेतुर्निखिलकुवलयस्यापि मोदप्रदायी
लोकालोकोदरैकोदयमथ परतोऽप्यस्य देदीप्यमानः ।
अह्न्येव प्रोज्जिहानं दिनमनु च निशां द्योतमानः प्रकाशं
तिग्मांशोर्नातिशेतां कथमिव सुमहान्**भारतीयः प्रकाशः** ॥ १०४ ॥

श्रीमद्भास्करराययज्वतिलकस्योच्चैर्यशःस्रोतसः
पात्रं दिग्वलयान्तरालमभवद्द्वैरोधसी रोदसी ।
अश्मानन्ति कुलाचला जलधयः सप्तह्रदन्त्यैन्दवं
बिम्बं कंवयतीह नूनमुडवः शबूकगुम्भन्ति च ॥ १०५ ॥

निर्यातीव पदाम्बुजान्मधुरिपोः सौतीव पद्मालयां
वेवेक्तीव पयोऽम्बुनी विहरति स्रष्टुर्मुखाब्जेष्विव ।
किंच स्मेरयतीव कैरववनीं द्विष्टे करीन्द्रानिव
क्ष्मां मूर्ध्नैव बिभर्ति कीर्तिरमला **श्रीभारतीयज्वनः** ॥ १०६ ॥

हीरति काञ्च्यां हारति चोलतटेऽन्नेषु चन्दनाम्बवति ।
कुन्दति कुन्तलदेशे कीर्तिर्**गम्भीरराय**तनयस्य ॥ १०७ ॥

कीर्त्या यस्य जगत्त्रये धवलिते सर्वे गजाः स्वर्गजाः
किंचोच्चैःश्रवसो हया नृपतयः सर्वेऽपि सीरायुधाः ।
नद्यः खःसरितोऽखिलाः फणभृतो दर्वीकराधीश्वराः
शैला हन्त हिमालया ववृतिरे सर्वे सुराः शंकराः ॥ १०८ ॥

कुमुदं वर्धयन्पद्मोल्लासी क्लेऽप्येव भास्करः ।
दुन्दुभिं ध्वनयन्नुर्व्यां प्रमोदी दिनमानशे ॥ १०९ ॥

वयसि चरमे लब्ध्वा सह्याद्रिजातटगेहितां
विदितनिखिलत्रय्यन्तार्थं चिदैक्यविभावनात् ।
महिममहति क्षेत्रे मध्यार्जुने शिवतां गतो-
ऽप्यमलवपुषा कीर्त्या जागर्ति शाश्वतिकेन सः ॥ ११० ॥

अन्येन्द्रं जगदस्थितेन्द्रमपि वा कर्तुं प्रगल्भेऽन्वये
संभूतो ननु बालकृष्णसचिवोत्तंसस्य रूपान्तरम् ।
लक्ष्म्यम्बाहृदयाम्बुधेर्हिमरुचिः प्राज्ञैः प्रशस्यामिमां
प्राणैषीत्सुमतिर्यथामति जगन्नाथाभिधानः कृतिम् ॥ १११ ॥

अब्दे प्रमोदसचिवे शब्दार्थपरिष्कृता कृता कृतिना ।
भास्करविलाससंज्ञा भायाद्भुवने कृतिश्चिरायैषा ॥ ११२ ॥

अनेन वागध्वरेण समाराद्धा कथंचन ।
दयतां देशिकात्मा मे देवी श्रीललिताम्बिका ॥ ११३ ॥

इति श्रीविश्वामित्रमहर्षिगोत्रपयोधिकैरवमित्रस्य श्रीमद्भास्करराय-
भारतीदीक्षिताग्निचिदन्तेवासिना सनाथस्य जगन्नाथस्य
कृतिर्भास्करविलासकाव्यमिदं भुवनाभोगाख्यातं
संपूर्णतामयासीत् ।



ललितासहस्रनामभाष्योदाहृतग्रन्थानां ग्रन्थप्रणेतॄणां च मातृकाक्रमेण निर्देशः ।

अग्निपुराणम् ३५,४२,८९
अग्निपुराणीयकोशः ३२,३५,३७,४२, ६०,१२१,१४४,१७२
अत्रिस्मृतिः १९३
अथर्वणब्राह्मणम् ६,१४५
अथर्वणवेदमंत्रकाण्डम् २१४
अनुत्तरत्रिंशिकाशास्त्रम् १२७
अनेकार्थध्वनिमंजरी ५९,१२९
अन्तर्यामिब्राह्मणम् ७४
अमरशेषः ३४,१०२,१७१,१८२
अमरसिंहः ३४,३६,४१,४६,५५,५८, ६०,६३,७८,९०,११७, १२०,१६२,१७०,१७६, १८८,१८९,१९१
अरुणोपनिषद् १३,५६,६२,१०२,१२६
अरुणोपनिषद्भाष्यम् ४०,६२
अष्टावक्रगीता १७३,२३१
अर्थरत्नावलिः ६९
आगमः ३९,८१
आगमिकाः ९६
आग्नेयपुराणम् ८२
आज्ञावतारः ८२
आथर्वणशौनकशाखा २२५
आथर्वणब्राह्मणम् २४
आथर्वणश्रुतिः १२५,१७०,२३१
आदित्यपुराणम् २४,१७८
आनन्दलहरी १७५
आपस्तम्बः ६४,१०१,१०२,१७७
आयुष्यसूक्तम् ६८,६९
ईशावास्योपनिषद् ९७
उणादिसूत्रम् ३८,८०
उत्तरचतुःशतीशास्त्रम् ३०,४७,२३७
ऐतरेयम् १०४,११६
कपिलसूत्रम् १९४
कर्मकांडम् २३५
कल्पसूत्रम् ५३,६०,७२,१२७, १९०,२१५,२१८
कल्याणाचार्यः ७३,७४
काठकोपनिषद् ९२,१७८
काण्वश्रुतिः १२५,१८९
कात्यायनः २४,१९६
कादिमतम् ४४,७१,१५१
कामकलाविलासः ३४,९०,१४८
कामन्दकः १०२,१६६
कामशास्त्रम् १९६
कामिकतन्त्रम् ६७,१८१,
कामिकागमः ६७,६८,१२४,१८१
कालिकापुराणम् २,२०,२४,३६,३७, ३९,७०,८२,९०,९२, ११६,१२३,१२९,१३३, १३५,१५०,१५४,१५९, १६४,१७७,१८३,१९५, २१४,२१९,२२१
कालिकोपपुराणम् ११०
कालिदासः २६,८२,८३
कालीतन्त्रम् ५३
कालीपुराणम् २१९
काशीखण्डम् २१,६०,६६,८७
किरातार्जुनीयम् १४
कुमारसंहिता ११९
कुलागमः १९०
कुलार्णवः ५३,७१,९७,१९४, २१६,२२५

कूर्मपुराणम् २०,२९,५७,६३,६५, ८१,८२,८३,८४,८८,९७, १०२,१०९,१२१,१२३, १४१,१४२,१४३,१५२, १५७,१६३,१७५,१७८, १८४,१८८,१९३,२००, २२४,२३४
कृष्णदासः ४६,७९,१३५,१५९
कौलोपनिषद् १७२
कौषीतकिब्राह्मणम् १५८
क्रोधभट्टारकः ११२
क्षेमराजः ४६
क्षेमराजवृत्तिः १५९
खंडनखंडखाद्यम् ६५
गणेशसहस्रनाम २४
गरुडपुराणम् ५९,७४,१०२
गरुडपुराणरत्नाध्यायः ३१
गायत्रीकल्पः १०९
गुरुकला १२४
गोपथब्राह्मणम् २७
गौडपादसूत्रम् ४०,४३,६७,१०९, १२२,१२६,१३३, १३४,१७०
गौडपादसूत्रभाष्यम् ४०
गौतमसूत्रम् ३५,६५,६६,१४०
घटार्गलयंत्रपटलम् ८६
चन्द्रकुलातन्त्रम् ११३
चन्द्रज्ञानतन्त्रम् ७७
चिन्तामणिस्तवः ५३
चिद्गगनचन्द्रिका ५३,१५७
चूडालोपाख्यानम् ५५
छन्दःसुधाकरः १८८
छन्दोभास्करः ३६,१३७,१६८,१७१
छन्दोविचितिभाष्यम् १९८
छलाक्षरसूत्रम् २५,५३,७०,१०८, १४३,१८७,१९८
छान्दोग्योपनिषद् ८८,१०४,१०९, १५७
जैनतन्त्रम् १०३
जैनेन्द्रव्याकरणम् ३८
जैमिनिः ७५,८४,१४३,१६४,२१९
ज्ञानार्णवः २८,३१,४७,७१,७३,७४, १०२,१११,१५७,१६८, १६९,१७६,१८०,१९१, १९२,१९४,२१३
ज्योतिःशास्त्रम् १३७,१९१,२०७
तन्त्रचिन्तामणिः १५८
तन्त्रराजः ३०,३१,४२,४६,५५,६५, ८१,१०३,११२,१२७, १७०,१७५,१९४, २०९,२१५
तन्त्रवार्तिकम् २२,२१३
तन्त्रसारम् १६८
तलवकारोपनिषद् १३६,१४२
तैत्तिरीयकम् १०४,१७९
तैत्तिरीयश्रुतिः १३२
त्रिपुरार्णवः १७६
त्रिपुरासारम् १२६
त्रिपुरासिद्धान्तः ४४,४६,४८,७४,८०, ८५,९०,९३,१००, १३७,१६७,१९२
त्रिपुरोपनिषद् १०,६२,६६,६८, ७५,२३५
त्रिशती २१,२४,५९
त्रैपुरसूक्तम् ९,१०,१९१
दक्षिणामूर्तिसंहिता ८६,१६३,१९०, १९४,२१३
दत्तात्रेयतन्त्रम् १४८
दत्तात्रेयसंहिता ३३,५५

दाल्भ्यपरिशिष्टम् २४
दुर्गभट्टः १२१
दुर्वासामुनिः ८९,११६,१४४,१७५
दूतीयागप्रकरणम् १३०
देवीपुराणम् २०,२८,३८,५५,५७,
६६,६७,६८,८८,९१,
९३,१०९,११४,११५,
११६,१२१,१२३,१२६,
१२९,१३६,१३८,१४१,
१६१,१६६,१७५,१७८,
१८९,१९२,१९४,२१८,
२२२
देवीभागवतम् ३,२१,२२,३९,५९,
६०,६१,६२,६४,६५,६६,
७१,७३,७६,८१,८२,
८३,८४,८७,९१,९४,
१०२,१०३,१०९,११३,
१२१,१२२,१३४,१३७,
१४४,१६३,१६५,२३१,
२३२,२३५
देवीमाहात्म्यम् १२२
देवीस्तवः १०९,१३७
धनुर्वेदः ४९
धौम्यः ११०,११४,१३३,२२१
नवरात्रप्रदीपः ८९,२२२
नामकल्पद्रुमः ३२
नाममाला १७९
नारदतन्त्रम् २१४
नारदपंचरात्रम् ८४,९०,
नारसिंहोपपुराणम् १६७
नित्यातन्त्रम् ९,५९,९९,१७५,
१९०,२१३,
नित्याहृदयम् ७५,१२७,१२९,
१६०,१७९
निरुक्तम् ११०
नीलातन्त्रम् २१९
नृसिंहतापिन्युपनिषद् १९२
नृसिंहप्रसादः २२२
नृसिंहपुराणम् १०६,१६७
पञ्चदशीस्तवः ७२
पञ्चपादिका ३८
पञ्चगीस्तवराजः २०२
पञ्चरात्रम् ६६,६७,९१,१०४,१९०
पञ्चशिखाचार्यः १०५
पद्मपुराणम् ४,३६,५७,६२,६४,६७,
६९,७१,८८,९०,१०७,
१०९,११३,१२१,१२३,
१३५,१३६,१३८,१५९,
१६३,१७०,१७५,१७८,
१८९,१९६,२०१,२०९
परशुरामः ५३,७२
परशुरामकल्पसूत्रम् २१०,२१५
परानन्दतन्त्रम् १४५
पराशरस्मृतिः १४२,१७७
पराशरपुराणम् २३४
पराशरोपपुराणम् २३४
पाणिनिसूत्रम् २५,२६,२८,२९,३४,
३६,३७,५५,५६,५७,६०,
६१,८५,८७,९३,९६,९८,
१००,१०७,१०८,१०९,
११०,११२,११४,११६,
११७,११८,१२३,१२४,
१२५,१२९,१३५,१३९,
१४०,१४१,१४२,१६१,
१६४,१७०,१७२,१७४,
१८१,१८२,१८७,१८८,
१९०,१९१,१९३,२१९,
२२०,२२४,२३८
पातञ्जलसूत्रम् १३७,१४०
पाद्मपुष्करखण्डम् ६४,२०१
पारिजातकारः ११०

पिङ्गलसूत्रम् २६,२७,३९,९७,१६९, १७४
पिप्पलादशाखा २१४
पुलस्त्यस्मृतिः २१७
पुष्पदन्तकृतमहिम्नस्तोत्रम् २६,६९
पूर्वचतुःशतीशास्त्रम् ३०,१३३
पैङ्गलतन्त्रम् १७१
प्रत्यभिज्ञा ४४,४९,७८,९५
प्रपंचसारम् १८,२७,९९,१२१
फेत्कारिणीतन्त्रम् २१९
बहुरूपाष्टकतन्त्रम् ४०
बहुरूपाष्टकप्रस्तारः १९०
बह्वृचोपनिषद् १४४,१८८
बृहत्तन्त्रकौमुदी १९०
बृहत्पाराशरस्मृतिः २७,८९,११३,१७८
बृहदारण्यकम् ३८,९३,१०३,११०, १३४,१४१,१४२, १६१,१६२,१६३
बृहन्नारदीयम् २०,२२,२६,५९, ६८,१०६
बृहस्पतिसवः २२७
बृहस्पतिस्मृतिः २०४
बोधसारम् ६
बौधायनः ६,२२९
ब्रह्मपुराणम् ८२,९२,१२८,१३५,१६५
ब्रह्मगीता ३७,११२
ब्रह्मवैवर्तम् ८७,८९,९७,१०६,१७७, २०४
ब्रह्मसूत्रम् ५९,१११,१४७,१७३, १७८,२२५
ब्रह्माण्डपुराणम् २९,४१,४२,४४,४६, ४८,४९,५०,६४,६९, ८५,९७,१०६,१०७, ११६,१२३,१३७, १६२,१६८,१६९, १७८,१९५,२१७,२२१, २२६,२३०,२३६,२३७
ब्रह्मोत्तरखण्डम् ३५,६९
भक्तितन्त्रम् १४९
भक्तिमीमांसाभाष्यम् २०७
भक्तिमीमांसासूत्रम् ३९,५८,२०७
भक्तिसूत्रम् ५८
भगवतीपुराणम् ११०,१६७
भगवत्पादाचार्याः २,३९,५२,६०,७९, ८३,९०,१००,१११, ११२,१२५,१७२, १९०
भगवद्गीता ५,२६,२९,५९,६१,६४, ९०,९२,१०९,१२४, १३७,१४२,१६३, १६५,१६७,१७५, १७७,१८७,२०७
भट्टोत्पलः ५९,१६५
भरद्वाजस्मृतिः १०९,११०,१४५,१४७
भविष्योत्तरपुराणम् २,५३,१९१,२०३, २२२,२२३
भागुरिः १८५
भामती १७२
भावनोपनिषद् ७१,१८६
भैरवयामलम् ३,४०,४१,१९०,२३४
भैरवयामलतन्त्रम् ४०,२३४
भोजनकुतूहलादिसूदशास्त्रम् २२४
भोजराजवृत्तिः १३२
भोजराजीयम् २२२
मत्स्यपुराणम् ३६,६२,७४,९०,१०५, १०९,१२९,१४०,१६३, २३४
मनुस्मृतिः ८७,९२,११४,१२१, १७०,२०५,२१२
मन्त्रपारायणोद्धारः २८

मन्त्रमहोदधिः १९०
मल्लारिमाहात्म्यम् ११३
महाभारतम् ६,३८,५८,६८,८०,८७, ९२,११०
महाभाष्यम् २,३४,६४,१३९,१७४, २३२
महार्थमञ्जरी ८३
महास्वच्छन्दसंग्रहः ३०
महास्वच्छन्दतन्त्रम् ५१,८८
मातृकाकोशः २४
मातृकाविवेकः १२२,१२५
माधवः ११०
मार्कण्डेयपुराणम् २९,६०,६६,६७,७०, ८६,११३,१२१,१३१,१३५, १३८,१३९,१७५,१७६,२२१
मालामन्त्रः ९
मुण्डकोपनिषद् १३२
मुहूर्तचिंतामणिः ९३
मृगेन्द्रसंहिता ८१,९६,१०४
मेदिनीकोशः ६६,१३२
मैरालतन्त्रम् ६९,१७३,२१४
मोक्षधर्मः ८०
यज्ञवैभवखण्डम् २६,३८,६१,७४, १००,१२५,१३९, १४०,१४२,१९५
याज्ञवल्क्यस्मृतिः २२,७५,१२९,१३१, १४३
यादवकोशः ७०,९०,१०६,२३९
यास्कः (निरुक्तम्) १०९,१६२,१७०
योगवासिष्ठम् ३०,४२,४७,५५,५७, ६१,७०,७२,७९,९८, १३५,१२०,१२५,१३९, १७४,१८९,१९५,२२५
योगशास्त्रम् (पातञ्जलम्) ४५,६०, ६८,९१,१००,१३२,१४५
योगसूत्रम् ५९,६४,६५,७४,७९, ११४,१२४,१३४,१७९,
योगसूत्रभाष्यम् १५०
योगिनीहृदयम् २८,५१,५८,१४८, १६९,१७२
रत्नकोशः ९३
रत्नत्रयपरीक्षा ८२१
रभसकोशः ८२,९३,१३४,२३९
रसरत्नसमुच्चयः १८
रहस्यागमः ९९
राघवपाण्डवीयम् १४
राजमार्तण्डः ५९,१२४
रामायणम् १५,१७०
रुद्रयामलम् ४,११,१४,१५,४०,१४१, १८६,२३५
रेणुकापुराणकम् २९,११०
लक्ष्मीतन्त्रम् ६६,६७,९१
लघुनारदीयपुराणम् १२३
लघुस्तवः ९३,१३३,१६१
ललितास्तवरत्नम् ३९,४०,११२,१२२
ललितोपाख्यानम् ४४,४५,४९,७२, १९७
लक्षः सुभगोदयटीका ७७
लिङ्गपुराणम् ३८,५७,६०,६३,६७,६८, ६९,७४,८१,८६,८९,९२,९४, ९७,१०५,१०६,११५,११८, १२१,१२४,१३१,१३५,१४०, १६४,१६७,१७४,१७६,१७७, २०३,२१४,२१५
वातुलशुद्धतत्त्वभेदपटलम् २३३
वरदराजः ४४,११८
वररुचिः २,५७,८५
वरिवस्यारहस्यम् ५,७५,१७१
वसिष्ठतन्त्रम् ५७
वसिष्ठसंहिता ११३
वसिष्ठस्मृतिः ६४

वाजसनेयश्रुतिः ४२,९२
वातुलशुद्धतन्त्रम् २३५
वामकेश्वरतन्त्रम् २१,३०,५६,७२,
१३४,१३९,२१३
वामनपुराणम् ११४,१२३,१६६,१९३
वायवीयसंहिता ६०,८०,१३८
वायुपुराणम् ३८,५७,५९,६०,६९,८७,
९२,१०३,११०,११३,
११५,१२१,१२८,१३०,
१३६,१७४,१७६,१८१,
१९४,१९५,२०५
वाराहपुराणम् १५,९१,११३,११४,
११५,११७,१३३,
१३६,१३८,१४५,
१६६,१८५
वाराहीतन्त्रम् २१५
वार्तिककारः (कात्यायनः) ८,२५,६१,
७५,१६५,२२६
वार्तिककारः (शिवसूत्रम्) ७९,२२६
वासनापटलम् १३६,१५९
वासनासुभगोदयः ७६
विज्ञानभैरवभट्टारकः ६२
विष्णुधर्मोत्तरम् २१
विद्यारत्नम् १०९
विद्यारत्नभाष्यम् ४०,१७१
विरूपाक्षपञ्चाशिका ८०,१९४,१९६
विवरणाचार्यः १३९
विश्वकर्मशास्त्रम् १६,९३
विश्वकोशः २,४०,५३,५४,५५,६३,
६६,७०,८१,८६,९८,
११२,११४,१२८,१२९,
१३४,१४२,१४३,१५८,
१६९,१६१,१६३,१६८,
१७०,१७१,१८०,१८५,
१८७
विश्वप्रकाशकोशः ८०,१३१,१३८
विश्वरूपाचार्यः २२२
विष्णुधर्मोत्तरम् २०,२१,२२,२३
विष्णुपुराणम् २२,५८,६६,६९,७०,
७६,७९,८६,८९,९१,
१०४,१०८,१०९,
११५,१२६,१२८,
१३१,१३५,१६२,
१६३,१६४,१६६,
१७१,१८२,१९१,
१९४,२३४
विष्णुभागवतम् १७,२६,५९,६२,८०,
१०५,१३४,१३६,
१४०,१४२,१४४,
१६५,१६६,१७१,
२३२,२३३,२३४
विष्णुरहस्यम् १९१
विष्णुसहस्रनाम १११,१९७,१९९
विष्णुसहस्रभाष्यम् १११
विष्णुस्मृतिः ९२
वृत्तिकारः १३१
वेदभाष्यम् १००,१५६
वैदिकनिघण्टुः १२१
व्याडिकोशः २७
व्यासः ११०
व्याससूत्रम् १६४,१९४
व्रतखण्डम् ११२,१६०,२२३
विज्ञानभैरवभट्टारकः १७१
शक्तिरहस्यम् ६५,९३,१०३,१२८,
१३३,२२२,२३२,
२३४,२३७
शक्तिशास्त्रम् ५१,९६
शक्तिसूत्रम् २९,४७,४८,४९,१३७
शक्तिसूत्रभाष्यम् २९,४७
शब्दार्णवः १९६
शंकरारण्यः १७९

शाकुन्तलम् १७२
शाट्यायनः २४
शाण्डिल्यसूत्रम् ६४,११४
शाबरचिन्तामणिः ११५,२१५
शांभवानन्दकल्पलता १५१
शारदातिलकम् ९५,१६८
शारीरकभाष्यम् ४१
शार्ङ्गधरीयकथाकोशः ७२
शाश्वतकोशः ७१,१०६,१६६
शिवधर्मोत्तरम् १९२
शिवपुराणम् ५९,६९,७३,११५,१२६, १३१,१६७,१७५,१७८
शिवरहस्यम् ८०,८४,९५,१२४,२३२
शिवसूत्राणि १२,४३,४४,४५,७८,९६, १३२,१३६,१६२,१६५, १७३,१८४,१८६,१८७, २३१,२३२
शिवसूत्रवार्तिकम् ४३,४४,४५,
शिवसूत्रविमर्शिनी ४४
शिवसूत्रव्याख्या ४४,४५,४९ ४८,१६५
शिवस्तवः ५९,८५,८७,२३१,२३२
शिवस्तुतिः १७५
शिवाष्टोत्तरशतव्याख्या ३८
शुकसंहिता ५७,११३
शैवतन्त्रम् ७६,१२२,१२६,२२६
शैवशास्त्रम् ४५,५१,९६
शैवाः १०५
शैवागमः ३८,११३,१६७
श्यामलारहस्यम् २१२
श्यामलासहस्रनाम ५६
श्यामारहस्यम् २१३
श्रीकण्ठभाष्यम् २११
श्रीधरीयलक्ष्मीपीठिका ७२
श्वेताश्वतरोपनिषद् १३७
संकेतपद्धतिः २८
संक्षेपशारीरकम् १०९
संवर्तस्मृतिः ७५,१७७
सनत्कुमारतन्त्रम् ५६
सनत्कुमारसंहिता १२५,१७८
सनन्दनसंहिता १२५
समयाचारस्मृतिः १४१,१४२
समाससूत्रम् ८६,१०५,११४
सहस्रभोजनखण्डम् २२७
सामब्राह्मणम् १२१
सांख्यतत्त्वकौमुदी ६३
सांख्यतन्त्रम् ८६
सांख्यप्रवचनसूत्रम् १२९
सांख्यसप्ततिः १०४,११४
सिद्धांतकौमुदी १९९
सुप्रभेदः २०
सुन्दरीतापिनीयम् ६७,१२८
सुभगार्चापारिजातः १६९
सुभगोदयटीका ७७
सूतगीता १२४,१९०,२३४
सूतसंहिता ६१,८९,१०३,१२३,१३५, १३६,१६१,१६६,१६८,१७४, १८६,२२६,२३३,२३४
सूत्रम् ६२,६७,६८
सेतुबन्धः ६१,७५
सौन्दर्यलहरी १०,१३,३९,७१, १२९,१४९
सौन्दर्यलहरीव्याख्यान २८
सौभाग्यरत्नाकरः ६९,२२१
सौभाग्यसुधोदयम् १००,१२२
सौरपुराणम् १७५,
सौरसंहिता २१,८४,९४,९५,१०७, १४५,१९५
स्कन्दपुराणम् २३,३९,७१,८६,१३६, १४०,१४३,१५८, १८६,१९५

स्पन्दशास्त्रम्	४६,७८	हरिवंशः	२३,८०.८६,१२२,१३८, १६४,१८४
स्वच्छन्दतन्त्रम्	१४,४०,९२,९५, ११७,१८०	हर्षदीक्षितः	१६८
संक्षेपशारीरकाचार्याः	२९,१०९	हलायुधकोशः	१६९
स्वच्छन्दसंग्रहः	५३,६८,९६,१५७	हारीतस्मृतिः	१६९
स्वतन्त्रतन्त्रम्	२९,४०,४३,८८	हिरण्यकेशिसूत्रम्	२०१
हनुमुण्ठपीठमाहात्म्यम्	२१३	हेमकोशः	१८
हंसोपनिषद्	१३५	हेमचन्द्रः	१३४

इति ललितासहस्रनामभाष्योदाहृतग्रन्थानां
ग्रन्थप्रणेतृणां च निर्देशः।

श्रीः ।

ललितासहस्रनाम ।

भास्करायप्रणीतसौभाग्यभास्करभाष्योपेतम् ।

उपोद्घाताख्या प्रथमा कला ।

श्रीललिताम्बायै नमः ।

श्रीगम्भीरविपश्चितः पितुरभूद्यः कोनमाम्बोदरे
विद्याष्टादशकस्य मर्मभिदभूद्यः श्रीनृसिंहाद्गुरोः ।
यश्च श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभव-
त्स त्रेता त्रिपुरा त्रयीति मनुते तामेव नाथत्रयीम् ॥ १ ॥

गुरुचरणसनाथो भासुरानन्दनाथो विवृतिमतिरहस्यां वीरवृन्दैर्नमस्याम् ।
रचयति ललिताया नामसाहस्रिकाया गुरुकृतपरिभाषाः संविवृण्वन्नशेषाः ॥ २ ॥

अष्टाभिर्वाग्भायानामधिपतिभिरमोघोक्तिभिर्देवताभि-
र्मात्राज्ञप्ताभिरभ्यं यदरचि ललिता दिव्यनाम्नां सहस्रम् ।
यद्ब्रह्माणीरमेशप्रभृतिदिविषदां विस्मयाधानदक्षं
तत्रैकस्यापि नाम्नः कथमिव विवृतिं मादृशः कर्तुमीष्टे ॥ ३ ॥
तथापि श्रीमात्रा दहरकुहरे सूत्रधरया
समादिष्टा वाचामधिपतिषु काप्यन्यतमिका ।
मदीड्यश्रीनाथत्रयचरणनिर्णेजनजलैः
पवित्रे जिह्वाग्रे नटति ममता सा मम मता ॥ ४ ॥
आ प्राचः कामरूपाद्धुहिणसुतनदप्लाविताद्या प्रतीचो
गान्धारात्सिन्धुसार्द्राद्रघुवररचिताद्या च सेतोरवाचः ।
आ केदारादुदीचस्तुहिनगहनतः सन्ति विद्वत्समाजा
ये ये तानेष यत्नः सुखयतु समजान्कश्चमत्कर्तुमीष्टे ॥ ५ ॥

इह खलु निखिलपुरुषार्थसाधने भगवत्याराधनेऽभ्यर्हिततमस्य रहस्यनामसहस्र-
कीर्तनस्य रहस्यतरसद्गुरुसंप्रदायैकवेद्यस्वरूपत्वेन तान्संप्रदायान् शिष्यानुजिघृक्षय

त्रिपुरां कुलनिधिमीडेऽरुणश्रियं कामराजविद्धाङ्गीम् ।
त्रिगुणैर्देवैर्निनुतामेकान्तां विन्दुगां महारम्भाम् ॥ १ ॥

दिदर्शयिषवः श्रीमन्नृसिंहानन्दनाथनामानोऽस्मद्गुरुचरणाः निरन्तरनिरन्तराया अपि शिष्यशिक्षायै मङ्गलमाचरन्ति—**त्रिपुरेति** । त्र्यात्मकं पुरं भूपुरं मण्डलकोण-रेखामन्त्रादिसमूहो वा यस्याः सा त्रिपुरा । तदुक्तं कालिकापुराणे-'त्रिकोणं मण्डलं चास्या भूपुरं च त्रिरेखकम् । मन्त्रोऽपि त्र्यक्षरः प्रोक्तस्तथा रूपत्रयं पुनः ॥ त्रिविधा कुण्डलीशक्तिस्त्रिदेवानां च सृष्टये । सर्वं त्रयं त्रयं यस्मात्तस्मात्तु त्रिपुरा मते'ति । कुलस्य सजातीयसमूहस्य निधिं मातृमानमेयरूपत्रिपुट्या एकज्ञानविषय-त्वेन साजात्यात्, घटमहं जानामीत्येव ज्ञानाकारात् 'जानामीति तमेव भान्तमनु भात्येतत्सनस्तं जग'दिति श्रीमदाचार्यभगवत्पादोक्तेः, तदेव हि कुलम् । 'सजातीयैः कुलं यूथ'मिति कोशात् । परमशिवादिस्वगुरुपर्यन्तो वंशो वा कुलम् । 'संख्या वंश्येने'ति पाणिनिसूत्रे 'वंशो द्विधा विद्यया जन्मना चे'ति महाभाष्यात् । आचारो वा कुलम् । 'न कुलं कुलमित्याहुराचारः कुलमुच्यते । आचाररहितो राज-न्नेह नामुत्र नन्दती'ति भविष्योत्तरपुराणात् । सुषुम्नामार्गो वा कुलम् । कुः पृथि-वीतत्त्वं लीयते यस्मिंस्तदाधारचक्रं तस्य शक्तयस्य संबन्धात् । अरुणा रक्ता श्रीः कान्तिर्यस्यास्ताम् । कामराजेन कामेश्वराख्यपरमशिवेन विद्धं सामरस्यापन्नं अङ्गं यस्याः । त्रिगुणैः सत्त्वरजस्तमोमयैर्देवैर्विष्णुब्रह्मरुद्रैः नितरां नुतां स्तुताम् । एकान्तां रहोदेवतां, एकां मुख्यां तां प्रसिद्धां वा । अश्वासाविश्वेति कर्मधारये शिवकाम इत्य-र्थात्तत्सुन्दरीं वा । 'अकारो ब्रह्मविष्ण्वीशकमठेध्व'ति विश्वः । 'इकारो मन्मथः प्रोक्त' इत्यनेकार्थध्वनिमञ्जरी च । बिन्दुं सर्वानन्दमयं चक्रं गच्छतीति तथा । महान्ब्रह्माण्डादिरूप आरम्भो यस्यास्तामीडे स्तौमीत्यर्थः । **अथात्रैवं नामोद्धारः प्रदर्श्यते**—त्रिपुरेत्यत्र पकार एकसंख्याया वाचको **रेफस्तु** द्वित्वसंख्यायाः । यदाह वररुचिः—'कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैररङ्काः ॥ नेजे शून्यं ज्ञेयं तथा स्वरे केवले कथिते'ति । पिण्डान्त्यैरित्यस्य व्यञ्जनसमूहे चरम एव सांकेतिक इत्यर्थः । 'अङ्कानां वामतो गति'रिति न्यायात्पुरेत्यनेनैकविंशतिसंख्या कथिता भवति । एवमुत्तरत्रापि । तेन त्रि इत्याकारकपदारब्धानि नामानि त्रिनयनेत्यारभ्य त्रिकोण-गेत्यन्तान्येकविंशतिरेवेत्यर्थः । निधयो नव 'नव ग्रहद्वारनिधिप्रजेशा' इति छान्द-सीयवचनात् । कुलपदारब्धानि नामानि नव कुलामृतैकरसिकेत्यारभ्य कुलरू-पिणीत्यन्तानि । अरुणाः सूर्या द्वादश श्रीपदारब्धानि श्रीमातेत्यारभ्य श्रीशिवेत्य-न्तानि । कामपदारब्धानि राजसंख्याकानि षोडश कामेशबद्धमाङ्गल्येत्यारभ्य कामकेलितरङ्गितेत्यन्तानि । विद्याङ्गी विद्यत्यक्षरारब्धान्येकोनचत्वारिंशत् विशुक्रप्राणां हरगेत्यारभ्य विरागिणीत्यन्तानि । त्रिगुणैर्गुणनिधिर्गुणप्रिया गुणातीतेति त्रीणि । निनुतां निकारारब्धानि षष्टिः निजारुणेत्यारभ्य निरालम्बान्तानि । एकान्त-ताम्बूलपूरितमुखीत्येकं नाम । बिन्दुगां बिन्दुमण्डलवासिनी बैन्दवासना बिन्दुतर्पण-

ललितानामसहस्रे छलार्णसूत्रानुयायिन्यः ।
परिभाषा भाष्यन्ते संक्षेपात्कौलिकप्रमोदाय ॥ २ ॥
पञ्चाशदेक आदौ नामसु सार्धद्व्यशीतिशतम् ।
षडशीतिः सार्धान्ते सर्वे विंशतिशतत्रयं श्लोकाः ॥ ३ ॥
दशभूः सार्धनृपाला अध्युष्टं सार्धनवषडध्युष्टम् ।
मुनिसूतहयाम्बाश्वाम्बाश्वोक्तिर्ध्यानमेकेन ॥ ४ ॥

अगस्त्य उवाच ।

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥ १ ॥

संतुष्टेति त्रीणि । महारम्भां महापदारब्धानि द्विचत्वारिंशत् महालावण्येत्यारभ्य महेश्यन्तानि ॥ १ ॥ छलाक्षरनामसूत्रेभ्यो नामविभागादेर्विलम्बेन क्लिष्टतया ज्ञायमानत्वात्तत्रत्या एव परिभाषाः सुलभोपायेन सुबोधा इति विद्योपासकानां तोषाय कथ्यन्त इत्यर्थः । छलाक्षरसूत्राणां विलम्बितार्थबोधजनकत्वं तत्रतत्र प्रकटीकरिष्यामः ॥ २ ॥ आदौ प्रथमभागे पञ्चाशदेकश्च । एकपञ्चाशच्छ्लोका इत्यर्थः । वक्ष्यमाणस्य सहस्रभोजनप्रयोगस्य बहुदिनक्रियमाणत्वपक्षे प्रथमदिन एकपञ्चाशच्छ्लोकपाठः । ध्यानश्लोकस्तु प्रत्यहं पठनीय इति वैपम्यध्वननाय विभज्य कथनम् । नामसु विषये द्व्यशीत्युत्तरं शतमर्धश्लोकश्च अन्ते फलश्रुत्यादिप्रकरणे । संहत्य तु त्रीणि शतानि विंशतिश्च श्लोका इत्यर्थः ॥ ३ ॥ अथ प्रथमभागं विभज्य दर्शयति—भूः एकः । नृपालाः षोडश । अध्युष्टं सार्धत्रयम् । मुनिरगस्त्यः । हयाश्वपदानि हयग्रीवपराणि । दशश्लोका अगस्त्योक्तिरूपा इत्यादिरीत्या यथाक्रममन्वयः । अगस्त्याख्यो हि महामुनिः श्रीविद्योपासकाग्रेसरस्तत्रभगवतो हयग्रीवस्य देशिकेन्द्रस्य मुखाद्ब्रह्माण्डपुराणीयैर्मन्त्रन्यासपूजापुरश्चरणहोमरहस्यस्तोत्राख्यैः सप्तभिः खण्डैः श्रीमातुः प्रादुर्भावादिरहस्यजातमाकर्ण्य इतोऽपि परमरहस्यं नामसहस्रमस्तीति तपोबलादेव निश्चित्य तद्भक्तायापि मह्यं किमिति गुरुभिर्न दत्तमित्यनुपदेशनिमित्तांशे सन्दिहानः पृच्छतीत्याह भगवान् सूतः ॥ ४ ॥ न गच्छतीत्यगः पर्वतस्तं विन्ध्यनामानं स्त्यायतीत्यगस्त्यः । स्त्यानं स्तम्भनम् । साच कथा काशीखण्डे द्रष्टव्या । असङ्गतत्वापनोदाय पूर्वकथाप्रसङ्गं सामान्येन स्मारयति—**अश्वेति** । देवीभागवते प्रथमस्कन्धे तावदिय कथा स्मर्यते । पुरा किल भगवान् विष्णुर्यज्ञसंरक्षणादिघनतरकार्यार्थं कृतबहुजागरः श्रान्तः शार्ङ्गधनुषः कोटिं ग्रीवयावलम्ब्य निद्राणोऽभूत् । तदा ब्रह्मरुद्रादयः कार्यविशेषसिषाधयिषया तज्जागरणाय वह्निनामकक्रिमिभ्यो यज्ञभागमिच्छद्भ्यो दत्त्वा तन्मुखात्प्रत्यक्षामत्रोटयन् । तेन कोटेरुच्चलनाच्छिरोऽत्युड्डीनं क्वापि गतमभूत् । ततः शोकाविष्टाः सुरास्तच्छीर्षमलभमानास्त्रिपुरसुन्दरीं तुष्टुवुः । सा तुष्टा सती हयशिरोयोजनेनैनं जीवयतेत्याज्ञाप्य भगवत्यन्तरधत्त । ततस्तथा

पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितः ॥ २ ॥
वर्णितं श्रीपुरं चापि महाविभवविस्तरम् ।
श्रीमत्पञ्चदशाक्षर्या महिमा वर्णितस्तथा ॥ ३ ॥

जीवितो विष्णुर्हयग्रीवो भूत्वा हयग्रीवाख्यं दैत्यं हतवान् । रहस्यजातमखिलं देवीमुखादेव लब्धवानित्यादि । सोऽयमश्वाननो विष्णुरेव । तदिदं विशेष्यमुक्तवृत्तान्तस्मारणेन देव्यनुगृहीतत्वाभिप्रायगर्भम् । अतएव महाबुद्धे इत्यादिविशेषणद्वयं न स्तुतिमात्रम् । ललितेति । पद्मपुराणे हि 'लोकानतीत्य ललते ललिता तेन चोच्यत' इति निर्वचनश्लोके चकारादन्यदपि संभवन्निर्वचनमनुमतम् । पराशक्तिसदाशिवादिरूपाणि शक्तिशिवयोरुत्तरोत्तरापकर्षवन्ति बहूनि सन्ति । तेषां च लोका अपि बहुविधाः । परशिवाभिन्नमहाशक्तिस्तु सर्वलोकातीता महाकैलासपराजितादिपदवाच्ये सर्वलोकोत्तमे लोके तिष्ठति । तस्याश्च शरीरं घनीभूतघृतवद्रजस्तमःसंपर्कशून्यशुद्धसत्त्वघनीभावरूपम् । अन्यासां शिवशक्तीनां कतिपयानां सात्त्विकशरीराण्यपि सत्त्वाधिक्यगुणान्तराल्पत्वयुक्तानि न पुनः शुद्धसत्त्वानि । अतः सर्वोत्तमैषा परब्रह्ममूर्तिः । अस्या अपि सन्ति रहस्यभूता बहवो भेदास्तेषु कामेश्वर्यात्मकमूर्तिरेवेह ग्रन्थे प्रतिपाद्येति ललितापदेन सूचितम् । ललितं शृङ्गारहावजन्यः क्रियाविशेषः तद्वती ललिता । तेन शृङ्गाररसप्रधानेयं मूर्तिरिति सूचितम् । सैव देवी क्रीडाविजिगीषादिशीलत्वात् । तस्याश्चरितं प्रादुर्भावादिस्तोत्रसमुदायान्तं कथितं भवतेति शेषः । परमाद्भुतं अत्युत्तमत्वात्पूर्वमश्रुतचरत्वादनुपमत्वाच्चेत्यर्थः ॥ १ ॥ अथैतदेव विशिनष्टि सप्तभिः **पूर्वमित्या**दिभिः । प्रादुर्भावः । 'असद्वा इदमग्र आसीत्', 'सदेव सोम्येदमग्र आसीत्', 'नाऽसदासीन्नो सदासीदि'त्यादिश्रुत्येकवाक्यतया निर्णीतस्य सृष्टिप्राक्कालिकस्य निर्विशेषचिन्मात्रस्य प्राथमिकः कामकलारूपपरिणामो गुरुमुखैकवेद्यः । स च पूर्वं इतः प्राक्, पट्टाभिषेकादिभ्यः प्रथमं वा । त्वयोदित इति सर्वत्रान्वेति । अग्निकुण्डात्समुद्भवरूपो वाऽवतारविशेषात्मा प्रादुर्भावः । पट्टं सकलभुवनसाम्राज्याधिकारस्तस्य विषयेऽभिषेचनं स्वायत्तीकरणेतिकर्तव्यतारूपोऽङ्गविशेषः । उदितमिति तु नपुंसकत्वेन परिणमनीयम् । भण्डाख्योऽसुरो ललितोपाख्याने यो विस्तरेण वर्णितस्तस्य वधो युद्धे हननं विस्तरेण बहुना शब्दराशिना । 'प्रथनेवावशब्दे' इति पर्युदासाच्छब्दभिन्न एव विस्तार इति रूपम् ॥ २ ॥ निरुपपदस्य पुरपदस्य प्रवृत्तिनिमित्तभूतधर्माणां पौष्कल्याद्देव्याः पुरमेव मुख्यं पुरपदवाच्यम् 'अभियुक्तानां नाम श्रीपदपूर्वं प्रयुञ्जीते'ति वचनाच्छ्रीकारपूर्वकमिह प्रयुक्तम् । तच्च रुद्रयामले 'अनन्तकोटिब्रह्माण्डकोटीनां बहिरूर्ध्वतः' इत्यादिना पञ्चविंशतिप्राकारैरनन्तयोजनविस्तृतैः परिवेष्टितत्वेन वर्णितमेकम् । मेरोरुपरि तत्समानयोगक्षेमं संक्षिप्तं ललितास्तवरत्ने भगवता दुर्वाससा देशिकेन्द्रेण वर्णितमपरम् । क्षीरसमुद्रमध्ये तृतीयमिति तु विद्यारत्नभाष्यकाराः । महाविभवविषयकः श-

षोढान्यासादयो न्यासा न्यासखण्डे समीरिताः ॥ ४ ॥
अन्तर्यागक्रमश्चैव वहिर्यागक्रमस्तथा ।
महायागक्रमश्चैव पूजाखण्डे प्रकीर्तितः ॥ ५ ॥
पुरश्चरणखण्डे तु जपलक्षणमीरितम् ।
होमखण्डे त्वया प्रोक्तो होमद्रव्यविधिक्रमः ॥ ६ ॥
चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ।
रहस्यखण्डे तादात्म्यं परस्परमुदीरितम् ॥
स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥ ७ ॥
मन्त्रिणीदण्डिनीदेव्योः प्रोक्ते नामसहस्रके ।

व्दराशिर्यत्रेति तु वर्णनक्रियाया विशेषणम् । श्रीबीजयुक्ता या पञ्चदशाक्षरी पञ्चदशानां स्वराणां समाहारः कादिविद्या हादिविद्या वा तस्याः । तस्यां श्रीबीजयोगस्तु 'चत्वार ईं बिभ्रति क्षेमयन्तः' इति श्रुतिसिद्धो रहस्यतरः सांप्रदायिकैकवेद्योऽस्तीति कश्चित् । तत्तन्त्रेषु क्वाप्यदर्शनात्प्रामाणिका न मन्यन्ते । उक्तश्रुतिस्तु 'कामराजाख्यमन्त्रान्ते श्रीबीजेन समन्विता । षोडशाक्षरविद्येयं श्रीविद्येति प्रकीर्तिते'ति हयग्रीवोद्धृतमन्त्रान्तरपरेत्यप्याहुः । तेन श्रीशब्दः शोभादिपरः । वक्ष्यमाणव्याडिकोशेन बह्वर्थत्वावगमात् ॥ ३ ॥ **षोढेति** । गणेशग्रहनक्षत्रयोगिनीराशिपीठाख्यन्यासषट्कजन्यावान्तरापूर्वषड्भिकपरमापूर्वसाधनीभूतो न्यासः षोढा न्यास उच्यते । सच भूषणमालिन्यादिभेदादनेकविधः । आदिना चक्रन्यासादिपरिग्रहः । न्यासखण्डे समस्तन्यासैकप्रतिपादके ग्रन्थशकले । न्यासो नाम तत्तद्देवतानां तत्तदवयवेष्ववस्थापनम् । अवस्थितत्वेन भावनेति यावत् ॥ ४ ॥ **अन्तरिति** । अन्तर्यागो नामाधाराद्राजदन्तान्तं तेजस्तन्तोर्विभावनम्, मानसी देवपूजा वा तस्य क्रम इतिकर्तव्यता । बहिर्यागः पात्रासादनादिशान्तिस्तवान्तः कर्मसमूहः । सएवाष्टष्टकादिघटितो महायागः । एते चास्माभिर्वैरिवस्याप्रकाशे पूजाप्रकरण एव निरूपिताः ॥ ५ ॥ **पुरश्चरणेति** । पुरः मन्त्रोपास्तेरादौ दीक्षोत्तरकालं चरणं परिचर्या । जपस्य लक्षणमवस्थापञ्चकशून्यषट्कविपुवत्सप्तकचक्रनवकविभावनादिरूपं चिह्नम् । तच्चास्माभिर्वैरिवस्यारहस्ये प्रथमेंश एवोक्तम् । **होमेति** । होमानां तद्द्रव्याणां च तद्विधीनां द्रव्यपरिमाणादिरूपाणां च क्रमः शब्दमध्ये पादविक्षेपः । निबन्धनमिति यावत् ॥ ६ ॥ चक्रराजस्येति टच्प्रत्ययान्तम् । बिन्दुादिनवचक्रात्मकस्येति तदर्थः । विद्यायाः पञ्चदश्याः षोडश्या वा । श्रीदेव्याः त्रिपुरसुन्दर्याः । देशिकात्मनोः गुरुशिष्ययोः तादात्म्यं तत् ब्रह्मैव आत्मा स्वरूपं यस्य तत्तदात्म 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति वचनात् । तस्य भाव इत्यर्थे ब्राह्मणादित्वात्ष्यञ् । सर्वेषामेकब्रह्मरूपता । अभेद इति यावत् । मन्त्रस्य निगमार्थवर्णनावसरे वरिवस्यारहस्येऽस्माभिरुक्तोऽस्य प्रकारः । **स्तोत्रेति** । बहु-

नतु श्रीललितादेव्याः प्रोक्तं नामसहस्रकम् ॥ ८ ॥
तत्र मे संशयो जातो हयग्रीव दयानिधे ।
किंवा त्वया विस्मृतं तज्ज्ञात्वा वा समुपेक्षितम् ॥ ९ ॥
मम वा योग्यता नास्ति श्रोतुं नामसहस्रकम् ।
किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥ १० ॥

विधाः पञ्चमीस्तवराजादिरूपाः ॥ ७ ॥ मन्त्रिणी **मन्त्रो राजाधिकारोपयोगिनी** मननक्रिया साऽस्यास्तीत्यर्थे इनिः । नान्तत्वान्ङीप् । अमाल्येत्यर्थः । सा तत्रेषु राजश्यामलेत्युच्यते । सा च तत्रेषु वाराहीति प्रसिद्धा, ते च ते देव्यौ च तयोः ॥ ८ ॥ **तत्रेति** । तत्र अनुक्तौ धर्मीभूतायाम् । ललितासहस्रनामोक्तयभावविशेष्यकः संशय इत्यर्थः । स च चतुष्कोटिक इत्याह—**किंवेत्यादिना सार्धेन** । विस्मृति-प्रयुक्तत्वमेकः प्रकारः । सर्वज्ञस्य विस्मरणासंभवात्प्रकारान्तरमाह—**ज्ञात्वा वेति** । उपेक्षा इष्टानिष्टोभयविषयकप्रवृत्तिनिवृत्त्यौदासीन्येनावस्थानम् ॥ ९ ॥ मित्रशत्रुभृत्योदासीनभेदेन चतुर्विधेषु जीवेषु भृत्यकोटिप्रविष्टस्य शिष्यस्योदासीनत्वायोगो भक्तिजिज्ञासितार्थोपेक्षायां देशिकेन्द्रस्य कृपालुत्वहानिश्चेत्यतस्तृतीयं प्रकारमाह—**मम वेति** । नास्तीत्यनेन सामयिकाभाव उक्तो नात्यन्ताभावः । तथात्वे चतुर्थकोटेरुत्थानायोगात् । अनधिकारिणं प्रत्यनुक्तेर्मृल्यत्वविघटकतायाः कृपालुत्वविघटकत्वस्य च योगादिति भावः । तदुक्तं बोधसारे—'तत्तद्विवेकवैराग्ययुक्तवेदान्तयुक्तिभिः । श्रीगुरुः प्रापयत्येव नपद्मपमपद्मताम् । प्रापय्य पद्मतामेनं प्रबोधयति तत्क्षणात् । तस्मात्सर्वप्रयत्नेन सेव्यः श्रीगुरुभास्करः' इत्युक्तम् । तत्र नपद्ममित्येकं पदं । नकारेणायं समासः । अयोग्येपि योग्यतामापाद्य श्रीगुरुसूर्यो बोधयतीति समुदायार्थः । अतो योग्यतामपि **गुरुर्दद्यादेवेत्याशयेन** कोटित्रयं स्वयमेव निरस्य का पुनश्चतुर्थी कोटिरित्यनवधार्य **पृच्छति—किमर्थमिति** । भवत्कर्तृकोक्तयभावः किंप्रयुक्त इत्यर्थः । कारणं चतुर्थीं कोटिं । इतरकोटीनां स्वेनैव निरस्तत्वादिति भावः ॥ १० ॥ अथैकश्लोकः सूतोक्तिरूपः । भारते 'नापृष्टः कस्यचिद्ब्रूयादिति वेदानुशासनमि'ति निषेधात्पृच्छकाय किमपि न वक्तव्यम् । यत्तु 'अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभव' मिति तदुत्तरार्धं **तदपि श्रद्धालुप्रश्नासमर्थ**शिष्यपरम् । श्रद्धाभावे हानिस्मरणात् । यदाह **बोधायनः—'अश्रद्धा परमः** पाप्मा श्रद्धा हि परमं तपः । तस्मादश्रद्धया दत्तं हविर्नाश्नन्ति देवताः । इष्ट्वा दत्त्वापि वा मूर्खः स्वर्गं नहि स गच्छति । शङ्काविहितचारित्रो यः स्वाभिप्रायमाश्रितः । शास्त्रातिगः स्मृतो मूर्खो धर्मतन्त्रोपरोधनादि'ति । **श्रुतिरपि 'श्रद्धयाग्निः** समिध्यते श्रद्धया हूयते हवि'रित्यादि । ततश्च श्रद्धाभावे **पृच्छकायापि न वक्तव्यं किमुतापृच्छकाय** । तत्सत्त्वे तु यदि शिष्यः प्रश्ने न **समर्थः तदा प्रश्नमप्रतीक्ष्यैव गुरुर्वदेदिति स्थितिः । प्रकृते त्वगस्त्यः श्रद्धालुः प्रश्ने समर्थश्च अथापि किमिति न पृच्छतीति चिन्तयानो नापृष्ट इति निषेधाद्भीतो देशिकसार्वभौमो भगवान् हय-**

सूत उवाच ।

इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।
प्रहृष्टो वचनं प्राह तापसं कुम्भसंभवम् ॥ ११ ॥
लोपामुद्रापतेऽगस्त्य सावधानमनाः शृणु ।
नाम्नां सहस्रं यन्नोक्तं कारणं तद्वदामि ते ॥ १२ ॥

ग्रीवः शिष्यकृतशुश्रूषया वशीकृतो विवक्षुरपि भक्तिपूर्वकप्रश्नाभावकृतविलम्बादियन्तं कालं दुःखित इवाभूत् । अधुना तु न तथेत्याह सूतः—**इति पृष्ट इति ।** चतुर्थकोटिविषयकप्रश्नकर्मीभूत इत्यर्थः । प्रच्छधातोर्द्विकर्मकतया कोटिवद्गुरोरपि कर्मत्वात् । प्रहृष्टः विलम्बापगमादिति शेषः । तपोभिर्यज्ञादिति पापक्षये सत्यङ्गुरितविविदिषाकत्वादस्ति श्रद्धेति योग्यतां प्रदर्शयति—**तापसमिति ।** चित्तवृत्तिनिरोधकारणीभूतवायुवृत्तिनिरोधशीलत्वादपि योग्यतामाह—**कुम्भसंभवमिति ।** कुम्भस्य कुम्भकस्य सम्यक् चिरकालं भवः स्थितिर्यस्मिंस्तमित्यर्थः । रेचकपूरकयोः सार्वजनीनतया सुलभत्वान्निरोधपदवाच्यत्वाभावाच्च तत्परित्यागेन कुम्भकस्यैव ग्रहणम् ॥ ११ ॥ अथ सार्धैः षोडशभिः श्लोकैर्हयग्रीवोक्तिः । पूर्वश्लोक एव हयग्रीवः प्राहेत्युक्तत्वान्नैतदारम्भे हयग्रीव उवाचेत्युक्तिः । एवमग्रेऽवचनेऽप्युत्तरत्र ज्ञेयम् । भर्त्रभिमतदेव्याराधनं गृहिण्या क्रियमाणमप्यनुकूलदांपत्यघटकं सत्पत्न्या उपास्तियोग्यतापादकमिति व्यञ्जयन् विवक्षितमर्थं प्रतिजानीते—**लोपामुद्रापत इति ।** अतएव भगवत्यैव त्रिंशत्यां वक्ष्यते 'पत्न्यस्य लोपामुद्राख्या मामुपास्तेऽतिभक्तितः । अयं च नितरां भक्तस्तस्मादस्या वदत्व त'दिति । अत्र भर्तृनिष्ठभक्तेः पत्न्यानुकूल्यस्य समुच्चयार्थकश्चकार इति तत्रैव वक्ष्यामः । अथवा न केवलं भक्तिप्रश्नावेव योग्यतावच्छेदकौ । विद्योपास्तिविरहे तयोः सत्त्वेऽप्युपदेष्टुर्योगिनीशापान्नानात् । अतस्तत्साहित्यद्योतनायेदं विशेषणम् । अथवा लोपामुद्राशब्दस्तद्विद्यापरस्त्रिपुरसुन्दरीपरो वा । तैव पतिरुपास्या यस्येत्यर्थः । नचागस्त्यविद्योपासकस्य कथं तथात्वव्यपदेशः । शाखान्तराधिकरणन्यायेन विद्ययोरभेदाभिप्रायेणोपपत्तेः । नच विद्यापदवाच्ययोरप्यस्योरभेदेऽप्यगस्त्यलोपामुद्रासंज्ञयोर्मन्त्रयोर्भेद एवेति वाच्यम् । अगस्त्योपास्तितेत्यादियौगिकशब्दैकदेशानां तेषां संज्ञात्वाभावेन भेदकत्वायोगात् । नचाक्षरन्यूनाधिकभावाभ्यां सुपिसुषिरयोरिव भेदः । तयोः पदभेदकत्वेऽपि मन्त्रभेदकत्वाभावात् । अतएव 'अप्स्वन्तरमृत'मिति मन्त्रस्य याजुषाथर्वणबह्वृचैर्भिन्नच्छन्दस्कत्वेन पाठेऽपि भेदानङ्गीकारस्त्रात्रिकाणां संगच्छते । अतएव च भूतशुद्ध्यन्तर्गतजलमण्डलशोधने विकल्पेन विनियोगो न्यायसिद्धः । तदुक्तम्-'अप्स्वन्तरिति मन्त्रेण शोधयेदम्बुमण्डलम् । आर्ष्योष्णिहा पुरस्ताच्च बृहत्या पुरउष्णिहे'ति । एवं 'युञ्जन्ति हरी इषिरस्ये'ति मन्त्रो बह्वृच-च्छन्दोगाभ्यां छन्दोभेदेन पठ्यमानोऽपि न भिद्यते । अनेनैवाशयेन नामैधाख्यसामाधिकारे 'अथ पुरउष्णिगनुष्टुभेनानुष्टुभो नयन्ती'ति श्रुतौ द्वयोरपि छन्दसोरुल्लेखः ।

रहस्यमिति मत्वाहं नोक्तवांस्ते न चान्यथा ।
पुनश्च पृच्छसे भक्त्या तस्मात्तत्ते वदाम्यहम् ॥ १३ ॥
ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ।
भवता न प्रदेयं स्यादभक्ताय कदाचन ॥ १४ ॥
न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥ १५ ॥

तेन तन्त्रराजे हादिविद्याधिकारे पठितानां कालनित्यामन्त्राणां पारायणानां च कादिविद्याङ्गत्वेनापि लेखः पद्धतिकाराणां संगच्छत इति दिक् । अवधानं विषयान्तरसंचाराभावस्तत्सहितं मनो यस्य तादृशः सन् । इतरकोटीनां तेष्वरसानां च तवैव स्फुरितत्वेऽपि तद्विलक्षणायाः कोटेर्विवक्षितायां झटिति त्वद्बुद्धौ स्फुरणायोग्यत्वादिति भावः । यत् येन कारणेन 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शन'मिति वार्तिके सर्वविभक्तीनां साधुत्वाभिधानात् ॥ १२ ॥ प्रकटार्थस्योक्तौ प्रश्नभक्तिसदसद्भावापेक्षा नावश्यकी, किंतु रहस्यविषय एवोक्तरूपा वस्तुस्थितिरित्युपसंहारं द्योतयन् भक्तिपूर्वकप्रश्नस्योपदेशस्य चान्वयव्यतिरेकावुपदिशति—**रहस्यमितीति** । ते तुभ्यम् । अपृष्टवते इति शेषः । अन्यथा न त्वदुत्प्रेक्षितनिमित्तानि न भवन्ति । अस्वरसानां तवैव स्फुरितत्वादिति भावः । भक्त्या भक्तिपूर्वकम् । तस्मात् भक्तियुक्तप्रश्नाभावकृतप्रतिबन्धस्यापगमात् । तत् ललितानामसहस्रम् ॥ १३ ॥ उक्तार्थं संमतिमाह—**ब्रूयादिति** । वक्ता पृच्छकेन श्रोतृभिश्च तत्त्वबुभुत्सूनां सभा भवति तत्र वक्तृभिन्नाः सर्वेऽपि यद्यपि शिष्यास्तथापि रहस्यपदार्थस्य रहसि जनबाहुल्याभावे सत्येव वक्तव्यत्वादत्र शिष्यशब्देन पृच्छक एवावशिष्यत इत्याशयेन शिष्यायेत्युक्तं । त्वयाप्येवं वर्तितव्यमित्याशयेनाह । शिष्यायेत्यनुवर्तते । अभक्ताय पृच्छकायापि न देयमित्यर्थः । तेनापृच्छकायापि प्रश्नासमर्थाय भक्ताय देयमिति सिध्यति ॥ १४ ॥ अभक्ताविवरणार्थां श्रुतिमर्थतोऽनुवदति—**न शठायेति** । 'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । असूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्या'मिति हि श्रुतिः । तत्र गुरूक्तिसमनन्तरमेव जातनिश्चयोऽपि यः पूर्वमेवैतदज्ञातचरमिति वा इदानीमपि न ज्ञातमिति वा प्रदर्शयितुं यतते स शठोऽयतश्च जातं निश्चयं गुरवे प्रदर्श्य तद्दूषणार्थमेवैदंपर्येण यतमानो हेत्वाभासोपन्यासशीलो दुष्टोऽसूयकश्च । गुरुभक्तिः सर्वोपि यथार्थैवेति ज्ञानं विश्वासः स नास्ति यस्य सोऽविश्वासोऽनृजुश्च । यद्वा अयतोऽन्तःशुद्धिहीनः स चेह दुष्टपदेन संगृहीतः । एवंसति संप्रदायो माविच्छेदीत्यत आह—**श्रीमात्रिति** । भक्तितन्त्रे 'सा परानुरक्तिरीश्वरे' इत्यधिकरणादिषु निर्णीतलक्षणश्चित्तवृत्तिविशेषो भक्तिः तया युक्ताय । अनेनाभक्तनिरासः । न केवलं भक्तिमात्रमधिकारितावच्छेदकमिति द्योतनाय विशेषणद्वयम् । विद्याराजः पञ्चदशी तद्वेदनं गुरुमुखादुपदेशः ॥ १५ ॥ नित्यनैमित्तिककर्माचरणपूर्वकं सर्वत्र देव्यमेद-

उपासकाय शुद्धाय देयं नामसहस्रकम् ।
यानि नामसहस्राणि सद्यःसिद्धिप्रदानि वै ॥ १६ ॥
तन्त्रेषु ललितादेव्यास्तेषु मुख्यमिदं मुने ।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ॥ १७ ॥

भावनाख्या मानसी क्रियोपास्तिः तद्वानुपासकः । शुद्ध इति शाक्त्यादिदोषरहिताय । अथैतदुपदेशे ईदृशो निर्बन्धोऽस्य रहस्यत्वात्तच्च मुख्यत्वात्तच्च देवताप्रीतिकरत्वेनावश्यकत्वादिति प्रदर्शयितुमुत्तरो ग्रन्थसंदर्भो नामारम्भाधिकः—**यानीति** । यानि कोटिसंख्याकानि तेषु यानि सद्यःसिद्धिप्रदानि दशसंख्याकानि 'एते दश स्तवा गङ्गाश्यालकावालरासभे'ति संगृहीतानि ॥ १६ ॥ ललितादेव्या नामसहस्राणि तन्त्रेषु चतुःषष्टिसंख्याकेषु पुराणेषु च कथितानि तेष्वपीदं ललितानामसहस्रं मुख्यतममिति योजनयार्थः । 'देवीनामसहस्राणि कोटिशः सन्ति कुम्भजे'त्युत्तरग्रन्थानुसारात् । पुंदेवत्या मन्त्राः स्त्रीदेवत्या विद्या इति मन्त्रविद्ययोर्लक्षणभेदेऽप्यस्याः शिवशक्तिसामरस्यरूपत्वादुभयात्मतेति द्योतनाय मन्त्राणां मध्ये विद्येत्युक्तम् । अतएव देवताध्याने ऐच्छिको विकल्पः स्मर्यते । 'पुंरूपं वा स्मरेद्देवि स्त्रीरूपं वा विचिन्तयेत् । अथवा निष्कलं ध्यायेत्सच्चिदानन्दलक्षण'मिति मालामन्त्रेऽपि स्त्रीपुंसभेदेन भेदः । एतदभिप्रायेणैव गुणनिधिः श्रीमाता परंज्योतिरित्यादीनि नामानि त्रिलिङ्गकानि संभन्स्यन्ते । अथवा कूटत्रयात्मकत्वेऽपि पञ्चदशस्वरघटितत्वात्पञ्चदशाक्षरशालित्वसूचनाय मन्त्राणामित्युक्तम् । पिण्डकर्तरीबीजमन्त्रमालाभेदेन पञ्चविधेषु मन्त्रेषु पञ्चदशाक्षराणां मन्त्ररूपत्वात् । तदुक्तं नित्यातन्त्रे—'मन्त्रा एकाक्षराः पिण्डाः कर्तर्यो द्व्यक्षरा मताः । वर्णत्रयं समारभ्य नवार्णा विधिबीजकाः । ततो दशार्णमारभ्य यावद्विंशतिमन्त्रकाः । तत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते' इत्यादि । कादिः ककार आदिर्यस्यां सा कादिः काली-शक्तिः त इति तन्त्रराजप्रसिद्धकादिनामकशक्तित्रयभिन्ना वा । अतएव 'कादिसंज्ञा भवद्रूपा सा शक्तिः सर्वसिद्धये' इत्यादि तत्रैव देवीं प्रति शिववाक्यम् । साच 'कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरूच्येषा विश्वमातादिविद्या' इत्यथर्वणैः पठ्यमानत्रैपुरसूक्तस्थायामृच्युद्धृता । तन्त्रभेदेनोद्धृतानां विद्यानां सर्ववेदान्तप्रत्ययन्यायेनैक्येऽप्युपासकरुच्यनुसारेण कल्पितं तारतम्यमप्यस्तीत्याह—**परेति** । भावार्थप्रभृत्यर्थानां सर्वेषां तत्रैव सामञ्जस्यात् । सप्तत्रिंशदक्षरैः षट्त्रिंशत्तत्त्वातीतरूपायाः कादिविद्यातिरिक्तास्वसंभवाच्चेति भावः । तदिदमस्माभिर्वैरिवस्यारहस्य एव विद्यान्तरेषु तदसामञ्जस्यप्रदर्शनपूर्वं निरूपितम् । 'अञ्ज्यञ्जनबिन्दुत्रयनादत्रितयैर्विभाविताकारा । षट्त्रिंशत्तत्त्वात्मा तत्त्वातीता च केवला विद्या' इति । किंच 'यदक्षरैकमात्रेऽपि संसिद्धे स्पर्धते नरः । रविताक्ष्यैन्दुकंदर्पशंकरानलविष्णुभिः । यदेकादशमाधारं बीजं कोणत्रयात्मकम् । ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते' इत्यादेर्गुरुमुखैकवेद्यो रहस्यार्थो न हादिविद्यासु समञ्जसः । 'चत्वार ईं बिभ्रति क्षेमयन्त' इत्यत्रापि कादि-

पुराणां श्रीपुरमिव शक्तीनां ललिता यथा ।
श्रीविद्योपासकानां च यथा देवो वरः शिवः ॥ १८ ॥
तथा नामसहस्रेषु वरमेतत्प्रकीर्तितम् ॥ १९ ॥
यथास्य पठनाद्देवी प्रीयते ललिताम्बिका ।
अन्यनामसहस्रस्य पाठान्न प्रीयते तथा ।
श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिदम् ॥ २० ॥
विल्वपत्रैश्चकराजे योऽर्चयेल्ललिताम्बिकाम् ।
पद्मैर्वा तुलसीपत्रैरेभिर्नामसहस्रकैः ॥ २१ ॥

पक्ष एव स्वरस इत्येके । हादिपक्षेऽपि तुल्येति तु रहस्यम् । किंच त्रिपुरोपनिषद्यपि 'अथैतस्य परं गह्वरं व्याख्यास्यामः' इत्यादिना गायत्रीपञ्चदश्योरेकरूपत्वं वक्तुं तत्पदककारयोरेवैकार्थत्वमुक्तम् । तन्मूलकत्वेनैवान्या उद्धृताः । त्रिशत्यां कामेश्वराभ्यामप्यस्या एवादरः क्रियमाणो दृश्यते । तत्त्रराजे तु तृतीयकूटस्यैव प्रथममुद्धारेण तत्रैवैकाक्षरनिवेशेनान्ययोः कूटयोर्लाघवेनोद्धाराय हादिविधैवादृतेति ज्ञेयम् । अतएव त्रैपुरसूक्ते 'षष्ठं सप्तममथ वह्निसारथिम्' इत्यृचा कादेः पञ्चादेव हादेरुद्धारः कृतः । 'शिवः शक्तिः कामः' इति सौन्दर्यलहरीस्थश्लोकद्वयं द्वेधापि व्याख्यायत इति दिक् ॥ १७ ॥ उपासकानामित्यन्ताश्चतस्रो निर्धारणे षष्ठ्यः । उपास्तेः परमं फलमुपास्यानेदः । सच परशिवे सार्वकालिक एवास्तीत्युपासकत्वं तस्याप्यविशिष्टम् । कथमन्यथा तस्यादिनाथत्वं तदभेदानुसंधानमस्मदादीनां च संगच्छते । देव्यभेदानुसंधानदार्ढ्यबललब्धाभेदेन गुरुणा सह शिष्यस्याप्यभेदानुसंधानाद्देव्यभेदलाभस्य नार्थिकद्वारकतायाः सिद्धान्तरहस्यत्वादित्याशयेनाह—**वरः शिव इति** । परमशिव इत्यर्थः । तेन गणरुद्रादिनिरासः ॥ १८ ॥ तथेति स्पष्टम् । अर्धश्लोकोऽयम् ॥ १९ ॥ मुख्यत्वे हेतुमाह—**यथास्येति** । यथा निरवधिकमित्यर्थः । अन्येषां शिवविष्ण्वादीनां नामसहस्रमन्यच्च तन्नामसहस्रं च तस्येति वा । अथैतत्पाठं विधत्ते । प्रीतय इति तादर्थ्यचतुर्थ्या सर्वेभ्यः कामेभ्य इत्यादाविव कीर्तनकरणकभावनाभाव्यत्वप्रतीतिः । इदमिति तु धात्वर्थः कर्म सक्तूनितिवत् । अतएव तेन न्यायेनैव विनियोगभङ्गेन मत्वर्थलक्षणया नामसहस्रकीर्तनेन श्रीमातृप्रीतिं भावयेदिति विधेः पर्यवसितोऽर्थः । अथवा सोमादिद्रव्याणां यागसाधनत्वेन तृतीयाश्रुतेः प्रत्यक्षत्वाच्च तत्र तथा वाक्यार्थवर्णनेऽपि प्रकृते नाम्नां वर्णानित्यत्ववादे तालव्योष्ठ्यपुटव्यापाररूपकीर्तनजन्यत्वात्तन्नित्यत्ववादेऽपि ध्वनेरनित्यत्वेन कीर्तनजन्यध्वन्यभिव्यङ्ग्यताया वर्णात्मकद्रव्येषु स्वीकारादनुत्पन्नस्यानभिव्यक्तस्य वा कीर्तनजनकत्वायोगान्नामाभिव्यञ्जककीर्तनेनेष्टं भावयेदित्येवार्थः । कीर्तनं चेह वाचिकमानसोभयसाधारणम् । नामपठनवन्नामस्मरणस्यापि वचनान्तरेषु फलश्रवणात् । तस्मादिति हेत्वधिकरणन्यायेनार्थवादः । अनिशं यावज्जीवम् । तेनाग्निहोत्रवन्नित्यकाम्योभयरूपमिदं कर्मेति सिध्यति ॥ २० ॥ अथ कीर्तनस्यान्याश्रयेणापि फलसंबन्धमाह—**विल्वपत्रैरिति सार्धेन** । वचनान्तरेण प्राप्तमन्तर्यागबहिर्यागभेदेन

सद्यः प्रसादं कुरुते तत्र सिंहासनेश्वरी ।
चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥ २२ ॥
जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम् ।
जपपूजाद्यशक्तोऽपि पठेन्नामसहस्रकम् ॥ २३ ॥
साङ्गार्चने साङ्गजपे यत्फलं तदवाप्नुयात् ।
उपासने स्तुतीरन्याः पठेदभ्युदयो हि सः ॥ २४ ॥

द्विविधमपि पूजनं बिल्वपत्राद्यन्यतमकरणकं चक्रराजाधिकरणकमर्चयेदित्येकेन पदेन यच्छब्दयोगादनूद्यते । तत्र तात्पर्यग्राहकाणि पदान्तराणीति य इष्ट्येत्यादिवाक्य इव नोद्देश्यानेकत्वप्रयुक्तो वाक्यभेदः । नामसहस्रकैरिति तु कीर्त्यमानाभिप्रायं कीर्तनपर्यवसायि । तेनार्चनविशेषाश्रितेन नामकीर्तनेन (यद्यपि रुद्रयामले 'तुलसीबिल्वपत्राणि धात्रीपत्राणि पार्वति । अर्चने चक्रराजस्य नोचितान्येव सर्वथे'ति निषेधः प्रतीयते तथापि सहस्रनामकरणकार्चने विशिष्य बिल्वपत्राणां विधानान्निषेधस्तदितरकरणकार्चनपरो व्यवतिष्ठते) ॥ २१ ॥ सद्यः प्रसादं भावयेदित्यर्थः । अथ यावज्जीववाक्येन प्राप्तं जीवनावच्छिन्नं कालसामान्यं विशेषेणोपसंहरति—**चक्राधिराजमिति ।** अर्चनोत्तरं यः क्रियमाणो नित्यजपस्तदुत्तरकाले नित्यं सकृत्कीर्तयेदित्यर्थः । 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'तिवदयं कालार्थः संयोगः । अर्चनजपकीर्तनानां प्रत्येकं विधिभिः फले विनियोगेन कृतार्थत्वात् । अतएव जपपूजादेः कालोपलक्षणार्थत्वात् 'अनपायो हि कालस्य लक्षणं हि पुरोडाशा'विति न्यायेन तदभावेऽपि कर्तव्यतां प्राप्तमनुवदति—**जपेति ।** आदिना न्यासादिपरिग्रहः ॥ २२ ॥ **उपास्तिं प्रति** जपादीनां सर्वेषामङ्गत्वान्नित्यकर्माङ्गेषु यथाशक्त्युपबन्धस्य सिद्धान्तसिद्धत्वादशक्त्या जपाद्यकरणे तदुत्तरकालत्वाभावेऽपि तदुपलक्षितकालस्यानपायादेकपुरोडाशायामिष्ट्वपांशुयाजवन्नामसहस्रकीर्तनं कर्तव्यमेवेत्यर्थः ॥ २३ ॥ ननु किमिदं कीर्तनं शक्तस्योच्यते तदशक्तस्य वा । नाद्यः । नित्यकर्मत्वादेव शक्तं प्रति तत्प्राप्तेः पुनरनुवादवैयर्थ्यात् । नान्त्यः । अशक्तं प्रति विधेरप्ययोगात् किमुतानुवादस्य । 'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी'ति न्यायादित्यत आह—**साङ्गेति ।** अङ्गैः सहितं साङ्गं । आवरणपूजनसहितप्रधानदेवतापूजनस्य कुल्लुकासेतुमहासेतुजपसहितविद्याजपस्य च न्यासादेश्च यत्फलं तदुद्देशेनापि पठेदित्यर्थः । अयं भावः—यदि न्यासार्चनजपकीर्तनेष्वन्यतमस्यैकस्यैव करणे शक्तिस्तदा न्यायतो विकल्पे प्राप्ते तदपवादेन कीर्तनमेव विधीयते । तेन 'यदि सत्राय दीक्षितानां साम्युत्तिष्ठासेत्सोममपभज्य विश्वजिता यजेते'त्र सत्राभावे विहितविश्वजिद्यागवदस्य प्रतिनिधित्वं, परंतु वचनबलात्पूजादिफलमपि । विश्वजितस्तु न सत्रफलं मानाभावादिति । इदानीमुपासनांप्रत्यवैकल्पिकमङ्गत्वं कीर्तनस्येत्याह—**उपासने इति ।** सप्तम्या 'तत्र जयान् जुहुया'दित्यत्रेवाङ्गित्व-

---

१ श्रीमत्सिंहासनेश्वरी. २ यद्यपीत्यादि व्यवतिष्ठते इत्यन्तो ग्रन्थो द्वित्रिपुस्तकेषु नोपलभ्यते तदेव समीचीनं वचनस्यैव निर्मूलत्वात्.

इदं नामसहस्रं तु कीर्तयेन्नित्यकर्मवत् ।
चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तनम् ॥ २५ ॥
भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ।
भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम् ॥ २६ ॥
तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुम्भसंभव ।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया ॥ २७ ॥
वाग्देवीवैशिनीमुख्याः समाहूयेदमब्रवीत् ।
वाग्देवता वशिन्याद्याः शृणुध्वं वचनं मम ॥ २८ ॥

योगः । तदङ्गत्वेनेतरेषां त्रैलोक्यमोहनकवचादिरूपाणां स्तोत्राणां पाठेऽभ्युदयः फले विशेषः । अपाठे तु नाङ्गन्यूनत्वकृतो दोषः । तेन तेषां कृत्वङ्गत्वबोधकानां तत्तत्प्रकरणस्थवचनानां विकल्पे पर्यवसायकमिदं वाक्यम् । तेन षोडशिग्रहवदितरेषामङ्गत्वं 'नवलक्षप्रजप्तापि तस्य विद्या न सिध्यती'त्यादितत्तत्प्रकरणस्थवाक्येषु सिद्धिपदं तत्तत्पाठजन्याभ्युदयविशिष्टविद्याफलपरमित्यदोषः ॥ २४ ॥ इदं तु न तादृशमङ्गं अपितु नित्यकर्मवत् संध्यावन्दनवत् । स्वाभाविकप्रतियोगिकविकल्पासहत्वमात्रार्थकोऽयं वतिः । ततश्च संयोगपृथक्त्वन्यायेन कीर्तनं कृत्वर्थपुरुषार्थोभयरूपमिति मन्तव्यम् । अर्चनादिप्रायपाठेनाप्युपासनाङ्गत्वमेव द्रढयति । देव्या विद्यायाः । काकाक्षिन्यायेनोभयत्रान्वेति ॥ २५ ॥ भक्तस्य उपासकस्य । अभ्युदयं अभ्युदयकरं । मत्वर्थीयोऽच् । श्रेयस्करमित्यर्थः । अर्चनादिप्रायपाठादर्चनादितुल्यत्वं माप्रसाङ्क्षीदत आह—**भक्तस्येति** । जपपूजापेक्षयापीति शेषः । तत्फलजनकस्योक्तत्वादिति भावः ॥ २६ ॥ तत्फलजनकत्वमस्य कथमित्याशङ्क्य तत्र निमित्तं वक्तुं स्तोत्रप्रतिपाद्याया देवताया निखिलशिवशक्तिगणोपास्यत्वमुखेन सर्वोत्तमत्वद्योतिकां कथामुपक्रमते—**तत्रेत्यादिना** । नह्यत्र 'अनूयाजान्यक्ष्यन्भवती'ति हेतुवादवत्स्वार्थतात्पर्यकत्वद्योतनाय प्रकर्षेण वक्ष्यामीति प्रतिज्ञा । अतएवार्थवादधिया नोपेक्षस्वेति द्योतयितुं शृणु त्वमिति स्वाभिमुखीकरणात् । अवाप्तसकलकामत्वेन देव्याः स्वार्थकामनाभावादाह—**भक्तानामिति** ॥ २७ ॥ मुखे आदौ गणनीया मुख्या । वशिन्येवाद्या मुख्या यासां ता वशिन्याद्याः । आदिना कामेश्वर्यादिकौलिन्यन्तसप्तकपरिग्रहः । तासामेवाह्वाने परिकरालंकारेण हेतुगर्भं विशेषणं वाग्देवीरिति । क्रीडाविजिगीषाद्युतिस्तुतिव्यवहारमोदमदकान्तिगतयोऽत्र सर्वे दीव्यतेरर्थाः ननु स्वप्नः । देवतानामस्वप्नत्वात् । वाचा क्रीडन्ति विजिगीषन्ति द्योतन्ते स्तुवन्तीत्यादिरीत्या वा वाग्देव्यः । वाङ्मयमात्रे स्वातन्त्र्यं तासामेव चिकारयिषितस्तोत्रार्थमाह्वानमिति भावः । इदं वक्ष्यमाणवृत्तान्तरूपम् । अथाध्युष्टश्लोकैरम्बावचनम् । हे वशिन्याद्याः, यतो यूयं वाग्देवतास्ततो मम वचनं शृणुध्वमिति योजना । युष्माकं वागीश्वरीत्वान्मद्वचनश्रवणेऽपि भवतीनामेवाधिकार इति प्रोत्साहनं व्यङ्ग्यम् ॥ २८ ॥ ननु वशिन्याद्युपासका देवता

भवत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः ।
मद्भक्तानां वाग्विभूतिप्रदाने विनियोजिताः ॥ २९ ॥
मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः ।
मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः ॥ ३० ॥
कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः ।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ॥ ३१ ॥

अपि वागीश्वर्यः संपतिताः किं त्वदाज्ञावाक्यश्रवणे नाधिकारिण्य इत्याशङ्क्याह—**भवत्य इति** । ततश्चेति शेषः सर्वत्राध्याहृत्य योज्यः । प्रकर्षेणोत्कर्षेण उल्लसन्त्यो वाचो विभूतय ऐश्वर्यं यासां ताः । इतरवैलक्षण्यं प्रकर्षः । सर्वोत्तमत्वमुत्कर्षः । तेन सर्वोत्तमदेवताप्रसादलब्धाया विद्याया एव सर्वविद्योत्तमत्वात्तद्वत्य एव सर्वोत्तमस्तोत्रकरणेऽधिकारिण्य इति ध्वनिः । ननु नकुलीदेव्यादयोऽपि भगवतीप्रसादलब्धवागीश्वर्यशीला एवेति ता एव स्तोत्रकरणाय विनियुज्यतामत आह—**मद्भक्तानामिति** । नकुलीवागीश्वर्यादयस्तु ललिताभक्तैः सह विवदमानानां परेषां वाचस्तम्भनादिषु विनियुक्ताः । ततश्च सहस्रनामस्तोत्रस्यापि वाग्विभूतिरूपत्वेन तस्य ललिताम्बाभक्तेभ्य एव दित्सितत्वेन नकुल्यादेस्तत्करणे विनियोजने वशिन्याद्यधिकारभङ्गापत्तिरिति ध्वन्यम् ॥ २९ ॥ ननु वशिन्यादिभिरपि स्तोत्राणि कृतानि सन्त्येव किमनेन नूतनेनेत्यत आह—**मच्चक्रस्य रहस्यज्ञा इति** । चक्रस्य बिन्द्वादिभूपुरान्तस्य रहस्यं वासनामयं शरीरं जानन्तीति तथा । अथवा । अस्ति विमर्शरूपा स्वसंविद्विषयान्तरानवभासिनी । तस्या झटित्युच्चलनाकारप्रतिभोन्मज्जनात्मकोऽन्तःपरिस्पन्दः पूर्णाहंभावनामकस्तुर्यावस्थानामकश्च । तस्य च शक्तयोऽनन्तविधास्तासां समूहश्चक्रं तस्यानुसंधानं गुरुमुखैकलभ्यं रहस्यं, तस्मिन् सति स्वभिन्नस्य सर्वस्यापि स्वस्मिन्नेवोपसंहारो भवति । तथाच शिवसूत्रं 'शक्तिचक्रानुसंधाने विश्वसंहारः' इति । 'गुरुरूपाय' इति च । तदिदं जानन्तीति तथा । ततश्चेतरेषु स्तोत्रेषु चक्ररहस्यं न प्रकाशितमस्ति । चिकारयिषिते तु तदपि प्रकाश्यमस्तीति व्यङ्ग्यम् । नन्वरुणोपनिषद्ब्रह्मोपनिषत्त्रिपुरोपनिषदादिषु चक्ररहस्यमपि प्रकाशितमेवास्तीति किमनेनेत्यत आह—**मम नामपरायणा इति** । नामशब्दो देवतावाचकप्रातिपदिकपरो मन्त्रपरश्च । सौन्दर्यलहर्यां 'शिवः शक्तिः कामः' इति मन्त्रोद्धारश्लोके मन्त्राक्षराण्युद्धृत्य, अन्ते 'भजन्ते वर्णास्ते तव जननि नामावयवता'मिति प्रयोगात् द्विविधयोः शब्दयोरेकशेषः । तेन नामोपदेशेन चक्ररहस्यकथनं मन्त्राणामुद्धारश्चोपनिषत्सु न लभ्यते । तादृशापूर्वस्तोत्रकरणे तु भवतीनामेव नामज्ञत्वादधिकार इति व्यज्यते । तस्मादुक्तहेतुपञ्चकात् वो युष्मानेवाहमाज्ञापयामि नान्याः इति योजना ॥ ३० ॥ आज्ञप्तव्यार्थमेवाह—**कुरुध्वमिति** । नामसहस्रकैरितीत्थंभूतलक्षणे तृतीया । सहस्रनामोपलक्षितं मम स्तोत्रं कुरुध्वमित्यन्वयः । स्तोत्रं विशिनष्टि—**ममाङ्कितमिति** । मम नाम्ना चिह्नितमित्यर्थः । अङ्कनं नाम

हयग्रीव उवाच ।

इत्याज्ञप्ता वचोदेव्यः श्रीदेव्या ललिताम्बया ।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम् ॥ ३२ ॥
रहस्यनामसाहस्रमिति तद्विश्रुतं परम् ।
ततः कदाचित्सदसि स्थित्वा सिंहासनेऽम्बिका ॥ ३३ ॥
स्वसेवावसरं प्रादात्सर्वेषां कुम्भसंभव ।
सेवार्थमागतास्तत्र ब्रह्माणीब्रह्मकोटयः ॥ ३४ ॥
लक्ष्मीनारायणानां च कोटयः समुपागताः ।
गौरीकोटिसमेतानां रुद्राणामपि कोटयः ॥ ३५ ॥

चरमश्लोके नामप्रक्षेपः—यथा कामदेवाङ्के राघवपाण्डवीये काव्यलक्ष्म्यङ्के किरातार्जुनीये च । प्रकृते च यद्यप्यम्बाया अनन्तानि नामानि तथापि ललितेत्यसाधारणं नाम । गुणिरुद्रेश्वरादिपत्नीष्वपि भवान्यादिनामप्रयोगेण तेषां साधारण्यात् । त्रिपुरसुन्दरीति नाम्नोऽपि तत्रान्तरे प्रतिपत्तिथिनित्यायाः सत्त्वात् । अतः सहस्रनामसमाप्तिश्लोके फलश्रुतिचरमश्लोके च ललिताम्बिकेति नाम्न उल्लेखः ॥ ३१ ॥ अथ सार्धनवभिः श्लोकैः पुनरपि हयग्रीववाक्यम् । अत्र पूर्वश्लोकार्थेन पौनरुक्त्याभावादेवमुक्तम् । रहस्यैश्चक्रराजस्य मन्त्रोद्धाररहस्याभ्यां सहितैः । मत्वर्थीयोऽच्प्रत्ययः ॥ ३२ ॥ स्तोत्रनाम्नोऽन्वर्थकताप्रदर्शनाय तन्निर्वक्ति—**रहस्यनामसाहस्रमिति ।** तद्विश्रुतं परं इति पदस्य वारद्वयमन्वयः । रहस्यगर्भितत्वाद्धेतोः रहस्यनामसाहस्रमिति परं अतिशयेन विश्रुतं प्रसिद्धमित्यर्थः । सिंहासनेऽवस्थानं सर्वेषां दर्शनार्थम् ॥ ३३ ॥ सेवावसरः सेवार्थमवकाशः । ब्रह्माणीति नायं ब्रह्मशब्दान्ङीष् 'इन्द्रवरुणे'त्यादिसूत्रे ब्रह्मशब्दपाठाभावेनानुगागमायोगात् । अपितु ब्रह्म वेदानणति शब्दायते व्याहरतीति यावत् । स ब्रह्माणः । चतुर्भिर्वेदनैश्चतुर्वेदवक्ता ब्रह्मेत्यर्थः । तस्य स्त्रीत्यर्थे पुंयोगलक्षणो ङीप् । तथाच स्वच्छन्दशास्त्रयोगः 'ब्रह्माणीत्यपरा शक्तिर्ब्रह्मणोत्सङ्गगामिनी'ति । ब्रह्माणमानयति जीवयतीति वा ब्रह्माणी । अतो न 'पुमान्स्त्रिये'त्येकशेषप्रसक्तिः । अथवा ब्रह्माणीशब्दो भारतीकोटिपरः तत्समेता ब्रह्मकोटय इति शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासः । बहुवचनं कोटिसंख्यापरम् । तेन प्रकृतिप्रत्ययाभ्यां मिलित्वा कोटिगुणिता कोटिरिति सिद्ध्यति । जलधिसंख्याका ब्रह्माण्यस्तावन्त एव ब्रह्माणश्चेत्यर्थः । अतएव रुद्रयामले सर्वमङ्गलाध्यानप्रकरणे 'आवृतां ब्रह्मसहितब्रह्माणीकोटिकोटिभि'रित्यादि स्मर्यते ॥ ३४ ॥ लक्ष्मीकोटिसमेता नारायणकोटीनां कोटय इत्यर्थः । रुद्राणामित्यपि रुद्रकोटीनामित्यर्थकम् । यथाश्रुते तावदेकैकस्य रुद्रस्य कोटिकोटिगौरीसमेतत्वावगतिः स्यात्, पूर्वाभ्यां शक्तिभ्यां सह संख्यायां वैषम्यं च । यदि पुनर्बहुकोटिसंख्याकरुद्रसमुदायस्यैव विशेष्यत्वाभिप्रायेण गौरीकोटिसमेतत्वरूपं विशेषणं तत्वेकैकरुद्रस्य विशेष्यत्वाभि-

मन्त्रिणीदण्डिनीमुख्याः सेवार्थं याः समागताः ।
शक्तयो विविधाकारास्तासां संख्या न विद्यते ॥ ३६ ॥
दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः ।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ॥ ३७ ॥

प्रायेणेति पर्यालोच्यते तदा यथाश्रुतमेव साधु । सर्वाणि बहुवचनानि पुनरनन्त-संख्यापराणि ब्रह्माण्डानामानन्त्यंप्रति ब्रह्माण्डसृष्ट्यधिकारिषु त्रयस्त्रावदयकत्वेन तेषामानन्त्ये विवादाभावात् । तेषां युगपदाह्वानं तु सर्वब्रह्माण्डेष्वस्य प्रसिद्धिसंपा-दनायेत्याकूतम् ॥ ३५ ॥ **विविधाकारा इति** । 'परा शक्तिश्चादिशक्तिरिच्छा-ज्ञानक्रिया बला । बालान्नपूर्णा बगला तारा वाग्वादिनी परा ॥ गायत्री चैव सावित्री सिद्धलक्ष्मीः स्वयंवरा । नकुली तुरगारूढा कुरुकुल्ला च रेणुका ॥ संपत्करी च साम्राज्यलक्ष्मीः पद्मावती शिवा ॥ दुर्गा भद्राकृतिः काली कालरात्रिः सुभद्रिका । छिन्नमस्ता भद्रकाली कालकण्ठी सरस्वती ॥' इत्याद्या रुद्रयामलादौ प्रसिद्धाः । यद्यपि पूर्वत्रापि कोटय इति बहुवचनेनासंख्यातत्वमेवोक्तं तथापि तत्तत्समान-संख्याका प्रत्येकं बालादयः सजातीया एव । परस्परविजातीया अप्यनन्ता इत्या-शयेन तासां नाम्नां विशिष्य निर्देष्टुमशक्यत्वात्संख्या न विद्यत इत्युक्तम् । अथ-वा असंख्या असंख्यनामधेयमित्यर्थः । न विद्यते । न शक्यते वक्तुमिति शेषः । सम्यक् ख्यातीति संख्या नामनिर्देष्टेत्यर्थो वा ॥ ३६ ॥ दिवि भवा दिव्या दिक्प-लाद्या देवाः । मानवाः पुण्या ब्रह्मर्षयो विश्वमित्राद्याः । सिद्धाः सनकनारदाद्या योगिनः । तेषामोघाः संख्याविशेषाः । तथाच रुद्रयामले 'अनेककोटिदिक्पालैश्च-न्द्रार्कवसुकोटिभिः । सनकाद्यैश्च योगीन्द्रैः सप्तर्षीणां च कोटिभिः ॥ नारदादिमहौ घानां कोटिभिः परिवारिता'मिति । तेनौघा इति बहुवचनमनेककोटिपरम् । यद्य-प्योघो नाम संख्याविशेषो न ज्योतिःशास्त्रे प्रदृश्यते । यदुक्तं 'एकदशशतसहस्रायु-तलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जं खर्वं निखर्वमहापद्मशङ्कवस्तस्मात् ॥ जल-धिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः ॥' इति । नापि वायुपुराणे । तत्रहि 'शृणु संख्यां परार्धस्य परस्याप्यपरस्य च'इत्यादि 'कोटिकोटिसहस्राणि परार्धमिति कीर्त्यते' इत्यन्तं यथापूर्वमुक्त्वोक्तं 'परार्धद्विगुणं चापि परमाहुर्मनीषिणः । शत-माहुः परिवृत्तं सहस्रपरिपद्मकम् ॥ ततोऽयुतं च नियुतं प्रयुतं चार्बुदं ततः । न्यर्बुदं खर्बुदं खर्वं निखर्वं शङ्कुपद्मकौ ॥ समुद्रं मध्यमं चैव परार्धमपरं ततः । एवमष्टाद-शैतानि स्थानानि गणनाविधौ ॥ शतानीति विजातीयान्युद्दिष्टानि मनीषिभि'रिति, तथापि रामायणे युद्धकाण्डे 'शतं शतसहस्राणां कोटिमाहुर्विपश्चितः' इत्यारभ्य 'शतं समुद्रसाहस्रं महौघ इति विश्रुत'मित्यन्ते शङ्कुमहाशङ्कुवृन्दमहावृन्दपद्ममहा-पद्मखर्वमहाखर्वसमुद्रमहौघाख्या उत्तरोत्तरं लक्षलक्षगुणिता दशसंख्या उक्तास्तत्र 'नामैकदेशे नामग्रहण'मितिन्यायेनौघपदमात्रं प्रयुक्तम् । अथवा परप्रकाशानन्द-नाथाद्याः सप्त परमगुरवो गगनानन्दनाथाद्या अष्टौ परापरगुरवो भोगानन्दनाथा-द्याश्चत्वारोऽपरगुरव इत्योघत्रयं दिव्यादिपदवाच्यम् । इदंच कामराजसंतानाभिप्रा-

तेषु दृष्ट्वोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् ।
तत्र श्रीललितादेवीकटाक्षाक्षेपनोदिताः ॥ ३८ ॥
उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।
अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ॥ ३९ ॥
श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी ।
सर्वे ते विस्मयं जग्मुर्यें तत्र सदसि स्थिताः ॥ ४० ॥
ततः प्रोवाच ललिता सदस्यान्देवतागणान् ।
ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम् ॥ ४१ ॥

येणोक्तम् । लोपामुद्रासंतानभेदेन विद्याभेदेन च मित्रेशानन्दनाथादीनि बहून्योघत्रयाणि ज्ञानार्णवादिषु द्रष्टव्यानि । दिव्यादिगुरुक्रमस्तु गुरूपदेशादवगन्तव्यः । तत्र सर्वेषामिति संख्याविशेषो महौघपर्यायः । बहुवचनमप्यनन्तानन्तपरम् । यजुर्वेदसंख्याप्रायपाठे परार्धायस्वाहेत्यस्योत्तरमुषसेस्वाहेत्यारभ्य सर्वस्मैस्वाहेत्यन्ता अष्टौ मन्त्राः श्रूयन्ते । तत्रत्याश्चोषआदयः शब्दाः संख्याः प्रायपाठात्क्षलक्षगुणोत्तरसंख्यावाचका वक्तव्याः । तदयं संग्रहः—'उषोव्युष्टिस्तथोदेष्यन्नुद्यन्नुदित एव च । स्वर्गो लोकश्च सर्वश्चेत्येवमाम्नायते श्रुतौ । एताः परार्धात्परतः संख्या लक्षगुणोत्तराः ॥' इति । एवंसति रामायणैकवाक्यतापि लभ्यते । रामायणीयमहाशङ्खोज्यौतिःशास्त्रीयपरार्धपर्यायत्वात् । सतिसंभवे स्मृतेर्मूलान्तरं गवेषणाया अयोगात् । नचैवं सर्वपदस्य संज्ञारूपत्वेन सर्वनामतानापत्तिः । सर्वनामपदस्यान्वर्थकतया चरमसंख्यावाचकस्यापि सर्वपदस्य समस्तवाचकतया तदुपपत्तेः । अतएव श्रुतावपि स्यादेशश्चतुर्थ्या उपपद्यते । तस्य छान्दसत्वे तु प्रकृते सुडागमोऽपि तथैवेति ज्ञेयम् ॥ ३७ ॥ विश्वकर्मशास्त्रे 'नृपस्य दक्षपुत्रस्य वामभागेऽष्टमश्चिणः' इत्यादिरीत्योक्तं क्रममनतिक्रम्य यथाक्रमम् । अत्र स्वशब्दं आत्मनि वाच्ये पुंलिङ्ग एवेति प्रकृते वाग्देवतात्मपरोऽपि स्वकृतैरित्यत्र पुंलिङ्ग एव भवति, सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वा ॥ ३८ ॥ ३९ ॥ ते सर्वे ब्रह्माणीप्रभृतयोऽपि । प्रसादविस्मययोर्मूलं तु शब्दार्थयोरलंकारादिपुष्टिरदोषता । यथा विष्णुसहस्रनामादिषु 'क्षेत्रज्ञोऽक्षर एवचे'त्यादौ निरर्थकाव्ययप्रयोगः शतावधिनाम्नां द्विरुक्तिः केषांचित्त्रिरुक्तिश्चतुरुक्तिश्च न तथेह स्तोभप्रयोगः पुनरुक्तिर्वा । यद्यपि भगवत्पादैर्भाष्ये तत्रार्थभेदो वर्णितस्तथाप्यर्थभेदेन नाम्नां भेदाङ्गीकारो नानार्थोच्छेदाद्यापत्त्याऽनन्यगतिकः । अर्थभेदेऽप्युच्चारणभेदादपि भेदापत्तिश्च । तथा चक्ररहस्यमन्त्रोद्धारादिरूपरहस्यार्थान्तराणामपि चमत्कृतानीति । तानिच यद्यपि गुरुमुखादेव वेद्यानि तथापि विद्वच्चित्तचमत्कारार्थं क्वचित्क्वचिदर्थान्तराणि तत्रतत्र दिङ्मात्रेण प्रदर्शयिष्यामः ॥ ४० ॥ सदसि स्थितान्सदस्यान्प्रति प्रोवाच । विस्मयनिरासार्थमिति शेषः ॥ ४१ ॥ अथ पञ्चभिः श्लोकैरम्बावाक्यम् । ममाज्ञयैव ननु स्वप्रतिभामात्रेण । अतो नात्र विस्मयः कर्तव्य इति

अङ्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः ॥ ४२ ॥
तत्पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये।
प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम् ॥ ४३ ॥
इदं नामसहस्रं मे यो भक्तः पठते सकृत्।
मम प्रियतमो ज्ञेयस्तस्मै कामान्ददाम्यहम् ॥ ४४ ॥
श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम्।
पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये ॥ ४५ ॥
मामर्चयतु वा मा वा विद्यां जपतु वा न वा।
कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा ॥ ४६ ॥
मत्प्रीत्या सकलान्कामाँल्लभते नात्र संशयः।
तस्मान्नामसहस्रं मे कीर्तयध्वं सदादरात् ॥ ४७ ॥

हयग्रीव उवाच।

इति श्रीललितेशानी शास्ति देवान्सहानुगान् ॥ ४८ ॥
तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः।
शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम् ॥ ४९ ॥
पठन्ति भक्त्या सततं ललितापरितुष्टये।
तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने ॥ ५० ॥

भावः ॥ ४२ ॥ अयं प्राथमिको विधिः। पूर्वोक्तस्त्वेतदनुवादरूपोऽपि वक्तृश्रोतृभेदाद्विधिरेव। अतएव पुनःश्रवणस्यानन्यपरत्वाभावेन शाखाभेदेन पुनःश्रुताग्निहोत्रविधीनामिव न कर्मभेदकत्वम्। संप्रदायः प्रवर्तनीय इति विधत्ते। भक्तेषु श्रीविद्यादीक्षितेषु ॥ ४३ ॥ वक्ष्यमाणेषु काम्यप्रयोगेषु सतिसंभवे स्तोत्रावृत्तिः कर्तव्येति विधत्ते—इदमिति। यः सकृदेकवारमपि पठति तस्मै कामान्ददामि किमुत बहुवारमित्यनया भङ्ग्या काम्यप्रयोगेष्वावृत्तिविधानाभावेऽप्यस्यैवावृत्तिविधाने तात्पर्यं दाक्षायणयज्ञविधिवत्। अन्यथा होमविधेरग्रबिन्दुनिपातमात्रेण शास्त्रार्थसिद्धिवत्सकृत्पाठेनैव तत्सिद्धिरावृत्तौ मानाभावात्परिसंख्यायार्थं सकृत्त्वविधानस्य वैयर्थ्यापातात् ॥ ४४ ॥ प्रथमविधावुक्तस्य सदातनत्वस्योपसंहारार्थमाह—श्रीचक्र इति। 'उपलक्षणमापाये ऽप्युपलक्ष्यानपायः' इति न्यायबललभ्यमर्थमाह ॥ ४५ ॥ अशक्तस्य जपार्चनादेः फलमितएव लभ्यमित्याह ॥ ४६ ॥ स्पष्टम् ॥ ४७ ॥ अथ अध्युष्टश्लोकैर्हयग्रीववाक्यम्। यद्यप्युपान्त्यश्लोकान्तमेतद्वाक्यमेव, तथापि मध्ये ध्यानश्लोकः प्रक्षिप्त इति वदन्तीत्येवमुक्तम्। अम्बाया वचनमुपसंहरति। भगवतीच्छारूपायाः शासनाज्ञापरपर्यायप्रवर्तनाय नित्यत्वाच्छास्तीति प्रवर्तमाननिर्देशोऽप्युपपद्यते। 'आकुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्ति'मितिवत् ॥ ४८ ॥ निगमयति-तदाज्ञयेति ॥ ४९ ॥ तत्र हेतुं प्रवक्ष्यामीत्युपक्रान्तमर्थमुपसंहरन्नेव संगतिदर्शनपूर्वकशिष्यावधानाय प्रतिजानीते ॥ ५० ॥

आवश्यकत्वे हेतुत्वे मया प्रोक्तो मुनीश्वर ।
इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु ॥ ५१ ॥

अथ ध्यानश्लोकः ।

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम् ॥ ५२ ॥

आवश्यकत्व इति ॥ ५१ ॥ अस्य श्रीललितासहस्रनामस्तोत्रमालामन्त्रस्य । वशिन्यादिभ्यो वाग्देवताभ्य ऋषिभ्यो नमः शिरसि १ । अनुष्टुप्छन्दसे नमः मुखे २ । श्रीमहात्रिपुरसुन्दर्यै देवतायै हृदये ३ । क बीजाय नाभौ ४ । स शक्तये गुह्ये ५ । ह कीलकाय पादयोः ६ । चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगाय सर्वाङ्गे ७ । कूटत्रयं द्विरावृत्य बालावा षडङ्गद्वयम् । अथ 'ऋषिर्गुरुत्वाच्छिरसि ध्येयत्वाद्देवता हृदि । छन्दोऽक्षरत्वाज्जिह्वायां न्यस्तव्यं मन्त्रवित्तमै'रित्यादिरीत्या ऋषिन्यासस्थानानि प्रपञ्चसारोक्तानि । शैवशाक्तादिभेदेन न्यासे मुद्राविशेषाः पदार्थादर्शोक्तास्तत्तद्वासनाश्च जपप्रकरण एवास्माभिर्विवृता इति नेह लिख्यन्ते । माणिक्यशब्दात्तस्येदमित्यणि अर्शआद्यच् । ततश्च माणिक्यकिरीटवति मौलौ स्फुरन् शोभमानस्तारानायकश्चन्द्र एव शेखरः शिरोभूषणं यस्यास्ताम् । उत्तमपरो वा मौलिशब्दः । माणिक्यश्रेष्ठवत्स्फुरन्नित्यादि पूर्ववत् । आसमन्तात्पीनौ पुष्टौ वा 'ऊधस्तु क्लीबमापीन'मिति कोशादूधोवद्वा वक्षोरुहौ यस्यास्ताम् । अलिभिर्भ्रमरैः पूर्णं रत्नमयं चषकं वाटीम् । 'चषकं च कटोरी च वाटिका खारिका तथा । कचोली गाथिका चेति नामान्येकार्थकानि वै ॥' इति रत्नसमुच्चयेऽभिधानात् तदन्तर्गतस्य मधुनः सुगन्धित्वान्मधुपूर्णता । यद्वा 'अलिः सुरापुष्पलिहो'रिति हैमकोशान्मद्यमलिपदवाच्यं रत्नं घटे तेष्ठति एतादृशो रक्तचरणः पद्मभो द्रवो यस्यास्तामिति एवं परिभाषायां चतुर्भिः श्लोकैः सहस्रनाम्नः प्रथमो भागो विवृत इति शिवम् ॥ ५२ ॥

इति श्रीभास्करानन्दकृते सौभाग्यभास्करे । उपोद्घातपरैः श्लोकैः प्रथमा तपिनीकला ॥१॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीमन्नृसिंह-
यज्वचरणाराधकेन भारत्युपनामकश्रीमद्भंभीररायदीक्षितसूरिसूनुना
भास्करारायेण भास्करानन्दनाथेतिदीक्षानामशालिना प्रणीते
सौभाग्यभास्करे ललितानामपरिभाषामण्डलभाष्ये
उपोद्घातप्रकरणं नाम प्रथमा कला ।

अथ प्रथमशतकं नाम द्वितीया तापिनीकला

अथ परिभाषामण्डले नामारम्भकवर्णानेव विभाजकोपाधीकृत्य द्वात्रिंशद्विधानि वक्ष्यमाणानि नामानि विवेचयितुमेकपञ्चाशन्मातृकासु ग्राह्यवर्णान्विचिनोति—**अक्षु शराच्छरवर्णास्ततः समानन्तिमौ कचयोः। अथ मध्यान्यांस्तपयोर्द्वितीयमन्त्ये त्यजेन्नवमम्॥ ५॥** अक्षु षोडशस्वराणां मध्ये शरात् प्राथमिकपञ्चाक्षराणि गृहीत्वा। ल्यब्लोपे पञ्चमी। शरवर्णान् षष्ठादिदशमान्तान् पञ्चवर्णांस्त्यजेत्। ततः अवशिष्टानामेकादशादिषोडशान्तानां मध्ये समान् द्वादशचतुर्दशषोडशान्। कचयोः कवर्गचवर्गयोः अन्तिमौ घकारङकारौ झकारञकारौ च। अथानन्तरे टवर्गे मध्यान्यान् डकारभिन्नांश्चतुरो वर्णान्। तपयोः तवर्गपवर्गयोः द्वितीयं थकारं फकारं च। अन्त्ये यवर्गीयदशाक्षरेषु नवमं लकारं त्यजेत्। तत्तदक्षरादिनामधेयानामभावादिति भावः॥ ५॥ अतएव 'द्वात्रिंशद्भेदभिन्ना या तां वन्देऽहं परात्परा'मिति सूतसंहितोक्तिरेतत्परेत्याशयेनाह—**इत्थं शिष्टानुष्टुब्वर्णारब्धेषु नामसु तु संख्याः। अर्वनटत्रिद्विषेवैकद्वीचतुःकंजपानवरधीराः॥ ६॥** इत्थं एकोनविंशतिवर्णानां त्यागेनावशिष्टा अनुष्टुब्वर्णाः द्वात्रिंशत्संख्यान्यक्षराणि तैरारब्धेषु नामसु संख्यां वक्ष्म इत्यर्थः। तदेवाह सार्धेन। अत्रैकैकं पदमेकैकाक्षरादिनाम्नां संख्येति क्रमः। तथाहि। अर्व, अकारादीनि नामानि चत्वारिंशत् ४०॥ नट, आकारादीनि दश १०॥ त्रि, इकारादीनि त्रीणि ३॥ द्वि, ईकारादीनि द्वे २॥ इषु उकारादीनि पञ्च ५॥ इषुशब्दस्य बाणपरत्वेन तदर्थकत्वात्॥ एक, एकारादि नामैकम् १॥ द्वि, ओकारादीनि द्वे॥ चतुः, अंकारादीनि चत्वारि ४॥ कंज ककारादीन्येकाशीतिः ८१॥ पान, खकाराद्येकम् १॥ पकारात्पूर्वं नकारीयविन्दुलेखस्तु छन्दोनुसारादनिष्टाभावाच्चोक्तः॥ वर, गकारादीनि चतुर्विंशतिः २४॥ धीरः, चकारादीन्येकोनत्रिंशत् २९॥—**किंधूपद्विस्तम्भछलभयमांसे पदे वरः सङ्गः॥ प्रकटगयाजलवाटीधुसिधर्मे माखखोल्कटीकाधीः॥ ७॥** किं, छकारात्मकं नाम १॥ धूप, जकारादीन्येकोनविंशतिः १९॥ द्वि, डकारादीनि द्वे २॥ स्तम्भ, तकारादीनि षट्चत्वारिंशत् ४६॥ छल, दकारादीनि सप्तत्रिंशत् ३७॥ भय, धकारादीनि चतुर्दश १४॥ मांसे, नकारादीनि पञ्चसप्ततिः ७५॥ पदे, पकारादीन्येकाशीतिः ८१॥ वरः, वकारादीनि चतुर्विंशतिः २४॥ सङ्गः, भकारादीनि सप्तत्रिंशत्, ३७॥ प्रकट, मकारादीनि द्वादशोत्तरशतम् ११२॥ गया, यकारादीनि त्रयोदश १३॥ जल, रेफादीनि नामान्यष्टत्रिंशत् ३८॥ वाटी, लकारादीनि चतुर्दश १४॥ धुसि, वकारादीन्येकोनाशीतिः ७९॥ धर्मे, शकारादीन्येकोनषष्टिः ५९॥ मा, षकारादीनि पञ्च ५॥ खखोल्क, सकारादीनि द्वाविंशत्युत्तरशतम् १२२॥ टीका, हकारादीन्येकादश ११॥ धीः, क्षकारादीनि नव ९॥ नामानीत्यर्थः॥ ७॥—**इत्थं नामसहस्रं साधकलोकोपकारकं विहितम्। गुणगणसद्भावाभावावाश्रित्य ब्रह्मणोऽस्वायाः॥ ८॥** इत्थं पूर्वोक्तप्रकारेण। साधकानां तत्तन्मातृकाभिमान्यमूर्ताकर्षिणी-

न्द्राण्यदिक्षमावत्सन्तदेवताः सिषाधयिषूणां लोकानामुपकारकमस्माभिर्विहितमुक्तमित्यर्थः । तत्तदक्षरारब्धनामसंख्याज्ञानेन सद्यः पापाद्विमुच्यत इति । अत्र श्रीमातृशब्देन ललिताम्बाया इव मातृकासरस्वत्यास्तदभिन्नानामप्यमृतादीनामपि संग्रह इति सुवचम् । अथवा देव्या अनन्तेषु नामसु शीघ्रं साधकोपकारकत्वेन कृष्णान्येव नामानि वाग्देवताभिरिह संगृहीतानीत्यर्थः । ननु निर्गुणे ब्रह्मणि धर्मलेशराहित्याद्गुणक्रियाजातिरूढीनां शब्दप्रवृत्तिनिमित्तानामसंभवाच्चतुष्टय्यपि शब्दानां प्रवृत्तिर्न तत्र युज्यत इत्यत आह—**गुणगणेति** । ब्रह्मणोऽम्बाया इति समानाधिकरणे षष्ठ्यौ ॥ ८ ॥ अयं भावः—ब्रह्म द्विविधं । सकलं निष्कलं चेति । 'द्वे ब्रह्मणी वेदितव्ये परं चापरं चे'ति श्रुतेः स्मृतेश्च । तत्र सकलमपरम् । तद्द्विविधं । जगन्नियामकं जगदात्मकं चेति । तदुक्तम् 'जगन्नियन्ता जगदात्मकश्चे'ति । अन्यत्रापि–'शिवः कर्ता शिवो भोक्ता शिवः सर्वमिदं जगत्' इति । 'देवी दात्री च भोक्त्री च देवी सर्वमिदं जगदि'ति च । 'स्थितिसंयमकर्त्री च जगतोऽस्य जगच्च स' इति च । 'सोऽकामयत बहु स्यां प्रजायेये'ति श्रुतिश्च । अकामयतेति निमित्तताया बहु स्यामिति परिणाम्युपादानतायाश्च प्रतीतेः । 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा'दित्यधिकरणे 'आत्मकृतेः परिणामादि'ति ब्रह्मसूत्रं च । तत्र जगदात्मकं ब्रह्म चराचरभेदाद्द्विविधम् । द्विविधमपि हिरण्यगर्भादिभेदाद्दियदादिभेदाच्चानेकविधम् । जगन्नियन्त्रपि नियमनस्य सृष्टिस्थितिलयतिरोधानानुग्रहभेदेनानेकविधत्वाद्ब्रह्मविष्णुरुद्रादिभेदेनानेकविधमेव । तेष्वप्येकैकस्य भक्तानुजिघृक्षया तत्तद्वासनानुसारेण कार्यभेदेन च गृहीतानां रूपाणामनन्तत्वात्तत्तद्विशिष्टवेषेणानन्त्यमेव । तदुक्तं सुप्रभेदे–'यतीनां मन्त्रिणां चैव ज्ञानिनां योगिनां तथा । ध्यानपूजानिमित्तं हि तनूर्गृह्णाति मायया' इति । कालिकापुराणे 'मायैका भिन्नरूपेण कमलाख्या सरस्वती । सावित्री सा च संख्या च भूता कार्यस्य भेदतः' इति । बृहन्नारदीयेऽपि जगत्कर्त्रीं शक्तिं प्रकृत्य 'उमेति केचिदाहुस्तां शक्तिं लक्ष्मीं तथा परे । भारतीत्यपरे चैनां गिरिजेत्यम्बिकेति च ॥ दुर्गेति भद्रकालीति चण्डी माहेश्वरीति च । कौमारी वैष्णवी चेति वाराहीति तथा परे ॥ ब्राह्मीति विद्याविद्येति मायेति च तथा परे । प्रकृतिश्च परा चेति वदन्ति परमर्षयः' इति । श्रुतिश्च–'एकधा बहुधा चैव दृश्यते जलचन्द्रव'दिति । देवीपुराणे 'देव्या वा एष सिद्धान्तः परमार्थो महामते । एषा वेदाश्च यज्ञाश्च स्वर्गश्च सकलं जगत् ॥ देव्या व्याप्तमिदं विश्वं जगत्स्थावरजंगमम् । इज्यते पूज्यते देवैरन्नपानात्मिका च सा ॥ सर्वत्र शांकरी देवी तनुभिर्नानाभिश्च सा । वृक्षेषूर्व्यां तथा वायौ व्योम्यप्स्वग्नौ च सर्वशः' इति । निष्कलं त्वेकविधमेव । तदेतत्सर्वं कूर्मपुराणे हिमवन्तंप्रति देवीवाक्येन स्पष्टीकृतम्–'अशक्तौ यदि मां ध्यातुमैश्वरं रूपमव्ययम् । तदा मे सकले रूपे कालाद्येऽनन्तभेदिनि ॥ यदेव रूपं मे तात मनसो गोचरस्तव । तन्निष्टस्तत्परो भूत्वा तदर्चनपरो भव ॥ यत्तु मे निष्कलं रूपं चिन्मात्रं केवलं शिवम् । सर्वोपाधिविनिर्मुक्तमेकमेवामृतं परम् ॥ ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पद'मिति । एवंस्थिते सगुणे ब्रह्मणि शक्त्या शब्दानां प्रवृत्तिर्निराबाधैव । प्रवृत्तिनिमित्तभूतानां धर्माणां सत्त्वात् । निर्धर्मके तु शब्दा लक्षणया

प्रवर्तन्ते । विशिष्टकेवलयोस्तादात्म्यरूपस्य शक्यसंबन्धस्य संभवात् । निर्गुणे मिथ्यारूपस्य संबन्धस्य स्वीकारेऽपि स्वसमानसत्ताकधर्मशून्यत्वरूपनिर्धर्मकताया ब्रह्मणोऽनपायात् । अतीतानागतघटादिविषयकज्ञानीयविषयतासंबन्धस्येवान्यतरस्मिन्संसृष्टत्वमात्रेणैव तादात्म्यस्यापि संबन्धत्वाङ्गीकारसंभवाद्वा । अतएव त्रिंशत्यां वक्ष्यते 'लक्ष्यार्थलक्षणागम्ये'ति । अनया च रीत्या भगवत्या नामान्यनन्तान्येव । वक्ष्यतिच हयास्यः 'देवीनामसहस्राणि कोटिशः सन्ति कुम्भजे'ति । सौरसंहितायां याज्ञवल्क्यंप्रति मायां प्रकृत्य सूर्यवचनम् 'अस्या नामान्यनन्तानि तानि वर्णयितुं मया । न शक्यानि मुनिश्रेष्ठ कल्पकोटिशतैरपी'ति । देवीभागवतेऽपि 'असंख्यातानि नामानि तस्या ब्रह्मादिभिः सुरैः । गुणकर्मविधानाद्यैः कल्पितानि च किं ब्रुवे'इति । किंबहुना शब्दमात्रं ब्रह्मपरम् । अतएव प्रकृतेऽपि कानिचिन्नामानि जीवावस्थाभेदपराणि दृश्यन्ते विश्वरूपा तैजसात्मिकेत्यादीनि । कानिचित्तु जीवविशेषणपराणि मालिन्यादीनि । स्थावरविशेषणपराणि मह्यादीनि । सगुणब्रह्मविशेषणपराणि मुकुन्देत्यादीनि । तत्तच्छक्तिपराणि रमेत्यादीनि । तत्तदवतारविशेषकृतगुणक्रियादिघटितानि भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणीत्यादीनि । निर्गुणब्रह्मपराणि परंज्योतिरित्यादीनि दृश्यन्ते । एवमन्येऽपि बहवो भेदा ऊह्याः । एवं सति यद्यपि शब्दजातं सर्वमपि देवीनामैवेति सहस्रनामगणनप्रयासो व्यर्थ एव, तथापि तेषु यैर्यैर्नामभिस्तावत्पुरातना महामहिमानो देवीभक्ता देवीं स्तुत्वा प्रसादितवन्तः स्वान्मनोरथान् साधितवन्तो देवीमुखान्नाम्नोऽस्य माहात्म्यं भवत्विति वरान्दापितवन्तः स्वयमेव वा वरान् दत्तवन्तस्तान्येव नामानि संग्रहीतुं गणनाप्रयासः सार्थकः । सचान्येष्वपि सहस्रनामसु तुल्य एव । अस्य तु तेभ्योऽपि महत्त्वमधिकजनपरिग्रहदार्ढ्यच्छीघ्रफलकत्वेतरासाध्यफलकत्वादिभिर्बहुभिर्हेतुभिरिति तु पूर्वमेव व्यक्तीकृतमुत्तरत्रापि करिष्यते । तदेतत्सर्वमभिप्रेत्योक्तं विष्णुधर्मोत्तरे 'एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम । नाम्नां बहुत्वं लोकानामुपकारकरं शृणु ॥ निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् । विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम ॥ यच्छक्तिमन्नाम यस्य तत्तस्मिन्नेव वस्तुनि । साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुष्वि'ति । तेनेदमपि सिद्ध्यति । अन्नकामोऽन्नदायै नम इति, वसुकामो वसुदायै नम इति, भीतो भयापहायै नम इति, बद्धो बन्धमोचिन्यै नम इति जपेदित्यादि । यद्यपि वायुपुराणे 'अरण्ये प्रान्तरे वापि जले वापि स्थलेऽपि वा । व्याघ्रकुम्भीरचोरेभ्यो भयस्थाने विशेषतः ॥ स्वपंस्तिष्ठन्व्रजन्मार्गे प्रजपन्भोजने रतः । कीर्तयेत्सततं देवीं स वै मुच्येत बन्धनादि'ति देवीनामकीर्तनसामान्यस्यैव बन्धनिवर्तकत्वमुक्तम् । वामकेश्वरतन्त्रेऽपि 'मनसा संस्मरत्यस्या यदि नामापि साधकः । तदैव मातृचक्रस्य विदितो भवति प्रिये' इति नामस्मरणसामान्यस्य मातृचक्रान्तं प्रसिद्धिः फलमुक्तम् । तथापि चतुर्धाकरणन्यायेन विष्णुधर्मोत्तरवचनेनैतेषामुपसंहारादत्रत्यो नामशब्दो भयापहेत्यादिनामविशेषपरत्वेन व्यवतिष्ठते । अतएव नामविशेषाश्रयेण फलविशेषः काशीखण्डे स्मर्यते 'उमानामामृतं पीतं येनेह जगतीतले । न जातु जननीस्तन्यं स

पिबेत्कुम्भसंभव ॥ उमेति द्व्यक्षरं मन्त्रं योऽहर्निशमनुस्मरेत् । न स्मरेच्चित्रगुप्तस्तं कृत-पापमपि द्विजे'त्यादि । नन्वेवंसति फलश्रुतौ सर्वफलकत्वोक्तेरप्यनेनैव न्यायेनोप संहारः प्रसज्जते । ततश्च सर्वरोगप्रशमनीमित्यादिना वक्ष्यमाणस्य सर्वफलप्रदत्व-वचनस्य नातीव सार्थक्यम् । नचार्थवादत्वेन सार्थक्यम् । वेदे तथा सुवचत्वेऽपि पुराणेष्वसंभवात् । तदुक्तं बृहन्नारदीये 'पुराणेष्वर्थवादत्वं ये वदन्ति द्विजाधमाः । तैरर्जितानि पुण्यानि तद्वदेव भवन्ति वै ॥ समस्तकर्मनैर्मूल्यसाधनानि नराधमः । पुराणान्यर्थवादानि ब्रुवन्नरकमश्नुते' इत्यादीति चेत् । मैवम् । तत्तन्नाम्नां शक्तिभेदेन फलभेदे सिद्धे तत्समष्ट्यनुवादकत्वेन तत्सार्थक्यसंभवात् । नचानुवादस्याप्यर्थानुवा-दान्तःपातित्वेनोक्तनिषेधवाक्यविरोधः । तत्रत्यार्थवादपदस्यात्मवपोत्खेदनादिवा-क्यसमानयोगक्षेमगुणवादपरत्वात् । 'प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजे'दित्यादौ शिलात्वे सत्येव शिलाबुद्धिनिषेधस्य शिलान्तरसाधारणदेवतानाविर्भावबुद्धिनिषेधपर-त्ववत् । वस्तुतस्तु 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासा'विति वाक्यस्य 'दर्शपूर्णमासा-भ्यां स्वर्गकामो यजेते'त्यनेन फलांशे नोपसंहारः । 'न हिंस्यात्सर्वा भूतानी'ति निषे-धस्य 'न ब्राह्मणं हन्या'दित्यनेनापि नोपसंहार इति सिद्धान्तः । विशेषाकाङ्क्षायां सत्यामेवोपसंहारावतारात् । अनयोर्विधिनिषेधयोः सर्वपदघटितत्वेन विशिष्यविशि-ष्यैव सर्वेषां फलानां प्राणिनां चोपस्थित्या भावनान्वये कीदृशं फलं किंजातीयः प्राणीति विशेषाकाङ्क्षाया अनुदयात् । तदुक्तं तन्त्रवार्तिके 'सामान्यविधिरस्पष्टः संहि-येत विशेषतः । स्पष्टस्य तु विधेर्नान्यैरुपसंहारसंभवः' इति । तथाच प्रकृतेऽपि सर्वेभ्यः कामेभ्य एकैकं नामेति विधिपर्यवसानस्यावश्यकत्वात् 'यच्छक्तिमन्नाम यस्ये'ति विष्णुधर्मोत्तरवचनस्य पाद्मवायवीयदेवीनामसामान्याश्रितविष्ण्युपसंहारकताया नामांशे स्वीकारेऽपि फलांशे तदस्वीकारः । सर्वपदघटितस्यैव विधिपर्यवसा-नस्य बहुभिर्वचनैः सिद्धत्वात् । तथाच देवीवचनम् 'कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा । मत्प्रीत्या सकलान्कामाँल्लभते नात्र संशयः' इति । कालिकापुराणेऽपि 'ये स्तुवन्ति जगन्मातर्भवतीमम्बिकेति च । जगन्मयीति मायेति सर्वं तेषां प्रसिध्यति' इति । विष्णुपुराणे देवीं प्रति विष्णुवचनम् । 'ये त्वां मायेति दुर्गेति वेदगर्भाम्बिकेति च । भद्रेति भद्रकालीति क्षेम्या क्षेमंकरीति च । प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्र-मूर्तयः । तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यती'ति । याज्ञवल्क्यस्मृतौ 'विना-यकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम् । दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं विनिवेदयेदि'ति विधायोपस्थानमन्त्रं लिङ्गं च स्मर्यते 'रूपं देहि यशो देहि भगं भगवति देहि मे । पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे' इति । देवीभागवतेऽपि 'न तदस्ति पृथिव्यां वा दिवि प्राप्यं सुदुर्लभम् । प्रसन्नायां शिवायां यदप्राप्यं नृपसत्तम ॥ ते मन्दास्तेऽतिदुर्भाग्या रोगैस्ते समुपद्रुताः । येषां चित्ते न विश्वासो भवेदम्बार्चना-दिष्विति । हरिवंशेऽपि 'ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्याग्निमारुताः । अश्विनौ वस-वश्चैव विश्वे साध्यास्तथैव च । महेन्द्रः सहपर्जन्यो धाता भूमिर्दिशो दश । गावो नक्षत्रवंशाश्च ग्रहा नद्यो ह्रदास्तथा । सरितः सागराश्चैव नानाविद्याधरोरगाः । तथा

नागाः सुपर्णाश्च गन्धर्वाप्सरसां गणाः । कृत्स्नं जगदिदं प्रीतं देवीनामानुकीर्तनादि'-ति । नचैवं पर्यवसन्नस्य विधेरन्नदा-वसुदादिनामभेदेन बहुरूपत्वात्सर्वेभ्यः कामेभ्योऽन्नदेति नाम कीर्तयेदिति विधिनैव सिद्धे विष्णुधर्मोत्तरीयस्य 'अन्नकामोऽन्नदेति नाम कीर्तये'दिति विशेषविधेर्वैयर्थ्यापत्तिरिति वाच्यम् । अस्य पर्यनुयोगस्य स्वर्ग-कामविधावपि तुल्यत्वात् । अनेन विधिनैव स्वर्गफलकत्वं ज्ञात्वानुष्ठाने स्वर्गो नान्यथेत्यभ्युदयशिरस्कत्वादिरूपसमाधानस्यापि तुल्यत्वात् । परमार्थतस्तु तन्त्राणां स्मृतित्वाविशेषेऽपि मन्वादिस्मृतीनां कर्मकाण्डशेषत्वं, तन्त्राणां तु ब्रह्मकाण्डशेषत्वमिति सिद्धान्तादुत्तरगीमांसीयदेवताधिकरणन्यायेन देवताविग्रहादेरुत्पत्त्यधिकरणीकारात्तत्तत्कामनापूरकत्वादिगुणकं ब्रह्म ध्यातव्यमिति द्योतनमेव विशेषविधेः प्रयोजनम् । तथाच श्रुतिः 'अन्नादो वसुदानो विन्दते वसु य एवं वेदे'ति । अन्नमासमन्तादत्त इत्यन्नादः । वसुनो धनस्य दानं यस्मात्स वसुदानश्च परमेश्वरस्तमेवंप्रकारेण यो वेदोपास्ते स वसु अन्नं च विन्दत इति तदर्थात् । किंच । अन्नदायै नम इति मन्त्रेण सार्वकाम्यवचनेन भयहरणकामप्रयोगे क्रियमाणे गौणमुख्याधिकरणन्यायेन तस्य मन्त्रस्य जघन्यवृत्त्या भयापहृत्वप्रकारकस्मृतिजनकतायाः सिद्धत्वेऽप्यन्नकामप्रयोगे मुख्यवृत्त्यैवान्नप्रदत्वप्रकारकस्मृतिजनकतया देवताया अपि झडित्यर्थोपस्थितिस्तत्प्रसादोऽपि झडित्येव स्यादिति विशेषद्योतनमपि प्रयोजनम् । अतएव स्कान्दे सूतगीतायां नामसु गौणमुख्यभेदेन फलभेदः स्मर्यते 'नामानि सर्वाणि तु कल्पितानि स्वमायया नित्यसुखात्मरूपे । तथापि मुख्यास्तु शिवादिशब्दा भवन्ति संकल्पनया शिवस्य ॥ मुख्यशब्दजपतो मुनीश्वराः सत्यमेव परमेश्वरो भवेत् । तस्य वक्त्रकमले सदाशिवो नृत्यतिस्म परमेशया सहे'त्यलं विस्तरेण ॥ इदानीं छलाक्षरसूत्रोक्तरीत्यैव प्रतिनामधेयमक्षराणि संचिख्यासुः श्लेषेण गुरुं प्रणमयति—**मन्त्राद्यो जयति गुणी नवचरणस्त्रिंशदर्धाभः । एकार्धत्रयदेहो भूमदहारीतसत्पालेशः ॥ ९ ॥** मन्त्राणामाद्यो मूलकारणं श्रीगुरुसार्वभौमो जयति सर्वोत्कर्षेण वर्तते । 'मोक्षस्य मूलं यज्ज्ञानं तस्य मूलं महेश्वरः । तस्य पञ्चाक्षरो मन्त्रो मन्त्रमूलं गुरोर्वचः' इति वचनात् । तमेव विशेषणैर्विशिनष्टि । गुणी परमार्थतो निर्गुणोऽपि विद्यावतारसिद्ध्यर्थं स्वीकृतानेकविग्रहः । नवे नित्यनूतने चरणे रक्तशुक्लाख्ये यस्य सः । तदुक्तं 'वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् । रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः' इति । अथवा 'पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनमि'ति कोशान्नवचक्रात्मकः । त्रैलोक्यमोहनादिसर्वानन्दमयान्तचक्रराजाभिन्न इति यावत् । त्रिंशतामर्धं पञ्चदशाक्षराणि श्रीविद्यान्तर्गतानि तदाभस्तत्तुल्यः । तद्रूप इत्यर्थः । 'निरञ्जनः परमं साम्यमुपैती'ति श्रुतावभेदेऽपि तुल्यतोक्तिदर्शनात् । एको मुख्यश्चासावर्धत्रयदेहश्च अर्धं च त्रयं च । अध्युष्टमिति यावत् । तादृशी सार्धत्रिवलयाकारा कुण्डलिन्येव सर्वदेवतारूपा देह आत्मा यस्य सः । भूतुल्यो मदो महामद इत्यर्थस्तं हरति । यद्वा भूमा ब्रह्मानन्दस्तं दत्तेऽतएव हारी मनोहरः । 'यो वै भूमा तत्सुख'मिति श्रुतेः । ता जटाः ताभिः सहितः सप्तः परमशिवस्तत्पादौ लाति

आदत्ते विषयीकरोतीति सप्तपाल्ला शिवपदभक्तिः इता प्राप्ता सप्तपाल्ला येन सः अतएवेशः परमशिवः शिवभक्तिवललभ्यतदभेद इति समुदितार्थः। सा इत्येकाक्षरस्य जटावाचकत्वं 'स साः सप्ताश्वनुन्नारुणकिरणनिभाः पातु विश्वत्रिनेत्रः' इति प्रयोगे प्रसिद्धम्। आदित्यपुराणप्रसिद्धपश्चिमोदधितीरस्थसप्तकोटीश्वरनामनिर्वचनश्लोकेऽपि। 'अद्याप्यस्ति विपश्चितामपि महत्संदेहकोटिद्वयं यः श्रुत्या जगदीश्वरो निगदितः सप्तः किमसोऽथ सः। तत्रेशः प्रथमेव कोटिरिति किं निश्चायनाय स्फुटं नात्रैव प्रथितोऽभवत्परशिवः श्रीसप्तकोटीश्वरः' इति। अत्र सप्तशब्दौ सजटनिर्जटवाचिनौ सन्तौ शिवविष्णुपरौ। ईदृश्या च रीत्योत्तरश्लोकानामपि प्रकृतोऽप्रकृतो वार्थो वर्णयितुं शक्योऽपि ग्रन्थविस्तरभयात्पण्डितैरूहितुं शक्यत्वान्निष्प्रयोजनत्वाच्च तमुपेक्ष्य नामविभागपरत्वेनैव व्याख्यान्तरं प्रस्तूयते। मन्त्राद्यो जयति मन्त्राणामादावुच्चारणीयः प्रणवो जयति। 'ॐकारो वर्तुलस्तारो मन्त्राद्यः प्रणवो ध्रुवः' इति मातृकाकोशात्। कालिकापुराणे 'स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते' इत्यनेनादावन्ते चोच्चार्यत्वेन प्रणवस्य विधानात्। अतएव शाट्यायनः 'दानयज्ञतपःस्वाध्यायजपध्यानसंध्योपासनप्राणायामहोमदैवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्तये'दिति। काल्यायनोऽपि प्रणवं प्रकृत्य 'ब्रह्मारम्भे विरामे च यागहोमादिषु शान्तिपुष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु विनियोगोऽस्ये'ति। दाल्भ्यपरिशिष्टेपि 'ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म च। अनोंकृत्य कृतं सर्वं न भवेत्सिद्धिकारक'मिति। अतएव 'ॐकारेण सर्वा वाक् संतृण्णे'ति श्रुतिः। सर्वो मन्त्रः संपुटित इति तदर्थः। 'उतृदिर् हिंसानादरयो'रिति धातोः समुपसृष्टत्वे उभयमेलनार्थकतया दीर्घसोमे संतृण्णावितिविधौ 'न संतृणत्त्यसंतृण्णेहि हनु' इति निषेधेऽपि प्रयोगदर्शनात्। ननु सहस्रनामस्तोत्रस्य मन्त्रत्वे प्रणवपुटितत्वं युज्येत तदेव तु न संभवति मानाभावात्। अतएव त्रिशत्यां मन्त्रत्वस्याहत्य विधिः। 'केवलानामबुद्धिस्ते न कुम्भज। मन्त्रात्मकत्वमेतेषां नाम्नां नामात्मतापि चे'तिचेत् न। 'तच्चोदकेषु मन्त्राख्ये'त्यधिकरणे मन्त्रप्रसिद्धिविषयत्वस्यैव मन्त्रलक्षणत्वोक्तेः। अत्र च तान्त्रिकाणां मालामन्त्रत्वव्यवहारदर्शनात् 'शिवशंकररुद्रेशमहेश्वरमृडाव्यये'तिसंदर्भे तु मन्त्रप्रसिद्धभावेन नामत्वमात्रं। 'केवलं नामबुद्धिस्ते' इति त्वीदृशसंदर्भस्य परिसंख्यापकं न पुनः सहस्रनामसमाख्यातस्य। अतएव 'सहस्रनाममन्त्रोऽयं जपितव्यः शुभार्तये' इत्यादिवचनानि गणेशसहस्रनामादिषु दृश्यन्ते इत्याद्यन्तयोः प्रणव आवश्यकः। तस्य वर्णभेदेन स्वरभेदेन स्वरभेदादयः कालिकापुराणे स्मर्यन्ते 'स उदात्तो द्विजातीनां राज्ञां स्यादनुदात्तकः। प्रचितश्चोरुजातानां मनसापि तथा स्मरेत्॥ चतुर्दशस्वरे योऽसौ शेष औकारसंज्ञकः। स चानुस्वारचन्द्राभ्यां शूद्राणां सेतुरुच्यते॥ शूद्राणामादिसेतुर्वा द्विसेतुर्वा यदृच्छया। द्विसेतवः समाख्याताः सर्वार्थेव द्विजातयः' इति। द्विजातीनां ब्राह्मणानां राज्ञां क्षत्रियाणां। ऊरुजातानां वैश्यानां। मनसापीति वैश्यमात्रान्वयि। चन्द्रो नादः। सेतुः प्रणवः। द्विसेतव आद्यन्तप्रणवोच्चारणशीलाः। द्विजातयस्त्रैवर्णिका इति तदर्थः। यत्त्वार्थेवर्णब्राह्मणे

वेदभेदेन स्वरव्यवस्था श्रूयते 'स्वरितोदात्त एकाक्षर ओंकार ऋग्वेदे, त्रैस्वर्योदात्त एकाक्षर ओंकारो यजुर्वेदे, दीर्घप्लुतोदात्त एकाक्षर ओंकारः सामवेदे, ह्रस्वोदात्त एकाक्षर ओंकारोऽथर्ववेदे स सामवेदविषयिष्वेवेति नात्रोपयुज्यते ॥ एवं प्रणवं प्रदर्श्य श्रीमातेत्यादीनि त्रिषष्टिनामानि **विभज्यन्ते—गुणीत्यादिना**। यद्यप्यत्र मूलकारैः स्वशास्त्रोपयुक्तपरिभाषा न्यायमूलत्वेन विदुषां सुलभा इत्याशयेनैवीकृत्य न दर्शितास्तथापि शिष्यानुजिघृक्षयास्माभिरत्र कथ्यन्ते। 'कटपयवर्गभवैरि'ति (पृ. २ पं. २३) पूर्वोक्तश्लोके ङकारञकारयोः शून्यसंकेतः कृतः, इहतु दशत्यसंख्यायां क्रियते, तस्या एवोपेक्षणात् शून्यस्यानपेक्षणाच्च । ककारादिभिर्योतितसंख्याया आश्रयास्त्वेकैकनामान्तर्गताक्षराणि स्वरूपाणि । 'चतुरश्छयतावाद्यक्षरलोपश्चे'ति पाणिनिसूत्रे 'एष वै सप्तदशः प्रजापति'रित्यादिश्रुतिषु च संख्यायाः स्वरमात्राश्रयत्वदर्शनात्। एकद्वित्र्यादिसंख्यावाचकपदानि तु यत्र पादोऽर्धो वा विशेष्यत्वेन निर्दिश्यते तत्र तानि पादार्धात्मकनामसंख्यापराणि । यत्र च विशेष्यनिर्देशमन्तरेण प्रयुज्यन्ते तत्र समसंख्याकाक्षरनामसंख्यापराणि । तत्राप्यर्धस्यार्धयोरर्धानां वा समाप्तिपर्यन्तं यानि नामानि तत्पराण्येव न पुनस्त्रिपादपञ्चपादान्तर्गतनामपराणि । एकद्वित्रिचतुः पादाद्यन्तर्गतवर्णानां न सांकेतिकार्थं प्रयोग इति। एतदुदाहरणानि न्यायाश्चावसर एव व्यक्तीभविष्यन्ति । गुणी गकारणकारौ त्रित्वपञ्चत्वसंख्यापरौ तस्याश्च नामविशेष्यकत्वे त्रीणि पञ्च च नामानीति पर्यवसानात्तावता कतिभिरक्षरैरेकैकं नामेत्याकाङ्क्षाया अनिरासेनाकाङ्क्षितविधानं ज्याय इति सोमचयनेष्ट्यधिकरणन्यायेनाक्षराण्येव विशेष्याणि स्वीक्रियन्ते। तेषां च नामान्तरसांकर्येण विशेष्यत्वस्वीकारेऽप्युक्तदोषतादवस्थ्यादेकस्य नात्रस्त्रीण्येवाक्षराणीत्यादिरेवार्थः सिद्ध्यति । चतुरक्षरान्तर्गताक्षरत्रयस्यावयुत्यानुवादे वैयर्थ्यात्। एतेन अज्राद् इति छलाक्षरसूत्रेऽचां षोडशसु संकेतः। इयं च संख्याऽक्षरनिष्ठा, हल्भिरुक्ता संख्या तु नामनिष्ठा। ततश्च इत्युक्ते एकं नाम त्र्यक्षरमित्यर्थ इति भ्रमो निरस्तः । प्रकृते वर्णैकत्वादेवैकं नामेत्यर्थस्य लाभात्। प्रथमं नामेति तु वर्णप्राथम्यादेव सेत्स्यतीत्यंशस्तु सूत्रेष्वत्रापि समानः। नव चरणा यस्मिन्वाक्समूहे स नवचरणः। तस्य नवधा विभज्य निर्देशबलादेकैकस्य चरणस्यैकैकनामात्मकत्वं ध्वन्यते । तथाच नवशब्दोदिता संख्या नामस्वेवान्वेति नाक्षरेषु । अत्र नवशब्दान्नवत्वसंख्याया इव नकारवकारोदितदशचतुःसंख्ययोर्झडिति न प्रतीतिः । अतः प्रतीतिशैघ्र्यमान्थर्याभ्यां संख्यावाचकपदाक्षराणामिह संभूयैकार्थप्रत्यायकत्वमेव । एकत्र चरणादिशब्दसमवधानमहिम्ना संख्यावाचकशब्दानां नामधेयान्वितस्वार्थकत्वमेव नाक्षरान्वितस्वार्थकत्वमिति सिद्धे चरणादिविशेष्यसमर्पकपदाभावेऽपि नामान्वितस्वार्थकत्वं कृतं न दण्डेन पराणुद्यते। 'एकत्र निर्णीतः शास्त्रार्थोऽसति बाधकेऽन्यत्रापी'ति न्यायात्। 'आदित्यः प्रायणीयः पयसि चरु'रिति विधेरस्थालीवचनस्यापि चरुशब्दस्यादितिमोदनेनेति वाक्यशेषवशादोदनार्थकत्वे निर्णीते सौर्यं चरुमित्यादौ वाक्यशेषाभावेऽप्योदनार्थकत्वानपायात्। ईदृशासांकार्यसिद्ध्यर्थमेव चाक्षरसंख्यायां वाच्यायां गुणादिशब्दा-

न्तराणामेव प्रयोगो न पुनर्नवदशादिसंख्यापदाक्षराणामिति व्यवस्थापि सिद्ध्यति । त्रिंशदर्धाः । समांशस्याप्यंशत्वमात्रविवक्षायामनियतलिङ्गोऽर्धशब्दः । 'अर्धं नपुंसक'मिति सूत्रे कः पुनः पुंलिङ्ग इति भाष्यस्यानियतलिङ्गपरत्वेनैव कैयटेन व्याख्यानात् वा, 'पुंस्यर्धः' इति कोशाच्च । तेन षोडशषोडशाक्षराणि त्रिंशन्नामानीत्यर्थः । भकारस्य चतुरक्षरात्मकमेकं नामेति एकपदस्य तदुत्तरमेकनामेत्यर्थे सिद्धन्यायात् द्वादशाक्षरमिति सिद्ध्यति । एकस्मिन्नर्धे तावत एव परिशेषात् । अर्धात्परतोऽर्धान्तरग्रहणे तन्मध्ये नामसमाप्त्ययोगात् । 'यतिर्विच्छेदः' इति पिङ्गलसूत्रेणार्धान्तेऽवसानविधानात् । अवसानस्य च पदसमाप्तिव्याप्यत्वात् । नचार्धाच्यूनमेव नाम समाप्यतामिति वाच्यम् । तथात्वे एकपदवैयर्थ्यात् । रूपपदेन द्वादशसंख्यायां उक्तपरिभाषानुसारेण वक्तुं शक्यत्वेऽपि द्व्यक्षरैकाक्षरे नामनी इति भ्रमो माप्रसञ्जीति तथा नोक्तम् । अतएव दशाधिका संख्या पारिभाषिकानेकाक्षरसाध्यत्वान्नेह परिभाषया निर्दिश्यत इत्यपि नियमो द्रष्टव्यः । ततोऽर्धत्रयं त्रीणि नामानि । ततोऽष्टाभिरष्टाभिरक्षरैर्द्वे । ततश्चतुर्भिः पञ्चभिरष्टाभिर्द्वाभ्यां षड्भिश्चाक्षरैः षण्णामानि । ततः सप्तभिश्चरणैः सप्त । ततस्त्रिभिः पञ्चभिर्द्वे नामनी इत्येवं श्लोकार्थः ॥ ७ ॥ **अथ नाम्नामर्थः प्रस्तूयते**—तेषु स्त्रीपुंनपुंसकलिङ्गानां नाम्नां विशेषणरूपत्वेन तेषां क्रमेण चिदात्मा ब्रह्मेत्यादीनि विशेष्यसमर्पकपदानि निर्दिष्टानि । पदानुसारीण्येव हि लिङ्गानि नतु वास्तविकं ब्रह्मण्येकमपि लिङ्गं 'न स्त्री न षण्ढो न पुमानजेशितु'रिति विष्णुभागवतात् । 'न त्वमम्ब पुरुषो न चाङ्गना चित्स्वरूपिणि न षण्ढतापि ते । नापि भर्तुरपि ते त्रिलिङ्गता त्वां विना न तदपि स्फुरेदय'मिति कालिदासोक्तेश्च । अतएव देवताया ध्यानेऽप्यैच्छिक एव विकल्पः स्मर्यते । 'पुंरूपं वा स्मरेद्देवि स्त्रीरूपं वा विचिन्तयेत् । अथवा निष्कलं ध्यायेत्सच्चिदानन्दलक्षण'मिति विशेष्यनिर्देशायैव वा लिङ्गत्रयसाधारणस्य प्रणवस्यादौ प्रयोगः । तस्य च समस्तस्य ब्रह्मैवार्थः । 'ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति भगवद्वचनात् । अकारोकारमकारनादबिन्दुभिर्व्यस्तैर्ब्रह्मविष्णुरुद्रेश्वरसदाशिवानां कथनात्तत्पञ्चकरूपमिति वा । तदुक्तं बृहन्नारदीये 'अकारं ब्रह्मणो रूपमुकारं विष्णुरूपवत् । मकारं रुद्ररूपं स्यादर्धमात्रं परात्मकम् ॥ वाच्यं तत्परमं ब्रह्म वाचकः प्रणवः स्मृतः । वाच्यवाचकसंबन्धस्तयोः स्यादौपचारिकः ॥' इत्यत्र । रूपपदं वाच्यवाचकयोरभेदाभिप्रायेणाभिन्नपरम् । अतएव भेदघटितो वाच्यवाचकभावसंबन्ध औपचारिकोऽमुख्यः । व्यावहारिक इत्यर्थः । अनेनैवाशयेन पुष्पदन्तोऽप्याह 'समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पद'मिति । यज्ञवैभवखण्डे तु नानाविधा अर्था वर्णिताः 'ज्ञातार्थं ज्ञातमित्येवं वक्तव्ये सति तद्विना । ओमिति प्राह लोकोऽयं तेन ज्ञातस्य वाचकः ॥ अज्ञातार्थं तथाऽज्ञातमिति प्राप्ते तु वाचके । ओमिति प्राह लोकोऽयं तेन ज्ञातस्य वाचकः ॥ संदिग्धार्थं तु संदिग्धमिति प्राप्ते तु वाचके । ओमिति प्राह लोकोऽयं तेन संदेग्धवाचकः ॥ आकाशादिपदार्थानां ये शब्दा वाचका भुवि । विना तानखिलाञ्शब्दान् लोक ओमिति भाषते ॥ अतः प्रयोगबाहुल्यात् घटकुड्यादिशब्दवत् । आकाशादिपदा-

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।

र्थानां वाचकः प्रणवः स्मृतः । सर्वावभासकत्वेन ब्रह्मणा सदृशः स्मृतः ॥ सर्वावभासकं मन्त्रमिमं जपति यो द्विजः । सर्वमन्त्रजपस्योक्तफलं स लभतेऽचिरात् ॥' इति । बृहत्पाराशरस्मृतिरपि 'प्रणवो हि परं तत्त्वं त्रिवेदं त्रिगुणात्मकम् । त्रिदेवतं त्रिधामं च त्रिप्रज्ञं त्रिरवस्थितम् ॥ त्रिमात्रं च त्रिकालं च त्रिलिङ्गं कवयो विदुः । सर्वमेतत्त्रिरूपेण व्याप्तं हि प्रणवेन तु ॥ अग्निः सोमश्च सूर्यस्य त्रिधामेति प्रकीर्तितम् । अन्तःप्रज्ञं बहिःप्रज्ञं घनप्रज्ञमुदाहृतम् ॥ हृत्कण्ठे तालुके चेति त्रिस्थानमिति कीर्त्यते । अकारोकारमकारैस्त्रिमात्र उच्यते स तु ॥ कर्मारम्भेषु सर्वेषु त्रिमात्रं तं प्रकीर्तयेत् । स्थित्वा सर्वेषु शब्देषु सर्वं व्याप्तमनेन हि ॥ न तेन हि विना किंचिद्वक्तुं याति गिरा यतः' इति । गोपथब्राह्मणेऽपि 'ओंकारं पृच्छामः को धातुः किं प्रातिपदिकं किं नाम-ख्यातं किं लिङ्गं का विभक्तिः कः स्वरः' इत्यादिना महता खण्डेन तत्स्वरूपनिर्णयः प्रपञ्चसारे प्रणवपटले व्याख्यातृभिः पद्मपादाचार्यैरपि प्रणवार्थदीपिकादिग्रन्थान्तरे च कृतो भूयानस्य विस्तरो द्रष्टव्यः ॥ ९ ॥

लोके हि दुःखदशायां मातुः स्मरणं प्रसिद्धम् । अनुभूतास्तु मातरो न तापत्रयहरणसमर्थाः । तदुक्तमभियुक्तैः नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति प्रख्याता जनकाः कियन्त इति मे सेत्स्यन्ति चाग्रे कति । एतेषां गणनैव नास्ति महतः संसारसिन्धोर्विधेर्भीतं मां नितरामनन्यशरणं रक्षानुकम्पानिधे ॥' इति । अतो दुरन्तदुःखहरणक्षमासु सर्वोत्तमा जगन्मातैव स्वस्मिन्दयावत्त्वापादनाय मातृत्वेनैव स्तोतव्या स्तोत्रसंरम्भप्रयोजनमोक्षादिरूपफलत्वेनापि स्तोतव्येत्याशयेनाह— **श्रीति** । श्रियो लक्ष्म्या माता । श्रीरिति गौरुपलक्षणं तद्वाचकमेव वा । तथाच व्याडिकोशः 'लक्ष्मीसरस्वतीधीत्रिवर्गसंपद्विभूतिशोभासु । उपकरणवेषरचनाविद्यासु श्रीविद्ये प्रथिते'ति । तथाच श्रीगीर्जनकत्वान्नेयं तत्समानकोटिभूता रुद्राणी किंतु तत्त्रितयजनयित्री परशिवमहिषी परा भट्टारिकेत्युक्तं भवति । यद्वा श्रियं लक्ष्मीं माति परिच्छिनत्ति । परिच्छेद्यापेक्षया परिच्छेदस्याधिक्यावश्यंभावादनवधिकश्रीरूपो मोक्ष इत्यर्थः । 'सा हि श्रीरमृता सता'मिति श्रुतिप्रसिद्धम् । त्रयीं माति ब्रह्मणे बोधयति परिच्छेदेन व्यवसृजति वा । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः । प्राथमिकाभिव्यक्तिरूपा व्यासरूपा वेत्यर्थः । श्रियं विषं माति कण्ठे स्थापयतीति वा । अनयोः पक्षयोर्नाम पुंलिङ्गं भवति । शिवशक्त्योरभेदात्प्रकाशो विमर्शो वा विशेष्यः । श्रीमात्रेनम इति मन्त्रे विशेषाभावेऽप्यर्थानुसंधाने विशेषः । अथवा 'अभियुक्तानां नाम श्रीपदपूर्वं प्रयुञ्जीत । श्रीचक्रश्रीशैलश्रीविद्याश्रीफलादिकव'दिति न्यायेनाभियुक्तप्रसिद्धेर्मातेति पदमात्रस्योत्पादिकेत्यर्थः । विनिगमनाविरहात्सर्वेषामिति लाभात् । 'यतो वा इमानि भूतानि जायन्ते' इत्यधिशेषश्रुतेश्च । अतएव निरुपपदा एवेश्वरेशानादिशब्दाः परशिववाचकाः । अतश्च 'ईशानो भूत-

भव्यस्ये'त्यादाविव जगन्मातेति क्वचित्प्रतिसंबन्धिनिर्देशेऽपि मातृपदमात्रस्य त्रिपुरसुन्दरीवाचकत्वं न विहन्यते। यद्वा हसकलरङेति व्यञ्जनषट्कस्य बालायाः स्वरत्रयेणान्ते योजने कूटत्रयात्मको जायमानो मन्त्रो मातेत्युच्यते। 'माया कुण्डलिनी क्रिया मधुमती'ति मन्त्रपारायणोद्धारश्लोके मातृपदस्य तथा वृद्धैर्व्याख्यानादिति मन्त्रोद्धारपरा व्याख्यावगन्तव्या। राजशब्दान्नान्तत्वान्ङीपि कृते पश्चान्महच्छब्देन समासे 'आन्महतः' इत्यात्वे श्रीयुक्ता महाराज्ञीति मध्यमपदलोपसमासे रूपं नतु महाराजशब्दाट्टित्वान्ङीप्। तथात्वे महाराजीत्यापत्तेः। सकलप्रपञ्चजातपालनेऽधिकृतेत्यर्थः। राजशब्दशक्यतावच्छेदकनृपत्वकोटौ पालनस्य निविष्टत्वात्। तथाच श्रुतिः 'येन जातानि जीवन्ती'ति। अत्र श्रीविद्यायां निगूढस्याक्षरत्रयस्योद्धारः। तत्रैकं तावत्षोडशीकलेत्युच्यते। 'सच्छिष्यायोपदेष्टव्या गुरुभक्ताय सा कले'ति वचनात्प्रायेणाधुनिकैर्बहुभिर्गुरुमुखाज्ज्ञातम्। तच्च 'शिवः शक्तिः कामः' इति विद्योद्धारश्लोके सौन्दर्यलहरीव्याख्यानोल्लेखने प्रकटीकृतं चतुर्लक्ष्मीमनुषु प्राथमिको मन्त्र इति। इतरद्वयं प्रकाशविमर्शरूपम्। तदुक्तं संकेतपद्धतौ 'अकारः सर्ववर्णाभ्यः प्रकाशः परमः शिवः। हकारोल्लः कलारूपो विमर्शाख्यः प्रकीर्तितः॥' इति। अनयोरपि रहस्यत्वादेव 'मध्यबिन्दुविसर्गान्तः समास्थानमये परे। कुटिलारूपके तस्याः प्रतिरूपं वियत्कले'त्यादिभिर्गूढार्थैरेव श्लोकैर्योगिनीहृदये स्वरूपनिष्कर्षः कृतः। तत्प्रकाशनं चास्माभिर्वीरेश्वरसेतुबन्ध एव कृतमिति नेह प्रतन्यते। राज्ञीत्यंशेन मायाराज्ञीमन्त्रोद्धारः। अतएव न टच्प्रत्ययान्तत्वेन प्रयोगः। नृपाधिष्ठितमासनं सिंहासनमुच्यते। आसनेषु सिंहः श्रेष्ठ इत्यर्थे राजदन्तादित्वात्पूर्वनिपातः। श्रीमत्प्रपञ्चसाम्राज्यलक्ष्मीवच्च तत्सिंहासनं च तस्येश्वरी ईशित्री। सिंहाभिन्नमासनमिति वा। देव्याः सिंहासनारूढत्वात्। तदुक्तं देवीपुराणे नामनिर्वचनाध्याये 'सिंहमारुह्य कन्यात्वे निहतो महिषोऽनया। महिषघ्नी ततो देवी तथा सिंहासनेश्वरी'ति। यद्वा सिंहशब्दो हिंसार्थकः। तदुक्तं वैयाकरणैः 'हिंसिधातोः सिंहशब्दो वशकान्तौ शिवः स्मृतः। वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथे'ति। तेन सिंहेन हिंसया असनं क्षेपणं निरास इति यावत्। 'असु क्षेपणे' इति धातोर्ल्युट्। संहार इति समुदायार्थः। तत्रेश्वरी समर्था। तथा च श्रुतिः 'यत्प्रयन्त्यभिसंविशन्ती'ति। यद्वा मकारः पञ्चसंख्यापरः। सन्ति सिंहासनसमाख्याताश्चैतन्यभैरव्यादिसंपत्प्रदा भैरव्यन्ता अष्टौ मन्त्राः। तेषु त्रयं युग्मरूपं द्वयमेकैकरूपमित्येवं पञ्चैव दिव्यध्यभेदेन सिंहासनानि ज्ञानार्णवे कथितानि 'पञ्चसिंहासनगता कथं सा त्रिपुरा परा। कथयस्व महेशान कथं सिंहासनं भवे'दिति पृष्टे 'प्रथमं शृणु देवेशि ब्रह्मा सृष्टिकरो यदा। निश्चेतनोऽथ देवेशी तदा त्रिपुरसुन्दरीम्। समाराध्याभवत्कर्ता सृष्टेस्तु परमेश्वरि। ब्रह्माणं तं समाराध्य तपसा महता प्रिये। शक्रोऽभूद्देवराजोऽयं पूर्वस्यां दिशि पालकः। तदा प्रसन्ना त्रिपुरा पूर्वसिंहासने स्थिते'त्यादिना। तेषां पञ्चसिंहासनानामीश्वरीमित्यनेन मन्त्रोद्धारः। एवं त्रिभिर्नामभिः सृष्टिस्थितिलयकर्तृत्वेन ब्रह्म लक्षयित्वा प्रकृतपुराणोक्तमातृप्रादुर्भावादिकथाक्रमं प्रा-

चिदग्निकुण्डसंभूता देवकार्यसमुद्यता ॥ ५२ ॥
उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता।

येणाश्रयन्नेव तिरोधानानुग्रहापरपर्यायबन्धमोक्षप्रदत्वेनापि सप्रपञ्चं लक्षयितुमुपक्रमते—**चिदग्नीत्यादिना** शिवशक्त्यैक्यरूपिणीत्यन्तेन। चित् केवलं ब्रह्म तदेवाग्निकुण्डं अविद्यालक्षणतमोविरोधित्वात्। 'अन्तर्निरन्तरनिरिन्धनमेधमाने मोहान्धकारपरिपन्थिनि संविदग्ना'वित्यादौ चिद्वह्निरूपकप्रयोगदर्शनात्। शक्तिसूत्रमपि 'चिद्वह्निरवरोधपदे छन्नोऽपि चिन्मात्रयामेयेन्धनं पुष्यती'ति। तद्धाष्यं च चितिरेव विश्वग्रसनशीलत्वाद्वह्निरिति। तत्र सम्यक् अभेदेन भूता स्थिता चैतन्याख्यधर्मरूपेणावस्थिता नतु जाता। 'तत्र जातः' 'तत्र भवः' इति पाणिनिना भूजनिधात्वोर्भेदेन कीर्तनात् शक्तिशक्तिमतोरभेदाच्च। तदुक्तं संक्षेपशारीरकाचार्यैः 'चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते' इति। यद्वा प्रसिद्धमग्निकुण्डमेव चित्। चिदग्निपदयोरेव वोपमितसमासः। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने'त्यादौ रूपकदर्शनात्। तस्य कुण्डात्संभूता प्रादुर्भूता उत्पन्नेत्यर्थः। 'धुंधुमारस्ततोऽभवदि'त्यादौ भवतेरुत्पत्तावपि प्रयोगात्। तदुक्तं रेणुकापुराणे 'रेणुनामाभवत्पुत्र इक्ष्वाकुकुलवर्धनः' इत्यारभ्य तस्य तपो देवीवरं च वर्णयित्वा 'एतस्मिन्नन्तरे यज्ञे वह्निकुण्डाच्छनैर्द्विज। दिव्यरूपान्विता नारी दिव्याभरणभूषिते'त्यारभ्य 'वह्नेः शीतांशुबिम्बाभा सहसा निर्गता बहिः। एकैव तु जगद्धात्री द्वितीया नास्ति काचने'त्यन्तेन। ब्रह्माण्डपुराणेऽपि भण्डासुरपीडितं शक्रं निर्वर्ण्य 'कुण्डं योजनविस्तारं सम्यक्कृत्वातिशोभन'मित्यादिना चिदग्निकुण्डे देवैः कृतं स्वस्वमांसहोममुक्त्वोक्तम् 'होतुमिच्छत्सु देवेषु कलेवरमनुत्तमम्। प्रादुर्बभूव परमं तेजःपुञ्जमयं महत्। कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम्। तन्मध्यतः समुदभूच्चक्राकारमनौपमम्। तन्मध्यतो महादेवीमुदयार्कसमप्रभा'मित्यारभ्य 'तां विलोक्य महादेवीं देवाः सर्वे सवासवाः। प्रणेमुर्मुदितात्मानो भूयोभूयोऽखिलात्मिका'मित्यन्तम्। नित्याया उत्पत्त्यसंभवमाशङ्क्य समाधत्ते—**देवकार्येति**। देवानां कार्याणि भण्डासुरमहिषासुरवधादीनि तदर्थमुद्यता आविर्भूता। प्रकृतिविकृतिभावाभावेन तादर्थ्यचतुर्थ्यन्तेन सह समासायोगेऽपि शेषषष्ठ्या समासः। तदुक्तं मार्कण्डेयपुराणे 'देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा। उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥' इति। कूर्मपुराणेऽपि हिमवन्तंप्रति भगवत्योक्तं 'अहं वै याचिता देवैः संस्मृता कार्यगौरवात्। विनिन्द्य दक्षं पितरं ममेश्वरविनिन्दकम्। धर्मसंस्थापनार्थाय तवाराधनकारणात्। मेनादेहात्समुत्पन्ना त्वामेव पितरं श्रिते'त्यादि ॥ ५२ ॥ एवं चिद्रूपत्वेन प्रकाशात्मकतामुक्त्वा विमर्शात्मकं रूपमाह—**उद्यदिति**। भानूनां किरणानां सहस्रं यस्य स भानुसहस्रः सूर्यः। तस्योद्यत्त्वं विशेषणं। वर्तमानकालिकोदयवत्त्वं तदर्थः। वर्तमाने लटः शतृशानचोर्विधानात्। तेन लौहित्यं ध्वन्यते। उद्यतां भानूनां रक्तसूर्याणां सहस्रमागान्त्यं तेन तुल्येति वा। अतिलोहितेति फलितोऽर्थः। उक्तं हि स्वतन्त्रतन्त्रे 'स्वात्मैव

रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥ ५३ ॥
मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका ।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥ ५४ ॥

देवता प्रोक्ता ललिता विश्वविग्रहा । लौहित्यं तद्विमर्शः **स्यादुपास्तिरिति भावने'ति** । वामकेश्वरतन्त्रेऽपि 'स्वयं हि त्रिपुरा देवी लौहित्यं तद्विमर्शन'**मिति** । **ईदृशप्रकाशविमर्शसामरस्यापन्नाया** देव्यास्त्रीणि रूपाणि स्थूलं, सूक्ष्मं, परं **चेति** । **करचरणादिविशिष्टं स्थूलं**, मन्त्रमयं सूक्ष्मं, वासनामयं परम् । तदुक्तं योगवासिष्ठे **भगवता** 'सामान्यं परमं चेति द्वे रूपे विद्धि मेऽनघ । पाण्यादियुक्तं सामान्यं यत्तु मूढा उपासते ॥ परं रूपमनाद्यन्तं यन्ममैकमनामयम् । ब्रह्मात्मपरमात्मादिशब्दैनैतदुदीर्यते ॥' इत्यादि । 'सामान्यं द्विविधं प्रोक्तं स्थूलसूक्ष्मविभेदत' इत्यन्यत्रापि । यत्तु गङ्गादीनां जलादिमयं रूपं तत्स्थूलतरं चतुर्थम् । सूक्ष्मस्यापि पुनस्त्रैविध्यं वक्ष्यते । तेषु स्थूलं निर्दिशति—**चतुरिति** । ध्यानोक्तावयवमन्त्रोपलक्षणमेतत् । बाहुमात्रपरमेव वा । बाहुप्रसङ्गादायुधानां त्रिविधं रूपमाह—**रागेति** चतुर्भिः । रागोऽनुरक्तिश्चित्तवृत्तिविशेषः इच्छैव वा । राग एव स्वं वासनामयं रूपं **यस्य स्थूलस्य पाशस्य** तेनाढ्या वामाधःकरेत्युक्ता । क्रोधो द्वेषाख्या चित्तवृत्तिः । आकारशब्दादर्शआद्यच्चि आकारं सविषयकं ज्ञानमित्यर्थः । घटोऽयमित्याकारकं ज्ञानमित्यादौ विषयपरत्वेनाकारपदप्रयोगात् । क्रोधपदमेव ज्ञानपरमिति तु कश्चित् । तत् 'क्रोधोऽङ्कशङ्कुः' इति श्रुतिविरोधाद्वक्ष्यमाणस्मृतावेव ज्ञानपदस्य क्रोधपरत्वसंभवादयुक्तम् । तस्मात् द्वेषज्ञानोभयात्मकेनाङ्कुशेनोज्ज्वला शोभमानदक्षाधःकरा । तथाचोक्तं पूर्वचतुःशतीशास्त्रे 'पाशाङ्कुशौ तदीयौ तु रागद्वेषात्मकौ स्मृता'विति । तन्त्रराजेऽपि वासनापटले 'मनो भवेदिक्षुधनुः पाशो राग उदीरितः । द्वेषः स्यादङ्कुशः पञ्चतन्मात्रात्रापुष्पसायकाः ॥' इति । उत्तरचतुःशतीशास्त्रे तु 'इच्छाशक्तिमयं पाशमङ्कुशं ज्ञानरूपिणम् । क्रियाशक्तिमये बाणधनुषी दधदुज्ज्वल'मित्युक्तम् ॥ ५३ ॥ संकल्पविकल्पात्मकक्रियारूपं मन एव रूपं यस्य तादृशमिक्षुरूपं पुण्ड्रेक्षुमयं कोदण्डं धनुर्यस्या वामोर्ध्वकरे सा तथोक्ता । पञ्चसंख्यानि तन्मात्राणि शब्दादीनि विषयाः तदेव तन्मात्रम् । पञ्चभूतानामेतदेव रूपमित्यर्थः । तदुक्तं महास्वच्छन्दसंग्रहे 'भूतमात्रस्वरूपोऽर्थविशेषाणां निरूपकः । शब्दस्तु शब्दतन्मात्रं मृदूष्णकविनिश्चयः ॥ विशिष्टस्पर्शरूपश्च स्पर्शतन्मात्रसंज्ञकः । नीलपीतत्वशुक्लत्वविशिष्टं रूपमेव च ॥ रूपतन्मात्रमित्युक्तं मधुरत्वाम्लतायुतम् । रसतन्मात्रसंज्ञं तु सौरभ्यादि विशेषतः ॥ गन्धः स्याद्गन्धतन्मात्रं तेभ्यो वै भूतपञ्चक'मिति । एतानि तन्मात्राण्येव सायका बाणा यस्या दक्षोर्ध्वकरे सा तथोक्ता । तदुक्तं वामकेश्वरतन्त्रे 'शब्दस्पर्शादयो बाणा मनस्तस्याभवद्धनु'रिति । कादिमतेऽपि 'बाणास्तु त्रिविधाः प्रोक्ताः स्थूलसूक्ष्मपरत्वतः ॥ स्थूलाः पुष्पमयाः सूक्ष्मा मन्त्रात्मानः समीरिताः । पराश्च वासनायां तु प्रोक्ताः स्थूलान् शृणु प्रिये ॥ कमलं कैरवं रक्तं कह्लारेन्दीवरे तथा । सहकारक-

चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा ।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता ॥ ५५ ॥

मित्युक्तं पुष्पपञ्चकमीश्वरी'ति । तेषां नामानि तु कालिकापुराणे 'हर्षणं रोचनाख्यं च मोहनं शोषणं तथा । मारण चेत्यमी बाणा मुनीनामपि मोहदाः ॥' इति । ज्ञानार्णवे तु 'क्षोभणं द्रावणं देवी तथाकर्षणसंज्ञकम् । वश्योन्मादौ क्रमेणैव नामानि परमेश्वरी'ति । तन्त्रराजे तु 'मदनोन्मादनौ पश्चात्तथा मोहनदीपनौ । शोषणश्चेति कथिता बाणाः पञ्च पुरोदिताः ॥' इति ॥ **अथायुधमन्त्रोद्धारः** । रश्च अगश्च स्वं च तेषां समाहारो रगस्वम् । अगशब्देन स्थाणुर्हकारः । 'हः शिवो गगनं स्थाणु'रिति कोशात् । स्वं सबिन्दुक ईकारः । तेन रेफहकारेकारबिन्दुसमाहारो रूपं सूक्ष्माख्यं यस्य पाशस्येत्यादि । हकारोत्तरमिह रेफोऽवगन्तव्यः संप्रदायात् । क्रो च धश्च आ च क्रोधाः । तदुपरि श्रूयमाणः कारप्रत्ययो द्वन्द्वान्तत्वात्प्रत्येकं संबध्यते । क्रोकारधकाराकारा इत्यर्थः । तेऽङ्कुशेनोज्वलाः अनुस्वारेण शोभमानाः । कौ शेत इति कुशः अंकाराभिन्नः कुशोऽङ्कुशः । मन इति थकारस्य संज्ञा । थकाराधिकारे 'दक्षनासाधिपो मन' इति कोशात् । कोदण्डोऽनुस्वारः 'अकारश्चुकोदण्ड' इति कोशात् । मनोरूपः कोदण्डः थकाराभिन्नोंकारः क्रोधाकारेत्यादिनामसु दकाररेफककारलकारयकारसकारवकारा आ ई ऊ स्वराः सबिन्दुका विवक्षिताः । इतरदविवक्षितम् । तेषां यथासंप्रदायं योगे बाणबीजानि सिद्ध्यन्तीति । **आयुधबीजविभागस्तु** गुरुमुखादवगन्तव्यः । निजः स्वकीयो योऽरुणप्रभाया रक्तिमकान्तेः पूरः प्रवाहस्तस्मिन्मज्जन्ति तदभेदेन भासमानानि ब्रह्माण्डानां मण्डलानि यस्याः सा । प्रातःकाले सौभाग्यादिन्यासविशेषेषु यादृशं ध्यानं विहितमस्ति तादृशरूपवतीत्यर्थः ॥ ५४ ॥ इदानीं अग्निकुण्डापादानकस्थूलरूपप्रादुर्भावे शीर्षस्य प्रथमत्वाद्देवीमुखाभिन्नवाग्भवकूटस्य पञ्चदश्यां प्रथमत्वाच्च शीर्षमारभ्यैव पादपद्मान्तं वर्णयितुमारभते । चम्पकादिशब्दा वृक्षे शक्ता अपि तत्तत्पुष्पेष्वपि निरूढलाक्षणिकाः । 'द्विहीनं प्रसवे सर्वं'मित्यग्निपुराणकोशात् । चम्पकानि चेत्यादि द्वन्द्वः । सौगन्धिकानि कह्लाराणि तैः पुष्पैः लसन्तः शोभमानाः कचाः शिरोरुहा यस्याः सा । लसच्छब्दोऽन्तर्भावितण्यर्थो वा । तेन पुष्पेषु स्वीयपरिमलापादकाः कचा इति फलति । तदुक्तम् 'जानासि पुष्पगन्धान्भ्रमर त्वं ब्रूहि तत्त्वं मे । देव्याः केशकलापे गन्धः केनोपमीयेते'ति । कुरुविन्दमणयः पद्मरागाख्याः । शोणाः कामानुरागादिबहुगुणशीला रत्नविशेषाः । तदुक्तं गरुडपुराणे रत्नाध्याये 'तस्यास्तटेषूज्वलचारुरागा भवन्ति तोयेषु च पद्मरागाः । सौगन्धिकोत्थाः कुरुविन्दजाश्च महागुणाः स्फाटिकसंप्रसूताः ॥' सौगन्धिककुरुविन्दस्फटिकाद्यन्तर्गतपाषाणादिप्रभेदास्तद्भेदं पद्मरागमणीनामुत्पत्तिः । तेषु कुरुविन्दोद्भवेष्वेव 'बन्धूकगुञ्जाशकलेन्द्रगोपजपाशशासृक्समवर्णशोभाः । भ्राजिष्णवो दाडिमबीजवर्णास्तथापरे किंशुकवर्णभासः ॥' इति । अत्र तस्या इत्यस्य रावणगङ्गाया इत्यर्थः । 'ये तु रावण गङ्गायां जायन्ते कुरुविन्द-

अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता ।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका ॥ ५६ ॥
वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका ।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥ ५७ ॥
नवचम्पकपुष्पाभनासादण्डविराजिता ।
ताराकान्तितिरस्कारिनासाभरणभासुरा ॥ ५८ ॥
कदम्बमञ्जरीक्लृप्तकर्णापूरमनोहरा ।
ताटङ्कयुगलीभूततपनोडुपमण्डला ॥ ५९ ॥

काः । पद्मरागा घनाकारं विभ्राणाः सुस्फुटार्चिषः ॥' इत्युपक्रमात् । गुणातिशयोऽपि तत्रैव कथितः 'कामानुरागः कुरुविन्दजेषु शनैर्न तादृक् स्फटिकोद्भवेषु । माङ्गल्ययुक्ता हरिभक्तिदाश्च वृद्धिप्रदास्ते स्मरणाद्भवन्ती'ति । ईदृशानां श्रेण्या पङ्क्त्या कनता दीप्यमानेन कोटीरेण मुकुटेन मण्डिता । ईदृशविशेषणविशिष्टां देवीं ध्यायतां भक्त्याद्यभिवृद्धिर्भवतीति ध्वनिः ॥ कुरुविन्दाश्च मणयश्चेति द्वन्द्व इति तु कश्चित् । तद्रत्नोत्पत्त्यज्ञानात् ॥ ५५ ॥ चन्द्रस्याष्टमी कला यस्यां तिथौ वर्धते ह्रसति वा सा तिथिरष्टमीत्युच्यते । तत्संबन्धी यश्चन्द्रोऽष्टकलायुक्तः समचन्द्रार्धमितियावत् । तद्वद्विभ्राजता विराजमानेन अलिकस्थलेन ललाटदेशेन शोभिता । 'ललाटमलिकं गोधि'रित्यग्निपुराणीयकोशात् । मुखमेव चन्द्र इति रूपकं तत्कलङ्कत्वेन तुल्यो मृगनाभेः कस्तूर्या विशेषकः तिलको यस्यास्तथोक्ता । कलङ्कतिलकयोरुपमानोपमेयभावः ॥ ५६ ॥ वदनमेव स्मरस्य कामराजस्य माङ्गल्यगृहं तस्य तोरणो बहिर्द्वारमेव चिल्लिका भ्रूलता यस्याः । 'चिल्लिका भ्रूलतायां स्या'दिति नामकल्पद्रुमः । 'आभुग्नमसृणचिल्ली'ति ललितास्तवरत्नं च । परम्परितरूपकम् । प्राचीनपाठप्रयोगाच्चिल्लीशब्द एव भ्रूपरो ज्ञेयः । वक्त्रलक्ष्म्या मुखकान्तेः परीवाहे जलपूरे चलद्भ्यां चञ्चलाभ्यां मीनाभ्यां तुल्ये लोचने यस्याः । मीनस्येवेक्षणं यस्या इति वा । मीनानां वीक्षणमात्रे शिशूनामभिवृद्धिर्नतु स्तन्यदानादिनेति प्रसिद्धेः । तेन कटाक्षमात्रेण भक्तपोषकेत्यर्थः ॥५७॥ नवं नूतनं चम्पकस्य पुष्पं नतु केवलकलिका । ईषद्विकसिता गन्धफलीति यावत् । तेन तुल्यो यो नासादण्डस्तेन विराजिता । तारा मङ्गलाख्या शुक्राख्या च तारकादेवीविशेषो वा तयोः कान्तिं तिरस्करोति जयतीति तथा तादृशेन नासाभरणेन माणिक्यमौक्तिकादिभ्यां घटितेन भासुरा शोभमाना ॥ ५८ ॥ कदम्बमञ्जर्या नीपवल्लर्या क्लृप्तः कल्पितः कर्णपूरः कर्णोपरिभागे अवस्थाप्यमानः शेखरस्तेन मनोहरा रमणीया । ताटङ्कयुगलं कर्णाभरणद्वयं तस्य स्वर्णादिभवस्य प्रकृतेऽभावात् अभूततद्भावे च्विः । तथा संपद्यमाने तपनस्य सूर्यस्योडुपस्य चन्द्रस्य च मण्डले यस्याः । तदुक्तम् 'सूर्यचन्द्रौ स्तनौ देव्यास्तावेव नयने स्मृतौ । उभौ ताटङ्कयुगलमित्येषा वैदिकी श्रुति'रिति ॥ ५९ ॥ पद्मरागशिलै-

पद्मरागशिलादर्शपरिभाविकपोलभूः ।
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा ॥ ६० ॥
शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्वला ।
कर्पूरवीटिकामोदसमाकर्षदिगन्तरा ॥ ६१ ॥

वातिनिर्मलत्वात्प्रतिबिम्बग्राहित्वाच्चादर्शो दर्पणं तं परिभवत्यवजानाति । ततोऽप्यतिशयेन कामेश्वरप्रतिबिम्बग्राहित्वाच्छोणत्वाच्च । ईदृशी कपोलभूर्गण्डभित्तिर्यस्याः । नवां नूतनां विद्रुमबिम्बयोः पक्वप्रवालतुण्डीफलयोः श्रियं कान्तिं न्यक्कुरुतोऽधः कुरुतस्ततोऽप्याधिक्येनौन्नत्यात् । तादृशौ रदनच्छदावोष्ठौ यस्याः ॥६०॥ 'सा भवति शुद्धविद्या येदन्ताहन्तयोरभेदमति'रित्युक्तेर्दत्तात्रेयसंहितादिषु श्रीविद्यायास्तादृशाभेदपरत्वेन व्याख्यानात्सैव शुद्धविद्योच्यते । शुद्धाया अविद्यामलप्रतिस्पर्धिन्या विद्यायाः षोडशीरूपाया अङ्कुराणामिवाकारः स्वरूपं यस्य तेन द्विजपङ्क्तिद्वयेन दन्तपङ्क्तियुगलेनोज्वलाशोभमाना । श्रीमातुर्हि मूलाधारादिभ्यः परापश्यन्त्यादिक्रमेण वैखर्यात्मना मुखान्निःसृतासती षोडशीविद्या पश्चात्कर्णाकर्णोपदेशेन विस्तृताभूत् । तत्र शब्दब्रह्मरूपस्य बीजस्योच्छूनतावस्था परा, स्फुटितावस्था पश्यन्ती, मुकुलिताव्यक्तं दलद्वयं मध्यमा, सम्यग्विकासेन प्रसृतं मिथः संसृष्टमूलं दलद्वयं वैखरी । तदेव चाङ्कुरपदवाच्यम् । तद्दशायां दन्तसाम्यमप्यस्त्येव । षोडशाक्षराङ्कुराणां प्रत्यङ्कुरं दलद्वयाद्वात्रिंशद्दन्तसंख्यासंपत्तिरपि । अतस्तान्यङ्कुराण्येव मूर्तिमन्ति दन्तरूपाणीति तात्पर्यम् । द्विजशब्दश्लेषेण समासोक्तयलंकारेणार्थान्तरमपि । वेदादयो विद्या हि ब्राह्मणमेवाश्रित्य तिष्ठन्ति 'विद्या ह वै ब्राह्मणमाजगामे'ति श्रुतेः । तेनाऽप्रतिष्ठाः सत्योऽन्यत्र विस्तरं प्राप्नुवन्ति । अतो हेतोर्ब्राह्मणा एव विद्याङ्कुररूपाः । ततश्च शुद्धा निर्मला विद्याङ्कुराकारा च सती या द्विजानां ब्राह्मणानां पङ्क्तिस्तद्वयेनोज्वला । ब्राह्मणानामप्यम्बामुखान्निःसृतत्वेन त एव मूर्तिमन्तो दन्ता इति तात्पर्यम् । यद्वा 'शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी'त्यादिक्रमेणानुत्तरपर्यन्ता द्वात्रिंशद्दीक्षास्तन्त्रेषु प्रसिद्धास्ता द्विजपङ्क्तिपदेनोच्यन्ते । दीक्षाया अपि जन्मरूपत्वात् । उपनयनापेक्षया द्वितीयत्वाच्च । 'दीक्षा जन्म तृतीयं स्या'दिति वचनस्य मातुरुदराज्जन्ममेलनाभिप्रायकत्वेनाविरोधात् । शुद्धविद्या त्र्यक्षरी सैवाङ्कुरमारम्भो यस्याः सा शुद्धविद्याङ्कुरा । अकारेत्यत्राऽः परतोऽकारप्रश्लेषेणाङ्कुरयोरभिविध्यनुत्तरवाचकत्वेनानुत्तरपर्यन्तेत्यर्थः । शुद्धविद्याङ्कुरा च सा आकारा च सा द्विजपङ्क्तिश्चेति कर्मधारयोत्तरं तस्या द्वयेनोज्वला भासमानेति विग्रहः । संप्रदायकमायाद्वात्रिंशद्दीक्षितान्तःकरणैः पुरुषधौरेयैरेव लभ्या नान्यैरिति भावः । 'एलालवङ्गकर्पूरकस्तूरीकेसरादिभिः । जातीफलदलैः पूगैर्लाङ्गल्यूषणनागरैः । चूर्णैः खदिरसारैश्च युक्ता कर्पूरवीटिके'ति लक्षणलक्षितस्य ताम्बूलस्यामोदं परिमलं समाकर्षन्ति स्वस्वाभिमुख्येन प्रसारयन्ति या दिशः प्राच्याद्या दश देवतास्ता एवान्तरं परिधानं यस्याः सा । ताभिर्देवताभिरम्बामुखकमलविगलत्ताम्बूलकवलनापेक्षिणीभिरपि तादृग्भागप्रथमनिःसृ-

निजसंलापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा ॥ ६२ ॥
अनाकलितसादृश्यचिबुकश्रीविराजिता ।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा ॥ ६३ ॥
कनकाङ्गदकेयूरकमनीयभुजान्विता ।

तपरिमल एवाहंपूर्विकया यौगपद्येन समाकृष्य सर्वाभिर्गृह्यते । तल्लिप्सयैव हि ता आवृत्त्या परितोऽदृश्यवेषेण स्थिता इति तात्पर्यगल्योत्प्रेक्षाध्वननादिह वस्तुनालंकार-ध्वनिः । अथवा यस्या वीटिकामोदेन परिमलातिशयेन समाकर्षीणि सुरभिलानि दिगन्तराणि सेति । 'आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् । समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः' इत्यमरः ॥ ६१ ॥ निजस्य स्वीयस्य स्वतःशोभनस्य ब्रह्मविषयकस्य बालापस्य वर्णात्मकशब्दस्य माधुर्येण मञ्जुलतया विशिष्य निःशेषेण भर्त्सिता तिरस्कृता कच्छपी वीणा यया सा । समासान्तविधेरनित्यत्वात् 'नञ्दृतश्चे'ति न कप् । कच्छपस्य स्त्री कच्छपीति तु कश्चित् । तत् 'कच्छपी महती वीणे'त्यादि-कोशदर्शनात् । अमरकोशशेषोऽपि वीणामधिकृत्याह 'विश्वावसोः सा बृहती तुम्बु-रोस्तु कलावती । सा नारदस्य महती सरस्वत्यास्तु कच्छपी'ति । लोके हि वर्णाभि-व्यक्तेरभावेऽपि षड्जादिस्वराभिव्यक्तिमात्रेण ज्ञातचरानेव वर्णानुन्नीय माञ्जुल्यमात्र-लिप्सयैव हि वीणानादे रुचिरित्यनुभवः । कच्छप्यास्तु सारस्वतत्वादेव शुकसारि-कादिवदीषत्स्पष्टवर्णाभिव्यक्तिरप्यस्ति । स्पष्टतरवर्णाभिव्यक्तितदधिकमाधुर्यशालिनः संलापस्य तु सर्वातिशयत्वे नास्ति विवाद इति । अतएव सौन्दर्यलहर्यां 'विपञ्च्या गायन्ती विविधमपदानं पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने । तदी-यैर्माधुर्यैरपलपिततन्त्रीकलरवां निजां वीणां वाणीं निचुलयति चोलेन निभृत'मिति स्मितमीषद्धासः सोऽपि मन्दः तस्य प्रभापूरे लावण्यप्रवाहे मज्जतीति मज्जत् नतु नम्रम् । एकत्र मग्नस्यावयवान्तरसंचारविलोपापत्तेः । इदं त्ववयवान्तरसंचारार्थं यतते तस्मान्निःसर्तुं नाभिवाञ्छति चेति वर्तमाननिर्देशेन ध्वनितम् । कामः कला-शरीरघटको बिन्दुरग्नीषोमाख्यो रविः । तदुक्तं कामकलाविलासे 'बिन्दुरहंकारात्मा रविरेतन्मिथुनसमरसाकारः । कामः कमनीयतया कला च दहनेन्दुविग्रहौ बिन्दु-' रिति । स एवेश्वरो राजराजेश्वरस्तस्य मानसं यस्याः सा तथोक्ता । मीमांसकमते विभुनोऽपि मनसो मज्जनकथनेन प्रभापूरस्य निरवधिकाधिकाधिक्यं ध्वन्यते ॥ ६२ ॥ वाग्देवतामारभ्याद्य यावद्वर्णयितुं प्रवृत्तैः कविभिरनाकलितं आसमन्तादभिव्याप्य न कल्पितं सम्यक् न लब्धं सरसोपमानस्यालाभात् । अपितु मुखमुकुरवृन्तरूप-यत्किंचिदुपमानेन लब्धप्रायं यत्सादृश्यमौपम्यं यस्यास्तादृश्या चिबुकश्रिया विरा-जिता । कामेशेन परमशिवेन बद्धं यन्माङ्गल्यसूत्रं कामोज्जीवनहेतुभूतं सौभा-ग्याभरणं तेन शोभिता कन्धरा शिरोधिर्यस्याः ॥ ६३ ॥ अन्नं ददातीत्यङ्गदं शरीरघटकमित्यर्थः । कनकमेवाङ्गदं येषां तैः सुवर्णैकशरीरकैः । केयूरैर्दो-

रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता ॥ ६४ ॥
कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी।
नाभ्यालवालरोमालिलताफलकुचद्वयी ॥ ६५ ॥
लक्ष्यरोमलताधारतासमुन्नेयमध्यमा।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया ॥ ६६ ॥

भूषणैश्चतुर्भिः कमनीया रमणीया ये भुजास्तैरन्विता युक्ता। अङ्गदकेयूरयोराकृतिवैलक्षण्यमाश्रित्याभरणद्वयपरं वा व्याख्येयम्। अतएव ब्रह्मोत्तरखण्डे सप्तमेऽध्याये शिवध्यानप्रकरणे प्रयोगः 'दधानं नागवलयकेयूराङ्गदमुद्रिकाः' इति। अन्यत्रापि 'केयूराङ्गदहारकङ्कणमुखालंकारविभ्राजिता'मिति। 'केयूरमङ्गदं दोर्भूषे'त्यग्निपुराणं तु भुजभूषणत्वेनानुगमय्य कथनपरम्। तदनुसारित्वादमरसिंहोऽपि तत्पर एवेत्यदोषः। रत्नखचितग्रैवेयेण ग्रीवाभरणचिन्ताकेन चार्थात्सौवर्णेन लोलैश्चञ्चलैर्हारभावमापन्नैर्मुक्ताफलैश्चान्विता। रत्नमयं ग्रीवासंबन्धि यच्चिन्ताकं तदधस्तिर्यक्पङ्क्तिरूपेण लम्बमानैर्मुक्ताफलैरित्येकाभरणपरं वा। चिन्ताकमान्द्रदेशेषु प्रसिद्धम्। ललाटिकापर्यायं इति तु कश्चित्। तत्तादृशकोशालेखनाच्चिन्त्यम्। ग्रीवायामेव चिन्ता ध्यानं येषां ते ग्रैवेयचिन्ताकाः। उपर्युपर्यापतत एव ध्यानं ये कुर्वन्ति न पुनर्दहरान्तर्देवानां द्रढयितुं क्षमास्ते मध्यमाधिकारिण इत्यर्थः। लोलाः सतृष्णा अधमाधिकारिणः। 'लोलश्चलसतृष्णयो'रित्यग्निपुराणानुयाय्यमरः। मुक्ता उत्तमाधिकारिण इत्यर्थः। एषां त्रयाणामपि यानि रत्नभूतान्याफलानि अल्पफलान्यधिकफलानि च। 'आशीषदर्थेऽभिव्याप्ता'विति कोशात्। तैरन्विता तद्दाने तत्परा इति प्रकृताप्रकृतोभयविषयकश्लेषः ॥ ६४ ॥ कामेश्वरस्य प्रेमैव रत्नमणिः रत्नोत्तमः तत्पणनविषये प्रतिपणभूतौ स्तनौ यस्याः। मणिशब्दो रत्नपरः सन् स्तनयोरेव विशेषणं वा। स्तनरत्ने विक्रीय प्रेमरत्नं क्रीतवतीति भावः। तेन द्विगुणमूल्यदानेन क्रयविक्रयाभ्यां च सुतरां परस्परस्तापायेन प्रेमपरावृत्त्यभावः पातिव्रत्यातिशयश्चेति विनिमयालंकारेण वस्तुध्वनिः नाभिरेवालवालो लतावापश्चभ्रो यस्या रोमावल्यभिन्नलतायास्तस्याः फलभूता कुचद्वयी यस्याः सेति परम्परितरूपकमुत्प्रेक्षासंबन्धातिशयोक्तिश्चेति संकरः ॥ ६५ ॥ लक्षयितुं योग्या लक्ष्या ज्ञाप्यमानेति यावत्। ज्ञायमानस्यैव लिङ्गस्यानुमितिं प्रति कारणत्वात्। लिङ्गज्ञानमात्रस्य कारणतावादेऽपि लिङ्गज्ञानयोर्विशेष्यविशेषणभावे विनिगमनाविरहेणोभयतोऽपि कारणताया दुष्परिहरत्वात्। अनागतादेरपि बाधाकारस्य सत्त्वात्। तथाच गौतमसूत्रं 'बुद्धिसिद्धं तदस'दिति। लक्ष्या या रोमलताधारता रोमावलिरूपवल्यावापस्थानत्वम्। आधारतासंबन्धेन रोमलतैव लिङ्गमिति यावत्। तया सम्यगुन्नेयं प्रमानुमितिविषयो मध्यमं वलग्नं यस्याः। नाभ्यधःप्रदेशो मध्यमाख्यघनावयववान् रोमलतात्वादिति प्रयोगः। मध्यमस्य रोमलतया समर्थनात्काव्यलिङ्गालंकारः। यद्यपि 'निराधारो हा रोदिमि कथय कस्याग्र पुरत' इत्यादाविव स्वान्यतरभागानेकवर्णायाः पदमध्ययतेः साधुतायाः समुद्रायन्तस्थापरत्वेनैव व्यवस्थितत्वात्पादान्तयतेः 'प्रण-

अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी ।
रत्नकिङ्किणिकारम्यरशनादामभूषिता ॥ ६७ ॥
कामेशज्ञानसौभाग्यमार्दवोरुद्वयान्विता ।
माणिक्यमुकुटाकारजानुद्वयविराजिता ॥ ६८ ॥
इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका ।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥ ६९ ॥
नखदीधितिसंछन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥ ७० ॥

मत भवबन्धक्लेशनाशाय नारायणचरणसरोजद्वन्द्वमानन्ददायी'त्यादाविवाधारतेत्यस्य मध्ये न साधुत्वं तथापि रातमाण्डव्यादिमुनीनां छन्दःशास्त्रप्रवर्तकानां प्राचामाचार्याणां च मते यतेरनङ्गीकारात्तद्वीत्या साधुत्वमुपपद्यते । **पैङ्गलं** तु कलियुगीयग्रन्थमात्रपरमिति प्रदर्शितं छन्दोभास्करेऽस्माभिः । **स्तनयोर्भारेण** गौरवेण दलत इव मध्यस्य दार्ढ्यार्थं कृतः पट्टबन्धः कनकपट्टिकाभिर्बन्ध **एव वलित्रयं** यस्याः सेत्युत्प्रेक्षातिशयोक्ती ॥ ६६ ॥ अतिशयेनारुणमरुणारुणं **'कान्तायाः करतलरागरक्तरक्त'** इतिवदतिशयस्य वीप्सया द्योतनात् । अरुणवदनूरुवदरुणं वा । **कुसुम्भेन** रक्तं कौसुम्भं च यद्वस्त्रं तेन भास्वती भासुरा कट्यास्तटी यस्याः । **रत्नमयीभिः किङ्किणिकाभिः** क्षुद्रघण्टिकाभी रम्येण रशनाभिन्नेन दाम्ना सौवर्णमेखलासूत्रेण **भूषिता** ॥ ६७ ॥ **कामेशेनैव** ज्ञाते तदेकसाक्षिके सौभाग्यमार्दवे लावण्यकोमलत्वे **ययोस्तयोरूर्वोर्द्वयेनान्विता** । **माणिक्यमुकुटं** अखण्डमाणिक्येन निर्मितं मुकुटं **टोपिकानामकं** न्युब्जं शिरःप्रावरणं यत्तस्येवाकारो ययोस्तयोर्जानुनोरूरुपर्वणोर्द्वयेन **विराजिता** ॥ ६८ ॥ इन्द्रगोपाः प्रावृषेण्या आरक्ततमाः कृमिविशेषास्तैः परितः क्षिप्तौ खचितौ यौ स्मरस्य कामराजस्य तूणौ निषङ्गौ ताभ्यां तुल्ये जङ्घे एव जङ्घिके यस्याः । यदि तैः खचितौ स्यातां तदोपमा संभाव्येतेत्युपमायामभूतत्वांशध्वनिः । गूढौ मांसलौ **गुल्फौ** पार्ष्णी यस्याः । कूर्मयोः पृष्ठे जयत इति जयिष्णुनी ये **प्रपदे** पादाग्रे ताभ्यामन्विता । जयिष्णुपदमिष्णुच्प्रत्ययान्तम् नतु 'ग्लाजिस्थश्च ग्स्नु'रिति ग्स्नुप्रत्ययान्तं जिष्णुरित्यापत्तेः । इष्णुचो विधानं तु 'भुवश्चे'ति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वेन वृत्तिकृता व्याख्यानात् । तत्सूत्रे छन्दसीत्यनुवृत्तिस्तु न कार्या । **'भूष्णुर्भविष्णुर्भविते'**त्यमरकोशे प्रयोगात् । प्रयोगशरणा वैयाकरणा इति न्यायात् । तस्माद्विष्णुभ्राजिष्णुवज्जयिष्णुरपि साधुरेव ॥ ६९ ॥ नखानां पादनखचन्द्राणां **दीधितिभिः किरणैः** सम्यक् छन्नो लोपितो नमतां ब्रह्मविष्वादिजनानां तमोगुणोऽज्ञानं यस्याः । पाद-ध्यानेनाज्ञाननाश इति भावः । यद्वा अस्याश्चरणयुगस्य नखचन्द्रस्य नमज्जनकिरीटमणिगणच्छायाप्रतिबिम्बव्याहुल्येन दीधितीनां विशिष्यभानाभावे तासां तमोनाशाय नमज्जनहृदयान्तःप्रवेश उत्प्रेक्षते कविरिति भावः । तथाच मत्स्यपुराणपद्मपुराणयोः पार्वत्याः सामुद्रिकलक्षणानि दृष्टवतो नारदस्य वाक्यम् **'न जातोऽस्याः**

सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ।
मरालीमन्दगमना महालावण्यशेवधिः ॥ ७१ ॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता ।
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा ॥ ७२ ॥

पतिर्भद्रे लक्षणैश्च विवर्जिता ॥ उत्तानहस्ता सततं चरणैर्व्यभिचारिभिः । स्वच्छायया भविष्येयं किमन्यद्बहु भाष्यते ॥' इति मेनांप्रत्युक्तैर्दुर्लक्षणान्येवेमानि कथितानीति भ्राम्यता हिमवता सदुःखं पृष्टो नारद उवाच—'हर्षस्थानेऽपि महति त्वया दुःखं निवेद्यते । अपरिच्छिन्नवाक्यार्थो मोहं यासि महागिरे ॥' इत्यादिना 'न जातोऽस्याः पति'रित्यादिवाक्यानामर्थं निर्वर्ण्यन्ते कथितं 'यत्तु प्रोक्तं मया पादौ स्वच्छायाव्यभिचारिणौ । अस्याः शृणु ममात्रापि वाचोऽर्थं शैलसत्तम ॥ चरणौ पद्मसंकाशावस्याः स्वच्छनखोज्ज्वलौ । सुरासुराणां नमतां किरीटमणिकान्तिभिः ॥ विचित्रवर्णैर्ह्यस्यन्ति स्वच्छायां प्रतिबिम्बितैः । प्रविश्य नाशयिष्यन्ति तेषां हार्दं तमोगुण'मिति । पद्द्वयस्य चरणयुगलस्य प्रभाजालेन सौष्ठवादिगुणसमूहेन पराकृते निरस्ते सरोरुहे कमले यस्याः सा ॥ ७० ॥ सिञ्जानाः भूषणजन्यशब्दविशेषं कुर्वाणा मणयो ययोस्ताभ्यां मञ्जीराभ्यां पादकटकाभ्यां मण्डिता श्रीर्ययोस्तादृशे पदाम्बुजे यस्याः । 'नद्यृतश्चे'त्यविकल्पितोऽपि कप्रत्ययः श्रीशब्दस्य नदीसंज्ञानिषेधादेव न भवति । 'ह्रस्वो नपुंसक'इति ह्रस्वस्तु संज्ञापूर्वकविधेरनित्यत्वान्नेह भवति । मण्डिते श्रीयुक्ते पदाम्बुजे यस्या इति त्रिपदबहुव्रीहिर्वा । मरालो हंसः स्वभावादेव मन्दगतिः । तत्रापि स्त्रीजातीया विशेषत इति मरालीत्येवोपात्ता । तस्या इव मन्दगमनं यस्याः । महतो लावण्यस्यातिशयितसौन्दर्यस्य शेवधिर्निधिः । 'निधिर्ना शेवधि'रित्यमिपुराणकोशात् । अतएव 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति पाणिनीयसूत्रात्पुंलिङ्गमिदं नाम । तेन शेवधयेनम इत्येव प्रयोगो न पाक्षिकः शेवध्यैनम इति ॥ ७१ ॥ वसनाभरणकुसुमकान्त्यादिकं सर्वमेवारुणं यस्याः । अवद्यानि निन्द्यानि न भवन्तीत्यनवद्यानि सुलक्षणान्यङ्गानि अवयवा यस्याः । सर्वैश्चूडामणिप्रभृतिपादाङ्गुलीयकान्तैः कालिकापुराणोक्तैश्चत्वारिंशता कल्पसूत्रोक्तैरन्यैरपि वाभरणैर्भूषिता । एवं स्थूलं रूपमुक्त्वा तदवस्थितिस्थानान्याह—**शिवकामेत्यादिना** । कमनीयत्वात्कामः 'कामः कमनीयतये'त्युक्तेः । कामं यथेच्छं रूपमस्येति वा कामः । ईदृशव्युत्पत्त्यैव मन्मथे कामपदप्रवृत्तेः कालिकापुराणे प्रदर्शनात् । 'जगत्सु कामरूपत्वे त्वत्समो नैव विद्यते । अतस्त्वं कामनाम्नापि ख्यातो भव मनोभवे'ति । प्रज्ञानमेव वा कामः । तथाच श्रुतिः 'यदेतद्धृदयं मनश्चैतत्संज्ञानमज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ती'ति । अत्र प्रज्ञानशब्देन शिव एवोच्यते । स्कान्दे ब्रह्मगीतायां तथैवोपबृंहणदर्शनात् 'शंकरप्रभ - विज्ञानं बहुधा शब्द्यते बुधैः । केचिद्धृदयमित्याहु'रित्यारभ्य 'वश इत्येकषट्श मुक्तिः सर्वाण्येतानि संततम् । प्रज्ञानस्य

शिवस्यास्य नामधेयान्यसंशय'मित्यन्तम् । जगत्सिसृक्षावानीश्वरः कामपदवाच्यः। तथाच बृहदारण्यके श्रूयते 'आत्मैवेदमग्र आसीदेक एव सोऽकामयत' इत्यादि 'एतावान्वै काम' इत्यन्तम् । शिवश्चासौ कामश्चासावीश्वरश्चेति कर्मधारयः । गुणिरुद्रमदनयोर्निरासाय पदत्रयी । तस्याङ्के वामोत्सङ्गे तिष्ठति निषण्णा । अतएवाह शिवा । 'वश कान्तौ शिवः स्मृतः' इति । कान्तिरिच्छा । परशिवेच्छारूपेत्यर्थः। इच्छारूपायाः शक्तेः शिवाधारकत्वादिति भावः । शिवाभेदाद्वा शिवा । तत्र शिवपदनिरुक्तिस्तु शैवागमे 'वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः । बुभुत्साया-स्तथा ज्ञोऽस्मीत्यापातज्ञानवस्तुनः ॥ असत्यालम्बनत्वेन सत्यः सर्वजडस्य तु । साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ॥ आनन्दरूपः सर्वार्थसाधकत्वेन हेतुना । सर्वसंबन्धवत्त्वेन संपूर्णः शिवसंज्ञितः ॥ जीवेशत्वादिरहितः केवलः शिव एव सः ॥' इति। शिवं करोतीति वा । शिवशब्दात् 'तत्करोती'ति ण्यन्तात्पचाद्यचि टाप् । शेतेऽस्मिन्सर्वमिति वा । 'सर्वनिघृष्वरिष्वे'त्यादिना कर्तृभिन्नेऽर्थे औणादिकनिपातनात् । शिवाः शोभना गुणा अस्यां सन्तीति वा । अर्शआदित्वादच् । जैनेन्द्रव्याकरणे तु 'शिवादयश्चे'ति सूत्रं तत्सुभूतिचन्द्रेण व्याख्यातम् । शाम्यतीति शिवः 'क्वन इत्वमङ्गलोपश्च निपात्यत' इति । 'समेधयति यं नित्यं सर्वार्थानामुपक्रमम्। शिवेति यन्मनुष्याणां तस्मादेव शिवः स्मृतः ॥' इति । भारते 'समा भवन्ति मे सर्वे दानवाश्चामराश्च ये । शिवंकरोऽस्मि भूतानां शिवत्वं तेन मे सुराः ॥' इति च । 'यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च विचैति विश्व'मिति श्रुतिः । 'त्रिलोचनं नीलकण्ठं प्रशान्त'मिति च । तदेतत्सर्वं शिवाष्टोत्तरशतव्याख्याने संगृहीतमस्माभिः । 'प्रकृत्या नैर्मल्यादमलगुणयोगादपि शमाज्जगत्याधारत्वाद्भजदमृतदानाच्च भवतः । बलादिच्छाशक्तेः परमशिव वेदान्तनिकरैरसाधारण्येन व्यवहृतिमयासीः शिव इति' । शिवाभेदा वा शिवा । तदभेदस्य प्रवृत्तिनिमित्तता च लिङ्गपुराणे दर्शिता 'यथा शिवस्तथा देवी यथा देवी तथा शिवः । तस्मादभेदबुद्ध्यैव शिवेति कथयन्त्युमा'मिति । तत्रैव स्थलान्तरे 'उमाशंकरयोर्भेदो नास्त्येव परमार्थतः । द्विधासौ रूपमास्थाय स्थित एको न संशयः ॥' इति । 'परमात्मा शिवः प्रोक्तः शिवा सैव प्रकीर्तिते'ति च । यज्ञवैभवखण्डेऽपि 'चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः । अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा ॥ सदाकारा परानन्दा संसारोच्छेदकारिणी । सा शिवा परमा देवी शिवाभिन्ना शिवंकरी ॥' इत्यारभ्य 'करुणासागरामेनां यः पूजयति शांकरीम् । किं न सिध्यति तस्येष्टं तस्या एव प्रसादतः ॥' इत्यन्तम् । अथवा । वायोर्भार्या शिवानाम्नी । उक्तंच लैङ्गे 'समस्तभुवनव्यापी भर्ता सर्वशरीरिणाम् । पवनात्मा बुधैर्देव ईशान इति कीर्त्यते ॥ ईशानस्य जगत्कर्तुर्देवस्य परमात्मनः । शिवा भार्या बुधैरुक्ता पुत्रश्चास्य मनोजवः ॥' इति । 'बालेन्दुशेखरो वायुः शिवः शिवमनोरमे'ति च । वायुपुराणेऽपि 'ईशानस्य चतुर्थी या तनुर्वायुरिति स्मृता । तस्य पत्नी शिवानाम पुत्रश्चास्य मनोजवः ॥' इति । यद्वा । शिवं मोक्षं ददातीति शिवा । तदुक्तं देवीपुराणे 'शिवा मुक्तिः समाख्याता योगिनां मोक्ष-

सुमेरुशृङ्गमध्यस्था श्रीमन्नगरनायिका ।

दायिनी । शिवाय जयते देवी ततो लोके शिवा स्मृते' ति । आगमे तु 'पावकस्योष्णतेवेयं भास्करस्येव दीधितिः । चन्द्रस्य चन्द्रिकेवेयं शिवस्य सहजा शिवे'ति । एवमिच्छादिधर्मरूपापि न धर्मिणंप्रति गुणभूतेत्याह—**स्वाधीनेति** । स्वस्यात्मनोऽधीन आयत्तो वल्लभो भर्ता कामेश्वरो यस्याः । शिवस्य शक्त्यधीनात्मलाभकत्वाद्धर्म्येव धर्माधीन इत्यर्थः । तदुक्तं कालिकापुराणे 'नित्यं वसति तत्रापि पार्वत्या सह नर्मकृत् । मध्ये देवीगृहं तत्र तदधीनस्तु शंकरः' इति । आगमेऽपि 'शक्तो यया स शंभुर्भुक्तौ मुक्तौ च पशुगणस्यास्य । तामेनां चिद्रूपामाद्यां सर्वात्मनास्मि नतः' इति । स्कान्देऽपि 'जगत्कारणमापन्नः शिवो यो मुनिसत्तमाः । तस्यापि संभवच्छक्तिस्तया हीनो निरर्थकः' इति । श्रीमदाचार्यभगवत्पादैरप्युक्तम् 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपी'ति । स्वाधीनीकृतो वल्लभो ययेति वा । शर्यातिकन्यायाः सुकन्यायाः पतिरश्विभ्यां स्वसमानरूपः कृत इति तं विशिष्याजानत्या तया भगवतीमाराध्यैव स्वाधीनीकृत इति देवीभागवते सप्तमस्कन्धे कथा स्मर्यते 'शरणं ते जगन्मातः प्राप्तास्मि भृशदुःखिता । रक्ष मेऽद्य सतीधर्मं नमामि चरणौ तवे'त्यादिप्रार्थनोत्तरम् 'एवं स्तुता तदा देवी तया त्रिपुरसुन्दरी । हृदि तस्या ददौ ज्ञानं येनाधीनः पतिर्भवे'दित्याद्युक्तेः । एवं शच्या इन्द्रप्राप्तिरपि षष्ठस्कन्धोक्तेहोदाहर्तव्या ॥ ७२ ॥ यद्यपि भक्तिमीमांसायां 'तत्प्रतिष्ठा गृहपीठव'दिति सूत्रे गृहे तिष्ठति पीठे तिष्ठतीति प्रयोगाविशेषादुभयोरप्यधिकरणत्वं मुख्यमेव नतु साक्षात्परंपरासंबन्धादिरूपतारतम्यपीठभूभागस्यापि गृहान्तर्गतत्वादित्युक्तं, तथापि गृहे क्व तिष्ठतीतिवत्पीठे क्व तिष्ठतीत्याकाङ्क्षानुदयात्पीठमपेक्ष्येतरेषामधिकरणानां तारतम्यमनुभवसिद्धमस्त्येव । तेन न्यायेन मुख्यत्वात्कामेश्वरवामोत्सङ्गं प्रथममुक्त्वा स्थलान्तराण्याह—**सुमेरुशृङ्गमध्यस्थेत्यादिना** । सुमेरोर्हैमाद्रेर्मध्यशृङ्गे तिष्ठतीति तत्स्था । शोभने मेरुमध्यशृङ्गे इति वा । मेरुपर्वते हि शिवत्रिकोणवत्त्रीणि शृङ्गाणि सन्ति तेषां मध्ये चतुर्थं शृङ्गमस्ति । तदुक्तं ललितास्तवरत्ने दुर्वासमहामुनिभिः 'स जयति सुवर्णशैलः सकलजगच्चक्रसंघटितमूर्तिः । काञ्चननिकुञ्जवाटीकन्दलदमरीप्रपञ्चसंगीतः ॥ हरिहयनैर्ऋतमारुतहरितामन्तेष्ववस्थितं तस्य । विनुमः सानुत्रितयं विधिहरिगौरीशविष्टपाधारम् ॥ मध्ये पुनर्मनोहररत्नरुचिस्तवकरञ्जितदिगन्तम् । उपरि चतुःशतयोजनमुत्तुङ्गं शृङ्गपुंगवमुपासे' इति । श्रीमल्लक्ष्मीवद्यनगरं निरुपपदमेव नगरपदं विद्यानगरवाचकं तस्य नायिका अधिपतिः । तच्च नगरं द्विविधं । एकं तावन्मध्यमेरुशृङ्गस्थम् । तदुक्तं ललितास्तवरत्ने 'तत्र चतुःशतयोजनपरिणाहं देवशिल्पिना रचितम् । नानासालमनोज्ञं नमाम्यहं नगरमादिविद्यायाः' इति । तत्र मध्यशृङ्गे । चत्वारि शतानीति विग्रहः नतु 'चतुःशतमुक्ति'रिति पिङ्गलसूत्र इव चतुरधिकं शतमिति । उत्तरश्लोके प्रथमप्राकारस्य प्रथमं सहस्रपूर्वकषट्शतसंख्याकयोजनपरिमित इति परिमाणोक्ति-

चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता ॥ ७३ ॥
महापद्माटवीसंस्था कदम्बवनवासिनी ।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥ ७४ ॥

विरोधात् । नानासालैः पञ्चविंशतिभिः प्राकारैरिति तदर्थः । अपरं सकलं ब्रह्माण्ड-बहिरूर्ध्वभागे सुधासागरमध्यगंतरत्नद्वीपस्थम् । तदुक्तं रुद्रयामले 'अनेककोटिब्रह्माण्डकोटीनां बहिरूर्ध्वतः । सहस्रकोटिविस्तीर्णं सुधासिन्धोस्तु मध्यमे ॥ रत्नद्वीपे जगद्द्वीपे शतकोटिप्रविस्तरे । पञ्चविंशतितत्त्वात्मपञ्चविंशतिवप्रकैः ॥ त्रिलक्षयोजनोत्तुङ्गैः श्रीविद्यायाः पुरं शुभ'मित्यादि । विद्यारत्नभाष्ये तु क्षीरसमुद्रमध्येऽप्येकं पुरमस्तीत्युक्तं परंतु तस्य चतुर्विंशतिप्राकारा इत्यसकृदुक्तं तत्रैकस्य प्राकारस्य न्यूनत्वं गवेषणीयम् । श्रीमन्नगरशब्दः श्रीचक्रपरो वा । 'चक्रं पुरं च सदनमगारं नगरं गृहे'ति विश्वाख्योक्तेः । 'कगजदशारे'त्यादिगौडपादीयसूत्रे श्रीपुरस्य चक्रपरत्वेन तद्भाष्ये व्याख्यानाच्च । 'नैतमृषिमविदित्वा नगरं प्रविशेत्' । 'देवानां पूरयोध्या' । 'अमृतेनावृतां पुरी'मित्यादिश्रुतिषु नगरादिपदानां चक्रे प्रयोगदर्शनाच्च 'नगरचक्र-इत्यादिरुद्रयामलात् । मेरौ तु स्वल्पपरिमाणं 'शृङ्गारवर्णवर्यस्योत्तरतः सकलविबुधसंसेव्यम् । चिन्तामणिगणरचितं चिन्तां दूरीकरोतु मे सदन'मिति ललितास्तवरत्नात् । गौडपादीयसूत्रभाष्ये तु 'सर्वेषां चिन्तितार्थप्रदमन्त्राणां निर्माणस्थानं तदेवेति तस्य चिन्तामणिगृहत्व'मित्युक्त्वा तन्निर्माणप्रकारो विस्तरेण वर्णितः । पञ्चभिर्ब्रह्मभिर्निर्मितमासनं मञ्चकरूपं तत्र स्थिता । तदुक्तं बहुरूपाष्टकतन्त्रे भैरवयामलतन्त्रे च 'तत्र चिन्तामणिमयं देव्या मन्दिरमुत्तमम् । शिवात्मके महामञ्चे महेशानोपबर्हणे ॥ अतिरम्यतले तत्र कशिपुश्च सदाशिवः । भूतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः । तत्रास्ते परमेशानी महात्रिपुरसुन्दरी'ति । भूतकाः भृत्याः ब्रह्मविष्णुरुद्रेश्वरा इत्यर्थः । आग्नेयादीशानान्तविदिक्षु ब्रह्मादय उपर्यधःस्तम्भरूपाः मध्ये पुरुषरूपा अपि श्रीध्यानाच्छक्तिभावं प्राप्ता मीलिताक्षा निश्चला इत्यादिकं पुराणादवगन्तव्यम् ॥ ७३ ॥ महान्ति पद्मानि यस्यामीदृश्यामटव्यां वने सम्यक्तिष्ठति । पद्माटवीस्वरूपमूर्ध्वं 'त्रिलक्षयोजनायाममहापद्मवनावृतम्' इति रुद्रयामलोक्तमेकम् । ललितास्तवरत्नोक्तमन्यत् 'मणिसदनसालयोरधिमध्यं दशतालभूमिरुहदीर्घैः । पर्णैः पयोदवर्णैर्युक्तां काण्डैश्च योजनोत्तुङ्गैः ॥ मिलितैस्तालीपञ्चकमानैर्मिलितां च केसरकदम्बैः । संततगलितमरन्दस्रोतोनिर्यन्मिलिन्दसंदोहाम् ॥ पाटीरपवनबालकधाटीनिर्यत्परागपिञ्जरिताम् । पद्माटवीं भजामः परिमलकल्लोलपक्ष्मलोपान्ता'मिति । ब्रह्मरन्ध्रस्थितसहस्रदलपद्ममपि पद्माटवीत्युच्यते । उक्तंच स्वच्छन्दतन्त्रे 'तस्मादूर्ध्वं कुलं पद्मं सहस्रारमधोमुख'मिति प्रक्रम्य 'महापद्मवनं चेदं समानं तस्य चोपरी'ति ब्रह्माण्डपिण्डयोरैकरूप्याच्च । इदं चारुणोपनिषद्भाष्ये 'आण्डीभवजमामुहु'रितिवाक्यव्याख्यानावरे स्पष्टीकृतम् । कदम्बानां नीपानां वने वसतीति तथा । चिन्तामणिगृहं परितो मणिमण्डपं तत्परितः कदम्बवनम् ।

तदुक्तं भैरवयामले 'बिन्दुस्थानं सुधासिन्धुः पञ्चयोन्यः सुरद्रुमाः । तत्रैव नीपश्रेणी च तन्मध्ये मणिमण्टपम् ॥ तत्र चिन्तामणिमय'मित्यादि । कनकरजतप्राकारमध्यभूः सप्तयोजना । तस्माद्द्वियोजनोन्नताः कदम्बवृक्षाः सन्तीत्यपि पुराणे स्थितम् । सुधासागरः पीयूषवर्णः स चोर्ध्वस्थ एकः 'अमृतेनावृतां पुरी'मिति श्रुतिप्रसिद्धः । पिण्डाण्डे बिन्दुस्थाने सहस्रारकर्णिकाचन्द्रमध्येऽन्यः । अपराजिताख्ये सगुणब्रह्मोपासनाप्राप्ये नगरे अरनामक-ण्यनामकौ द्वौ सुधाहदौ सागरप्रतिमौ । शारीरकभाष्ये 'अनावृत्तिः शब्दा'दितिसूत्रे कथितावन्यौ । अविशेषाद्यस्मैर्वेऽपीह गृह्यन्ते । तेषां मध्ये तिष्ठतीति तथा । कामे कमनीये अक्षिणी यस्याः । समासान्तष्टच् । कामेश्वर एव नेत्रं यस्या इति वा । नेत्रविषयत्वान्नेत्रत्वमुपचर्यते । काञ्ची-पीठाधिष्ठात्र्या इदमसाधारणं नाम । तदुक्तं ब्रह्माण्डपुराणे 'सर्वज्ञा साक्षिभावेन तत्तत्कामानपूरयत् । तदृष्ट्वा चरितं देव्या ब्रह्मा लोकपितामहः । कामाक्षीति तदा नाम ददौ कामेश्वरीति चे'ति । कामान्मनोरथान्ददातीति कामदायिनी । कामेश्वरमेव वा भक्तेभ्यो वितरति, शिवाभेददानाभिप्रायेण वा कामदायिनी । कामं मन्मथं यति खण्डयतीति वा कामदः शिवस्तेन अयिनी शुभावहविधिमती । 'अयः शुभावहो विधि'रित्यमरः । अथवा दायो नाम पित्रादिपरंपरार्जितं स्वम् । ततः कामेश्वरेण दायवती । तदभिन्नानादिसिद्धस्वभाववतीत्यर्थः ॥ ७४ ॥

अथ परिभाषायां चतुःषष्टि नामानि विभजते—**अर्धचतुर्विंशतितनुभेदोद्भवगुणगणो दशपात्। दम्भावहगोमेदाभावेहचतुर्गुणा गुणैर्गङ्गा ॥ १० ॥**

अर्धानां चतुर्विंशतिः ततस्तकारात्षडक्षरमेकं नाम । ततो नकाराद्दशाक्षरम् । नकारस्य शून्ये संकेतितत्वेऽपि तावन्मात्रस्य नामाक्षरसंख्यत्वायोगादकारान्तरसाहित्यापेक्षायां प्रथमोपस्थितिन्यायेनैकाङ्कसमावेशे दशसंख्यावाचकत्वसिद्धेः । टवर्गे दशत्वादपि तत्सिद्धेः दशपादिति । तत्रैकादशानां पादात्मकनाम्नां सत्वेऽपि छन्दोनुरोधादवयुत्यानूद्यैकादशः पादः पृथग् उत्तरार्धे दकारेण निर्दिष्टः । चतुरिति चत्वारि नामानीत्यर्थः । नतु चतुरक्षरमेकं नामेति । तथात्वे एकेनैव घकारढकाराद्यक्षरेण सिद्धेऽधिकोक्तेर्वैयर्थ्यात् । एकाद्यादिसंख्यावाचकपदसंबन्धिभिन्नैरेव वर्णैरक्षरसंख्याव्यवहारस्यासांकर्यार्थमङ्गीकारस्योक्तत्वाच्च । ततश्चत्वारि नामानि कतिकत्यक्षराणीत्याकाङ्क्षायां परस्पराक्षरसंख्यावैषम्ये मानाभावात् 'समं स्यादश्रुतत्वा'दिति न्यायेन समसंख्याक्षराणीति सिद्धेऽर्धस्यार्धयोरर्धानां वा मध्य एवेत्यपि नियमाच्चत्वारिचत्वार्यष्टावष्टौ वाक्षराणीति सिध्यति नतु नवनवेत्यादि । अर्थात्परतो द्वितीयनामसमाप्त्यापत्तेश्छन्दःसूत्रविरोधेन तस्यानिष्टत्वात् । चतुरष्टसंख्ययोरन्यतरनियमस्तु 'भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहे'त्यर्धपर्यालोचनवतां व्युत्पत्तिमतां च सुज्ञान एव । नह्ययं ग्रन्थः सहस्रनामाक्षराणामुद्धाराय गुरुचरणैः कृतः किंतु ज्ञाताक्षरान्प्रति विभागप्रदर्शनाय । अतश्चाक्षरज्ञानसापेक्षत्वाद्व्युत्पन्नैश्चतुश्चतुरक्षराणीति ज्ञातुं शक्यमेव । नच तैरन्यत्राप्येवमेव ज्ञातुं शक्यत्वाद्ग्रन्थवैयर्थ्यम् । व्युत्पन्नानामपि संदेहस्य प्रचुरं प्रदर्शयिष्यमाणत्वात् । अन्यथा छलाक्षरसूत्राणामपि वैयर्थ्यापत्तेः । अथापि यद्यष्टाक्षरे द्वे नामनी विभज्येते तदा गुणैरिति गकारेण शरच्चन्द्रनिभाननेः

देवर्षिगणसंघातस्तूयमानात्मवैभवा ।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता ॥ ७५ ॥

त्रत्र शरच्चमिति त्र्यक्षरस्य भिन्ननामत्वापत्तिः । तत्रापि भ्रमादिष्टापत्तिं वदन्तस्तु नात्राधिकारिणः । तदुक्तं योगवासिष्ठे 'नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिञ्शास्त्रेऽधिकारवानि'ति । तुल्याविमौ पर्यनुयोगसमाधी सर्वशास्त्रेष्वपीति ॥ १० ॥

अथ देव्याः स्थूलरूपस्य कार्याणि स्पष्टतया वदन्नेव रहस्यभूतं परं रूपं रहस्योक्तिभिरेव वर्णयितुमारभते—**देवर्षीत्यादिना** । देवगणो ऋषिगणश्च यस्तयोः संघातस्तेन महासमुदायेन स्तूयमान आत्मा स्वरूपं यस्य तादृशं वैभवं यस्याः, स्तूयमानात्मवैभवमात्मनो व्यापकत्वं यस्या वा सा । अथवा देवर्षिगणैः संघातशः स्तूयमानं बहुप्रकारेण स्तूयमानमित्यर्थः । यद्वा संघातो नरकविशेषस्तन्निरासार्थं स्तूयमानमित्यादि । पापस्य प्रायश्चित्तमित्यादौ षष्ठ्या नाश्यनाशकभावसंबन्धार्थकत्वदर्शनादिहापि षष्ठीसमासः । यद्वा सम्यक् घातो भण्डासुरवधस्तदुद्देशेन स्तूयमानमित्यादि । अतएवोत्तरनामनि तदुत्तरभावितद्वधोद्योगकथनम् । अतएव ब्रह्माण्डपुराणे भण्डासुरपीडितैर्देवैः कृतं 'जयदेवि जगन्मात'रित्यादिना देवीस्तवं निर्वर्ण्य अम्बया वरं वृणुध्वमित्युक्ते देवानां वाक्यं 'यदि तुष्टासि कल्याणि वयं दैत्येन्द्रपीडिताः । दुर्लभं जीवितं चापि त्वां गताः शरणार्थिनः' इत्यादि । अन्यत्रापि 'ततः कदाचिदागत्य नारदो भगवानृषिः । प्रणम्य परमां शक्तिमुवाच विनयान्वितः' इत्यारभ्य 'अयं भण्डासुरो देवि बाधते जगतां त्रयम् । त्वयैकयैव जेतव्यो न शक्यस्त्वपरैः सुरै'रित्यन्तम् । वस्तुतस्तु । देवा ब्रह्मादयः । ऋषयो वसिष्ठादयः । देवर्षयो नारदादयः । देवर्षयश्च देवर्षयश्चेति विग्रहः । गणा आदित्यादयः । 'आदित्यविश्ववसवस्तुषिताभास्वरानिलाः । महाराजिकसाध्याश्च रुद्राश्च गणदेवताः' इत्यग्निपुराणात् । तेषां संघातः समुदायः 'अनेककोटिदिक्पालैश्चन्द्रार्कवसुकोटिभि'रित्यादिरुद्रयामलोक्तस्तेन स्तूयमानमित्यर्थः । तेन न गणसंघातपदाभ्यां पौनरुक्त्यं शङ्कनीयम् । अथ परस्परूपपरत्वपक्षे देवादिस्तूयमानत्वविशेषणादखिलानुगतमखिलपरिचितमखिलप्रेमास्पदं चैतन्यमेवात्मेति शैवशास्त्रोक्तं स्वरूपं ध्वनितम् । अग्निपुराणेऽपि 'तस्य चैतन्यमात्मेति प्रथमं सूत्रमीरितम् । ज्ञानबन्ध इतीदं तु द्वितीयं सूत्रमीशितु'रिति । ततश्च देवादिभिः स्तूयमानं परिचीयमानमात्मनः 'स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहे'ति तन्त्रराजोक्ताया आत्माभिन्नदेवताया वैभवं विभुत्वमनन्तशक्तिसंवृतत्वरूपं प्राभवं यस्याः सेति वर्णनीयम् । अथ देवकार्यसमुद्यतेति यत्स्थूलरूपस्य कार्यमुक्तं तत्प्रपञ्चयति । भण्डनामकोऽसुरस्तद्युद्धादिकं च ललितोपाख्याने विस्तरेण प्रसिद्धतरम् । तदुक्तं तत्रैव ब्रह्माण्डपुराणे मन्मथदाहं प्रक्रम्य 'अथ तद्भस्म संवीक्ष्य चित्रकर्मा गणेश्वरः । तद्भस्मना तु पुरुषं चित्राकारं चकार सः' इत्यारभ्य 'एतद्दृष्ट्वा तु चरितं धाता भण्डिति भण्डिति । यदुवाच ततो नाम्ना भण्डो लोकेषु

संपत्करी समारूढसिंधुरव्रजसेविता ।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥ ७६ ॥

कथ्यते' इत्यन्तम् । तस्यासुरत्वमपि तत्रैवोक्तम् 'रुदकोपानलज्वालातो यतो भण्डो महाबलः । तस्माद्रौद्रस्वभावश्च दानवश्चाभवत्ततः' इति । तस्य दैत्यस्य वधे हनने उद्युक्तानां शक्तीनां स्त्रीदेवतानां सेनाभिः सैन्ये सम्यक् व्यूहनिर्माणेनान्विता युक्ता । सम्यगभेदेनान्विता वा । तथाच गांडपादीयं सूत्रम् 'भण्डासुरहननार्थमेकैवानेका' इति । यद्वा भण्डो निर्लज्जः स च प्रकृते जीवभावमापन्नो देही । तदाहुः 'सच्चित्सुखात्मापि जडास्थिरत्वदुःखादिभिः क्लिश्यसि भण्डिमाय'मिति । तस्यासून् प्राणान् रात्यादत्ते तत्सर्वं स्वं तद्गतो धर्मो भण्डिमेति यावत् । 'ज्ञानबन्ध' इति सूत्रोक्तो बन्ध इति भावः । अस्यात्मा ज्ञानमिति सूत्रद्वयं संधावकारश्लेषाश्लेषाभ्यामात्मन्यात्मत्वज्ञानाभावोऽनात्मन्यात्मत्वज्ञानं च आणवमलपदवाच्यत्वेन प्रसिद्धो बन्ध इत्यर्थस्तद्भाष्यवार्तिकयोरुक्तः । तस्य वधो यस्मात्तदुद्युक्तमुद्योग उद्यम इति यावत् तस्य याः शक्तयः सामर्थ्यानि तासां सेनया समूहेन समन्वितेति रहस्यार्थः । तथाच शिवसूत्राणि 'उद्यमो भैरवः शक्तिचक्रानुसंधाने विश्वसंहारः', 'शक्तिसंधाने शरीरोत्पत्तिः', 'भूतसंधाने भूतपृथक्त्वविश्वसंघट्टा' इत्यादीनि । तद्वार्तिकानि यथा 'योऽयं विमर्शरूपायाः प्रसरन्त्याः स्वसंविदः । झडित्युच्चलनाकारप्रतिभो मज्जनात्मकः ॥ उद्यमोऽन्तःपरिस्पन्दः पूर्णाहंभावनात्मकः । स एव सर्वशक्तीनां सामरस्यादशेषतः ॥ विश्वतोभरितत्वेन विकल्पानां विभेदिनाम् । अलं कवलनेनापीत्यन्वर्थादेव भैरवः ॥ योऽयमुक्तः स्वसंवित्तेरुद्योगो भैरवात्मकः । अस्यास्ति महती शक्तिरतिक्रान्तक्रमाक्रमा ॥ निःशेषनिजचिच्छक्तिसेनाक्रमणलम्पटः । रिक्तारिक्तोभयाकारान्यैतदूषिणी परा ॥ तथैव स्वात्मचिद्वित्तौ प्रमेयोल्लासनादितः । परप्रमातृविश्रान्तिपर्यन्तस्पन्दरूपया ॥ सृष्टिस्थितिलयान्ताख्या भासा शक्तिप्रसारणात् । प्रपञ्चविषयं चञ्चत्पञ्चकृत्यं प्रपञ्चितम् ॥ तया प्रसारितस्यास्य शक्तिचक्रस्य यत्पुनः । संधानमान्तरा मायास्वोक्तक्रमविमर्शनम् ॥ तस्मिन्सत्यस्य विश्वस्य कालाग्न्यादिकलावधेः । संहारः स्यात्स्वसंवित्तिवह्निसद्भावलक्षणः ॥ इच्छाशक्तिरुमेत्यादिसूत्रोक्ता शक्तिरस्य या । संधाने योगिनस्तस्यास्तन्मये भावने सति ॥ तद्वशात्तत्तदिच्छार्हशरीरोत्पत्तिरिष्यते । भूतानां देहधीप्राणशून्यानां ग्राहकात्मनाम् ॥ ग्राह्याणां स्थावराणां च संधानं परिपोषणम् । पृथक्त्वमथ विश्लेषो व्याध्यादिक्लेशबन्धनात् ॥ विश्वस्य देशकालादिविप्रकृष्टस्य यत्पुनः । संघट्टश्चक्षुराद्यक्षप्रत्यक्षीकरणादिकम् ॥ एतत्सर्वं भवेच्छक्तिसंधाने सति योगिन'इत्यादि । पुंस्त्वशक्तिर्बाल्ये तिरोहितापि यौवने यथा समुल्लसति तथा विचित्राः शक्तिसमूहा जीवे विद्यमाना अप्यज्ञानवशात्तिरोहिताः, उद्योगे सति तु सर्वा अपि ताः समुल्लसन्तीति तु समुदायार्थः ॥ ७५ ॥ अस्ति संपत्करीनाम काचिद्देवता । या तावत्स्वतन्त्रतन्त्रे 'संपत्करीति काप्यस्ति विद्या साऽचिन्त्यवैभवे'त्यारभ्य 'एवं

त्रिवर्णा सा विद्या विधानं चाथ कथ्यत' इत्यन्तेन वर्णिता । सा हि त्रिपुरसुन्दर्या गजेष्वधिकृतेति ललितोपाख्याने प्रसिद्धम् । 'ललितापरमेशान्या अङ्कुशास्त्रात्समुद्भूता । संपत्करी नामदेवी'त्यारभ्य 'रणकोलाहलं नाम सारुरोह मतंगज'मित्यादिकमुक्त्वा 'तामन्वगा ययुः कोटिसंख्याकाः कुञ्जरोत्तमा' इत्यन्तम् । तया सम्यग्गजशास्त्रकथितोपायैरारूढानामारोहणादिना नियमितानां सिन्धुराणां भद्रमन्दमृगादिभेदभिन्नगजानां व्रजेन हास्तिकेन सेविता । अथवा सुखसंपन्मयी चित्तवृत्तिः संपत्करीत्युच्यते तस्यां समारूढैर्विषयीभूतैः सिन्धुरव्रजैः शब्दादिविषयसमूहैः सेविता । तथाच कादिमते 'इन्द्रियार्थान्गजान्पूर्वं तन्मात्रैव समर्चये'दिति । एकस्मिन् ज्ञाने विषयीभूतायास्त्रिपुट्या विविच्य संबन्धज्ञानरूपा चित्तवृत्तिः सुखसंपत्करी । तदुक्तं प्रत्यभिज्ञायाम् 'ग्राह्यग्राहकसंवित्तिसामान्ये सर्वदेहिनाम् । योगिनां तु विशेषोऽयं संबन्धे सावधानते'ति । तदिदं 'लोकानन्दः समाधिसुख'मिति शिवसूत्रव्याख्यायां स्पष्टम् । 'मात्रा स्वप्रत्ययानुसंधाने नष्टस्य पुनरुत्थान'मिति सूत्रे वरदराजेनोक्तं 'मात्राः पदार्थरूपाद्यास्तेष्वेभिश्चक्षुरादिभिः । अक्षैः स्वप्रत्ययो नाम ततस्त्वग्राह्यवेदनम् ॥ संधानं तु समस्तं तदहमित्यनुसंहतिः । अमुष्मिन्सति नष्टस्य हरितस्योक्तवर्गतः ॥ तुर्यस्य पुनरुत्थानं भूय उन्मज्जनं भवेत् । ऐक्यसंपत्करं तस्य योगीन्द्रस्येति शिष्यत' इति । अश्वारूढाख्या काचिद्देवता तन्त्रे प्रसिद्धा । यस्यास्त्रयोदशाक्षरो मन्त्रः सा तावदश्वेष्वधिकृता । तदुक्तं ब्रह्माण्डपुराणे 'अथ श्रीललितेशान्याः पाशायुधसमुद्भवा । अतित्वरितविक्रान्तिरश्वारूढाऽचलत्पुर' इत्यारभ्य 'अपराजितनामानं समारुह्य हयं ययौ । वहवो वातजवना वाजिनस्तां समन्वयु'रित्यन्तम् । अतएव त्रिपुरासिद्धान्ते नामनिरुक्तिः 'तुरङ्गेषु स्थिरत्वाच्च साश्वारूढेति गीयत' इति । तयाधिष्ठितानां स्वायत्तीकृतानां अश्वानां कोटिगुणितकोटिभिर्जलधिसंख्याभिर्वह्नीभिरावृता । यद्वा 'इन्द्रियाण्यश्वरूपाणि तत्र पश्चिमतो यजे'दिति कादिमते वचनादश्वपदेनेन्द्रियाणि कथ्यन्ते । तदारूढं मनः । मनस इन्द्रियद्वारैव वृत्तिनिर्गमात् । ततश्चैकेन मनसा असंख्यातानीन्द्रियाण्यधिष्ठाय तत्तत्सुखानि भुनक्तीत्यर्थः । अश्वारूढैरिति बहुवचनान्तेन विग्रहे बहुभिर्मनोभिर्युगपदनन्तेन्द्रियाधिष्ठात्रीत्यर्थः । आत्माख्यदेवतारूपो योगी पूर्वोक्तोद्यमाभ्यासवांश्चेदिच्छामात्रेण सर्वशरीराभिमानी भवतीति भावः । तथाच शिवसूत्राणि 'विस्मयो योगभूमिकाः । इच्छाशक्तिरुमा कुमारी । दृश्यं शरीर'मिति । तद्वार्तिकानि च 'यथा सातिशयानन्दे तस्य चिद्विस्मयो भवेत् । तथास्य योगिनो नित्यं तत्तद्वेद्यावलोकने ॥ निःसामान्यपरानन्दानुभूतिस्तिमितेन्द्रिये । परे स्वात्मन्यतृप्त्यैव यदाश्चर्यं स विस्मयः ॥ सएव खलु योगस्य परतत्त्वैकरूपिणः । भूमिकास्तत्क्रमारोहपरविश्रान्तिसूचिकाः ॥ इदंविस्मयविद्योगभूमिकारूढचेतसः । परभैरवतां युक्त्याभ्यासमानस्य शाश्वती ॥ तस्यैव योगिनो येच्छाशक्तिः सैव भवत्युमा । परा भट्टारिका सैव कुमारीति प्रकीर्तिता ॥ सदाशिवादिक्षित्यन्तविश्वसर्गादिलीलया । कुमारी कुं महामाया भूमिं मारयतीत्यपि ॥ कुमारी चोपभोग्यस्य योगिनो भैरवात्मनः । कुमारी नान्यभोग्यस्य

चक्रराजरथारूढसर्वायुधपरिष्कृता।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता ॥ ७७ ॥

भोक्तैकात्म्येन तिष्ठति ॥ उमा कुमारी संत्यक्तसर्वसङ्गा महेशितुः । आराधनपरा तद्वदिच्छाशक्तिस्तु योगिनः ॥ अयमेव स्फुटोपायो दृष्टोऽनुत्तरदेशिकैः । एवंगीदृक्प्रभावेच्छाशक्तियुक्तस्य योगिनः ॥ यद्यदृश्यमशेषं तच्छरीरं तस्य योगिनः । अहंत्वपृथक्त्वेन प्रतिवेत्प्रतिभासनात् ॥ एवं देहे च बाह्ये च सर्वत्रैषास्य योगिनः । दृश्यं शरीरतामेति शरीरं चापि दृश्यता'मिति । सूत्रान्तरं च 'यथा तत्र तथान्यत्रे'ति । 'यत्र स्वाभाविका देहे स्फुटीभूता स्वतन्त्रता । यथा तत्र तथान्यत्र देहे भवति योगिनः । स्फुटीभवति युक्तस्य पूर्णाहन्तास्वरूपिणी'ति ॥ ॥ चक्रराजकिरिचक्रगेयचक्रादयो रथप्रभेदा रथशास्त्रे ललितोपाख्याने च वर्णिताः । 'आनन्दध्वजसंयुक्तो नवभिः पर्वभिर्युतः । दशयोजनमुन्नम्रश्चतुर्योजनविस्तृतः ॥ महाराज्ञाश्चक्रराजरथेन्द्रः प्रचलन्बभौ । मन्त्रिताभामहाचक्रे गीतिचक्रे रथोत्तमे ॥ सप्तपर्वाणि चोक्तानि तत्र देव्यश्च ताः शृणु । किरिचक्ररथेन्द्रस्य पञ्चपर्वसमाश्रयाः । देवताश्च शृणु प्राज्ञ नामानि शृण्वतां जयः ॥ चक्रराजरथो यत्र तत्र गेयरथोत्तमः । यत्र गेयरथस्तत्र किरिचक्ररथोत्तमः ॥ एतद्रथत्रयं तत्र त्रैलोक्यमिव जंगम'मित्यादि । तेषु चक्रराजाख्यं रथमारूढैः सर्वैरायुधैः परिष्कृतालंकृता युद्धकाले देवी । रथसमीपे देव्याः सर्वाण्यायुधानि चक्रराजरथे परिपूर्य स्थापितानि सन्तीत्यर्थः । यद्वा चक्रराजं श्रीचक्रमेव रथस्तमारूढानि यानि सर्वायुधानि सर्वाण्यात्मज्ञानसाधनानि तैरित्यादि । यज्ञायुधानि संभरतीत्यादौ साधने प्रायुधशब्दप्रयोगदर्शनात् । आणवोपायशाक्तोपायशांभवोपायादयः शैवशास्त्रोक्तसाधनविशेषा योगशास्त्रोक्ताश्च ते श्रीचक्रान्न भिद्यन्त इत्यर्थः । तथाच सूत्रम् । 'नास्तिक्रान्तमध्यसंयमात्किमत्र सव्यापसव्यसौषुम्येष्वि'ति । चक्रसिद्धौ सत्यां योगमार्गे किमपि नावशिष्यत इत्यर्थः । अथवा चक्रराजमेव रथ आधारो यस्य तच्चक्रेशत्वाख्या सिद्धिरितियावत् । तामारूढं तद्वानेऽधिकृतं यत्सर्वायुधं सर्वाणि कर्मादिरूपाण्यायुधानि साधनानि यस्मिंस्तत् 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत' इति वचनाज्ज्ञानं शुद्धविद्येत्यर्थः । तया परिष्कृता । तथाच शिवसूत्रम् 'शुद्धविद्योदयाच्चक्रेशत्वसिद्धि'रिति । वार्तिकान्यपि 'यदाऽपरिमितां सिद्धिमनिच्छन्पुनरिच्छति । विश्वात्मवत्प्रथारूपां परां सिद्धिं तदास्य तु ॥ शुद्धविद्योदयाच्चक्रराजत्वं सिद्धिमृच्छति । वैश्वात्म्यप्रथनाकाङ्क्षी संधत्ते शक्तिमात्मनः ॥ यदा योगी तदा तस्य सदाशिवपदस्पृशः । ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ॥ सामानाधिकरण्यं च सद्विद्याहमिदंधियोः । इति नीत्या जगत्सर्वमहमेवेति या मतिः ॥ सा शुद्धा निर्मला विद्या तदीयादुदयात्स्फुटात् । उन्मज्जनात्स चिच्छक्तिमात्मनो नित्यमामृशेत् ॥ यदा योगी तदा तस्य चक्रेशत्वमनुत्तरम् । माहेश्वर्याः समावेशोत्कर्षात्सिध्यति योगिनः' इति । गेयचक्राख्यं

किरिचक्ररथारूढदण्डनाथपुरस्कृता।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥ ७८ ॥

रथमारूढया मन्त्रिण्या श्यामलादेव्या परितः सेविता। यद्वा गेयं प्रसिद्धं चक्रं यस्य तादृशो रथो यस्य सूर्यमण्डलस्य तत्रारूढाभिर्मन्त्रिणीभिर्विद्योपासकाभिर्योगिनीभिः परिसेविता। अथवा गेयो मुख्यश्चक्राख्यो रथो यस्याः सा त्रिपुरसुन्दरी तस्या आरूढमारोहणं बुद्धौ विषयीकरणमनुसंधानमितियावत्। तेन या मन्त्रिणी। मन्त्रोऽस्यास्तीति मन्त्रि मन्त्रवीर्यं तन्नयति विषयीकरोतीति तदनुभवस्तेन परिसेविता। आत्मानं त्रिपुरसुन्दर्याश्चाभेदेनानुसंधाने क्रियमाणे यत्तावत्तन्नराजे कथितं गुरुमुखैकवेद्यं मन्त्रवीर्ययोजनं तस्यानुभवो भवतीत्यर्थः। तथाच सूत्रं 'महाहदानुसंधानान्मन्त्रवीर्यानुभव' इति। 'महाहद इति प्रोक्ता शक्तिर्भगवती परा। अनुसंधानमित्युक्तं तत्तादात्म्यविमर्शनम्॥ मन्त्रवीर्यमिति प्रोक्तं पूर्णाहन्ताविमर्शनम्। तदीयोऽनुभवस्तस्य स्फुरणं स्वात्मनः स्फुट'मिति। एतच्च 'विद्याशरीरस्फुरत्ता मन्त्ररहस्य'मिति सूत्रे भगवता श्रीक्षेमराजेन विस्तरेण स्फुटीकृतम्॥ ७७॥ किरिर्वैराहः 'क्रोडः पोत्री किरिः किटि'रित्यमरात्। तदाकृतीनि तदाकृष्टानि वा चक्राणि यस्य तं रथमारूढया दण्डनाथया वाराह्याख्यया देव्या पुरस्कृता सेविता। 'सर्वदा दण्डपाणित्वाद्दण्डनाथेति गीयत' इति त्रिपुरासिद्धान्ते दण्डनाथनामनिर्वचनात्। अथवा किरय इति किरणाः सृष्टय इति यावत्। इदमुपलक्षणं स्थितिलययोः। तेषां चक्रं समूह एव रथः तस्यारोहेऽपि दण्डनाथेन कृतान्तेन पुरस्कृता न स्वाधीनीकृता। सृष्टिस्थितिलयान्तःपतितोऽपि योगी न यमयातनाविषयः। अलुप्तानुसंधान इतियावत्। तथाच सूत्रम्। 'तत्प्रवृत्तावप्यनिरासः स्वसंवेत्तृभावा'दिति। व्याख्यातं च भगवता कृष्णदासेन 'तेषां सृष्ट्यादिभावानां प्रवृत्तावप्यनारतम्। उन्मज्जनेऽपि निष्कम्पयोगावष्टम्भशालिनः॥ अनिरासः स्वसंवेत्तृभावादप्रच्युतिर्निजात्। उद्यत्तुर्यचमत्कारादुपलब्धिस्वभावत' इति। ज्वालामालिनीनामिका चतुर्दशीतिथिनित्या। तया हि श्रीमातरमभितो वह्निमयः प्राकारो निर्मितः तदाक्षिप्तस्य निर्मितस्य वह्निमयस्य प्राकारस्य वरणस्य मध्यगा मध्यभागे स्थिता। तथाच ब्रह्माण्डे ज्वालामालिनीं प्रति देवीवचनम् 'वत्से त्वं वह्निरूपासि ज्वालामालामयाकृतिः। त्वया विधीयतां रक्षा बालस्यास्य महीयसः॥ शतयोजनविस्तारं परिवृत्य महीतलम्। त्रिंशद्योजनमुन्नम्रज्वालाप्राकारतां व्रजे'दित्यादि। यद्वा ननु परस्परविलक्षणसृष्ट्यादिसंवृतस्य ज्ञानिनः कथमद्वैतानुसंधानलोपाभाव इत्यत आह-**ज्वालेति**। ज्वालानां मालिनिका मालास्ताश्च आक्षिप्तास्तत्क्षणे उत्पन्नाश्च वह्नेः प्राकाराः प्रकाराः स्फुलिङ्गादयस्तेषां मध्यगा तद्दृष्टृत्वेन तत्स्रष्टृत्वेन च मध्यवर्तिनी विवदमानयोर्द्वयोर्मध्यस्थवन्निर्विकारा। सृष्ट्यादिकर्तृत्वेन तद्विकारेऽप्यविकारिणीतियावत्। तदुक्तं स्पन्दशास्त्रे 'अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम्। कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम्॥ कार्योन्मुखप्रयत्नो यः

भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता ।
नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका ॥ ७९ ॥
भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता ।

केवलं सोऽत्र लुप्यते । तस्मिंल्लुप्तेऽपि लुप्तोऽस्मीत्यबुधः प्रतिपद्यते ॥ नतु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदः । तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भना'दिति । चिद्वह्निरूपस्य ज्ञानिनो विस्फुलिङ्गज्वालादितुल्यजगतः कार्यस्य नाशेऽपि वह्नित्वरूपप्रकाशकत्वस्य प्रकाशात्मकत्वस्य वा न क्षतिरिति फलितार्थः । नच शिवकार्यस्य क्षयिष्णुत्वेन शिवनिष्ठकर्तृत्वस्य नाशाभावे साधकस्य योगिनः किमायातमिति वाच्यम् । अस्यापि शिवतुल्यत्वेन 'तथापर्यनुयोगानर्हत्वाच्छिवतुल्यो जायत' इति सूत्रात् । उक्तंच 'स्वशक्तिप्रचयो विश्व'मिति सूत्रे वार्तिककारैः । 'शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः । इत्यागमदिशा विश्वं स्वशक्तिप्रचयो यथा ॥ शिवस्य तत्समस्यापि तथास्य परयोगिन' इति । अथवा । ज्वालामालिनिकासु शक्तित्रिकोणेषु पञ्चसु क्षिप्तानां समरसभावमापन्नानां वह्निप्राकारणां शिवत्रिकोणानां चतुर्णां मध्ये बिन्दुरूपेण तिष्ठतीति । तदुक्तमुत्तरचतुःशतीशास्त्रे 'तच्छक्तिपञ्चकं सृष्ट्वा लयेनाग्निचतुष्टयम् । पञ्चशक्तिचतुर्वह्निसंयोगाच्चक्रसंभव' इति ॥ ७८ ॥ भण्डासुरस्य सैन्यस्य चतुरङ्गबलस्य वधे उद्युक्तानां संयतानां शक्तीनां नकुल्यादीनां विक्रमेण पराक्रमेण हर्षिता । यद्वा । भण्डो जीवभावस्तस्य सैन्यं तदनुगुणाद्वैतविषयिण्यो वृत्तयस्तस्य वधे उद्युक्तानामद्वैतवृत्तिरूपशक्तीनां विशेषेण क्रमः पादविक्षेपस्तेन हर्षिता । स्वानन्दांशे आवरणनाशात् । तदिदमुक्तं शक्तिसूत्रे 'तदपरिज्ञाने स्वशक्तिव्यामोहिता संसारित्व'मिति । तस्य स्वकर्तृकपञ्चविधकृत्यस्यापरिज्ञाने स्वाभिः शक्तिभिः खेचरीगोचरीदिक्चरीभूचरीसंज्ञाभिर्व्यामोहितैव संसारित्वमिति तदर्थः । तासां च शक्तीनां पशुभूमिकापतिभूमिकेति भूमिकाद्वैविध्येन प्रमात्रन्तःकरणबहिःकरणविषयभावाद्यापत्तिस्तद्भाष्ये द्रष्टव्या । एतद्युक्तशक्तयश्चैतदुत्तरसूत्रे कथिताः तत्परिज्ञाने चित्तमेवान्तर्मुखीभावेन चेतनपदाध्यारोहाच्चितिरिति । अन्तर्मुखीभावशब्देन वृत्तिविशेषरूपाः शक्तय उच्यन्त इति । कामेश्वर्यादिचित्रान्ताः पञ्चदशतिथिनित्याख्या देवताः । यासां मन्त्रा ज्ञानार्णवे मन्त्रराजे च भेदेनोद्धृताः । तासां पराक्रमस्याटोपो विस्तारो दमनकादिचन्द्रगुप्तान्तपञ्चदशसेनानीवधपर्यन्तः तस्य निरीक्षणे सम्यगुत्सुका । पक्षे नित्या अनादिसिद्धाः स्वात्मशक्तयस्तत्पराक्रमेक्षणे उत्तरोत्तरमुत्सुका । सकृज्जातापि ज्ञानकलान्तर्मुखतायामेवोत्साहं जनयन्ती सती वर्धते । उक्तंच योगवासिष्ठे 'सर्वा एव कला जन्तोरनभ्यासेन नश्यति । इयं ज्ञानकला त्वन्तः सकृज्जातापि वर्धत' इति ॥ ७९ ॥ भण्डासुरस्य पुत्राणां चतुर्वाह्याद्युपमाया(ख्या)न्तानां त्रिंशत्संख्याकानां वधे उद्युक्ताया बालाख्यदेव्या नववर्षायाः

मन्त्रिण्यम्बाविरचितविषङ्गवधतोषिता ॥ ८० ॥
विशुक्रप्राणहरणवाराहीवीर्यनन्दिता ।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥ ८१ ॥

स्वपुत्र्या विक्रमेण नन्दिता हृष्टा । उक्तंच ब्रह्माण्डे 'ताभिर्निवेद्यमानानि सा देवी ललिताम्बिका । पुत्र्या भुजापदानानि श्रुत्वा प्रीतिं समाययौ'विति । **मन्त्रिण्यम्बया** श्यामलाम्बया विरचितेन विषङ्गाख्यस्य दैत्यस्य वधेन तोषिता । **विषङ्गविशुक्रौ** भण्डासुरभ्रातरौ । तदुक्तं ब्रह्माण्डे । 'पुरा भण्डासुरो नाम सर्वदैत्यशिखामणिः । पूर्वदेवान्बहुविधान्यः स्रष्टुं स्वेच्छया पटुः ॥ विशुक्रं नाम दैतेयवर्गसंरक्षणक्षमम् । शुक्रतुल्यविचारज्ञं दक्षांसेन ससर्ज सः ॥ वामांसेन विषङ्गं च सृष्टवान्भ्रातराबुभा'वित्यादि ॥ ८० ॥ विशुक्राख्यस्य दैत्यस्य प्राणान् हरतीति हरणं तादृशेन **वाराही**नामिकाया दण्डिनीदेव्या वीर्येण शौर्येण नन्दिता । त्रिपुरासिद्धान्ते **वाराही**प्रदनिरुक्तिर्यथा 'वराहानन्दनाथस्य प्रसन्नत्वान्महेश्वरी । वाराहीति **प्रसिद्धेयं वराह**वदनेन चे'ति । पक्षे भण्डपुत्रा आणवादयो मलाः, विरुद्धः सङ्गो **विषङ्गो** विषयाभिलाषः, विषं गच्छतीति वा विषात्मक इतियावत् । अतएव 'यो विषस्थो ज्ञानशक्तिहेतुश्चे'ति सूत्रे विषविरुद्धत्वादविषशब्दो माहेश्वर्यादिशक्तिमण्डलपरत्वेन क्षेमराजवृत्तौ व्याख्यातः । **विरुद्धं शुक्रं** तेजो यस्य स जीवभावः । विशेषेण शुचं शोकं राति क्रामतीति वा । अयस्मयादित्यादृषोदरादित्वाद्वा पक्षद्वये शब्दसिद्धिः । बालामन्त्रिणीवाराह्य अन्तरवृत्तिविशेषास्ताभिस्तेषां क्षयेण स्वात्मदेवता **तुष्यतीति** । तदिदमुक्तं 'वलल्लभे विश्वमात्मसात्करोती'ति शक्तिसूत्रे । **चितिरेव बलं** तल्लाभे उन्मग्नस्वरूपाश्रयेण विश्वं स्वाभेदेन भासयतीति तद्भाष्यम् । तथा 'तदारूढप्रमिते तत्क्षयाज्जीवसंक्षय' इति शिवसूत्रे वार्तिककारैः 'तदीत्युक्तचरे धात्रि **संवेत्तृत्व**स्वरूपिणी । आरूढा प्रमितिः सच्चिन्मद्विमर्शनतत्परा ॥ **यस्य तस्यास्य** तदिति प्रोक्ताणवमलात्मनः । अभिलाषस्य रूढस्य क्षयाज्जीवस्य संक्षय' इति । **असुरनिर्मितै**र्नानाविधैर्विघ्नैर्यन्त्रितान्देवान्वीक्ष्य श्रीमात्रा तदात्व एव स्वभर्तुर्मुखालोकनमात्रेणाष्टाविंशत्यर्णो महागणपतिरुत्पादितस्तेन तदीयं विघ्नयन्त्रं निर्भिद्य देवा **मोचिताः**। उक्तंच ब्रह्माण्डपुराणे 'ततः सा ललितादेवी कामेश्वरमुखं प्रति । दत्तापाङ्गा समहसन्नातिव्यक्तरदावलिः ॥ तस्या मन्दस्मितरुचः कुञ्जराकृतिमान्मुखे । कटक्रोडगलद्दानः कश्चिद्देवो व्यजृम्भते'त्यादि । तदिदं नामद्वयेनाह । **कामेश्वरमुखस्य परशि**ववदनचन्द्रस्यालोकाभ्यां साकूतवीक्षणचन्द्रिकाभ्यां कल्पित उत्पादितः श्रीमान्महागणेश्वरो यस्याः सा । यद्वा सूत्रोक्तो जीवक्षयो नित्यत्वान्नयुज्यत इत्याशङ्क्य जीवभावस्य क्षयपरत्वेन समाधत्ते—**कामेश्वर इति** । कामेश्वरः केवलनिर्गुणः शिवस्तन्मुखालोकेन तदनुभवेन कल्पितं श्रीगणेश्वरत्वं पुर्यष्टकाधीश्वरत्वं यया सा पुर्यष्टकप्रमातृत्वाहन्ताभिमानिविशिष्टस्य जीवपदवाच्यत्वेन तत्तादात्म्याभिमानस्य स्वात्मस्वरूपनिष्कर्ष-

महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥ ८२ ॥
कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥ ८३ ॥

ज्ञानजन्येन पुर्यष्टकेश्वरत्वज्ञानेन नाशे विशेषणाभावप्रयुक्तो विशिष्टाभाव इति भावः। तदुक्तं 'भूतकञ्चुकी तदा विमुक्तो भूयः पतिसमः परः' इति शिवसूत्रे वार्तिककारैः 'तदेत्युक्ताभिलाषस्य प्रशमाज्जीवसंक्षये। पुर्यष्टकप्रमातृत्वाभिमानगलनादसौ ॥ देहारम्भकरैर्भूतैरस्पृशद्भिरहंपदम्। कञ्चुकीव विशेषेण मुक्तो निर्वाणभाग्यतः ॥ भूयो बाहुल्यतः पत्या समोऽयं परमेशिना। तत्त्वरूपं समाविष्टश्चिदानन्दघनात्मकम् ॥ ततएव परः पूर्णः सम्यक्तन्मयतां गत' इति। अयमेवार्थः शक्तिसूत्रेऽप्युक्तः 'चिदानन्दलाभे देहप्राणादिष्ववभासमानेष्वपि चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्ति'रिति। 'मध्यविकासाच्चिदानन्दलाभ' इत्युत्तरसूत्रे तु मध्यविकासो यश्चिदानन्दलाभो हेतुत्वेनोक्तः स इह वक्ष्यमाणमहागणेशपदेन ग्राह्यः। यश्च मध्यविकासेऽप्युपायस्ततोऽप्युत्तरसूत्रे विकल्पपक्षयादिरूपो वर्ण्यते स इह कामेश्वरमुखालोकपदेनोक्तः। प्रहर्षितेत्यनेन तु चिदानन्दलाभ उक्तः। एतेषां स्वरूपनिष्कर्षस्तु प्रत्यभिज्ञाहृदयेऽनुसंधेयो विस्तरभयान्नेहोच्यते ॥ ८१ ॥ महागणेशेन निःशेषेण भिन्नैर्नाशितैर्विघ्नयन्त्रैः प्रत्यूहसमूहयन्त्रगैः प्रकर्षेण हर्षिता। गव्यूतिमात्रायामे शिलापट्टे अलसादिदेवताष्टकपुटितशूलाष्टकोपेतदिगष्टकं जयविघ्ननाम यन्त्रं विलिख्य देवीसैन्ये विशुक्रेण निक्षिप्तं तन्महागणपतिना चूर्णीकृतमिति ललितोपाख्याने प्रसिद्धम् ॥ भण्डेनासुरेन्द्रेण दैत्यराजेन निर्मुक्तानां शस्त्राणां प्रत्यस्त्राणां च प्रतिकूलान्यस्त्राणि वर्षतीति तथा। शस्त्रास्त्रयोर्भेदो धनुर्वेदे 'धृत्वा प्रहरणं शस्त्रं मुक्त्वा त्वस्त्रमिती'रित'मिति। पक्षे महागणानामीश्वरत्वेनात्मन्यात्मताज्ञानाभावादाविद्यकवृत्तिरूपाणां विघ्नानामस्त्राणां च पराहन्तानुसंधानधारारूपप्रत्यस्त्रैर्नाशेन नामद्वयमध्यात्मरीत्यापि व्याख्येयम् ॥ ८२ ॥ कराङ्गुल्यो दक्षवामकरद्वयस्याङ्गुल्यो दश तासां नखसंधिभूत्पन्नस्य नारायणस्य दशाकृतयो मत्स्यादिदशावतारा यस्याः सा। भण्डासुरेण सर्वासुरास्त्रं नाम सकलदैत्योत्पादनमस्त्रं प्रयुक्तं तेन सोमकरावणबलिहिरण्याक्षादय उत्पन्नाः सन्तोऽयुध्यन्त। ततो देव्या दक्षहस्ताङ्गुष्ठादिवामहस्तकनिष्ठिकान्ताङ्गुलिनखेभ्यः क्रमेण मत्स्यकूर्मवराहनारसिंहवामनभार्गवदाशरथिहलधरकृष्णकल्किरूपदशावतारानुत्पाद्य ते निपातिताः। उक्तंच ब्रह्माण्डे 'दक्षहस्ताङ्गुष्ठनखान्महाराज्ञ्याः समुत्थितः। महामत्स्याकृतिः श्रीमानादिनारायणो विभु'रित्यारभ्य 'दशावतारनाथास्ते कृत्वेत्थं कर्म दुष्करम्। ललिताम्बां नमस्कृत्य बद्धाञ्जलिपुटाः स्थिता' इत्यन्तेन। पक्षे जीवसंबन्धिन्यो जाग्रदादयोऽवस्थाः पञ्चेश्वरसंबन्धीनि सृष्ट्यादीनि कृत्यानि पञ्चेत्येवं दशाकृतयोऽपि नखमात्रेणोत्पन्ना भवन्तीति अनायासेनोत्पद्यन्त इत्यत्र तात्पर्यम्। नारायणशब्दो जीवेश्वरयोरुपलक्षकः। दशाशब्दोऽवस्थापरः। कृति-

कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा॥ ८४॥
हरनेत्राग्निसंदग्धकामसंजीवनौषधिः।

शब्दः कृत्यपरो वा। षडक्षरात्पाशुपतास्त्रमन्त्रादयं भिन्नो महापाशुपतास्त्रमन्त्रः। पूर्वं ईश्वरदेवत्योऽन्त्यः सदाशिवदेवत्यः। 'रुद्रादयः पिशाचान्ताः पशवः परिकीर्तिताः। तेषां पतित्वात्सर्वेशो भवः पशुपतिर्मतः' इति लैङ्गात्। पशुपतेरीश्वरस्य सदाशिवस्येदं पाशुपतम्। अश्वपत्यादित्वान्न पत्युत्तरपदलक्षणो ण्यप्रत्ययः। महच्च तत्पाशुपतं च महापाशुपतं सदाशिवास्त्रं तस्याग्निना निर्दग्धा असुरस्य भण्डस्य सैनिका यया सा। पक्षेऽभ्यासतारतम्येनोत्तरोत्तरोत्पन्ना उत्कृष्टा अद्वैतवृत्तय एव महापाशुपतास्त्राग्नयोऽसुरसैनिका आविद्यकवृत्तयः॥ ८३॥ कामेश्वरस्य यदस्त्रं तन्महापाशुपतादस्त्रादप्यधिकं तस्याग्निना निर्दग्धं भण्डासुरेण सहितं शून्यकाख्यं तदीयनगरं यया सा। तथाच ब्रह्माण्डे 'अथैकशेषितं दुष्टं निहताशेषबान्धवम्। क्रोधेन प्रज्वलन्तं च जगद्विप्लवकारिणम्॥ महासुरं महासत्त्वं भण्डं चण्डपराक्रमम्। महाकामेश्वरास्त्रेण सहस्रादित्यवर्चसा॥ गतासुमकरोन्माता ललिता परमेश्वरी। तदस्त्रप्रहितैर्ज्वालैः शून्यकं तस्य पत्तनम्॥ सस्त्रीकं च सबालं च सगोष्ठधनधान्यकम्। निर्दग्धमासीत्सहसा स्थलमात्रमशिष्यत॥ शून्यकं तत्पुरं नाम शून्यमासीद्यथार्थतः' इति। यद्वा। आत्माख्यदेवताया जीवदशायामेव सायुज्यमुक्तिं प्राप्तस्य शिवतुल्यस्थितिमियता प्रबन्धेन कथयित्वा, सांप्रतं प्रारब्धवशात्स्थितस्य दग्धपटाभासस्य द्वैतभानस्य तत्तुल्येन लिङ्गशरीरादिना सह नाशमात्मज्ञानेन वदन् शिवमात्रावशेषमाह। कामेश्वरास्त्रं चिदग्निः। चिदात्मन एव सर्वकाम्यमानत्वेन कामेश्वरत्वात्। 'आत्मनः कामाय सर्वं प्रियं भवती'ति श्रुतेः। भण्डासुरो द्वैतभानकरो जीवभावः। शून्यकेतिपदस्य दग्धपटाभासद्वैतभानमर्थः। शून्यवादिसंमतं शून्यमेव वा। जीवभावसहितस्य शून्यभावस्य चिदग्निनापगमे चिन्मात्रमवशिष्यत इति सिध्यति। शून्यशब्दाद्रिक्तेर्थे यवादिगणपाठात्कन्॥ एवं भण्डासुरपीडितैर्देवैः स्तुता सती भण्डहननान्तं देवकार्यं कृत्वा तदन्ते संतुष्टैर्देवैः पुनः स्तुते इत्याह—**ब्रह्मेति**। ब्रह्मविष्णुशक्राद्यैर्देवैः सम्यक् स्तुतं वैभवं पराक्रमो यस्याः। 'अस्मिन्नवसरे देवा भण्डसंहारतोषिताः। सर्वेऽपि सेवितुं प्राप्ता ब्रह्मविष्णुपुरोगमाः' इत्यादिब्रह्माण्डपुराणात्। पक्षे ब्रह्माद्यैः संस्तुतं परिचितं विभुत्वमपरिच्छिन्नत्वं सर्वात्मत्वं यस्या आत्मरूपदेवतायाः सा॥ ८४॥ हरस्य तृतीयनेत्रस्थेन अग्निना सम्यक् दग्धस्य भस्मीकृतस्य कामस्य मन्मथस्य संजीवनौषधिर्जीवातुः। विरक्ततरस्यापि कामेश्वरस्य स्वाभिमुखीकरणात्। भण्डासुरहननोत्तरं ब्रह्मादिभिः प्रार्थितया ललिताम्बया पुनर्मन्मथो जीवित इति कथाया ब्रह्माण्डपुराणे स्मरणाच्च। एतेन 'पित्रा निर्भर्त्सितो बालो

---

१ स्तूयमानात्मवैभवा. पा. २ भण्डासुरसैनिकास्तत्समीपवर्तिमुख्यसैनिकास्तेषां इति पाठ एकस्मिन्कोशेऽधिकः.

मात्रैवाश्वास्यते किल' इति न्यायोऽप्यनुगृहीतः। अनेनैवाशयेनोक्तं ब्रह्मवैवर्ते 'हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चने'ति। नच तत्र हरिपदस्योपास्यदेवतोपलक्षणत्वेन त्रिपुरसुन्दरीकोपात्राणकर्तृत्वं परमशिवस्यैव गुरुपरंपरावधित्वाद्वक्तव्यं न पुनर्वैपरीत्यमिति शङ्क्यम्। परमशिवस्यापि श्रीविद्योपासकत्वेनोपासनायाश्च गुरुमन्तरेणायोगात्तदपेक्षायां त्रिपुरसुन्दर्या एव तद्गुरुत्वस्वीकारात्। अतएव योगिनीहृदये शिवेनैव पार्वतीं प्रत्युक्तम् 'अन्यायेन न दातव्यं नास्तिकानां महेश्वरि। एवं त्वयाहमाज्ञप्तो मदिच्छारूपया प्रभो' इति प्रवृत्तिं प्रति इच्छायाः कारणत्वाच्छिवस्य प्रवर्तिका भगवत्येवेति सिद्धं तस्या गुरुत्वम्। अतएव गुरुमूर्तिरिति नाम वक्ष्यते। 'शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यत' इति चतुःशतीशास्त्रादिच्छाशक्तिविशिष्टस्यैव परशिवस्यादिनाथत्वेन तन्त्रेषु गणनान्न त्रिपुरसुन्दर्या गुरुमण्डलान्तरादिनाथात्पूर्वगणनपूजनाद्यापत्तिचोद्यावकाशः। तथाच महास्वच्छन्दतन्त्रे 'गुरुशिष्यपदे स्थित्वा स्वयमेव सदाशिवः। प्रश्नोत्तरपदैर्वाक्यैस्तन्त्रं समवतारय'दिति। स्वयमेवेत्यनेन प्रकाशविमर्शांशयोर्विभजनेन परस्परं गुरुशिष्यभावः सूचितः। प्रवर्तकत्वप्रवृत्त्वे देवीनिष्ठयोर्वकृत्वप्रवर्त्यत्वे शिवनिष्ठयोर्गुरुत्वशिष्यत्वयोरवच्छेदके इति तद्भेदादविरोधः। एतदेव द्योतयितुं मदिच्छारूपयेति विशेषणं प्रभुपदेन संबोधनं च। वस्तुतस्तु आदिनाथादर्वागादिशक्त्यम्बानाम्ना द्वितीयस्थाने गण्यत एवेति न ततः पूर्वं पुनर्गणनापत्तिः। सदाशिवनामकतृतीयगुरुं प्रत्यादिनाथावच्छिन्नाया आदिशक्तेरेव गुरुत्वाद्द्वितीयस्थान एव गणनीयतया न तयोः पौर्वापर्ये विनिगमनाविरहोऽपीति दिक्। यद्वा हरणं हर आत्मस्वरूपापहारः, हरन्तीति वा हाराः आत्मापहर्तारस्तेषां नेता नायकः स एव आसमन्ताद्व्याप्तोऽग्निः स्वस्वरूपान्यथाकरणात्। मूलाज्ञानमिति यावत्। तस्य मूलाज्ञानाधिकत्वात्। तेन सम्यग्दग्धो यः कामो जीवभावमापन्नः कामेश्वरस्वरूप आत्मा तस्य सम्यगावरणपरावृत्त्यभावपूर्वकं जीवने स्वस्वरूपावाप्तौ ओषधिर्मूलिका। एतदुपासनया विद्यारूपयाऽविद्यानिवृत्त्या स्वस्वरूपावाप्तिलक्षणो मोक्ष इति भावः। मन्मथस्य दाहात्पूर्वं स्वशरीरस्य जीवत एव पश्चादशरीरजीवनादृष्टान्तादात्मनोऽपि पूर्वं ब्रह्मण एव सतोऽविद्यावशात्सशरीरस्येव स्थितस्य तन्निवृत्तावशरीरतापूर्वकब्रह्मैक्यप्राप्तिर्ध्वन्यते। ध्वनितं चैवमेव शैवशास्त्रान्तिमाधिकरणे 'भूयः स्यात्प्रोक्तमिलन'मिति। वार्तिकेऽपि 'पुनश्च प्रोक्तचैतन्यस्वरूपमिलनात्मकम्। परायोगादिरूढस्य भवेत्परमयोगिनः॥ भूयः स्यादिति वाक्यस्य स्फुट एवायमाशयः। यच्छिवत्वममुष्योक्तं नापूर्वं तत्तु योगिनः॥ स्वभाव एव तन्मायाशक्तिप्रोत्थापितान्निजात्। नानाविकल्पदौरात्म्यात्पराभूतमिव स्वतः॥ विमृष्टं गुरुनिर्दिष्टप्रोक्तोपायक्रमेण तत्। शिवत्वं व्यक्तमेतीति शिवेनोदीरितं शिव'मिति। शक्तिशास्त्रान्तिमाधिकरणेऽपि 'निजसंविद्देवताचक्रेश्वरत्वप्राप्ति'रिति सूत्रावयवे निजपदेन तथैव स्फोरितमिति। इयता प्रबन्धेन देव्याः परं रूपं सूक्ष्मतरत्वात्सूक्ष्मरूपात्परात्परतो वक्तव्यमपि रहस्योक्तिविपर्यत्वात्स्थूलरूपधार्येण भण्डासुरवधेन सह श्लेषलिप्सया पूर्वमेवोक्त्वा क्रमप्राप्तं सूक्ष्मरूपं स्थूलरूपा-

श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा ॥ ८५ ॥
कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी ।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥ ८६ ॥
मूलमन्त्रात्मिका मूलकूटत्रयकलेवरा ।
कुलामृतैकरसिका कुलसंकेतपालिनी ॥ ८७ ॥

भिन्नत्वेन वर्णयति—**श्रीमद्वाग्भवेत्यादिना** । सूक्ष्मरूपमपि सूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदात्त्रिविधं पञ्चदशीविद्या कामकलाक्षरं कुण्डलिनी चेति भेदात् । तेष्वाद्यं नामत्रयेणोच्यते । श्रीमज्ज्ञानप्रदायकत्वादिमाहात्म्यशीलं वाग्भवत्वस्मादिति व्युत्पत्त्या वाग्भवनामकं कूटं पञ्चाक्षराणां समुदाय एवैकं मुख्यं स्वं निजं रूपं यस्य तादृशं मुखपङ्कजं यस्याः । तदुक्तं 'नेत्रोष्ठापरगलवर्णशालिवाचां संभूतिर्मुखमिति वाग्भवाख्यकूट'मिति ॥ ८५ ॥ कण्ठस्याधःकटिपर्यन्तो यस्य स मध्यभागः स एव मध्यस्थकामराजाख्यस्य षडक्षरसमूहस्य स्वं निजं रूपमस्याः । पटुज्योतिष्मती लोचने इति वत्कर्मधारयादपि मत्वर्थीयः । सर्जनशक्तिमत्त्वाच्छक्तिनामकेन कूटेन चतुरक्षरसमूहेनैकतामभेदमापन्नं कटेरधोभागं धारयतीति तथा । तदुक्तम् 'कामस्ते हृदि वसतीति कामराजं स्रष्टृत्वात्तदनु तवाम्ब शक्तिकूट'मिति ॥ ८६ ॥ चतुर्विधपुरुषार्थमूलकारणत्वान्मूलं पञ्चदशाक्षरी सैव मननात्त्रायत इति मन्त्र आत्मा स्वरूपं यस्याः । तदुक्तं 'पूर्णाहन्तानुसंध्यात्मा स्फूर्जन्मननधर्मतः । संसारक्षयकृत्त्राणधर्मतो मन्त्र उच्यते' इति । मूलस्य कूटत्रयमेवोक्तरीत्या कलेवरं स्थूलरूपं यस्याः, कूटत्रयमेव कलेवरं सूक्ष्मरूपं यस्या इति वा । वस्तुतस्तु मूलशब्दाभ्यां कामकलाक्षरमुच्यते । कूटत्रयपदेन त्र्यात्मकसमुदायघटकावयवा उच्यन्ते । अवयवे तयपो विधानात् । कामकलायां तूर्ध्वबिन्दुरेकस्तदधस्तिर्यग्बिन्दुद्वयं तदधो सार्धकलेति त्रयोऽवयवा गुरुमुखैकवेद्याः, त एव क्रमाद्विद्याकूटतया स्थूलरूपमुखाद्यवयवात्मना च परिणता इति सूक्ष्मतरं कुण्डलिन्याख्यं सूक्ष्मतमं वररूपपरं नामद्वयं समष्टिव्यष्टिभेदेनेति नाथचरणागमे विस्तरः । एवं ब्रह्माण्डान्तर्गतरूपमुक्त्वा पिण्डाण्डान्तर्गतं कुण्डलिन्याख्यं रूपं वक्तुमुपक्रमते । सा हि मूलाधाराख्ये चक्रे सार्धत्रिवलयाकारेण सुप्ता सती योगिभिरुत्थाप्य षट्चक्राणि ब्रह्मविष्ण्वादिग्रन्थींश्च भेदयन्ती सहस्रारं नीता सती तत्कर्णिकारूपचन्द्रमण्डलादमृतं स्रावयति । अयोगिभिरपि भावनामात्रेण सर्वाप्येषा प्रक्रिया संपाद्यते तत्प्रक्रियापराणि नामान्याह—**कुलामृतेत्यादिना** । कुलं सजातीयसमूहः । सचैतन्यज्ञानविषयत्वरूपसाजात्यापन्नज्ञातृज्ञेयज्ञानरूपत्रयात्मकः । घटमहं जानामीत्येवंज्ञानाकारात् ज्ञानभासनायानुव्यवसायापेक्षायां दीपभासनाय दीपान्तरापेक्षावत् इति उक्तं चाचार्यभगवत्पादैः 'जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग'दि

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।

ततश्च सा त्रिपुटी कुलमित्युच्यते । तदुक्तं चिद्गगनचन्द्रिकायाम् 'मेयमातृमितिलक्षणं कुलं प्रान्ततो व्रजति यत्र विश्रम'मिति । ऊर्ध्वाधरभावेन विद्यमानेषु स्वच्छन्दसंग्रहादौ प्रपञ्चितेषु द्वात्रिंशत्पद्येषु सर्वाधस्तनं पद्मं त्रिपुटीसंबन्धाभावादकुलमुच्यते । तदुपरिस्थानि कुलसंबन्धीनि । यद्वा । कुः पृथ्वीतत्वं लीयते यत्र तत्कुलमाधारचक्रं तत्संबन्धाल्लक्षणया सुषुम्णामार्गोऽपि । अतः सहस्रारात्स्रवदमृतं कुलामृतम् । 'शरीरं कुलमित्युक्त'मिति स्वच्छन्दसंग्रहोक्त्या शरीरसंबन्धित्वाद्वा तत्कुलामृतम् । तत्र मुख्यतया रसिका तद्रसास्वादनपरा । 'पुष्पितायाः कुलाङ्गारं दृष्ट्वा यो जपते नर' इति कालीतन्त्रे प्रयोगात्तत्रत्यामृतरहस्य रसिकेति वा । उपास्योपासकवस्तुजातस्य चित्त्वेन साजात्यात्तत्समुदायप्रतिपादकं शास्त्रमपि कुलम् । तथाच कल्पसूत्रे प्रयोगः 'कुलपुस्तकानि च गोपाये'दिति । 'दर्शनानि तु सर्वाणि कुलमेव विशन्ति ही'त्यागमे च । 'न कुलं कुलमित्याहुराचारः कुलमुच्यत'इति भविष्योत्तरपुराणवचनादाचारोऽपि कुलं तयोः संकेतान् तत्रत्यरहस्यानि पालयति पशुषु न प्रकाशयति सांप्रदायिकपरंपरायै प्रकाश्य तन्तुं प्रवर्तयति चेति तथा । 'चक्रसंकेतको मन्त्रपूजासंकेतकाविति । त्रिविधस्त्रिपुरादेव्याः संकेतः परमेश्वरी'त्यागमे 'कुलाङ्गनैषाप्यथ राजवीथीः प्रविश्य संकेतगृहान्तरेषु । विश्रम्य विश्रम्य वरेण पुंसा संगम्य संगम्य रसं प्रसूत' इति चिन्तामणिस्तवे च प्रतिपादितोऽयमर्थः ॥८७॥ कुलं नाम पातिव्रत्यादिगुणराशिशीलो वंशस्तत्संबन्धिन्यङ्गना यथा गुप्ता तथेयमप्यविद्याजवनिकया गुप्तत्वात्कुलाङ्गना । तदुक्तं कुलार्णवे 'अन्या तु सकला विद्याः प्रकटा गणिका इव । इयं तु शांभवी विद्या गुप्ता कुलवधूरिवे'ति । भगवान्परशुरामोऽप्याह 'अन्या विद्या वेश्या इवातिप्रकटा' इत्यादि । कुलस्यान्तः मातृमेययोर्मध्ये मितिरूपेण स्थिता । कुलशास्त्रस्य मध्ये ज्ञेयत्वेन वा स्थिता । प्रतिगृहं प्रतिदेशं प्रतिदेहं प्रतिवशं वा पूज्यत्वेन तिष्ठति । 'कुलं जनपदे गृहे । सजातीयगणे गोत्रे देहेऽपि कथितं कुल'मिति विश्वः । तदुक्तं भविष्योत्तरपुराणे 'पूजनीया जनैर्देवी स्थानेस्थाने पुरेपुरे । गृहेगृहे शक्तिपरैर्ग्रामेग्रामे वनेवन' इति । अधःस्थितं रक्तं सहस्रदलकमलमपि कुलम् । तत्कर्णिकायां कुलदेवीदलेषु कुलशक्तयश्च सन्तीति स्वच्छन्दतन्त्रेऽस्य विस्तरः । ईदृगर्थस्य कुलपदस्य परतः संबन्धसामान्यार्थे तद्धिते कौलम् । 'कुलं शक्तिरिति प्रोक्तमकुलं शिव उच्यते । कुलेऽकुलस्य संबन्धः कौलमित्यभिधीयत' इति तन्त्रोक्तम् । शिवशक्तिसामरस्यं वा कौलं तद्वती कौलिनी । बाह्याकाशावकाशे चक्रं विलिख्य तत्र पूजादिकं कौलमिति रूढ्योच्यत इति कश्चित् । कुले उक्तार्थके योगः संबन्धोऽस्या इति कुलयोगिनी । छलाक्षरसूत्रकारैः कौलिनीकुलयोगिनीत्यष्टाक्षरस्यैकनामत्वं यदुक्तं तन्नोपपत्तिं दशमे शतके वक्ष्यामः । सुषुम्णारूपं ऊर्ध्वस्थितं सहस्रारपद्ममुकुलमित्युच्यते । तथाच स्वच्छन्दसंग्रहे 'अधश्चोर्ध्वं येन शायाः सहस्रदलसंयुत'मित्यारभ्य 'पङ्कजद्वयमीशानि कुलाकुलमयं शुभ'मि-

अकुला समयान्तस्था समयाचारतत्परा ॥ ८८ ॥
मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥ ८९ ॥

स्यन्तं, तद्रूपत्वात्तन्निष्ठत्वाद्वाऽकुला। न विद्यते कुलं देहवंशादिकं यस्या इति वा। दहराकाशावकाशे चक्रं विभाव्य तत्र पूजादिकं समय इति रूढ्योच्यते। सच सर्वैर्योगिभिरैकमत्येन निर्णीतोऽर्थ इति संकेतरूपत्वादपि समयः। तत्प्रतिपादकत्वाद्वसिष्ठशुकसनकसनन्दनसनत्कुमाराख्यतन्त्रपञ्चकमपि समयपदेन व्यवह्रियते। तदन्तस्तत्प्रतिपाद्य तया तिष्ठति। यद्वा। समं साम्यं यातीति समयः शिवः। 'आतोऽनुपसर्गे कः' समयादेवी च तयोरेकशेषः। साम्यं च परस्परं शिवशक्त्योः पञ्चविधं अधिष्ठानसाम्यमनुष्ठानसाम्यमवस्थानसाम्यं नामसाम्यं रूपसाम्यं चेति। अधिष्ठानं पूजाधिकरणं चक्रादि। अनुष्ठानं सृष्ट्यादिकृतम्। अवस्थानं नृत्यादिक्रिया। नाम भैरवादि। रूपमारुण्यादि। अस्य च विस्तरो वासनाद्वयभगोदयव्याख्याने ललेन कृतः। तयोरन्ते स्वरूपे तिष्ठति। 'अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहर' इति विश्वः। रुद्रयामले दशभिः पटलैरुपदिष्ट आचारः समयाचार इत्युच्यते। यद्वा। दीक्षितस्य गुरुकटाक्षवशात् षड्विधैक्यचतुर्विधैक्यान्यतरानुसंधानदार्ढ्ये महावेधाख्यसंस्कारे च महानवम्यां जाते सति पश्चान्मूलाधारादुत्थिता देवी मणिपूरे प्रत्यक्षा भवति। तां तत्रैव पाद्यादिभूषणान्तैरुपचारैः संपूज्यानाहतं नीत्वा ताम्बूलान्तमभ्यर्च्य विशुद्धिचक्रं नीत्वा तत्रत्य चन्द्रकलारूपैर्मणिभिः पूरयित्वा आज्ञाचक्रं नीत्वा नीराज्य सहस्रदलकमले सरघामध्ये सदाशिवेन संयोज्य तिरस्करिणीं प्रासार्य समीपमन्दिरे स्वयं स्थित्वा यावद्भगवती पुनर्निर्गता सती मूलाधारकुण्डं प्रविशति तावत्तत्रैव समयं प्रतीक्षेतेत्याकारो गुरुमुखैकवेद्यः समयाचारः। तयोरुभयविधयोरपि तत्परा आसक्ता ॥ ८८ ॥ मूलाधाराख्यं चतुर्दलं पद्मं तत्कर्णिकाया मध्ये बिन्दौ कुलकुण्डनामके मुखमाच्छाद्य कुण्डलिनी तत्र सर्वदैव सुप्ता तिष्ठति। अतएवैतदाधारत्वात्सुषुम्णामूलत्वाच्च मूलाधार इत्युच्यते। स एवैको मुख्यो निलयो वासस्थानं यस्याः। षट्चक्रेषु प्रतिचक्रमाद्यन्तयोर्द्वौ द्वौ ग्रन्थी। तत्र ब्रह्मग्रन्थिद्वयं स्वाधिष्ठानीयं विशेषेण भिनत्तीति तथा ॥

॥ इति श्रीभासुरानन्दकृते सौभाग्यभास्करे। आद्येन शतकेनाभूद्द्वितीया तापिनी कला ॥ १०० ॥ इति श्रीमत्पदवाक्येत्यादिभास्करराय-कृते ललितासहस्रनामपरिभाषाभाष्ये प्रथमशतकं नाम द्वितीया कला ॥ २ ॥

नाभौ दशदले पद्मे सामयिकपूजायां मणिभी रत्नैः पूर्यते भाष्यते देवीति तच्चक्रं मणिपूरपदवाच्यम्। तस्यान्तरधःस्थितं ग्रन्थिं भित्त्वोदिता प्रकटिता। तदुपरिस्थितं विष्णुग्रन्थिं विशिष्य भिनत्तीति तथा। विष्णोर्मणिपूरचक्रस्थितत्वेन तद्ग्रन्थ्योर्विष्णु-

आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥ ९० ॥
तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिता।
महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी ॥ ९१ ॥

ग्रन्थिसंज्ञा। एवं ब्रह्मरुद्रग्रन्थिसंज्ञे अपि ज्ञेये ॥ ८९ ॥ भ्रूमध्ये द्विदलपद्मे आज्ञापकस्य श्रीगुरोरवस्थानादाज्ञाचक्रसंज्ञा। तावत्पर्यन्तं मनोनिग्रहाभ्यासे ईषद् ज्ञानोदयो भवतीति वा। आङीषदर्थकः। तदन्तराले तिष्ठति। रुद्रग्रन्थिद्वयं हृदयगतानाहतचक्रीयं विभिनत्तीति तथा। अनुष्ठाने एतद्वैपरीत्यमुन्नेयम्। पाठक्रमस्यार्थक्रमस्य बलीयस्त्वात् 'अर्थाच्चे'ति पाञ्चमिकन्यायात्। यद्वा। श्रीविद्यायां चत्वारः खण्डाः आग्नेयसौरसौम्यचन्द्रकलाख्याः त एव वाग्भवकामराजशक्तितुर्याख्याश्च। तेषां चतुर्णां मध्ये त्रयो हृल्लेखाख्या ग्रन्थयः। ताश्च तिस्रः क्रमेण रुद्रविष्णुब्रह्मसंज्ञकाः। तत्त्रयं भिनत्ति तदन्तः प्रविशति। तदभिधेयेत्यर्थः। वस्तुतस्तु दत्तात्रेयसंहितायां षडर्थप्रकरणोक्तकौलिकार्थपरमिदं नामषट्कम्। तदुक्तं तत्रैव 'मूलाधारादिकं चक्रषट्कं कुलमिति स्मृतम्। ग्रन्थित्रयं तत्रदेवीचक्रत्रितयगर्भितम् ॥ पृथ्व्याप्यचक्रद्वितयं ब्रह्मग्रन्थिपदोदितम्। वह्निसूर्यमयं चक्रद्वयं तेजोमयं महत् ॥ विष्णुग्रन्थिपदेनोक्तं तैजसं सर्वसिद्धिदम्। वाय्वाकाशद्वयीरूपं चक्रद्वितयमुत्तमम्। रुद्रग्रन्थिपदेनोक्तं मङ्गलायतनं महत्' इत्यादि। सहस्रसंख्याका अरा दलानि यस्य तदम्बुजं कमलं ब्रह्मरन्ध्राधःस्थमारूढा। सुधायास्तत्कर्णिकाचन्द्रसंबन्धिन्या आसारो धारासंपातस्तमभिवर्षितुं शीलमस्याः। 'अमृतस्य धारा बहुधा दोहमानं, चरणं नो लोके सुधितान्दधात्वि'ति श्रुतेः ॥ ९० ॥ तडित्सौदामिन्येव लता वल्ली तया समा रुचिः कान्तिर्यस्याः। 'विद्युल्लेखेव भास्वरे'ति श्रुतेः। षडवयवकानि चक्राणीति मध्यमपदलोपी समासः। तेन 'द्विगो'रिति ङीप्रत्ययो न भवति। तानि च मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाचक्रनामकानि। तेषामुपरि सहस्रारे सम्यक् स्थिता। महे उत्सवे तन्त्रत्यशिवशक्तिसमायोगरूपे आसक्तिस्तत्परता यस्याः। 'मह उद्धव उत्सव' इत्यमरः। वह्नितेजस्यासक्तिर्यस्या वा। 'मह उत्सवतेजसो'रिति विश्वः। महती आ समन्तात्सक्तिः संयोगो यस्या वा। कुण्डले अस्याः स्त इति कुण्डलिनी आकृत्या भुजङ्गी वा। तत्स्वरूपं च तन्त्रराजे 'मूलाधारस्थवह्न्यात्मतेजोमध्ये व्यवस्थिता। जीवशक्तिः कुण्डलाख्या प्राणाकाराथ तैजसी ॥ प्रसुप्तभुजगाकारा त्रिरावर्ता महाद्युतिः। मायाशीर्षा नदन्तीं तामुच्चरत्यनिशं खगे ॥ सुषुम्णामध्यदेशे सा यदा कर्णद्वयस्य तु। पिधाय न शृणोत्येनं ध्वनिं तस्य तदा मृति'रित्यादि। योगवासिष्ठे चूडालोपाख्याने 'पुर्यष्टकापराख्यस्य मनसो जीवनात्मिकाम्। विद्धि कुण्डलिनीमन्तरामोदस्येव मञ्जरी'मिति। नामनिर्वचनं च देवीपुराणे 'यतः स्फाटकाकारा कुण्डलिन्युच्यते तत' इति। यद्वा वाग्भवबीजस्य

भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥ ९२ ॥

सुधितान्दधात्वि'ति मन्त्रोऽपि । लोकस्य ब्रह्मलोकस्य द्वारं साधनम् । अर्चिर्ज्योतिर्महःशब्दा अग्निसूर्यचन्द्रकलावाचकाः । चरणशब्दश्चरति यातायातं करोतीति व्युत्पत्त्या कुण्डलिनीपरः । सामान्ये नपुंसकम् । सुधितान् तृप्तान् । हकारस्य धकारादेशोऽर्चिःशब्दे सकारलोपश्च छान्दसः । कुण्डलिनी अभ्यादिस्थानमागतासती सुधावृष्टिं कुर्वती अस्मांस्तृप्तान्करोत्वित्यर्थः । तदिदमुपबृंहितं शुकसंहितायाम् 'पावकस्यार्चिषां भानोर्ज्योतिषा महसा विधोः । दोहमाना सुधाधारा [illegible]तिसहस्रधा । गुप्ताचारा कुण्डलिनी तृप्तानस्मांस्तनोतु से'ति । अत्र गुप्तं यथातथा चरतीति चरणपदस्यार्थः । एवं वसिष्ठादितन्त्रेष्वप्युपबृंहणानि द्रष्टव्यानि ॥ ९१ ॥ भवं महादेवं संसारं कामं वा आनयति जीवयतीति भवानी । तदुक्तं देवीपुराणे निर्वचनाध्याये 'रुद्रो भवो भवः कामो भवः संसारसागरः । तत्प्राणनादियं देवी भवानी परिकीर्तिते'ति । यद्वा जलमूर्तेः परमेश्वरस्य भव इति संज्ञा । तस्य पत्नी उषानाम्नी । पुत्रः शुक्राख्यः । तदुक्तं लिङ्गपुराणे 'भव इत्युच्यते देवैर्भगवान्वेदवादिभिः । संजीवनेन लोकानां भवस्य परमात्मनः । उषा संकीर्तिता भार्या सुतः शुक्रश्च सूरिभि'रिति । वायुपुराणेऽपि 'भवस्य या द्वितीया तु तनूरापः स्मृतेति वै । तस्योषानामिका पत्नी पुत्रश्चाप्युशना स्मृत' इति । भवशब्दनिष्पतिरपि तत्रैव 'यस्माद्भवन्ति भूतानि ताभ्यस्ता भावयन्ति च । भवनाद्भावनाच्चैव भूतानां स भवः स्मृत'इति । अत्र ताभ्य इत्यस्याध्य इत्यर्थः । 'तस्मादापो भवः स्मृता' इत्युपक्रम्य पाठात् । भवं जीवनरूपं जलमप्यानयति जीवयतीति भवानी । यद्वा भवस्य स्त्रीत्यर्थे पुंयोगलक्षणो ङीष् । 'इन्द्रवरुणे'त्यादिनानुगागमः । इयंच स्थानेश्वराख्यपीठस्याधिष्ठात्री देवता । तदुक्तं पद्मपुराणेऽष्टोत्तरशतदेवीतीर्थमालाध्याये 'स्थानेश्वरे भवान्याख्या बिल्वके नामपत्रके'ति । एवं रूपपञ्चकं निर्वर्ण्य तत्प्राप्त्युपायं कतिपयैर्नामभिराह । भावना तावद्विविधा । शाब्दी भावना आर्थी भावना चेति । तत्र शाब्दी वैदिकशब्दनिष्ठाचार्यैश्छासमानयोगक्षेमा । ईश्वरेच्छैवेति तु मीमांसकवादकौतूहले निरूपितमस्माभिः । आर्थी तु प्रवृत्तिरूपा । कारकाणां परस्परसंबन्धरूपेत्यपि तत्रैव निरूपितम् । ताभ्यामगम्या गम्या वा कर्ममार्गविषय इति वा तज्जन्यन्तित्तशुद्धिरूपा वेत्यर्थः । यद्वा भावना त्रिविधा । तदुक्तं कूर्मपुराणे 'ब्राह्मी माहेश्वरी चैव तथैवाक्षरभावना । तिस्रस्तु भावना ह्येते वर्तन्ते सततं द्विजा' इति । अन्यत्रापि 'त्रिविधां भावनां ब्रह्मन्प्रोच्यमानां निबोध मे । एका मद्विषया तत्र द्वितीयाऽव्यक्तसंश्रया । अन्या तु सगुणा ब्राह्मी विज्ञेया त्रिगुणा त्रिधे'ति । इदं चेन्द्रद्युम्नंप्रति कूर्मावतारस्य भगवतो वचनम् । एतल्लक्षणनिष्कर्षश्च रत्नत्रयपरीक्षायां दीक्षितैः कृतस्ततएवावगन्तव्यः । यद्वा 'आज्ञान्तं सकलं प्रोक्तं ततः सकलनिष्कलम् ।

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ९३ ॥

उन्मन्यन्ते परे स्थाने निष्कलं च त्रिधा स्थित'मिति योगिनीहृदयोक्तलक्षणास्तिस्रो भावनाः । ताभिर्गम्या ज्ञेया । भवः संसार एवारण्यमतिगहनत्वात् पुनःपुनः प्ररोहाच्च । तस्य कुठारेव कुठारिका । 'द्वयोः कुठार' इति कोशात्स्त्रीलिङ्गता । तच्छेत्रीत्यर्थः । भद्रं मङ्गलं प्रियं यस्याः । भद्रो गजविशेषस्तज्जातीया गजाः प्रियाः यस्यां इति वा । भद्रा भव्या मूर्तिः स्वरूपं यस्याः । 'ब्रह्म तन्मङ्गलं विदु'रिति विष्णुपुराणात् । 'मङ्गलानां च मङ्गल'मिति भारताच्च । 'भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वि'त्यमेयपुराणोक्ता भगपदार्थाः शोभना यस्यां सा सुभगा ललितैव तस्या भावः सौभाग्यं तदभेद इति यावत् । यत्तु पद्मपुराणे 'इक्षवस्तरुराजश्च निष्पावा जीरधान्यके । विकारवच्च गोक्षीरं कौसुम्भं कुसुमं तथा । लवणं चाष्टमं तद्वत्सौभाग्याष्टकमुच्यते' इति वचने परिगणितं तदपि मङ्गलकार्योपयुक्तत्वाच्छ्रीकरत्वात्सौभाग्यमेव । सुष्ठु भाग्यं नियतिर्यस्य तस्य भावो वा सौभाग्यम् । भक्तेभ्यस्तानि ददातीति तथा । अत्रेदं बोध्यम्—महाशक्तिरित्यारभ्यैतत्पर्यन्तानि नव नामानि बडण् इति छलाक्षरसूत्रेण निर्दिष्टानि । तथाहि वररुचिसंकेते यवर्गोऽष्टानामिह तु नवानां संज्ञेत्युक्तं 'काज्ञाद्वाः' 'टयौचे'ति सूत्राभ्यां ककारमारभ्य ञकारमभिव्याप्य द्वाराणि नव भवन्ति । टवर्गयवर्गावप्येवमिति तदर्थः । पिषुः । पवर्ग इषूणां पञ्चानां संज्ञा । एतान्यक्षराणि नामसंख्यायोतकानि । अज्ञाद् । अचो राजः षोडशान्तसंख्यावाचका भवन्ति । युयुत्साः । इकार आदौ तत उकारः । एतद्वयं यस्मादक्षरात्परस्तदक्षरं साः । अकारेण सहितं तयोर्नाम । यथा किकु इत्यनयोः क इति संज्ञा टिटु इत्यनयोः ट इति । फीपात्पृडवः । फीकारात्परतः पृकारश्चेत्तद्युगलस्य डकारः संज्ञा । पकारात्परतश्चेत्तद्युगलस्य बकारः संज्ञा । पुटोण् । संपुटीकरणस्य ण् इति संज्ञा । एवंच बडणिति सूत्रस्य डकारेण पुटितो बकार इत्यर्थः । तेन डबड इति सिध्यति । ततश्च फीपृपिपुपृफीपृ इति सप्त वर्णा भवन्ति । द्वे नामनी चतुरक्षरे । तत्र प्रथमनाम्न आद्यमक्षरं पवर्गीयं । तृतीयं नामाष्टाक्षरं । तदाद्यमक्षरं पवर्गीयं । ततो द्वित्रिपञ्चाक्षरे । तदाद्ये पवर्गीये । ततः षष्ठं नामाष्टाक्षरं । तदाद्यमक्षरं च पवर्गीयं । ततो द्वे चतुरक्षरे । तयोराद्यं नाम पवर्गीयादिमाक्षरकं । ततोऽष्टाक्षरमेकं नाम । तदाद्यमक्षरं च पवर्गीयमिति । एवं नव नामानीत्येतावान्सूत्रार्थ इति दिक् ॥ ९२ ॥ भक्तिर्द्विविधा । मुख्या गौणी चेति । तत्रेश्वरविषयकोऽनुरागाख्यश्चित्तवृत्तिविशेषो मुख्यभक्तिः । तथाच भक्तिमीमांसासूत्रम् 'सा परानुरक्तिरीश्वरे' इति । 'अथातो भक्तिजिज्ञासे'ति सूत्रोपात्ता भक्तिस्तत्पदार्थः । तस्याः परेति विशेषणम् । परां मुख्यां भक्तिविशेषमुद्दिश्यानुरक्तिर्लक्षणत्वेन विधीयत इति तदर्थः । अतएव परेति गौणीं व्यावर्तयतीति भाष्यम् । 'गौण्या तु समाधिसिद्धि'रिति सूत्रे गौणी भक्तिः सेवारूपा

कथिता । तथाच गरुडपुराणे 'भज इत्येष वै धातुः सेवायां परिकीर्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी'ति । तद्भेदाः स्मरणकीर्तनादयो बहवः । तेन 'भक्तिरष्टविधा ह्येषा यस्मिन्म्लेच्छेऽपि वर्तते । स विप्रेन्द्रो यतिः श्रीमान्स मुनिः स च पण्डित' इत्यादित्यगरुडपुराणयोर्वचनम् । 'भक्तिर्नवविधा राजन्' इत्यादिभागवतं वचनं 'भक्तिर्दशविधा ज्ञेया पापारण्यदवोपमे'ति दशविधत्वप्रतिपादकं बृहन्नारदीयवचनमन्यच्चैतादृशमवयुत्यानुवाद एव । ईदृशो भक्तिपदार्थः प्रियो यस्याः सा । तथाच शिवपुराणे 'कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः । बहिर्बाभ्यन्तरे वापि मया भावो हि गृह्यते' इति । अत्र भावशब्देन बाह्या सेवारूपा चेष्टाभ्यन्तरोऽभिप्रायश्च गृह्यते । भक्त्या संराधनेन गम्या प्रत्यक्षा । तथाच श्रुतिः 'पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छ'न्निति । स्मृतिरपि 'योगिनस्तं प्र[1]पश्यन्ति भगवन्तं सनातन'मिति । 'ईश्वरप्रणिधानाद्वे'ति । योगसूत्रेऽप्येवं प्रणिधानपदस्य भक्तिपरतया राजमार्तण्डे व्याख्यानात् । भक्तौ ब्रह्मसूत्रमपि 'अपि संराधने प्रत्यक्षानुमानाभ्या'मिति । अव्यक्तमपि ब्रह्म भक्त्या प्रत्यक्षं भवतीति श्रुतिस्मृतिभ्यां तथावगमादिति तदर्थः । 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपे'ति भगवद्वचनमपि । अत्र प्रवेष्टुमित्यनेन ब्रह्मभावाख्यो मोक्ष उच्यते सोऽपि भक्त्यैव लभ्यत इत्यर्थः । तेन प्रकृते गम्यपदं प्राप्यपरत्वेनापि व्याख्येयम् । 'ब्रह्मसंस्थोऽमृतत्वमेती'ति श्रुतौ निष्ठापर्यायभक्तिवाचिना संस्थापदेन तथा प्रतिपादनात् । अतएव भक्तिमीमांसायां 'तत्संस्थस्यामृतत्वोपदेशा'दिति सूत्रम् । ब्रह्ममीमांसायां 'तन्निष्ठस्य मोक्षोपदेशा'दिति सूत्रं च । नित्यातन्त्रेऽपि भक्तिलक्षणकथनपूर्वकं तस्याखिलपुरुषार्थप्रदत्वमुक्तम् । 'उक्तलक्षणसंपन्ने गुरौ तत्प्रोक्तयोस्तथा । विद्यानुष्ठानयोः स्थैर्यधियः संशयनाशनी ॥ तारकत्वाप्रमत्तत्वे भक्तिरुक्ताखिलार्थदा । यया विहीना नियतमिहामुत्र च दुःखिता' इति । अथवा भक्तिर्लक्षणा तया गम्या बोध्या । विशिष्टशक्तिकानां सत्यज्ञानादिपदानां निर्धर्मकब्रह्मवाचकत्वायोगात् । अतएव त्रिशत्यां वक्ष्यते 'लक्ष्यार्था लक्षणागम्ये'ति । 'सर्वेषां त्वैकमुख्यमैतिशायनस्य भक्तपावनत्वात्सवनाधिकारो ही'ति जैमिनिसूत्रे भक्तिपदस्य लक्षणायां प्रयोगः । आस्माकीने शिवस्तवेऽपि 'न मे शक्तिः श्रीमन्महिमपरमाणोरपि नुतौ तथापि त्वद्भक्तिं व्यतनवमवष्टभ्य किमपि । न मद्वाः क्रोशन्ति प्रवचनमथापि प्रवृते यथा लोके भक्त्या परशिव न शक्त्या खगतये'ति भक्तेरुक्तलक्षणाया वश्या पराधीना । भक्त्या वश्येति वा । खतन्त्रापि 'शिवभक्तिपारतन्त्र्यत्वमश्नुष' इति वचनात् । भयानि जलस्थलादिप्रयुक्तादीनि सर्वाण्यपहन्तीति भयापहा । 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति श्रुतेः । तथाच वायुपुराणे 'अरण्ये प्रान्तरे वापि जले वापि स्थलेऽपि वा । व्याघ्रकुम्भीरचोरेभ्यो भयस्थाने विशेषतः । आधिष्वपि च सर्वेषु देवीनामानि कीर्तये'दिति ।

---

१ भक्तिसूत्रमिति पाठः.

शांकरी श्रीकरी साध्वी शरच्चन्द्रनिभानना ।
शान्तोदरी शान्तिमती निराधारा निरञ्जना ॥ ९४ ॥

शंभोरियं स्त्री, शांभवानामियं माता वा शांभवी । योगशास्त्रे मुद्राविशेषस्येदं नाम । तल्लक्षणं तत्रैव 'अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता । एषा सा शांभवी मुद्रा सर्वतन्त्रेषु गोपिते'ति । कल्पसूत्रे तु दीक्षास्तिस्र उक्ताः शक्तिः शांभवी **मान्त्री चेति** । विभज्य तल्लक्षणान्युक्तानि देवीभागवते 'अष्टवर्षा च शांभवी'ति **कन्याविशेषस्य** नामोक्तं तद्रूपा वेत्यर्थः । शारदया सरस्वत्या वाग्देवताभिश्च आराध्या, **शारदे** शरदृतौ वर्षादौ वा आराध्या । 'अथ शरत्समाः संवत्सर' इत्यमरात् । **'शरत्काले** महापूजा क्रियते या च वार्षिकी'ति मार्कण्डेयपुराणे । वर्षस्यादौ भवा वार्षिकीत्यर्थः । 'वासन्ते नवरात्रे तु पूजयेद्रक्तदन्तिका'मिति रुद्रयामलात् । शारदैर्विशारदैः पण्डितैः शालीनाख्याश्रमविशेषशीलैर्वाराध्या । 'शारदः पीतमुद्गे स्याच्छालीने प्रतिभाविनी'ति मेदिनी । **'अकारो वासुदेवः स्यादाकारस्तु पितामह' इत्यनेकार्ध**ध्वनिमञ्जर्यामभिधानात्ताभ्यामाराध्येत्यक्षरद्वयश्लेषेणार्थे सिद्धे शारदा **चासावाराध्येति** कर्मधारयो वा । तत्र शारदांशनिरुक्तिः कालीपुराणे 'शरत्काले पुरा यस्मान्नवम्यां बोधिता सुरैः । शारदा सा समाख्याता पीठे लोके च नामत' इति । क्षितिमूर्तेः परमशिवस्य शर्व इति संज्ञा तस्य स्त्रीत्यर्थे पुंयोगलक्षणे ङीष्यानुगागमः । मङ्गलस्य माता सुकेशीनाम्नीत्यर्थः । तदुक्तं लैङ्गे 'चराचराणां भूतानां धाता विश्वंभरात्मकः । शर्व इत्युच्यते देवः सर्वशास्त्रार्थपारगैः । विश्वंभरात्मनस्तस्य शर्वस्य परमेष्ठिनः । सुकेशी कथ्यते पत्नी तनुजोऽङ्गारकः स्मृत' इति । वायवीयेपि 'शर्वस्य या तृतीया तु नाम भूमितनुः स्मृता । पत्नी तस्य सुकेशीति पुत्रश्चाङ्गारको मत' इति । शर्म सुखं दातुं शीलमस्याः 'शर्मशातसुखानि चे'त्यग्निपुराणीयकोशः । 'सुखं ददाति भक्तेभ्यस्तेनैषा शर्मदायिनी'ति देवीभागवतात् ॥ ९३ ॥ करोतीति करः । पचाद्यच् । 'कृञो हेतुताच्छील्ये'त्यादिना टो वा । शं सुखं तस्य करः । शं करे यस्य स वा शंकरः तस्य स्त्री शांकरी । तथाच कालिकापुराणे 'प्रतिसर्गादिमध्यान्तमहं शंभुं निराकुलम् । स्त्रीरूपेणानुयास्यामि प्राप्य दक्षादहं तनुम् । ततस्तु विष्णुमायां मां योगनिद्रां जगन्मयीम् । शांकरीति स्तुविष्यन्ति रुद्राणीति दिवौकस' इति । करोतीति करी श्रियः करी श्रीकरी । श्रीकरो विष्णुः । 'श्रीधरः श्रीकरः श्रीमानि'ति विष्णुसहस्रनामसु पाठात् । तस्येयं श्रीकरीति वा ॥

अथ परिभाषायां षट्चत्वारिंशन्नामानि विभजते—**राजा चतुर्बलेन्द्रो भूत्वा बलिरागमान् द्विदश । गुणगणगौण्यं गणगोमार्गे मार्गे मृगेण भवेत् ॥ ११ ॥** चतुरित्येकस्मिन्वर्णे चतुश्चतुरक्षराणि चत्वारि नामानि द्विदश द्विसहिता दश । अर्धत्रयेणैतादृशानि नामानि द्वादश । स्पष्टमन्यत् ॥ ११ ॥ **साध्वी** पतिव्रता । 'सती साध्वी पतिव्रते'त्यमरः । कालत्रयेऽपि पत्यन्तरयोगाभावादनितरसाधारणं पातिव्रत्यम् । तदुक्तं श्रीमदाचार्यभगवत्पादैः 'कलत्रं वैधात्रं कति कति

निर्लेपा निर्मला नित्या निराकारा निराकुला।

भजन्ते न कवयः श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः। महादेवं हित्वा तव सति सतीनामचरमे कुचाभ्यामासङ्गः कुरबकतरोरप्यसुलभः' इति। देवीभागवतेऽपि 'साध्वीत्यनन्यसामान्यपातिव्रत्येन गीयसे' इति। शरत्कालिकेन चन्द्रेण तुल्यमाननं मुखं यस्याः। 'शो तनूकरणे'। शातं कृशम्। 'आदेच उपदेशेऽशिती'त्यात्वम्। उदरं यस्याः सा शातोदरी। शतोदरस्यानन्तगुहस्य हिमवतोऽपत्यं हैमवतीत्यर्थो वा। शान्तिरस्या अस्तीति शान्तिमती। भक्तेष्वौद्धत्याभावात्। आधारान्निष्क्रान्ता मूलाधारादुद्गता। 'निरादयः क्रान्ताद्यर्थे पञ्चम्ये'ति समासः। यद्वा निर्गत आधारः अधिष्ठानान्तरं यस्याः। सर्वजगदधिष्ठानस्य सत्यत्वेनाधारान्तरायोगात्। अथवा निराधाराख्यपूजास्वरूपा। तथाच सूतसंहितायाम् 'पूजा शक्तेः परायास्तु द्विविधा संप्रकीर्तिते'त्युपक्रम्य बाह्याभ्यन्तरभेदेन द्वैविध्यमुक्त्वा बाह्याया वैदिकतान्त्रिकभेदेन द्वैविध्यं सलक्षणं वर्णयित्वोक्तम् 'पूजा याऽभ्यन्तरा सापि द्विविधा परिकीर्तिता। साधारा च निराधारा निराधारा महत्तरा॥ साधारा या तु साधारे निराधारा तु संविदि। आधारे वर्णसंकृत्तविग्रहे परमेश्वरीम्॥ आराधयेदतिप्रीत्या गुरुणोक्तेन वर्त्मना। या पूजा संविदि प्रोक्ता सा तु तस्यां मनोलयः॥ संविदेव परा शक्तिर्नेतरा परमार्थतः। अतः संसारनाशाय साक्षिणीमात्मरूपिणीम्॥ आराधयेत्परां शक्तिं प्रपञ्चोल्लासवर्जिताम्। स्वानुभूत्या स्वयं साक्षात्स्वात्मभूतां महेश्वरीम्॥ पूजयेदादरेणैव पूजा सा पुरुषार्थदा' इति। अथ निराधारपूजाकर्मीभूतसंवित्स्वरूपस्यैदंपर्येण निषेधमुखेन विधिमुखेन पराभिमतनिरासेन च निर्धारणपूर्वकं तत्प्राप्तिसाधनोपायं तज्जन्यफलस्वरूपं च कतिपयैर्नामभिराह—**निरञ्जनादिभिः** सप्तभिः श्लोकैः। सन्ति हि त्रिविधाः पशवः। तत्रानात्मन्यात्मताज्ञानस्वरूपाणवमलमात्रेण युक्तो विज्ञानकेवलः, देहारम्भकादृष्टात्मककार्मणमलवान्प्रलयाकलभेदवद्विज्ञानकमायीयाख्यमलवान्सकल इति भेदात्। एषूत्तरोत्तरो मलः पूर्वपूर्वव्याप्य इत्यादि निरूपितं सेतुबन्धेऽस्माभिः। तत्र सकलपशुनिरासायाह—निरञ्जना अञ्जनं नाम कालिमा। मायासङ्ग इति यावत्। तमोरूपत्वेनावरणधर्मेण सादृश्यात्। तथाच योगवासिष्ठे 'भावाभावे पदार्थानां हर्षामर्षविकारदा। मलिना वासना राम सङ्गशब्देन कथ्यते' इति। निर्गतमञ्जनं यस्याः सा निरञ्जना। 'निरवद्यं निरञ्जन'मिति श्रुतेः। अविद्यासंपर्काभाववतीत्यर्थः। मिथ्यारूपाया अविद्यायाः स्वाधिष्ठानेऽभावात्। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वस्यैव मिथ्यात्वात्। यद्वा नितरां रञ्जनं रागो रक्तिमा संतोषणं वा यस्याम्॥ ९४॥ प्रलयकालेऽतिव्याप्तिं निरस्यति। कर्मसंबन्धेन लेपस्तस्मान्निष्कासिता। 'न मां कर्माणि लिम्पन्ति' इति स्मृतेः। यद्वा लेपः कर्मसंबन्धः स ज्ञानेन निर्गतो यस्याः सा निर्लेपा। तदुक्तं यज्ञवैभवखण्डे 'कर्मभिः सकलैरपि लिप्यते ब्रह्मवित्प्रवरश्च न सर्वथा। पद्मपत्रमिवाम्भिरहो परब्रह्मवित्प्रवरस्य तु वैभवम्'। गीतास्वपि 'लिप्यते न स पापेन पद्मपत्र-

निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥ ९५ ॥
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।

मिवाम्भसा'इति । विज्ञानकेवलेऽतिव्याप्तिं परिहरति । निर्मला आणवमलाभाववती, मलस्तमात्मा तदभाववती वा । मुक्तजीवस्तु लक्ष्य एव । नित्यमुक्तेत्यनेन वा तन्निरासः । यद्वा नित्यशुचिनो मालिन्यभ्रमाधायकत्वादविद्यैव मलस्तदभावत्वान्निर्मला । मलस्य मिथ्यात्वात् । तदधिष्ठानं तु न तथेत्याह । नित्या कालत्रयेऽप्यबाध्या । तेन क्षणिकविज्ञानमेवात्मेत्यौत्पातिकबाह्यनिरासः । 'अविनाशी वा अरेऽयमात्मे'ति श्रुतेः । तिथिनित्या कालनित्यामन्त्ररूपा वा । साकारविज्ञानवादिमाध्यमिकनिरासायाह । आकारस्य सगुणरूपस्य कल्पितत्वान्निराकारा । तदुक्तं विष्णुभागवते 'स वै न देवासुरमर्त्यतिर्यङ् स्त्री न षण्ढो न पुमान्न जन्तुः । नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः' इति । आकुलेति भावप्रधानो निर्देशः । अविद्यासंपर्केऽप्याकुलत्वाभावान्निराकुला । निर्गता आकुलता यस्या इति वा । तादृशानां दूरेति यावत् । आकुलत्वं सर्वाभावः शून्यं वा तेन शून्यवादिगम्भीराख्यबाह्यनिरासः । तार्किकमतं निरस्यति । गुणशून्यत्वान्निर्गुणा । 'साक्षी चेता केवलो निर्गुणश्चे'ति श्रुतेः । गुणानां शरीरधर्मत्वेन चिद्धर्मत्वाभावाच्च । तदुक्तं मत्स्यपद्मपुराणयोर्हिमवन्तंप्रति नारदेन 'यदुक्तं च मया देवी लक्षणैर्वर्जितेति च । शृणु तस्यापि वाक्यस्य सम्यगर्थं विचारणात् ॥ लक्षणं दैवकोट्यङ्गः शरीरैकाश्रयो गुणः । इयं तु निर्गुणा देवी नैव लक्षयितुं क्षमे'ति सावयवमेव ब्रह्मेति मतं निरसितुमाह । निर्गताः कला अंशा वास्तविका यस्याः । 'अंशो नानाव्यपदेशा'दिति सूत्रम् । 'ममैवांशो जीवलोके' इति स्मृतिश्च कल्पितांशाभिप्रायत्वादविरुद्धा । निर्गुणचिन्ता वा निष्कलेत्युच्यते । तदुक्तं विज्ञानभैरवभट्टारकैः 'ध्यानं या निष्कला चिन्ता निराधारा निराश्रया । न तु ध्यानं शरीरस्य मुखहस्तादिकल्पना' इति । निष्कला कलातीता वा । शान्ता शमवती । 'निष्कलं निष्क्रियं शान्त'मिति त्रिपुरोपनिषत् । शकारोऽन्तो यस्य तद्रूपा । अमृतबीजात्मिकेति यावत् । आशान्तेति वा छेदाद्दिगन्तव्याप्तत्वोक्त्यात्मनः परिच्छिन्नतावादिदिगम्बरनिरासः । 'सत्यकामः सत्यसंकल्प' इत्यादिश्रुत्या तादृशमेव ब्रह्मेति मतं निरस्यति । निर्गतः काम इच्छा यस्याः सा निष्कामा । 'अवाप्ताखिलकामायास्तृष्णा किंविषया भवेत्' इति देवीभागवतात् । 'नेतिनेत्यात्मे'ति श्रुतेः 'पूर्णमदः पूर्णमिद'मिति श्रुतेश्च औपाधिकगुणपराणि श्रुत्यन्तराणीति भावः । निष्कममतीति वा । 'अम गत्यादिषु' । उपप्लवो नाशः स निर्गतो यस्याः । निःशेषेणातिशयेन उप समीप एव पिण्डाण्ड एव प्लवोऽमृतप्लवणं यया सा निरुपप्लवा । निर्बन्धादिपदेष्वतिशयार्थे निरः प्रयोगात् । तदाह ॥ साध्वी निषदि 'आप्लवस्व प्रप्लवस्व अण्डीभवज मा मुहु'रिति ॥ ९५ ॥ नित्यं भावादनि-

---

१ 'त्मेत्यौत्तानिक इति पाठः. ति कति

नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ९६ ॥
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ९७ ॥

भक्ताः सा । नित्यं यथा तथा मुक्ता वा । नित्यं मुच्यति मुच्यते वा नित्यमुक् तस्य भावस्तत्ता वा मोक्षरूपेत्यर्थः । प्रधानस्य मनसश्च निरासायाह । निर्गता विकाराः सांख्ये प्रसिद्धा महदाद्यास्त्रयोविंशतिर्यस्याः । तदुक्तं सांख्यतत्त्वकौमुद्यां 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति । निर्गताः प्रपञ्चाः क्षित्यादिसंचयप्रतारणविस्तारा यस्याः सा निष्प्रपञ्चा । 'प्रपञ्चः संचये प्रोक्तो विस्तारे च प्रतारणे' इति विश्वः । 'प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते' इति श्रुतेः । नैरात्म्यवादिनो बौद्धाः । नैरात्म्यं ब्रह्मेति चार्वाकमतं निरस्तम् । सर्वाश्रयस्याश्रयान्तरायोगान्निराश्रया । 'विश्वं प्रतिष्ठितं यस्यां तस्याः कुत्र प्रतिष्ठिति'रिति वचनात् । कालत्रयेऽपि मालिन्याभावान्नित्यशुद्धा । 'अस्पर्शश्च महाञ्शुचि'रिति श्रुतेः । 'अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः' इति स्मृतेश्च । 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुतिमभिसंधायाह । नित्यबुद्धा चिद्रूपा । शुद्धबुद्धौ जिनविशेषौ तौ यस्याः प्रसादादिति वा । षड्दर्शनपूजायां जैनदर्शनोपास्यत्वेनापि देव्याः पूजादर्शनात्तदुपास्यतानामकदेवीरूपेति यावत् । निर्गतं अवद्यं गर्ह्यमाविद्यकविकारजातं यस्याः । 'निरवद्यं निरञ्जन'मिति श्रुतेः । अवद्यान्नरकान्निर्गता यत्प्रसादादिति वा । तथाच कूर्मपुराणे 'तस्मादहर्निशं देवीं संस्मरेत्पुरुषो यदि । न यात्यवद्यं नरकं संक्षीणाशेषपातकः' इति । लिङ्गपुराणेऽपि 'मायान्ताश्चैव घोराद्या अष्टाविंशतिकोटयः । नरकाणामवद्यानां पच्यन्ते तासु पापिनः । अनाश्रिता भवानीशं शंकरं नीललोहित'मित्यादि । अवकाशावधिभेदच्छिद्राण्यन्तरपदार्थाः तैर्विरहिता निरन्तरा । 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि चे'त्यमरः । 'य एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति' इति श्रुतेः । तेन सजातीयादिभेदत्रयवदेव ब्रह्मेति मतनिरासः ॥ ९६ ॥ सर्वकारणस्य कारणान्तराभावान्निष्कारणा 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' इति श्रुतेः । निःशेषं कारणं प्रथमं यस्यामिति वा । तज्जन्यानन्दवतीत्यर्थः । 'महापद्मवनान्तस्थां कारणानन्दविग्रहा'मिति वचनात् । कलङ्कः पापं तदभावान्निष्कलङ्का । 'शुद्धमपापविद्ध'मिति श्रुतेः । उप समीपे आदधाति स्वीयं धर्ममित्युपाधिः । 'उपसर्गे घोः किः' । स्वीयं लौहित्यं सामीप्यमात्रेण स्फटिके समर्पयञ्जपाकुसुममुपाधिः । तद्वच्चितेर्भेदेन भानेऽविद्यैवोपाधिस्तद्रहिता निरुपाधिः । यद्वा । निष्कलङ्कत्वाद्यसाधारणधर्मेषु साध्येषु देव्यास्तदस्योक्तहेतुत्वे निरुपाधित्वं नाम व्याप्यत्वासिद्ध्यभावः । सद्धेतुरित्यर्थः । सखण्डोस्मृतेः । यद्वोपाधिश्चेति द्विविधैरपि धर्मैः शून्येति वा । मीमांसाशास्त्रं सांख्यशास्त्रं वैभवखण्डेन सेश्वरं निरीश्वरं चेति तदुभयरूपत्वान्निरीश्वरा । सर्वेषामीश्वर्या ईश्वरान्तद्विरहो वा । अथान्तःकरणभेदानामात्मत्वनिरासायारिषड्वर्गत्यागस्य साधनत्वबोध-

निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥ ९८ ॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निःसंशया संशयघ्नी निर्भवा भवनाशिनी ॥ ९९ ॥

नाय च राग इच्छा तदभावादवाप्तसकलकामत्वान्निरागा । अथवा 'द्वेषप्रतिपक्षभावाद्रसशब्दाच्च राग' इति शाण्डिल्यसूत्रे भक्तेरपि रागपदवाच्यत्वाभिधानात्तन्निष्कान्तेत्यर्थः । नीरं जलं अगः पर्वतस्तदुभयरूपा वा । भक्तानां वैराग्यदानेन रागं मथ्नातीति रागमथनी । कर्तर्यपि ल्युटो महाभाष्ये 'नहि कारणयोरेव ल्युडुच्यत' इत्यादिग्रन्थेन साधितत्वादिह 'रागद्वेषाभिनिवेशाः क्लेशा'इति योगसूत्रोक्तो रागो गृह्यते । मदराहित्यान्निर्मदा । मदं नाशयति, मदनं धत्तूरमश्नातीति वा मदनाशिनी ॥ ९७ ॥ चिन्ताशब्दः स्मृतिसामान्यवचनोऽपि दुःखजनकस्मृतिविशेषे निरूढलक्षणिकः । 'चिन्ता चितासमा ज्ञेया चिन्ता वै विन्दुनाधिका । चिता दहति निर्जीवं चिन्ता दहति जीवित'मिति प्रयोगात् । 'चिन्ता छले चुल्लिकाया'मिति विश्वकोशाच्छलमप्यर्थः । तदुभयराहित्यान्निश्चिन्ता । 'वैकारिकस्तैजसश्च भूतादिश्चेत्यहं त्रिधे'ति वचनात्त्रिविधोऽहंकारस्तद्राहित्यान्निरहंकारा । मोहो वैचित्यं तदभावान्निर्मोहा । मोहमेकत्वज्ञानदानेन नाशयतीति मोहनाशिनी । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति श्रुतेः । ममशब्दो विभक्तिप्रतिरूपकमव्ययं ममेदमित्याकारकबुद्धिपरम् । सा च भेदघटितसंबन्धं स्वरसतो विषयीकरोति । स्वाभिन्नेतरभावान्निर्ममा । ममतायास्तादृश्या बुद्ध्या हन्त्री । पापराहित्यान्निष्पापा । पापं नाशयति स्वीयविद्याया जपादिना भक्तानामिति तथा । 'यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवमेवास्य पाप्मानः प्रदूयन्ते' इति श्रुतेः । तथाच वसिष्ठस्मृतिः 'विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपनैत्यकम् । सदापि पापकर्माणमेनो न प्रतियुज्यते । जापिनां होमिनां चैव ध्यायिनां तीर्थवासिनाम् । न संवसन्ति पापानि ये च स्नाताः शिरोव्रतै'रिति । पाद्मे पुष्करखण्डे 'मेरुपर्वतमात्रोऽपि राशिः पापस्य कर्मणः । काल्यायनीं समासाद्य नश्यति क्षणमात्रतः । दुर्गार्चनरतो नित्यं महापातकसंभवैः । दोषैर्न लिप्यते वीर पद्मपत्रमिवाम्भसे'त्यादि । देवीभागवतेऽपि 'छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं जगत् । प्रणम्य शिरसा देवीं न स पापैर्विलिप्यते । सर्वावस्थागतो वापि युक्तो वा सर्वपातकैः । दुर्गां दृष्ट्वा नरः पूतः प्रयाति परमं पद'मित्यादि । ब्रह्माण्डपुराणेऽपि 'वर्णाश्रमविहीनानां पापिष्ठानां नृणामपि । यद्रूपध्यानमात्रेण दुष्कृतं सुकृतायते'इति ॥ ९८ ॥ द्वेष्यस्यैवाभावान्निष्क्रोधा । 'न मे द्वेष्योऽस्ति न प्रियः' इति भगवद्वचनात् । भक्तानामरिषड्वर्गान्तर्गतं क्रोधं शमयति नाशयतीति क्रोधशमनी । क्रोधस्य दुष्टत्वमापस्तम्बेनोक्तम् 'क्रोधयुक्तो यद्यजति यज्जुहोति यदर्चति । स तस्य हरते सर्वमामकुम्भो यथोदक'मिति । अत्यन्तमोदा-

---

१ स्वाभिन्ने तदभावादिति पाठः.

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा॥ १००॥

र्याग्निर्लोभा। 'लोभः सर्वगुणान्हन्ती'ति निन्दितं लोभं भक्तानां नाशयतीति तथा। तन्त्रराजे गुरुलक्षणकथनदशायाम् 'असंशयः संशयच्छिन्निरपेक्षो गुरुर्मत' इत्युक्त्वा तयोर्विशेषणयोर्लक्षणमुक्तम् 'असंशयस्तत्त्ववित्त च्छित्तत्प्रतिपादना'दिति तादृशगुर्वभेदादिदं नामद्वयं निःसंशयासंशयघ्नीति। 'छिद्यन्ते सर्वसंशयाः' इति श्रुतेः स्मृतेश्च॥

अथ परिभाषायामेकोनपञ्चाशन्नामानि विभजते॥ **गुणभुविगोमृगश्रृङ्गे मूलमघाभोगगौरवाभावे। स्थूणाङ्गमहान्तो द्विर्भवदूषितवाक्चतुर्विभाजोऽष्टौ॥ १२॥** द्विरिति पञ्चाक्षरं नामद्वयम्। एकस्मिन्नर्थे दशाक्षराणामेव परिशेषात्। चतुरष्टपदे चतुरक्षरकनामधेयचतुष्टयाष्टकपरे। स्पष्टमन्यत्॥ १२॥

उत्पत्तिराहित्यान्निर्भवा। 'अनादिमत्परं ब्रह्मे'ति श्रुतेः। भवं संसारं नाशयतीति तथा। तथाच शक्तिरहस्ये 'नवम्यां शुक्लपक्षे तु विधिवच्चण्डिकां नृप। घृतेन स्नापयेद्यस्तु तस्य पुण्यफलं शृणु। दश पूर्वान्दश परानात्मानं च विशेषतः। भवार्णवात्समुद्धृत्य दुर्गालोके महीयते' इति। कौर्मेऽपि 'सैषा धात्री विधात्री च परमानन्दमिच्छताम्। संसारतापान्निखिलान्निहन्तीश्वरसंज्ञये'ति। देवीभागवतेऽपि 'अहं वै मत्परान्भक्तानैश्वरं योगमाश्रितान्। संसारसागरादस्मादुद्धरामि चिरेण त्वि'ति भगवतीवाक्यम्। यद्वा 'भवनाशिनीतटं नृसिंहमगमदि'ति बृहज्जाबालोपनिषत्प्रसिद्धनदीविशेषरूपा॥ ९९॥ विकल्पः शून्यविषयकं शब्दजन्यं ज्ञानम्। तथाच योगसूत्रं 'शब्दमात्रानुपाती वस्तुशून्यो विकल्प'इति। खण्डनखण्डखाद्येऽपि 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति ही'ति। फलपरीक्षायां गौतमसूत्रमपि 'बुद्धिसिद्धं तदस'दिति। तन्निष्क्रान्ता निर्विकल्पा। 'अल्पादयः क्रान्ताद्यर्थे द्वितीयये'ति समासः। तदतिक्रमश्च शब्दजन्यत्वांशे। तेन निर्विषयकनित्यज्ञानरूपेति फलितम्। अथवा विकल्पः प्रकारो न विद्यते यस्यां चरमवृत्तौ तद्रूपेति। यद्वा विरुद्धः कल्पः पक्षो विकल्पस्तदभाववती। स्वविरुद्धपक्षान्तराभावात्। सर्वस्य चाभिन्नत्वान्निर्विशेषेति पर्यवसितोऽर्थः। 'अरूपवदेव हि तत्प्रधानत्वा'दिति तार्तीयीके ब्रह्ममीमांसाधिकरणे निर्विकल्पैकलिङ्गताया ब्रह्मणः साधितत्वात् नेदं रजतमिति ज्ञानेन रजतबाधेऽपीदंपदार्थस्येव बाधाभावान्निराबाधा। अन्योन्याभावस्य प्रतियोगित्वसंबन्धेनानुयोगित्वसंबन्धेन चाभावान्निर्भेदा। तदुक्तं कौर्मे 'त्वं हि सा परमा शक्तिरनन्ता परमेष्ठिनी। सर्वभेदविनिर्मुक्ता सर्वभेदविनाशिनी' इति। तत्रैव स्थलान्तरे 'शक्तिशक्तिमतोर्भेदं वदन्त्यपरमार्थतः। अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तका'इति। भेदज्ञानं भेदमेव वा व्यावहारिकं तत्त्वज्ञानेन नाशयतीति तथा। नाशोऽन्तस्तदभावान्निर्नाशा। 'सत्यं ज्ञानमनन्त'मिति श्रुतेः। भक्तानां मृत्युं मथ्नातीति तथा। 'अथ कस्मादुच्यते मामृतादित्यमृतत्वं प्राप्नोतीत्यक्षयत्वं प्राप्नोति स्वयं

निस्तुला नीलचिकुरा निरपाया निरत्यया।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ १०१ ॥
दुष्टदूरा दुराचारशमनी दोषवर्जिता।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥ १०२ ॥

रुद्रो भवती'ति त्रैपुरोपनिषदुक्तेः। विहितनिषिद्धरूपक्रियाराहित्यान्निष्क्रिया। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुतेः। यद्वा क्रियान्वयमन्तरेणैव कर्त्रादिकारकभावमापन्ना। तदुक्तं विष्णुपुराणे 'यथा संनिधिमात्रेण गन्धः क्षोभाय जायते। मनसो नोपकर्तृत्वात्तथासौ परमेश्वर'इति। निर्गतः परिग्रहो यस्याः 'परिग्रहः परिजने पत्न्यां स्वीकारमूलयो'रिति मेदिनी ॥ १०० ॥ उपमाभावान्निस्तुला 'हेतुदृष्टान्तवर्जित'मिति त्रिपुरोपनिषत्। नीलाधिकुराः कुन्तला यस्याः। अपायोऽत्ययो नाशस्तद्रहिता। 'अत्ययोऽतिक्रमे दण्डे विनाशे दोषकृच्छ्रयो'रिति विश्वकोशानुसारेणातिक्रमादिरहिता निरत्यया। दुर्लभा योगिनामप्यसाध्यत्वात्। अतएव दुर्गमा अधिगन्तुमशक्यत्वात्। अदुर्गमेति वा छेदः। न विद्यते दुर्गमो यस्या इति तदर्थः। दुर्गमाख्यदैत्यवधप्रयोजिकेतियावत्। अतएव दुर्गा। तदुक्तं मार्कण्डेयपुराणे पाद्मरात्रे लक्ष्मीतन्त्रे च भगवत्यैव 'तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्। दुर्गादेवीति विख्यातं तन्मे नाम भविष्यती'ति। काशीखण्डेऽपि 'दुर्गो नाम महादैत्य' इत्यादिरध्यायः सर्वोऽप्येतत्पर एव। इयं च भीमरथीतीरे संनतिक्षेत्रवासिनी। दुर्गापदनिरुक्तिर्देवीपुराणेऽपि 'सुबलादिभये दुर्गे तारिता रिपुसंकटे। देवाः शक्रादयो येन तेन दुर्गा प्रकीर्तिते'ति। इयं च वाराणस्यां सुबाहुनाम्ने राज्ञे वरदानेन तेन प्रार्थिता सती दैव्यनेन दुर्गेति नाम्ना प्रसिद्धा स्थिता। तदुक्तं देवीभागवते तस्मै वरदानोत्तरं तत्प्रार्थनाप्रकरणे 'नगरेऽत्र त्वया मातः स्थातव्यं सर्वदा शिवे। दुर्गादेवीति नाम्ना वै त्वं शक्तिरिह संस्थिते'ति। नववर्षा कन्यापि दुर्गेत्युच्यते। तदप्युक्तं तत्रैव 'नववर्षा भवेद्दुर्गे'ति तेन तद्रूपा वेत्यर्थः। दुःखस्य सांसारिकस्य हन्त्री। 'तदत्यन्तविमोकोऽपवर्ग' इति गौतमसूत्रात्। 'दुःखेनात्यन्तविमुक्तश्चरति' इति श्रुतेश्च। सुखान्यैहिकामुष्मिककैवल्यरूपाणि प्रकर्षेण दत्ते सुखप्रदा। 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतेः। एतस्य विस्तरः पाद्मे पुष्करखण्डे चरमभागे षड्विरध्यायैर्द्रष्टव्यः ॥ १०१ ॥ दुष्टानां दोषवतां दूरा अप्राप्या। 'न भजन्ति कुतर्कज्ञा देवीं विश्वेश्वरीं शिवा'मिति देवीभागवतात्। दुराचारं शास्त्रविरुद्धाचारं शमयतीति तथा। वक्ष्यति च पुरस्तात् 'नित्यकर्माननुष्ठानान्निषिद्धकरणादपि। यत्पापं जायते पुंसां तत्सर्वं नश्यति द्रुत'मिति। दोषै रागद्वेषादिभिर्वर्जिता। सर्वं जानातीति सर्वज्ञा। 'यः सर्वज्ञः सर्ववि'दिति श्रुतेः। 'सर्वज्ञा सर्ववेत्तृत्वा'दिति देवीपुराणाच्च। सान्द्रा घना करुणा यस्याः। 'न तत्समश्चाभ्यधिकश्च दृश्यते'इति श्रुतौ दर्शननिषेधेन तद्विषययोरेव निषेधात्समानाधिकाभ्यां वर्जिता ॥ १०२ ॥ अथ सगुणरूपमाश्रित्याह।

सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी ॥ १०३ ॥

बालाबगलादिनिखिलशक्त्यभेदात्सर्वशक्तिमयी। 'ब्रह्ममयं जगदि' त्यादाविव मयडभेदार्थकोऽपि। सर्वदेवशक्तिरागृहरूपत्वादपि सर्वशक्तिमयी। तदुक्तं पाञ्चरात्रलक्ष्मीतन्त्रयोरिन्द्रं प्रति देव्यैव 'महालक्ष्मीरहं शक्र पुनः स्वायंभुवेऽन्तरे। हिताय सर्वदेवानां जाता महिषमर्दिनी। मदीयाः शक्तिलेशा ये तत्तद्देवशरीरगाः। संभूय ते ममाभूवन्रूपं परमशोभनम् ॥ आयुधानि च देवानां यानि यानि सुरेश्वर। मच्छक्त्यस्तदाकारा आयुधानि तदाभवन्नि'ति मार्कण्डेयपुराणे त्वयमर्थो विस्तरेण वर्णितो द्रष्टव्यः। 'पदार्थशक्तयो यायास्तास्ता गौरीं विदुर्बुधा' इति लैङ्गादसंकुचितार्थक एव सर्वशब्दो वा। सर्वाणि मङ्गलानि यस्याः। देवीपुराणे तु 'सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च। ईप्सितानि ददातीति तेन सा सर्वमङ्गला ॥ शोभनानि च श्रेष्ठानि या देवी ददते हरे। भक्तानामार्तिहरणी तेनेयं सर्वमङ्गला' इति ॥

॥ इति श्रीभासुरानन्दकृते सौभाग्यभास्करे। द्वितीयशतकेनाभूत्तृतीया धूम्रिका कला ॥ २०० ॥ इति श्रीमत्पदवाक्येत्यादिभास्कररायकृते ललितासहस्रनामभाष्ये द्वितीयं शतकं नाम तृतीया कला ॥ ३ ॥

स्वर्गादिमोक्षान्ताः सद्गतीः सतो ब्रह्मणोऽवगतिं ज्ञानं वा सतां गतीर्वा प्रददातीति तथा। 'गतिस्त्वं मतिस्त्वं त्वमेका भवानी' त्यभियुक्तोक्तेः। पाद्मे 'त्रिकालं पूजयेद्यस्तु चतुर्दश्यां नराधिप। स गच्छति परं स्थानं यत्र देवी व्यवस्थिते' त्यारभ्य 'दुर्गापूजोपकरणं स्वल्पं वा यदि वा बहु। कृत्वा वित्तानुसारेण रुद्रलोके महीयते' इत्यन्तैश्चतुर्भिरध्यायैः प्रत्युपचारं गुणकामविधिभिः क्रमेण समस्तलोकगतिप्रतिपादकानि वचनानीहोपष्टम्भकत्वेन योजनीयानि। अतएव सर्वस्वामित्वात्सर्वेश्वरी। असंकुचितस्वामित्वमभेदं विना न निर्वहतीत्याह। सर्वमयी क्षित्यादिशिवान्ततत्त्वाभिन्ना। तदुक्तं कामिके 'चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम्। भुवनाध्वा स संचिन्त्यो रोमवृन्दात्मनो विभोः ॥ पञ्चाशद्वर्णरूपेण स्तुवन्वर्णाध्वकल्पना। असौ त्वगात्मना चिन्त्यो देवदेवस्य शूलिनः ॥ सप्तकोटिमहामन्त्रैर्मूलविद्यासमुद्भवैः। मन्त्राध्वा संधिरात्मासौ विचिन्त्यः पार्वतीपतेः ॥ अनेकभेदसंभिन्ना मन्त्राणां पदसंहतिः। पदाध्वेत्युच्यते सौम्या शिरामांसतया स्थितः ॥ पृथिव्यादीनि षड्विंशत्तत्त्वान्यागमवेदिभिः। तत्त्वाध्वेत्युदितान्येष शुक्लमज्जास्थिरूपधृगि'ति। एतदेवावयुत्यानुवदति त्रिभिः। सर्वे सप्तकोटिसंख्या मन्त्राः स्वरूपमस्याः। श्रूयते च सुन्दरीतापिनीये 'पूर्वोत्तराभ्यां विद्या या अनेकाः परिकल्पिता' इति, स्पष्टतरं च गौडपादैः 'विद्या याः पूर्वोत्तराभ्यामनेका जाता' इत्यादिभिः सप्तभिः सूत्रैः सर्वमन्त्रात्मकत्वं वर्णितं तद्भाष्ये च प्रपञ्चितम्। तत्रैव 'तथा यच्चतन्त्राणी'ति सूत्रे वर्णितं प्रमेयमाह ॥ १०३ ॥ सर्वेषां घण्टार्गलादीनां

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥ १०४ ॥

यन्त्राणामात्मस्वरूपमेवात्मिका । 'प्रत्ययस्था'दितीत्वम् । वामकेश्वरादिसर्वतन्त्राण्येव रूपं शरीरमस्याः । सर्वतन्त्रैर्निरूप्या वा । तदुक्तं 'बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्येते स्रोतस्त्विन्य इवार्णवे' इति । शरीरपक्षेऽपि कामिकागमे 'कामिकं पादकमलं योगजं गुल्फयोर्युगम् । पादद्वयाङ्गुलीरूपे कारणप्रसृताह्वये ॥ अजिता जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः । पृष्ठभागेऽशुमानस्य नाभिः श्रीसुप्रभेदकम् ॥ विजयं जठरं प्राहुर्निःश्वासं हृदयात्मकम् । स्वायंभुवं स्तनद्वन्द्वमनलं लोचनत्रयम् ॥ वीरागमः कण्ठदेशो रुरुतन्त्रं श्रुतिद्वयम् । मुकुटं मुकुटं तन्त्रं बाहवो विमलागमाः ॥ चन्द्रज्ञानमुरः प्रोक्तं बिम्बं वदनपङ्कजम् । प्रोद्गीततन्त्रं रसना ललितं गण्डयोर्युगम् ॥ सिद्धं ललाटफलकं संतानं कुण्डलद्वयम् । किरणं रत्नभूषा स्याद्वातुलं वसवात्मकम् ॥ अङ्गोपाङ्गानि रोमाणि तन्त्राण्यन्यानि कृत्स्नशः । एवं तन्त्रात्मकं रूपं महादेव्या विचिन्तये'दिति । भ्रूमध्यादष्टमं स्थानं ब्रह्मरन्ध्रादधस्तनं मनोन्मनीति कथितं तद्रूपा । तत्स्वरूपं स्वच्छन्दसंग्रहे 'या शक्तिः कारणत्वेन तदूर्ध्वं चोन्मनी स्मृता । नात्र कालकलामानं न तत्त्वं न च देवता ॥ सुनिर्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते । शिवशक्तिरिति ख्याता निर्विकल्पा निरञ्जने'ति ॥ अतएव 'वामदेवाय नमो ज्येष्ठाय नमः' इति श्रुतौ प्रसिद्धस्य मनोन्मनाख्यशिवस्य शक्तिरिति च । त्रिपुरोपनिषद्यपि 'निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि । यदायात्युन्मनीभावं तदा तत्परमं पद'मिति । योगशास्त्रे मुद्राविशेषस्य संज्ञा । तल्लक्षणं तत्रैव 'नेत्रे ययोन्मेषनिमेषमुक्ते वायुर्यया वर्जितरेचपूरः । मनश्च संकल्पविकल्पशून्यं मनोन्मनी सा मयि संनिधत्ता'मिति । बृहन्नारदीयेऽपि 'ध्यानध्यातृध्येयभावो यदा पश्यति निर्भरम् । तदोन्मनत्वं भवति ज्ञानामृतनिषेवणादि'ति । मनांस्युन्मन्यते उत्कृष्टज्ञानयुक्तानि कुरुत इति वा । संधिरार्षः । 'यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वर' इति श्रुतिप्रसिद्धस्य महेश्वरपदस्य त्रिगुणातीतत्वं शक्यतावच्छेदकम् । तदुक्तं लैङ्गे 'तमसा कालरुद्राख्यो रजसा कनकाण्डजः । सत्वेन सर्वगो विष्णुर्नैर्गुण्येन महेश्वर' इति । अविच्छिन्नत्वमत्र तृतीयार्थेऽपि चरमभागे पदस्य तद्वाच्ये लक्षणा । कालरुद्राख्य इत्युपक्रमानुसारात् । तेन तदवच्छिन्ति कुतर्कज्ञाश्वरः । 'सत्वेन ब्रह्मचर्येण लिङ्गमस्य यथा स्थितम् । समर्चयन्ति ये लोरं शमयतीति उच्यते' इति । भारते 'महेश्वरः स भूतानां महतामीश्वरश्च स' इति च । यत्पापं जायते तिव्यूहो वातुलशुद्धे प्रतिपादितः सोऽपि महेश्वरस्त्वेयं माहेश्वरी । महतीमातीति सर्वज्ञा । महादेवी । महत्त्वं च प्रमाणागम्यशरीरवत्त्वम् । तदुक्तं देवीपुराणे 'बृ । सान्द्रा घना यदप्रमेयं प्रमाणतः । धातुर्महेति पूजायां महादेवी ततः स्मृते'ति । उधेन तद्विषयमूर्तेः शिवस्य महादेव इति संज्ञा तस्य पत्नी । बुधस्य माता रोहिणीनाम्नश्चिल्लाह ।

महारूपा महापूज्या महापातकनाशिनी ।
महामाया महासत्वा महाशक्तिर्महारतिः ॥ १०५ ॥

त्यर्थः । तथाच लैङ्गे 'समस्तसौम्यवस्तूनां प्रकृतित्वेन विश्रुतः । सोमात्मको बुधैर्देवो महादेव इति स्मृतः ॥ सोमात्मकस्य देवस्य महादेवस्य सूरिभिः । दयिता रोहिणी प्रोक्ता बुधश्चैव शरीरज' इति । वायवीयेऽपि 'नाम्ना देवस्य महतश्चन्द्रमास्तनुरष्टमी । पत्नी तु रोहिणी तस्य पुत्रश्चास्य बुधः स्मृतः' इति । सेयं गण्डक्यां चक्रतीर्थाधिष्ठात्री देवता । 'शालग्रामे महादेवी'ति पाद्मे पुष्करखण्डे देवीतीर्थेषु परिगणनात् । तत्रैव 'करवीरे महालक्ष्मी'रिति परिगणितां देवीमाह । महालक्ष्मीः महती च सा लक्ष्मीश्च । महाविष्णोरियं पत्नी । करवीरं कलौ कोलापुरमिति प्रसिद्धम् । अथवा अम्बिकांशभूतैवेयम् । तदुक्तं मैरालतन्त्रे 'महालनामकं दैत्यं स्याति क्षपयतीति च । महालसा महालक्ष्मीरिति च ख्यातिमागता । उपत्यकायां सह्याद्रेः पश्चिमोदधिरोधसी'ति । शिवपुराणेऽपि शिवं प्रस्तुत्य 'तस्याङ्कमण्डलारूढा शक्तिर्महेश्वरी परा । महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरे'ति । आयुष्यसूक्ते 'श्रियं लक्ष्मीमम्बिकामौपलाङ्गा'मित्यत्र लक्ष्मीपदमात्रस्य पार्वत्यां प्रयोगश्च । तेन पदेन पूज्यवाचिमहत्पदस्य 'सन्महत्परमे'त्यादिसूत्रेण समासः । 'सर्वस्याद्या महालक्ष्मीस्त्रिगुणा सा व्यवस्थिते'ति मार्कण्डेयपुराणं च । त्रयोदशवर्षात्मककन्यारूपा वा । कन्यां प्रक्रम्य 'त्रयोदशे महालक्ष्मी'रिति धौम्येन कथनात् । 'मृड सुखने' इति धातोर्विश्वस्थितिकर्तुः सत्वगुणवतः शिवस्य मृड इति संज्ञा । 'जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमोनमः' इति महिम्नस्तवात् । तस्य प्रिया ॥ १०४ ॥ महत् रूपचतुष्टयमपेक्ष्योत्कृष्टं रूपं यस्याः । तदुक्तं विष्णुपुराणे 'परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम् ॥ प्रधानपुरुषव्यक्तकालानां परमं हि यत् । पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम् ॥ प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः । रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः' इति । महती च सा पूज्या च महापूज्या । पूज्यानां शिवादीनामपि पूज्येत्यर्थः । तथाच पाद्मदेवीभागवतयोः [illegible]विष्णुब्रह्मविष्णुकुबेरविश्वदेववायुवसुवरुणाग्निशक्रसूर्यसोमग्रहराक्षसपिशाचमातृगणादिभेदचिन्त्यो देवपूजनीयदेवीमूर्तिभेदो मन्त्रे शैलेन्द्रनीलस्वर्णरौप्यपित्तलकांस्यस्फटिकमाणिक्यरात्मासौ विद्रुमबालवैडूर्यत्रपुसीसवज्रलोहविकाररूपो विस्तरेण दर्शितः । अत्राग्निशक्रत्युच्यते सौम्यमयीमेव प्रतिमां पूजयन्ति । इतरद्यथासंख्यं योजनीयम् । महान्ति तत्त्वाध्वेत्युदितं पातकानि नाशयतीति तथा । तथाच ब्रह्माण्डे 'कृतस्याखिलपापस्य सर्वे सप्तकोटिसंज्ञोऽपि वा । प्रायश्चित्तं परं प्रोक्तं पराशक्तेः पदस्मृति'रिति । ब्रह्मोत्तरविद्या या अनेकबहुनात्र किमुक्तेन श्लोकार्धेन वदाम्यहम् । ब्रह्महत्याशतं वापि शिवजाता' इत्यादि'रिति । 'महापातकशब्देन वीरहत्यैव कथ्यते' इति त्वर्थरत्नावल्यामुक्तम् । तत्रैव 'तीर्थभाग्यरत्नाकरादिषु प्रायश्चित्तप्रकरणे पापतारतम्येन पञ्चदश्या जपसंख्यायां

महाभोगा महैश्वर्या महावीर्या महाबला।

तारतम्यवचनान्युपष्टम्भकत्वेन योजनीयानि । ब्रह्मादीनामपि मोहकत्वान्महामाया। तदुक्तं मार्कण्डेयपुराणे 'ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति' । कालिकापुराणेऽपि 'गर्भान्तज्ञानसंपन्नं प्रेरितं सूतिमारुतैः । उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम् ॥ पूर्वातिपूर्वसंघातसंस्कारेण नियोज्य च । आहारादौ ततो मोहममत्वाज्ञानसंशयम् ॥ क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनःपुनः । पश्चात्कामेन योज्याशु चिन्तायुक्तमहर्निशम् ॥ आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या । महामायेति संप्रोक्ता तेन सा जगदीश्वरी'ति । यद्वा 'माया दम्भे कृपायां चे'ति कोशात्कृपावहुला । सतो भावो बलं गुणः । प्राणिनश्च सत्वपदार्थाः । 'सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयो'रिति विश्वः । महान्ति सत्त्वानि यस्याः, महती सर्वज्ञगन्निर्वाहकत्वादिरूपा विस्तृता विविधा च शक्तिः सामर्थ्यं यस्याः सा । 'शक्तिर्बले च सामर्थ्ये तथा प्रहरणान्तरे'इति यादवः । बलायुधपक्षावपीह योज्यौ । उक्तंच विष्णुपुराणे 'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथैतदखिलं जग'दिति । 'तत्राप्यासन्नदूरत्वाद्बहुत्वं स्वल्पता यतः । ज्योत्स्नाभेदोऽस्ति तच्छक्तेस्तद्वन्मैत्रेय विद्यत' इति । 'महाशक्तिः कुण्डलिनी'त्यत्र यदि तृतीयाक्षरस्य तालव्यत्वनिश्चयस्तदात्राकारप्रश्लेषः कर्तव्य इति न पौनरुक्त्यम् । न विद्यते महती शक्तिर्यदपेक्षयेति बहुव्रीहिः । 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतेः । छलाक्षरसूत्रे परिभाषायां चानयोश्चतुरक्षरत्वोक्तिबलात्क्वचित्पुस्तकेषूपलम्भाच्च महासनामहाशनापदयोरिव भेदमङ्गीकृत्यास्माभिस्तथा व्याख्यातम् । नन्वेतद्विष्णुसहस्रनामादिवत्पुनरुक्तिशताक्रान्तं येनार्थभेदमात्रमङ्गीकृत्य शब्दत ऐक्यं सोढव्यं स्यादिति । महती विषयरतिभ्योऽधिका रतिः प्रीतिर्ज्ञानिनां यस्यां सा । महाकामसुन्दरीत्वाद्वा महारतिरित्युच्यते ॥ १०५ ॥ महानाभोगः क्षित्यादिरूपो विस्तारो यस्याः, भोगः सुखं वा धनं वा महद्यस्या इति वा । ऐश्वर्यमीश्वरता विभूतिश्चेत्युभयं महद्यस्याः । महान्ति वीर्याणि शुक्रादीनि यस्याः । 'वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपी'ति विश्वः । महान्ति बलानि गन्धादीनि यस्याः । 'बलं गन्धे रसे रूपे स्थामनि स्थौल्यसेनयोः । बलो हलायुधे दैत्यभेदे बलिनि वायस' इति विश्वः । वायसपक्षे भुसुण्डादयो यत्प्रसादान्महान्तो जाता इति योज्यम् । तथाच योगवासिष्ठे वसिष्ठंप्रति भुसुण्डाख्यस्य वायसस्य वाक्यम् 'भ्रातरश्चण्डतनया वायसा एकविंशतिः । भ्रातृभिः सह हंसीभिर्ब्राह्मी भगवती तथा ॥ चिरमाराधितास्माभिः समाधिविरमे सति । प्रसादपरया काले भगवत्या ततः स्वयम् ॥ तथैवानुगृहीताः स्मो येन मुक्ता वयं स्थिता' इत्यादि ।

अथ परिभाषायां चत्वारिंशन्नामानि विभजते ॥ **भुवि हि चतुर्देहार्धं चतुष्पदार्धं भवेदविभौ । पादत्रयगुणदो द्विर्गौणाहों द्विर्विभागशरवीरः ॥ १३ ॥** अत्र प्राथमिकं चतुरिति पदं द्विरिति पदद्वयं चैकैकार्धविभाग-

महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥ १०६ ॥
महातन्त्रा महामन्त्रा महायन्त्रा महासना।
महायागक्रमाराध्या महाभैरवपूजिता ॥ १०७ ॥

परम्। तेनाद्ये चत्वारि नामानि चतुरक्षराणि अन्त्ययोरष्टाक्षरे द्वेद्वे नामनी इति सिध्यति। चतुष्पदेत्यत्र पदशब्दः पादपरः। स्पष्टमन्यत् ॥ १३ ॥

महाबुद्धिरित्यादि। महती च सा बुद्धिश्च महाबुद्धिः। यस्यां बुद्धावुत्पन्नायां ज्ञातव्यं नावशिष्यते सा महती। 'यस्मिन्विज्ञाते सर्वमिदं विज्ञातं स्या'दिति श्रुतेः। महती बुद्धिर्यस्याः सकाशादिति वा। एवमेव द्वेधा महासिद्धिपदं व्याख्येयम्। सिद्धयश्चाणिमाद्याः प्रसिद्धाः। अन्या अप्युक्ताः स्कन्दपुराणे 'रसानां स्वत उल्लासः प्रथमा सिद्धिरीरिता। द्वन्द्वैरनभिभूतिश्च द्वितीया सिद्धिरुच्यते॰ ॥ अधमोत्तमताभावस्तृतीया सिद्धिरुत्तमा। चतुर्थी तुल्यता तेषामायुषः सुखदुःखयोः ॥ कान्तेर्बलस्य बाहुल्यं विशोका नाम पञ्चमी। परमात्मपरत्वेन तपोध्यानादिनिष्ठता ॥ षष्ठी निष्कामचारित्वं सप्तमी सिद्धिरुच्यते। अष्टमी च तथा प्रोक्ता यत्र क्वचनशायिते'ति। महतां योगेश्वराणामीश्वरीति तथा ॥ १०६ ॥ महान्ति बहुफलप्रदानि तन्त्राणि कुलार्णवज्ञानार्णवादीनि मन्त्रा बालाबगलादयो यन्त्राणि पूजाचक्रपद्मचक्रामृतघटमेरुलिङ्गादीनि [illegible] यस्याः सा तथा। यद्वा स्वतन्त्राख्यं तन्त्रं श्रीविद्याख्यो मन्त्रः सिद्धिवज्राख्यं च यन्त्रं महत्सर्वोत्तमं यस्याः। स्वतन्त्रस्यान्यानपेक्षत्वान्महत्त्वम्। तदुक्तं तत्रैव [illegible] भगवन्सर्वतन्त्राणि भवतोक्तानि वै पुरा। तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः। तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो' इति प्रश्ने 'शृणु कादिमतं यत्तन्त्रं पूर्णमन्यानपेक्षया। गोप्यं सर्वप्रयत्नेन गोपनं तन्त्रचोदित'मिति। सौन्दर्यलहर्यामप्युक्तम्। 'चतुःषष्ट्या तन्त्रैः सकलमभिसंधाय भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः। पुनस्त्वं निर्बन्धादखिलपुरुषार्थैकघटना स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिद'मिति। मन्त्रविषये तु 'श्रीविद्यैव तु मन्त्राणा'मित्यादीनि कुल्लार्णवशक्तिरहस्ययोः परःसहस्रं वचनानि द्रष्टव्यानि। सिद्धिवज्राख्यं यन्त्रं प्रकृत्य न्यासात्रे स्मर्यते 'ललितविद्यया विद्यामन्यां यन्त्रेण वामुना। यन्त्रमन्यत्समं वेति योसौ स्यान्मूढचेतन'इति। महदासनं क्षित्यादिषट्त्रिंशत्तत्त्वरूपं यस्याः। 'एषाम्बा भगवती सर्वतत्त्वान्याश्रित्य तिष्ठती'ति देवीभागवतात्। ब्राह्म्यादिवंशभूताक्षोभ्यमादिचतुःषष्टियोगिनीपूजासहितो महायागः स एव क्रमः तदितरस्य सर्वस्यापि विल॰ म्बितफलप्रदत्वेनाक्रमत्वात्तेनाराध्या। 'शक्तौ च परिपाट्यां च क्रमश्चलनपङ्क्त्यो'रिकेति शाश्वतः। यद्वा भावनोपनिषदा प्रतिपादितो यागो रहस्यतरः शिवयोग्येकसाध्यो महायागः। सचास्माभिस्तद्भाष्ये तत्प्रयोगविधौ च विशदीकृत इति नेहोच्यते संक्षेपेण। भरणरमणवमनकर्ता सृष्टिस्थितिसंहृतिकारी परशिवो भैरवः स एव महांस्तेन यजनेन महाभैरवेण पूजिता। तदुक्तं पाद्मे 'शंभुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् प्रोक्तं । अक्षमालां करे धृत्वा न्यासेनैव भवोद्भव' इति। महाशंभुनाथो

महेश्वरमहाकल्पमहाताण्डवसाक्षिणी ।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥ १०८ ॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी ।
महाचतुःषष्टिकोटियोगिनीगणसेविता ॥ १०९ ॥

महायागेन चिदग्निकुण्डाल्ललितां प्रादुर्भावयामासेति ललितोपाख्याने **प्रसिद्धम्** ॥ १०७ ॥ महाकल्पे महाप्रलये यन्महेश्वरस्य महाताण्डवं विश्वोपसंहारादात्मैकशेषसमुद्भूतानन्दकृतं तत्कालेऽन्यस्य कस्याप्यभावादियमेव साक्षिणी । तदुक्तं पञ्चदशीस्तवे 'कल्पोपसंहरणकल्पिततताण्डवस्य देवस्य खण्डपरशोः परमैरवस्य । पाशाङ्कुशेक्षवशरासनपुष्पबाणैः सा साक्षिणी विजयते तव मूर्तिरेके'ति । 'एषा संहृत्य सकलं विश्वं क्रीडति संक्षये । लिङ्गानि सर्वजीवानां स्वशरीरे निवेश्य चे'ति देवीभागवते । महावासिष्ठेऽपि निर्वाणप्रकरणोत्तरार्धे एकाशीतितमे सर्गे शताधिकैः श्लोकैरत्यद्भुतमतिभयंकरं नृत्यमुभयोर्निर्वर्ण्योपसंहृतं 'डिम्बं डिम्बं सुडिम्बं पच पच सहसा झम्यझम्यं प्रझम्यं नृत्यन्त्याः शब्दवाद्यैः स्रजमुरसि शिरःशेखरं तार्क्ष्यपक्षैः । पूर्णं रक्तासवानां यममहिषमहाशृङ्गमादाय पाणौ पायाद्वो वन्द्यमानः प्रलयमुदितया भैरवः कालरात्र्ये'ति । महतः कामस्य परमशिवाभिन्नस्येशस्य भूपस्य महिषी कृताभिषेका पत्नी । त्रयाणां मातृमानमेयानां पुरं नगरं तदात्मिका च सा महती च सा सुन्दरी चेति तथा ॥ १०८ ॥ चतुरधिका षष्टिश्चतुःषष्टिस्तावन्त उपचारा भगवता परशुरामेण कल्पसूत्रे गणिताः । अन्येऽप्यष्टौ तन्त्रान्तरे 'शिवपादप्रसूनानां धारणं चात्मरोपणम् । परिवारविधिश्चाष्टौ गुरुभक्तार्चनं तथा ॥ शैवपुस्तकपूजा च शिवाग्नियजनं ततः । शिवपादोदकादानं साङ्गं प्राणाग्निहोत्रकम् ॥ एते चतुःषष्टियुता उपचारा द्विसप्तति'रिति । चतुरधिका षष्टिश्चतुःषष्टिस्तत्संख्या उपचाराः पूजाप्रकरणेऽस्माभिरुक्ताः तैराढ्या । धनिनस्ते तदभिन्नधनशीला । चतुःषष्टिकलाः शार्ङ्गधरीये कथाकोशे च श्रीधरीये लक्ष्मीपीठिकायां च वैलक्षण्येन गणितास्ता निष्कृष्य लिख्यन्ते 'अष्टादशलिपिबोधस्तद्वेखनशीघ्रवाचने चित्रम् । बहुविधभाषाज्ञानं तत्कविताश्रुतनिगदिता द्यूतम् ॥ वेदा उपवेदाश्चत्वारः शास्त्राङ्गषट्कं द्वे । तन्त्रपुराणस्मृतिकं काव्यालंकारनाटकादिद्वे ॥ शान्तिवैश्याकर्षणविद्वेषोच्चाटनमारणानि च षट् । गतिजलवृष्ट्याश्यायुधवाग्रेतःस्तम्भसप्तकं शिल्पम् ॥ गजहयरथनरशिक्षाः सामुद्रिकमल्लसूदगारुडकाः । तत्तत्सुषिरानद्धघनेन्द्रजालवृत्तानि गीतरसवादौ ॥ रत्नपरीक्षा चौर्यं धातुपरीक्षाप्यदृश्यत्वम् । इति भास्करसुधियोक्ता निष्कृष्य कलाश्चतुःषष्टि'रिति तत्प्रचुरा । कलाशब्दस्तत्प्रचुरो वा । तान्यपि चतुःषष्टिर्वामकेश्वरतन्त्रे गणितानि । तानि तट्टीकायामस्माभिर्विचयिष्यन्ते । तन्मयी तत्प्रधाना । ब्राह्म्यादीनामष्टानां मध्ये एकैकस्या अंशभूता अक्षोभ्यादि-

---

१ भास्करकविनोक्ता इति पाठः. २ सेतुबन्धेऽस्माभिर्विवृतानि. चै

मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा ॥ ११० ॥
चराचरजगन्नाथा चक्रराजनिकेतना।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥ १११ ॥

शक्तयोऽष्टावष्टाविति चतुःषष्टियोगिन्यः। तासामपि प्रातिस्विकमंशभूताः कोटिसंख्याका गणास्तैर्महद्भिः सेविता। वस्तुतस्त्वन्नराजोक्ता एवेह प्राह्याः। तथा ललिताचक्रनवके प्रत्येकं शक्तयः प्रिये। चतुःषष्टिमिताः कोव्य' इति। ताः संहृत्य पद्माब्जानि सप्तार्बुदानि षट्कोव्यो भवन्ति। नवसु त्रैलोक्यमोहनादिचक्रादिषु प्रतिचक्रं भिन्नाभिन्नाश्चतुःषष्टिकोटिसंख्याका योगिन्यः सन्तीति ताः संहृत्य पद्माब्जानि सप्तार्बुदानि षट्कोव्यो भवन्ति। तदिदं द्योतयितुं महत्पदं कोटिरेव विशेषणं वा। महत्त्वं च नवगुणितत्वम् ॥ १०९ ॥ 'मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च मन्मथः। अगस्तिरग्निः सूर्यश्च इन्द्रः स्कन्दः शिवस्तथा। क्रोधभट्टारको देव्या द्वादशामी उपासकाः' इति वचने संगृहीतो द्वादशप्रकारः श्रीविद्याप्रस्तारः। तदुद्धारश्च ज्ञानार्णवे द्रष्टव्यः। तेषु मनुचन्द्रविद्योभयरूपेत्यवयुल्यानुवादेन नामद्वयम्। चन्द्रमण्डलस्य मध्यं गच्छन्तीति, तथा कुण्डलिन्याः सहस्रारकर्णिकाचन्द्रभेदित्वात् सायंसंध्यावन्दने आयुष्करप्रयोगादौ च चन्द्रमण्डले ध्येयत्वात्। शिवपुराणे देवीं प्रति शिववचनम् 'अहमग्निशिरोनिष्ठस्त्वं सोमशिरसि स्थिता। अग्नीषोमात्मकं विश्वमावाभ्यां समधिष्ठित'मिति। चन्द्रमण्डलं तु श्रीचक्राभिन्नमिति रहस्यम्। चारु सुन्दरं रूपं लावण्यं यस्याः। चारुः हासो यस्याः। 'तवैव मन्दस्मितबिन्दुरिन्दु'रित्युक्तेः। परमानन्दप्रदः प्रबोधविशेषो गुरुमुखैकवेद्यो यस्या इति तु लक्षणया कश्चिदूचे। चार्व्या वृद्धिक्षयरहितायाश्चन्द्रकलायाः सादाख्यायाधिद्रूपाया धरा धारयित्री। यद्वा चन्द्रकलाख्या राजकन्या देवीभागवते प्रसिद्धा। तस्याः प्रेम्णे कामराजबीजोपासकः सुदर्शनाख्यो राजपुत्र एव त्वया वरणीय इत्यम्बया कथितं तेन चारु यथा तथा चन्द्रकलायाः धरा आधारभूतेत्यर्थः। तदुक्तं तत्रैव तृतीयस्कन्धे 'एतस्मिन्समये पुत्री काशिराजस्य सत्तमा। नाम्ना शशिकला दिव्या सर्वलक्षणसंयुते'त्युपक्रम्य 'स्वप्ने तस्याः समागत्य जगदम्बा निशान्तरे। उवाच वचनं चेदं समाश्वास्य सुखं स्थिता॥ वरं वरय सुश्रोणि मम भक्तं सुदर्शनम्। सर्वकामप्रदं तेऽस्तु वचनान्मम भामिनि' इत्यादि ॥ ११० ॥ जंगमस्थावरात्मकस्य जगतोऽधीश्वरी। त्रैलोक्यमोहनादिनवचक्रराजमेव निकेतनं वासस्थानं यस्याः। हिमवत्पर्वतस्य रूप्यपत्यत्वात्पार्वती। क्वचिदपवादविषयेऽप्युत्सर्गस्य प्रवृत्तेरित्यभाव इत्याहुः। 'प्रदीयतां दाशरथाय मैथिली' इतिवत्संबन्धसामान्यमेवेह विवक्षितं न विशेष इति युक्तम्। पद्मे इव नयने यस्याः सा पद्मनयना। पद्मरागाख्यरत्नेनारक्तेन समा तुल्या प्रभा कान्तिर्यस्यास्तथा। पद्मविशेषस्य कोकनदस्य रागेण रक्तिम्ना समेत्यादे वा। 'त्रायस्व कुण्डलिनि

पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥ ११२ ॥
ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता ।

कुङ्कुमपङ्कताम्रे' इति कल्याणाचार्योक्तेरमृतकुण्डलिनीपरं वेदं नाम ॥ १११ ॥ ब्रह्मायाः पञ्चापि वामादिस्वस्वशक्तिविरहे सति कार्याक्षमत्वाद्वामांशेन प्रेताः तैः कल्पिते आसने मञ्चके आसीना । तदुक्तं ज्ञानार्णवे 'पञ्च प्रेतान्महेशान ब्रूहि तेषां तु कारणम् । निर्जीवा अविनाशास्ते नित्यरूपाः कथं वदे'त्यादिना देव्या पृष्टे, ईश्वर उवाच 'साधु पृष्टं त्वया भद्रे पञ्चप्रेतासनं कथम् । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ पञ्च प्रेता वरारोहे निश्चला एव ते सदा । ब्रह्मणः परमेशानि कर्तृत्वं सृष्टिरूपकम् ॥ वामा शक्तिस्तु सा ज्ञेया ब्रह्मा प्रेतो न संशयः । शिवस्य करणं नास्ति शक्तेस्तु करणं यत' इत्यारभ्य 'सदाशिवो महाप्रेतः केवलो निश्चलः प्रिये । शक्त्या विनाकृतो देवि कथंचिदपि न क्षम' इत्यन्तम् । ब्रह्मादिसदाशिवान्तानां पञ्चानामपि ब्रह्मकोटावन्तर्भावात्पञ्चब्रह्मणां स्वरूपमस्याः । तदुक्तं त्रिपुरासिद्धान्ते 'निर्विशेषमपि ब्रह्म स्वस्मिन्मायाविलासतः । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ इत्याख्यावशतः पञ्च ब्रह्मरूपेण संस्थित'मिति । यद्वा । ईशानतत्पुरुषाघोरवामदेवसद्योजाताख्यानि पञ्च ब्रह्माणि । तथाच लैङ्गे 'क्षेत्रज्ञप्रकृतिबुद्ध्यहंकारमनांसि श्रोत्रत्वक्चक्षुर्जिह्वोपस्थानि शब्दादिपञ्चतन्मात्राणि च पञ्च ब्रह्मस्वरूपाणीत्युक्त्वा तेषामाकाशादिपञ्चमहाभूतजनकत्वमुक्तम् । तादृशस्वरूपवतीत्यर्थः । यज्ञवैभवखण्डेऽप्युक्तम् 'एक एव शिवः साक्षात्सत्यज्ञानादिलक्षणः । विकाररहितः शुद्धः स्वशक्त्या पञ्चधा स्थित' इति । सृष्टिस्थित्यादिपञ्चकृत्यशक्तिभिः सद्योजातादिपञ्चरूपो जात इत्यर्थः । गरुडपुराणेऽपि 'लोकानुग्रहकृद्विष्णुः सर्वदुष्टविनाशनः। वासुदेवस्य रूपेण तथा संकर्षणेन च ॥ प्रद्युम्नाख्यस्वरूपेणाऽनिरुद्धाख्येन च स्थितः । नारायणस्वरूपेण पञ्चधा ह्यद्वयः स्थित' इति । आचार्यैरप्युक्तम् 'पुंभावलीला पुरुषास्तु पञ्च यादृच्छिकं संलपितं त्रयी ते । अम्ब त्वदक्ष्णोरणुरंशुमाली तवैव मन्दस्मितविन्दुरिन्दु'रिति । चिदभेदाच्चिन्मयी । परम उत्कृष्ट आनन्दो यस्याः स्वरूपं सा । 'यो वै भूमा तत्सुख'मिति श्रुतेः । विज्ञानं चैतन्यमेव घनं सान्द्रं तदेकरसं रूपमस्याः । 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाये'ति श्रुतौ विज्ञानघनपदस्य चिदेकरसपरत्वेन व्याख्यानदर्शनात् । अथवा विज्ञानशब्दो जीवपरः । 'यो विज्ञाने तिष्ठन्विज्ञानमन्तरो यमयती'त्याद्यन्तर्यामिब्राह्मणे तथा व्याख्यानात् । तैर्घनं समष्ट्यात्मकं रूपमस्याः । जीवसमष्ट्यभिमानिहिरण्यगर्भात्मिकेत्यर्थः । 'एतस्माज्जीवघना'दिति श्रुतौ जीवघनपदस्य तथा व्याख्यानात् ॥ ११२ ॥ 'ध्यै चिन्तायाम्' । चिन्ता मानसं ज्ञानं 'प्रत्ययैकतानता ध्यान'मिति योगसूत्रोक्तम् । ज्ञानज्ञातृज्ञेयाख्यत्रिपुटीरूपेत्यर्थः । इष्टानिष्टप्रापके कर्मणी धर्माधर्मौ । तदुक्तं मत्स्यपुराणे 'धर्मेति धारणे धातुर्महत्त्वे वै प्रपद्यते । धारणेन

---

१. त्वाद्धर्म्यशेन.

विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ११३ ॥

महत्त्वेन धर्म एव निरुच्यते ॥ तेनेष्टप्रापको धर्म आचार्यैरुपदिश्यते । इतरोऽनिष्टफलदस्त्वाचार्यैरुपदिश्यते' इति । संवर्तस्मृतिरपि 'देशेदेशे य आचारः पारम्पर्यक्रमागतः । आम्नायैरविरुद्धश्च स धर्मः परिकीर्तित' इति । याज्ञवल्क्योऽपि 'ज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शन'मिति । जैमिनिरपि 'चोदनालक्षणोऽर्थो धर्म'इति । अत्रैवाधर्म इत्यकारप्रश्लेषेण विहितनिषिद्धक्रियात्वे तल्लक्षणे ऊह्ये । ताभ्यां विवर्जिता । तिर्यगधिकरणन्यायेन देवतानां कर्मानधिकारित्वात्, शास्त्रस्याविद्यावद्विषयत्वाद्वा । यद्वा धर्माधर्मौ बन्धमोक्षौ । 'धर्माधर्मस्य वाच्यस्य विषामृतमयस्य चे'ति नित्याहृदयश्लोके तथा व्याख्यानदर्शनात्तदुभयरहिता । तथाच त्रिपुरोपनिषदि श्रूयते 'न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः । न मुमुक्षुर्न वै मुक्तिरित्येषा परमार्थते'ति । अथवा धर्मशब्दो मत्वर्थलक्षणया धार्मिपरः । अधर्मशब्दो बहुव्रीहिणा धर्मपरः । धर्मिधर्मभावेन रहिता । जगता सहात्यन्ताभिन्नेत्यर्थः । धर्माधर्मशब्दौ शक्तिशिवाक्षरवाचकौ ताभ्यां विवर्जिता पञ्चदशी ललितेति तु रहस्यार्थः । धातूनामनेकार्थत्वाद्वर्जनमभिवृद्धिः । तच्चाक्षरद्वयं नित्याहृदये कथितं 'मध्यप्राणप्रथारूपस्पन्दव्योम्नि स्थिता पुनः । मध्यमे मन्त्रपिण्डे तु तृतीये पिण्डके पुनः ॥ राहुकूटद्वयं स्फूर्ज'दिति । एतस्यार्थो गुरुमुखादवगन्तव्यो वरिवस्यारहस्ये वा सेतुबन्धे वा प्रपञ्चितोऽस्माभिरिति ततोऽवगन्तव्यः ॥ अथैकोनविंशतिनामभिर्जीवेश्वरयोर्भेदान्विभजंस्तदात्मकत्वेन देवीं स्तोतुमुपक्रमते—**विश्वरूपेत्यादिना** । सृष्टिक्रमे हि प्राथमिकस्तमःसर्गस्ततो महतः सर्गस्ततोऽहंकारस्य त्र्यात्मकस्य । ततः पञ्चतन्मात्रापरपर्यायाणि सूक्ष्मभूतानि शब्दादीनि भवन्ति । तेषु च पञ्च ज्ञानशक्तयः पञ्च क्रियाशक्तयश्च सन्ति । ताश्चाद्या व्यष्टिवेषेण श्रोत्रादिज्ञानेन्द्रियपञ्चकं जनयन्ति । समष्टिवेषेण त्वन्तःकरणम् । अन्त्या अपि व्यष्टिवेषेण वागादिकर्मेन्द्रियपञ्चकं समष्टिवेषेण प्राणं जनयन्ति । धर्मिभूताः शब्दादयस्तु गगनादिस्थूलभूतपञ्चकं जनयन्तीति वस्तुस्थितिः । तत्र व्यष्टिभूतैः स्थूलभूतोपाधिभिः सूक्ष्मभूतोपाधिभिः कारणोपाधिभिश्चोपहितं चैतन्यं क्रमेण विश्वतैजसप्राज्ञपदवाच्यं भवति । समष्टिभूतैस्तैरुपहितं तु तत्त्वं क्रमेण वैश्वानरहिरण्यगर्भेश्वरपदवाच्यम् । अन्तःकरणकारणोपहितः परमात्मा हिरण्यगर्भः । प्राणकारणोपहितस्तु सूत्रात्मा । उभाभ्यां कारणाभ्यामविभक्ताभ्यामनुगमय्योपहितस्त्वन्तर्यामीत्युच्यते । एते त्रय एव ब्रह्मविष्णुरुद्रपदैः क्रमादभिधेया भवन्ति । एतच्च व्यष्टिजीवात्मसमष्टिजीवात्मपरमात्मनां प्रातिस्विकं त्रैविध्यमौपनिषदानां मतमवलम्ब्योक्तम् । तेषामन्ते जाग्रत्स्वप्नसुषुप्तीनामवस्थानां सृष्टिस्थितिसंहाराणां कृत्यानां च त्रयस्य त्रयस्यैवाङ्गीकारात् । तान्त्रिकाणां मते तु तुर्यतुर्यातीतयोरवस्थयोस्तिरोधानानुग्रहयोः कृतयोश्च द्वयोर्द्वयोराधिक्येन तदवस्थाकृत्यापन्नयोर्जीवपरमा-

त्मनोरप्याधिक्यात्प्रातिस्विकं पाञ्चविध्यम्। नचैतावता वैमत्यं, त्रिवृत्करणपञ्चीकरण-प्रक्रिययोरिव स्थूलसूक्ष्मदृष्टिभेदेन व्यवस्थोपपत्तेः, परंतु सुषुप्तावेव प्राज्ञस्य ब्रह्मभावसंपत्त्या तदतीतावस्थाद्वयापन्नस्यात्मनो न जीवभावः। अविद्यालेशानुवृत्तेः सत्वाच्च न परमात्मभावोऽपि। अतएव सुषुप्तिदशापन्नजीवोपाधेः कारणशरीरत्वेनेव तुर्यदशापन्नजीवोपाधेर्महाकारणशरीरत्वेन व्यवहारः 'तत्परश्च शिवतुल्यो जायत' इति शिवसूत्रे तादृशः शिवतुल्यत्वेन निर्दिष्टः। अर्थसाम्यादर्धशिव इति तदर्थः। अतएव च ततोऽपि परस्य 'निरञ्जनः परमं साम्यमुपैती'तिश्रुतावभेदस्य परमसाम्यपदेन निर्देश उपपद्यते। अनेनैवाशयेन पूर्णजीवतायाः पूर्णशिवतायाश्च तद्दशायामभावान्न पृथग्गणनमौपनिषदानाम्। अतएव 'मुग्धेऽर्धसंपत्तिः परिशेषा'दित्यधिकरणे मूर्च्छावस्थायाः पार्थक्येन गणनाभावेऽयमेव हेतुस्तैरुपन्यस्तः। अस्त्येव वा गणनं पञ्चविधजीवोपाधीनां पञ्चकोशपदैर्व्यवहारदर्शनात्। परमात्मनस्तु तिरोधानानुग्रहापरपर्यायबन्धमोक्षदानोपाधिकत्वेन 'ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिव' इति शैवतन्त्रोक्तलक्षणानुसारेण रुद्रापरतो भेदद्वयमक्षुण्णम्। एवंसति विश्वे स्थूलभूतोपहितजागरावस्थापन्नचैतन्यात्मका जीवास्तत्समष्टिभूतो वैश्वानरो रूपं चैतन्यदृष्ट्यात्मैव यस्याः सा विश्वरूपेत्यर्थः। यद्वा पूर्वं धर्मधर्मिभावविवर्जितेत्युक्तं तेन जगदभेदः सिद्ध इत्याह—**विश्वरूपेति**। विश्वमेव यस्या रूपं नतु विश्वाधारत्वेन धर्मिभूतमन्यद्रूपमस्तीत्यर्थः। तदुक्तं विष्णुपुराणे 'यथा हि कदली नाम त्वक्पत्रान्यो न दृश्यते। एवं विश्वस्य नान्यत्वं त्वत्स्थादीश्वर दृश्यत' इति। देवीभागवतेऽपि प्रथमस्कन्धे 'वटपत्रशयानाय विष्णवे बालरूपिणे। श्लोकार्धेन तदा प्रोक्तं भगवत्याखिलार्थदम्। सर्वं खल्विदमेवाहं नान्यदस्ति सनातन'मिति। अथवा साक्षाद्ब्रह्मणो जीवभावोऽल्पान्तं नीचं रूपमिति शुनकतुल्यत्वम्। अतएव नीचसेवात्मकवृत्तेः श्ववृत्तिरिति संज्ञा। नीचतरः पशुभाव इति यावत्। तादृशं स्वरूपं विगतं यस्याः प्रसादात्सा विश्वरूपा। अथवा षोडशकलात्मिका त्रिपुरसुन्दरीत्यविवादम्। तदुक्तं वासनासुभगोदये 'दर्शाद्याः पूर्णिमान्ताद्याः कलाः पञ्चदशैव तु। षोडशी तु कला ज्ञेया सच्चिदानन्दरूपिणी'ति। चन्द्रमण्डले हि सादाख्या कला वृद्धिह्रासरहितैका। अन्याः पञ्चदश यातायातभागिन्यः। तदभिन्नायाः श्रीदेव्या अपि चिद्रूपा कला त्रिपुरसुन्दरीपदवाच्यैका। अन्यास्तु कामेश्वर्यादिचित्रान्तास्तिथिभेदेन विपरिवर्तमानाः। तदभिन्नायां पञ्चदश्यामप्येकमक्षरं गुरुमुखैकवेद्यं चिद्रूपं यद्वशादस्याः श्रीविद्येति संज्ञा। अन्यानि च पञ्चदशाक्षराणि सर्वैरुपासकैः श्रूयमाणानि नित्यास्वरूपाणि। एवं चन्द्रमण्डलदेवीपञ्चदशीनामैक्यमिति तत्तत्कलाक्षराणामप्यैक्यमेव। अतएव पञ्चदशसंख्यानां तिथीनामक्षराणामपि त्रिखण्डत्वं यथा नन्दा भद्रा जया रिक्ता पूर्णेति त्रिरावृत्तेन भेदेन वाग्भवादिकूटभेदेन च। अतएव खण्डत्रयेणैव तैत्तिरीयाः शुक्लपक्षरात्रीणां पञ्चदशानां नामान्यामनन्ति 'दर्शा दृष्टा दर्शना विश्वरूपा सुदर्शना आप्यायमानाप्यायमानाप्यायसूनृतेरापूर्यमाणापूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी'ति। एवमेतद्दिवसानामपि खण्डत्रयेणैव नामान्यामन्यन्ते 'संज्ञानं

विज्ञानं प्रज्ञानं जानदभिजानत् । संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तं श्रेयोवसीय आपत्संभूतं भूत'मिति । अनयोरनुवाकयोश्च दिवसरात्रिनामत्वमित्यपि तत्रैवान्नातम् 'संज्ञानं विज्ञानं दर्शा दृष्टे'त्येतावनुवाकौ पूर्वपक्षस्याहोरात्राणां नामधेयानीति । अत्र यद्यपि खण्डत्रयमपि समानसंख्यमेव तथाप्येकादश्या दशमीवेधे दशमीत्वात् 'उपोष्या द्वादशी शुद्धे'ति वचनाद्वादश्या एवैकादशीत्वाच्चरमखण्डान्तर्गततिथेर्मध्यमखण्डे प्रवेशान्मन्त्रे द्वितीयतृतीयखण्डौ षट्चतुरक्षरौ भवतः । अतएव वेधाभावपक्षाभिप्रायेण सूर्यादिविद्यान्तरेषु समानाक्षराण्येव त्रीणि कूटानि । अनेनैवाशयेन सुभगोदयटीकायां लक्ष्मीनोक्तम् 'आपूर्यमाणायाः कलायाश्चन्द्रखण्डान्तःस्थिताया अपि सौरखण्डेऽन्तर्भावः । इराकलाप्रभेदत्वादिरापूर्यमाणयोरैक्यमनुसंधेय'मिति । उक्तश्लोके दर्शाद्या इति पदस्य शुक्लप्रतिपदाद्या इत्यर्थः । उदाहृतश्रुतौ प्रतिपदो दर्शनामकत्वोक्तेः तासां तिथीनां मन्त्राक्षराणां च प्रातिस्विकं शिवशक्तिमायाशुद्धविद्यादितत्त्वात्मकत्वं कौलिकसामयिकमतभेदेन तत्तदुपासनाप्रकारश्च चन्द्रकलायां द्रष्टव्यः । एवंच परस्परभेदाच्छुक्लपक्षचतुर्थीरात्रेः संज्ञाभूतमपि विश्वरूपापदं वाग्भवकूटचतुर्थाक्षरस्य शुद्धविद्यातत्त्वस्य च प्रतिपादकमिति तत्रित्ययाभिप्रेत्यर्थः । अथवा विश्वरूपमिति नपुंसकं पदम् । तस्य च मिथ्याजगदधिष्ठानेतिवत्क्लीलिङ्गता । तच्च कृष्णपक्षपञ्चमीदिवसवाचकम् । तथाच श्रूयते 'प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपम् । शुक्रममृतं तेजस्वि तेजः समिद्धम् । अरुणं भानुमन्मरीचिमदभितपत्तपस्वत् । सुता सुन्वती प्रसूता सूयमानाभिपूयमाणा । पीति प्रपा संपा तृप्तिस्तर्पयन्ती । कान्ता काम्या कामजाती युष्मती कामदुघा । प्रस्तुतं विष्टुतं सुतासुन्वती'ति । एतावनुवाकावपरपक्षस्याहोरात्राणां नामधेयानीति । तेन तद्रूपेत्यर्थः । एवं रात्रिविशेषस्य दिवसविशेषस्य चोपलक्षणरीत्या श्लेषलिप्सया चैकैकस्यैवोपादानेऽपि सर्वरात्रिरूपा सर्वदिवसरूपा चेत्यर्थः पर्यवस्यति । अतएवेदृशज्ञाने फलविशेषः श्रूयते 'स यो ह वा एता मधुकृतश्च मधुवृषांश्च वेद कुर्वन्ति हास्यैता अग्नौ मधु नास्येष्टापूर्तं धयन्ति । अथ यो न वेद न हास्यैता अग्नौ मधु कुर्वन्ति ध्रयन्त्यस्येष्टापूर्त'मिति । अत्र मधुकृच्छब्दो रात्रिपरः । मधुवृषशब्दश्च दिवसपरः । 'या एताः पूर्वपक्षापरपक्षयो रात्रयस्ता मधुकृतो यान्यहानि ते मधुवृषा' इति वाक्यशेषात् । मधु कुर्वन्ति वर्षन्ति चेत्यवयवशक्तेश्च । एता यो वेद तस्यैता दिवससहिता रात्रयः अग्नौ बैन्दवस्थानात् ब्रह्मरन्ध्रान्मधु कुर्वन्ति स्रावयन्ति । अस्येष्टापूर्तं कर्मजातं न धयन्ति पीत्वा न लोपयन्ति । व्यतिरेकेऽनिष्टमाह । अथ य इत्यादिना । कुण्डलिन्युत्थापनेन मधुस्रावणेन डाकिन्यादिमण्डलाप्लावनरूपान्तरकर्मणि सत्येव बाह्यानि यज्ञादिकर्माणि सफलानि भवन्ति । तदभावे तु यस्मिन्काले कर्माणि क्रियन्ते स काल एव तेषां कर्मणां कालमृत्युरूपो भवतीति फलितार्थः । तदिदमुपबृंहितं चन्द्रज्ञानतन्त्रे 'अन्तरग्नौ मधुस्रावं कुर्वतां शिशिरात्मनाम् । इष्टापूर्तादिकर्माणि फलन्ति किल कालतः ॥ अन्तःस्रावविहीनानां सदा संतप्तचेतसाम् ।

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता ।

कर्माणि क्रियमाणानि कालो ग्रसति तत्क्षणात् ॥ कालकर्षणिकैवान्तः करोति मधु वर्षति । इति यो वेद तस्य स्याद्ब्रह्मरन्ध्रात्सुधास्रुतिः ॥ वैदेही जनयामास सरघा कालकर्षणी । अहोरात्रैरिमां विद्यां दशपञ्चभिरक्षरै'रिति । अत्र तृतीयचतुर्थश्लोकयोरयमर्थः—कालकर्षिण्याख्या देवी मधु करोतीति मधुकृत् रात्रिरूपा । मधुवर्षतीति मधुवृषा अहोरूपा च । इति प्रकारेण रात्रिदिवसाभिन्नां देवीं यो वेदेत्यादि । विगतो देहो यस्य स विदेहोऽनङ्गः कामेशस्तत्संबन्धिनी वैदेही कामेश्वरी अहोरात्राभिन्नैः पञ्चदशभिर्वर्णैरिमां पञ्चदशीं विद्यां जनयामास । तथाच श्रुतिः 'जनको ह वैदेहोऽहोरात्रैः समाजगामे'ति । इयमेव च मधुकर्तृत्वात्सरघा । 'सरघा मधुमक्षिके'त्यमरः । श्रुतिरपि 'इयं वाव सरघा तस्या अग्निरेव सारघं मध्वि'तीत्यलं विस्तरेण । जागराख्यावस्थालक्षणमुक्तमीश्वरप्रत्यभिज्ञायां 'सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा । सृष्टिः साधारणी सर्वप्रथात्मायं स जागर' इति । तद्वान् जागरी विश्वाख्यः स्थूलशरीराभिमानी जीवः तदभिन्ना जागरिणी । 'ऋन्नेभ्यो ङीप्' । स्वप्नलक्षणमपि प्रत्यभिज्ञायाम् 'मनोमात्रपथेऽध्यक्षविषयत्वेन विभ्रमात् । स्पष्टावभासभावानां सृष्टिः स्वप्नपदं मत'मिति । स्वपितीति स्वपन् स्वप्नदशापन्नस्तैजसाख्यः सूक्ष्मशरीरव्यष्ट्यभिमानी जीवः तदभिन्ना स्वपन्ती । 'उगितश्चे'ति ङीप् । तैजसा उक्तलक्षणा जीवास्तत्समष्टिभूतो हिरण्यगर्भ आत्मा स्वरूपं यस्याः सा तैजसात्मिका ॥ ११३ ॥ सुप्तं संमदावस्था । तल्लक्षणं च शिवसूत्रे 'अविवेको माया सौषुप्त'मिति । 'सुखमहमस्वाप्सं न किंचिदवेदिष'मिति स्मरणान्यथानुपपत्त्या कल्पितास्तिस्रोऽविद्यावृत्तयोऽज्ञानाहन्तासुखविषयिण्यः सन्ति यत्र तत्सौषुप्तमित्यर्थः । तद्वान्प्राज्ञाख्यः कारणशरीरव्यष्ट्यभिमानी जीवः सुप्तः । अर्शआदिभ्योऽच् । तदभिन्ना सुप्ता । प्राज्ञा उक्तलक्षणा जीवास्तत्समष्टिभूत ईश्वर आत्मा स्वरूपं यस्याः सा प्राज्ञात्मिका । एतदवस्थात्रयस्य तद्भोक्तॄणां च विविच्य ज्ञानजन्यः शुद्धविद्योदयाख्यश्चमत्कारस्तुर्यावस्था । तदुक्तं स्पन्दशास्त्रे 'त्रिषु धामसु यद्भोग्यं भोक्ता यश्च प्रकीर्तितः' । विद्यात्तदुभयं यस्तु स भुञ्जानो न लिप्यत' इति । वरदराजेनापि 'तुर्यं नाम परं धाम तदाभोगश्चमत्क्रिया । भेदेऽपि जाग्रदादीनां योगिनस्तस्य संभवे'दिति । शिवसूत्रमपि 'जाग्रत्स्वप्नसुषुप्तिभेदेऽपि तुर्याभोगसंभव' इति । 'त्रिषु चतुर्थं तैलवदासेच्य'मिति च । तद्वान्महाकारणशरीराभिमानी जीवस्तुर्यः । तस्य व्यष्ट्या समष्ट्या चाभिन्ना तुर्या । तुर्यावस्थाप्राप्तावुपायः शिवेनोक्तः—'मनः स्वचित्तेन प्रविशे'दिति । 'प्राणायामादिकं कृत्वा स्थूलोपायं विकल्पकम् । अविकल्पकरूपेण स्वचित्तेन स्वसंविदा ॥ अन्तर्मुखपरामर्शचमत्काररसात्मना । मनस्तुर्यरसेनात्र स्वदेहादिप्रमातृताम् ॥ मज्जनेन प्रशमयन्प्रविशेत्तत्समाविशेत्' इति । यद्वा 'शिवमद्वैतं चतुर्थं मन्यन्ते' इति श्रुतिप्र-

सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥ ११४ ॥

सिद्धस्वरूपा तुरीया कापि देवतेति शक्तिरहस्यात् । 'तुरीया कापि त्वं दुरधिगमनिःसीममहिमे'ति भगवत्पादोक्तेश्च । त्रिपुरासिद्धान्ते तु 'तुरीयानन्दनाथस्य प्रसन्नत्वाद्वरानने । तुर्येति नाम विख्यातं तस्य देव्या निरन्तर'मित्युक्तम् ॥

अथ चत्वारिंशन्नामानि परिभाषायां विभजते ॥ **दिविभारतभुविताडघमृदुजंगमभोवदार्थदिवा । वाक्चतुरंघ्रिर्ध्वर्धा तत्फलमूलं तदेव नादवलम् ॥ १४ ॥** स्पष्टोऽर्थः ॥ १४ ॥

(सर्वावस्थेत्यस्यार्थः) ॥ अस्ति पञ्चमी जीवस्यावस्था । तस्याश्च रूढ्या नामान्तराभावात्तुर्यावस्थामतिक्रान्तत्वात्तुर्यातीतेत्येव यौगिको व्यवहार इत्याशयेनाह—**सर्वेति** । तुर्यावस्थामतिक्रान्ते पुरुषे प्राथमिकावस्थात्रयातिक्रमस्यावश्यकत्वात्सर्वाभिश्चतसृभिरवस्थाभिर्विशेषेण पुनरावृत्त्यभावपूर्वकं वर्जितो रहितो जीवस्तुर्यातीतस्तत्समष्टिव्यष्ट्यभेदादियमपि सर्वावस्थाविवर्जितेत्यर्थः । सा च तुर्यावस्थादार्ढ्यादुद्भवति । 'तुर्यावष्टम्भतो लभ्यं तुर्यातीतं परं पद'मिति वचनात् । वरदराजोऽप्याह 'तुर्याभ्यासप्रकर्षेण तुर्यातीतात्मकं पदम् । संप्राप्तः साधकः साक्षात्सर्वलोकान्तरात्मना । तुल्यः शिवेन चिन्मात्रस्वच्छन्दानन्दशालिने'ति । पञ्चमदशापन्नस्य स्वरूपकथनाय सूत्रत्रयं 'शरीरवृत्तिर्व्रतम्,' 'कथा जपः,' 'दानमात्मज्ञान'मिति । स्वात्मानुसंधानरूपशिवपूजासाधनत्वाच्छरीरधारणं व्रतरूपं न तुच्छम् । अतएव भट्टोत्पलेन शरीरधारणं प्रार्थितम् 'अन्तरुल्लसितस्वच्छशक्तिपीयूषपोषितम् । भवत्पूजोपभोगाय शरीरमिदमस्तु मे' इति । स्वैराभिलापमात्रं जपः । तच्चित्तस्य सत्यग्राहित्वात् । तदुक्तं योगसूत्रद्वये 'निर्विचारवैशारद्येऽध्यात्मप्रसादः,' 'ऋतंभरा तत्र प्रज्ञे'ति । 'यद्धि मनसा ध्यायति तद्वाचा वदती'ति श्रुत्या तदुक्तेः सर्वस्या अपि यथार्थरूपत्वेन मन्त्ररूपत्वात् । तदुक्तं योगवासिष्ठे 'सदा सन्तोऽभिगन्तव्या यद्यप्युपदिशन्ति नो । या हि स्वैरकथास्तेषामुपदेशा भवन्ति ताः' इति । परेभ्य आत्मोपदेश एव दानम् । तदुक्तं कृष्णदासेन 'प्रोक्तचैतन्यरूपस्य साक्षात्करणमात्मनः । यत्तज्ज्ञानं तदेवास्य दानं यत्तेन दीयते' इति । एतत्सूत्रत्रयमुपलक्षणपरत्वेन व्याख्येयमिति मन्वानैरुक्तं भगवत्पादैः 'जपो जल्पः शिल्पं सकलमपि मुद्राविरचन'मित्यादि । वार्तिकेऽपि 'इति प्रोक्तं व्रतं कुर्वञ्जपं चर्यां च पालयन् । शिवतुल्यः सदा स्वात्मा शिवाराधनतत्परः । अयमेव महायोगी महामन्त्रधुरंधुरः । अन्तेवासिजनस्यान्तस्तत्त्वतस्तत्त्वबोधक' इति । एवमविद्यावशीकृतस्य जीवस्य पाञ्चविध्यमुक्त्वा वशीकृतमायावच्छिन्नस्येश्वरस्य कृत्यभेदेन तथात्वमाह—**सृष्टीत्यादिना** । आचार्यभगवत्पादैरयमर्थो जगत्सूते धाते'ति श्लोके निरूपितः । सृष्टिर्जगन्निर्माणं रजोगुणप्रधानस्येश्वरस्य कृत्यं तस्य कर्त्री । ब्रह्मा चतुर्मुखस्तादृश ईश्वरः स एव रूपं यस्याः । तदुक्तं विष्णुपुराणे 'ब्रह्मविष्णुशिवा ब्रह्मन्प्रधाना ब्रह्मशक्तय' इति । गोपनं जगतः स्थितिः सा च सत्त्वगुणप्रधानस्येश्वरस्य कृत्यं तस्य कर्तृत्वाद्गोप्त्री ।

संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ॥ ११५ ॥

गोविन्दस्तादृश ईश्वरो विष्णुः स एव रूपमस्याः । तथाच हरिवंशे नारदवाक्यम् 'प्रकृत्याः प्रथमो भाग उमादेवी यशस्विनी । व्यक्तः सर्वमयो विष्णुः स्त्रीसंज्ञो लोकभावन' इति । गोविन्दपदनिरुक्तिर्विष्णुभागवते 'अहमिन्द्रो हि देवानां त्वं गवामिन्द्रतां गतः । गोविन्द इति नाम्ना त्वां भुवि गास्यन्ति मानवा' इति । भारते मोक्षधर्मेऽपि 'नष्टां च धरणीं पूर्वमविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुत' इति । हरिवंशेऽपि 'गौरेषा तु तथा वाणी तां च विन्दयते भवान् । गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवा'निति । 'गवादिषु विदेः संज्ञाया'मिति शः । 'गोविन्दो वासुदेवे स्याद्बाध्यक्षे बृहस्पता'विति विश्वप्रकाशकोशाद्बृहस्पतिरूपेति वा ॥ ११४ ॥ संहारो जगतः परमाण्वादिसावशेषो ध्वंसस्तमोगुणप्रधानस्येश्वरस्य कृत्यं तत्करोतीति संहारिणी । रुद्रस्तादृश ईश्वरः । रुजं द्रावयतीति वा रोदयतीति वा । संवर्तकालीनाया वृष्टेरेतत्सूर्याख्यनेत्रजन्यत्वेनाश्रुरूपत्वात् । 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्व'मिति श्रुतेः । 'रुजं द्रावयते तस्माद्रुद्रः पशुपतिः स्मृत' इति शिवरहस्याच्च । 'प्राणा वाव रुद्रा एते हीदं सर्वं रोदयन्तीति छान्दोग्यात् 'रोदेर्णिलुक्च'ेत्यौणादिको रक् । अण्यन्तादपि रगित्याहुः । 'तुष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः स्वयम् । अरुदत्सुस्वरं घोरं जगतः प्रभुरव्यय' इति भारते । वायवीयसंहितायां तु 'रुद्रुःखं दुःखहेतुर्वा तद्द्रावयति यः प्रभुः । रुद्र इत्युच्यते तस्माच्छिवः परमकारण'मित्युक्तं स एव रूपं यस्यास्तथा । तिरोधानमाच्छादनं निरवशेषो ध्वंसः । परमाण्वादेरपि प्रकृतौ लयो दीपनाशतुल्यो घनतरशुद्धसत्त्वप्रधानस्येश्वरस्य कृत्यं तत्करोतीति तिरोधानकरी । तिरस्करिण्याख्यशक्तिविशेषरूपा वा । तदुक्तं त्रिपुरासिद्धान्ते 'अभक्तानां च सर्वेषां तिरोधानकरी यतः । श्रीस्तिरस्करिणी तस्मात्प्रोक्ता सत्यं वरानने' इति । ईश्वरपदेन घनतरशुद्धसत्त्वप्रधान ईश्वर उच्यते । ईश्वरपदस्य मायाया इव तादृशसत्त्वगुणस्यापि शक्यतावच्छेदकत्वेनैकार्थत्वात् । तदभिन्नत्वादीश्वरी । 'वनोरचे'ति ङीप् । वस्तुतः 'स्थेशभासे'ति वरचि गौरादित्वान्ङीप् । अश्नोतेर्वा वरद इच्चोपधायाः टित्वान्ङीप् । पराहन्तैवेश्वरत्वं तद्वतीत्यर्थः । उक्तंच विरूपाक्षपञ्चाशिकायां विश्वशरीरस्कन्धे 'ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति । एते चाहन्तायाः पर्यायाः सद्भिरुच्यन्त' इति । विरलतरशुद्धसत्त्वप्रधान ईश्वरः सदाशिवस्तदभेदात्सदाशिवा । अदन्तत्वाट्टाप् । अनुग्रहो निरवशेषध्वंसमापन्नस्य जगतः सृष्ट्यादौ पुनः परमाण्वादिरूपतापत्तिः । सा च तावदुक्तविधस्येश्वरस्य कृत्यं तद्ददाति कुरुत इत्यनुग्रहदा । तिरोधानानुग्रहौ बन्धमोक्षौ वा । एतत्पक्षे बहिरन्तरुन्मेषलक्षणयोरीश्वरसदाशिवयोरेतत्प्रदत्वं स्वारसिकं भवति । पञ्चविधानामुक्तरूपाणां कृत्यानां परायणं आश्रयस्तेषु तत्परा वा । तान्यभीष्टानि

भानुमण्डलमध्यस्था भैरवी भगमालिनी ।

यस्या इति वा । 'परायणमरीष्टं स्यात्तत्पराश्रययोरपी'ति विश्वः उक्तंच मृगेन्द्रसंहितायाम् 'जगज्जन्मस्थितिध्वंसतिरोधानैककारणम् । भूतभौतिकभावानां नियमस्यैतदेव ही'ति । आगमान्तरेऽपि 'पञ्चविधं तत्कृत्यं सृष्टिः स्थितिसंहृती तिरोभावः । तद्वदनुग्रहकरणं जगतः सततोदितस्यास्ये'ति । देवीभागवतेऽपि चतुर्थस्कन्धे 'सा विश्वं कुरुते कामं सा पालयति पालितम् । कल्पान्ते संहरत्येव त्रिरूपा विश्वमोहिनी ॥ तया युक्तः सृजेद्ब्रह्मा विष्णुः पाति तयान्वितः । रुद्रः संहरते कामं तया संमिलितो जगत् ॥ सा बध्नाति जगत्कृत्स्नं मायापाशेन मोहितम् । अहं ममेति पाशेन सुदृढेन नराधिप ॥ योगिनो मुक्तसङ्गाश्च मुक्तिकामा मुमुक्षवः । तामेव समुपासन्ते देवीं विश्वेश्वरीं शिवा'मिति । आचार्यभगवत्पादैरप्युक्तं 'जगत्सूते धाता हरिरवती'त्यादिना । शक्तिसूत्रेऽपि 'तथा तद्वत्पञ्चविधकृत्यानि करोती'ति । कृत्यलक्षणान्यप्येतदुत्तरसूत्रे 'आभासनरक्तिविमर्शनबीजावस्थापनविलापनतस्तानी'ति । एतदर्थः प्रत्यभिज्ञाहृदये द्रष्टव्यः ॥ ११५ ॥ भानुमण्डलस्य सूर्यमण्डलस्य मध्ये तिष्ठतीति तथा । संध्यासमये देव्यास्तत्र ध्येयत्वात् । अन्तरधिकरणे 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इति श्रुतौ प्रतिपादितस्य रूपस्य परमेश्वरत्वनिर्णयाच्च । तथाच कूर्मपुराणे हिमवत्कृते देवीस्तवे 'अशेषवेदात्मकमेकवेद्यं स्वतेजसा पूरितलोकमेदम् । त्रिलोकहेतुं परमेष्ठिसंज्ञं नमामि रूपं रविमण्डलस्थ'मिति भानुमण्डलमनाहतकमलं वा । भैरवस्य परशिवस्य स्त्री भैरवी । यद्वा भीरूणां स्त्रीणां संहतिर्भैरवी । 'तस्य समूहः' इत्यणि ङीप् । नच काकं शौकं यौवतं गार्भिणमितिवन्नपुंसकापत्तिः । भैरवपदाद्विभूतिसंबन्धे पुनरणि ङीप्संभवात् । तथाच लैङ्गे 'अर्थः शंभुः शिवा वाणी दिवा शंभुः शिवा निशे'त्यारभ्यारुन्धत्यनसूयाशच्यादीनां गौरीरूपत्वं विशिष्यविशिष्योक्त्वाऽन्ते उपसंहृतम् 'स्त्रीलिङ्गशब्दवाच्या याः सर्वा गौर्या विभूतय' इति । त्रिपुराम्बाचक्रेश्वरीमन्त्रे मध्यकूटे रेफनिष्कासे तस्य भैरवीति संज्ञा । तन्मन्त्रात्मिकेति वा । द्वादशवर्षकन्यारूपा वा । 'द्वादशाब्दा तु भैरवी'ति कन्यां प्रकृत्य धौम्योक्तेः । भगं षाड्गुण्यं मलति धारयतीति भगमालिनी । 'मल मल्ल धारणे' इति धातुः । मालापदाद्वा समष्टिवाचिनो व्रीह्यादित्वादिनिः । भगाङ्कवस्तुमात्ररूपा वा । तथाच लैङ्गदेवीभागवतयोः 'ये ये पदार्था लिङ्गाङ्कास्ते ते शर्वविभूतयः । अर्था भगाङ्किता ये ये ते ते गौर्या विभूतय' इति । तिथिनित्याविशेषरूपा वा । अस्या मन्त्रे तन्त्रराजज्ञानार्तवोद्धृतप्रकारमपेक्ष्य दक्षिणामूर्तिसंहितोद्धृतप्रकारे बहवो भगशब्दाः पठ्यन्ते । तदावरणदेवतानामान्यपि प्रायेण भगशब्दपूर्वाण्येवेति तद्वाहुल्याद्भगमालिन्येवेयम् । ब्रह्मरूपत्वात्पद्मासना । प्रकृतिमयपत्रविकारमयकेसरसंवित्प्रालादिविशेषणशीलं पद्ममेवासनं पीठं यस्या वा, पद्मां लक्ष्मीं सनति भक्तेभ्यो विभज्य ददातीति वा । 'वन षण संभक्तौ' । तदुक्तमभियुक्तैः 'असौभाग्यं धत्ते परमसुखभोगास्पदमयं विचित्रं तद्रेहं

पद्मासना भगवती पद्मनाभसहोदरी ॥ ११६ ॥
उन्मेषनिमिषोत्पन्नविपन्नभुवनावली ।

भवति पृथुकार्तस्वरभृतम् । निविष्टः पल्यङ्के स कलयति कान्तारतरणं प्रसादं कोपं वा जनयि भवती यत्र कुरुते' इति । प्रसादपक्षे असौ इति छेदः । कार्तस्वरं सुवर्णम् । पल्यङ्को मञ्चः । कान्तारस्य तरणमिति । कोपपक्षे असौभाग्यमित्येकं पदम् । अयं इति छेदः । विचित्रं विगतचित्रम् । पृथुकानामार्तस्वरः पल्या अङ्के कान्ताया रते रणमिति श्लेषेण योज्यम् । पद्मः शूरः पद्मासुरस्त्वमस्यति क्षिपतीति वा । बिन्द्वादिसंभवदर्थान्तरमपि योज्यम् । 'पद्मं स्यादम्बुजव्यूहनिधिसंख्याहिबिन्दुष्वि'ति रभसः । 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणे'ति कालिकापुराणे, 'भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु । यशोवीर्यप्रयत्नेच्छाधर्मश्रीरविमुक्तिष्वि'ति कोशे च प्रसिद्धा भगपदार्था अस्यां सन्तीति भगवती । देवीभागवते तु 'उत्पत्तिं प्रलयं चैव भूतानां गतिमागतिम् । अविद्याविद्ययोस्तत्त्वं वेत्तीति भगवत्सया'वित्युक्तम् । शक्तिरहस्ये तु 'पूज्यते या सुरैः सर्वैस्तांश्चैव भजते यतः । सेवायां भजतिर्धातुर्भगवत्येव सा स्मृते'त्युक्तम् । पद्मनाभस्य विष्णोः सहोदरी एकोदरभवा भगिनी । एकमेव ब्रह्म धर्मो धर्मीति रूपद्वयं प्रापत् । तत्र धर्मः पुमान् धर्मी स्त्रीति द्विधाभवत् । तत्र पुमान् विष्णुः सकलजगदुत्पादनभावं, स्त्री तु परमशिवमहिषीभावं प्रापत् । एतत्त्रयमपि मिलित्वैकमखण्डं ब्रह्मेति शैवमतरहस्यं कूर्मपुराणादिषु प्रसिद्धं रत्नत्रयपरीक्षायां दीक्षितैर्विस्तरेण निरूपितम् । एतदभिप्रायेणैव ब्रह्मपुराणे पुरुषोत्तमक्षेत्रमाहात्म्ये 'या मेनाकुक्षिसंभूता सुभद्रा पूर्वजन्मनि । कृष्णेन सह देवक्याः सास्मिञ्जन्मनि कुक्षिगे'त्यादि स्मर्यते । यत्तु 'सुभद्राप्राणनाथाय जगन्नाथाय मङ्गल'मिति तत्रैव पठ्यते तत्र सुभद्रापदं लक्ष्मीपरं तात्त्विकाभेदाभिप्रायं वेति न कश्चिद्विरोध इति । अन्यत्रापि 'काञ्चीक्षेत्रे पुरा धाता सर्वलोकपितामहः । श्रीदेवीदर्शनार्थाय तपस्तेपे सुदारुणम् ॥ आत्मैक्यध्यानयुक्तस्य तस्य प्रततपतो मुनेः । प्रादुर्बभूव त्रिपुरा पद्महस्ता ससोदरा ॥ पद्मासने च तिष्ठन्ती विष्णुना जिष्णुना सहे'ति । अत्र कादिविद्याया वाग्भवकूटोद्धारः । पद्मासनः ककारः । भग एकारः । तद्वतीत्यत्र कामकलायाः श्लेषः । पद्मनाभस्योपेन्द्रस्य सहोदर इन्द्रो लकारः । हश्च उदं च होदे हकारबिन्दू ताभ्यां सहिता सहोदा । सहोदा च सा रीचेत्यनेन ह्रीरेखेति रहस्यम् ॥ ११६ ॥ उन्मेषनिमिषौ नेत्रविकाससंकोचौ ताभ्यामेव क्रमेणोत्पन्ना विपन्नाश्च सृष्टा नष्टाश्च भुवनानां ब्रह्माण्डानामावल्यः पङ्क्तयो यस्यास्तथा देव्या अनिमिषत्वेऽपि प्राणिकर्मवशेन तयोरुत्पत्तिसंभवात् । इच्छामात्रे तात्पर्यात् । तदुक्तमाज्ञावतारे 'इच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपी'ति । 'इच्छामात्रं प्रभोः सृष्टि'रिति च । कालिदासेनाप्युक्तम् 'दृष्टदृश्यदृशिलक्षणं जगत्प्राक्स्मृतेस्त्वयि तदम्ब संहृतम् । उन्मिषत्यपि पुनस्त्वदुद्गमे त्वद्भये निमिषति त्वदिच्छये'ति । गोरक्षेणाप्युक्तं महामुद्रायाम् 'विसुउम्मेसदसाए देसिअणाहस्स जेत्तियोऽवसरो ।

सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥ ११७ ॥
आब्रह्मकीटजननी वर्णाश्रमविधायिनी ।

कालावत्थप्पढियो विस्सणिमेसेवि वेत्तियो होइं' इति । छाया तु 'विश्वोन्मेषदशायां देशिकनाथस्य यावानवसरः । कालावस्थाप्रथितो विश्वनिमिषेऽपि तावानेव भवती'ति । 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपा'दिति श्रुतौ सहस्रशब्दोऽनन्तपरः । शीर्षशब्दो मुखादेरुपलक्षणम् । लिङ्गं त्वविवक्षितम् । 'सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठती'ति गीतासूपबृंहणदर्शनादित्याशयेनाह सहस्रशीर्षवदनेति । 'बहुव्रीहौ सक्थ्यक्ष्णो'रिति षच्प्रत्ययान्तान्ङीषि सहस्राक्षी । सहस्राणि पादा यस्याः सहस्रपात् । सहस्रपदे । नम इति प्रयोगः । 'संख्या सुपूर्वस्ये'ति समासान्तो लोपः । देवीभागवते तृतीयस्कन्धे 'सहस्रनयनारामा सहस्रकरसंयुता । सहस्रशीर्षचरणा भाति दूरादसंशय'मिति । अत्र भुवनस्यावलीत्यनेन भुवनेश्वरीबीजद्वयम् । सहस्राक्षीत्यनेन लकारः । सहस्रशब्दो हकारसकारसाहित्यपरः । तेन द्वितीयतृतीयकूटयोरुद्धारः ॥ ११७ ॥ ब्रह्मा सर्वजीवसमष्टिः स्थूलतमो हिरण्यगर्भाख्यो जीवः कीटः अतीन्द्रियतर ऊर्णाभक्षको वैद्यतन्त्रे ककेरुकमकेरुकेति द्वैविध्येन प्रतिपादितः स्तम्बाख्यो जीवविशेषः । आद्यन्तग्रहणेन प्रत्याहारन्यायेन तन्मध्यपतिताः सर्वेऽपि तन्मध्यमपरिमाणकशरीरधारिणो जीवा गृह्यन्ते । आङभिविधौ । ब्रह्मादिस्तम्बान्तजीवजातजनयित्रीत्यर्थः । एवं निर्मितानां जीवानां सन्मार्गप्रदर्शनाय स्वाज्ञारूपवेदात्मिका जाता । तत्र कर्मकाण्डब्रह्मकाण्डभेदेन द्विविधे वेदे कर्मणि तिर्यगधिकरणन्यायेन देवानां तिरश्चां चाधिकाराभावान्मनुष्यानेव वर्णाश्रमभेदेन चतुर्धा विभज्य कर्मकाण्डेन मातेव तत्तद्धर्मानपि व्यवस्थापयामासेत्याह—**वर्णाश्रमेति** । तथाच कूर्मपुराणे हिमवत्कृतदेवीस्तवानन्तरं 'अथ सा तस्य वचनं निशम्य जगतोऽरणिः । सस्मितं प्राह पितरं स्मृत्वा पशुपतिं पतिम् ॥ शृणुष्व चैतत्परमं गुह्यमीश्वरगोचरम् । उपदेशं गिरिश्रेष्ठ सेवितं ब्रह्मवादिभि'रित्यादिना साधनान्युक्त्वा 'ध्यानेन कर्मयोगेन भक्त्या ज्ञानेन चैव हि । प्राप्याहं ते गिरिश्रेष्ठ नान्यथा कर्मकोटिभि'रित्युपसंहृत्य कर्मयोगनिरूपणार्थं पुनरप्युक्तं 'श्रुतिस्मृत्युदितं सम्यक्कर्म वर्णाश्रमात्मकम् । अध्यात्मज्ञानसहितं मुक्तये सततं कुरु । धर्मात्संजायते भक्तिर्भक्त्या संजायते परम् । श्रुतिस्मृतिभ्यामुदितो धर्मो यज्ञादिको मतः । नान्यतो ज्ञायते धर्मो वेदाद्धर्मो हि निर्बभौ । तस्मान्मुमुक्षुर्धर्मार्थं मद्रूपं वेदमाश्रयेत् । मदाज्ञयैव गुप्त्यर्थं वेदानां भगवानजः । ब्राह्मणादीन्ससर्जाथ स्वे स्वे कर्मण्ययोजय'दित्यादि । निजां स्वीयामाज्ञां वेदविद्भिः शब्दभावनात्वेन व्यवहृतां रूपयन्ति साध्यसाधनेतिकर्तव्यतारूपांशत्रयविशिष्टमर्थभावनार्थवादादिभिः कुर्वन्ति तादृशा निगमाः कर्मकाण्डात्मका वेदा यस्मात्तथा ।

निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥ ११८ ॥
श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका ।
सकलागमसंदोहशुक्तिसंपुटमौक्तिका ॥ ११९ ॥

अतएव 'तद्भूतानां क्रियार्थेन समाम्नायः' इति जैमिनिः । कौर्मेऽपि 'ममैवाज्ञा परा शक्तिर्वेदसंज्ञा पुरातनी । ऋग्यजुःसामरूपेण सर्गादौ संप्रवर्तत' इति । अथवा सन्ति वेदानुयायीनि शैवतन्त्राणि कामिकादीन्यष्टाविंशतिः वेदविरुद्धानि कापालभैरवादीनि च । तेषु वैदिकानि निगमपदवाच्यानि परमेश्वरस्य मुखादुद्भूतत्वादाज्ञारूपाणि न पुनर्नाभ्यधोभागादुत्पन्नानि वेदविरुद्धानीत्यर्थः । तदुक्तं देवीभागवतस्कान्दयोः 'सद्योजातमुखाज्जाताः पञ्चाद्याः कामिकादयः । वामदेवमुखाज्जाता दीप्ताद्याः पञ्च संहिताः ॥ अघोरवक्त्रादुद्भूताः पञ्चाग्निविजयादयः । पुंवक्त्रादपि संभूताः पञ्च वैरोचनादयः ॥ ईशानवदनाज्जाताः प्रोद्गीताद्यष्टसंहिताः । ऊर्ध्वस्रोतोभवा एते नाभ्यधःस्रोतसः परे' इत्यादि । एवं व्यवस्थापिते वर्णाश्रमधर्मात्मके वेदे विहिताचरणनिषिद्धाचरणाभ्यां सदसत्फलमपि व्यवस्थादार्ढ्यार्थं मातैव ददातीत्याह— **पुण्यापुण्येति** । पुण्यपापयोः फले स्वर्गनरकौ प्रददातीति तथा । तदुक्तं कौर्मे 'ये न कुर्वन्ति तद्धर्मं तदर्थं ब्रह्मणा कृताः । निरयास्तेषु शमनः पातयेत्तान्मदाज्ञया ॥ धर्मं कुर्वन्ति वेदोक्तं ये मद्भक्तिपरायणाः । स्वर्गादिषु शचीशाद्यास्तान्नयन्ति मदाज्ञये'ति । अन्यत्रापि 'ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वे'ति । 'क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमता'मित्यादि । शिवरहस्ये श्रुतिरपि 'एष एव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषत्येष एवासाधु कर्म कारयति यमधो निनीषती'ति । 'फलमत उपपत्ते'रिति ब्रह्ममीमांसाधिकरणेऽप्ययमेवार्थः साधितः । 'वैषम्यनैर्घृण्ये अपि कर्मसापेक्षत्वान्न भवत' इति च तत्रैवोक्तम् । सौरसंहितायामपि 'ननु धर्मो ह्यधर्मश्च स्वस्वकर्ता ह्यधिष्ठितः । अन्तरेण महादेवं फलं कर्तुः प्रयच्छति । इति चेत्तन्न साधूक्त'मित्यादिनान्तर्यामिब्राह्मणोपबृंहणपूर्वकं समर्थ्योपसंहृतं 'श्रुत्यनुग्राहकेणापि ग्राह्यस्तर्केण शंकरः । अतः सर्वात्मना साक्षाद्धर्माधर्मफलप्रद' इति ॥ ११८ ॥ एवं कर्मकाण्डस्य क्रियार्थत्वमुक्त्वा ब्रह्मकाण्डस्य सिद्धवस्तुप्रतिपादनपरत्वमपि मातुराज्ञैवेत्याह । श्रुतीनां सीमन्ता ऊर्ध्वभागसाम्यादुपनिषदां भागास्तेषु सिन्दूरवत्तदन्तर्गतरहस्यार्थवत्संपद्यमाना कृता पादाब्जधूलिश्चरणकमलरजो यया सा तथोक्ता । अत्र विषयस्योपनिषदादेर्निगरणाद्रूपकातिशयोक्तिः श्रुतिशब्दस्य स्त्रीलिङ्गत्वादिवशादप्रस्तुतनायिकामण्डनप्रतीतेश्च समासोक्तिः । तामात्रे मलंकाराभ्यां वस्तुनो ध्वनिः । वेदा अपि भगवत्याः स्वरूपं शृङ्गग्राहिकया विछामात्रं खेन प्रतिपादयितुमसमर्था एव । इतरनिषेधमात्रं कुर्वन्तस्तु दूरादेव ल स्मृतेस्त्वयि भीता इव वा यथाकथंचित्प्रतिपादयन्तीव । तदिदं प्रतिपादनमित्थमिछये'ति ।

---

१ समाम्नायोऽर्थस्य तन्निमित्तत्वादिति सूत्रशेषः. योऽवसरो ।

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी।
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता ॥ १२० ॥

ननादत्यल्पतममिति धूलिपदेन ध्वन्यते। एतदपि च न वेदानां सामर्थ्यादपि तु मातुराज्ञयैवेति क्विप्रत्ययेन ध्वन्यत इति। तदिदमुक्तमस्माभिः शिवस्तवे 'सर्वज्ञाः श्रुतयोऽपि याः परशिव त्वत्प्राणरूपाः प्रियाः प्रज्ञग्राहिकया त्रपाभृत इव त्वां न प्रजल्पन्ति ताः। अन्यानेव तु नेतिनेति बहुशो वाचा निषेधन्ति चेत्कोऽन्यस्त्वामिदमित्थमित्यनुवदेत्तत्रापि मादृग्जनः' इति। विधिमुखेन प्रतिपादयन्तस्त्वागमाः स्थूलारुन्धतीन्यायेन तटस्थलक्षणरीत्यैव निर्दिशन्तीत्याह। सकलाश्च ते आगमा वेदाश्च तेषां संदोहाः समूहा एव शुक्तयस्ताभिः संपुटं पुटितं गर्भीकृतं प्रतिपादितं मौक्तिकं नासाभरणं यस्याः सा तथोक्ता। मौक्तिकपदं समीपवर्तिसृष्ट्यादिधर्मोपलक्षकं, स्थूलतारकासाम्यात्तच्छ्यास्मारकं च। अम्बामुखसमीपवर्त्यसाधारणं मौक्तिकादेव वेदैः प्रतिपाद्यते नतु तस्याः स्वरूपकम्। 'यतो वाचो निवर्तन्त' इत्यादिश्रुतेरिति भावः। यद्वा मुक्ताशब्दात्स्वार्थे कप्रत्ययोत्तरं तद्धितेन मौक्तिकमिति नपुंसकरूपसिद्धावपि प्रथममेवाणन्तान्ङीपि कृते पश्चात्कप्रत्यये 'ङ्यापोः संज्ञाच्छन्दसोर्बहुल'मिति ह्रस्वे घटी घटिकेतिवन्मौक्तिकेति स्त्रीलिङ्गमपि रूपं भवति। मौक्तिकवदाचरतीत्यर्थे क्विबन्तात् 'अप्रत्ययादि'त्यनेनाकारप्रत्यये सति अदन्ताट्टाब्वा। एवमेव मैथ्याजगदधिष्ठानेत्यादिवक्ष्यमाणनामसु द्रष्टव्यम्। तेनागमसंदोह एव शुक्तिमयः संपुटः समुद्रकस्तत्र मौक्तिकेव मौक्तिकेति तत्पुरुष एवेति न परवल्लिङ्गताविरोधभयेन बहुव्रीहिराश्रयणीय इति रूपकोत्प्रेक्षे। श्रुतिसीमन्तेत्यादिना त्रैवर्णिकोपास्यत्वं, सकलागमेत्यादिना चतुर्थवर्णोपास्यत्वं च ध्वनितमिति वा। तथाच रुद्रयामले 'यद्वेदैर्गम्यते स्थानं तत्तन्त्रैरपि गम्यते। ब्रह्मक्षत्रियविट्शूद्रास्तेन सर्वेऽधिकारिण' इति ॥ ११९ ॥ धर्मादींश्चतुरः पुरुषार्थान्प्रददातीति तथा। 'येऽर्चयन्ति पराशक्तिं विधिनाऽविधिनापि वा। न ते संसारिणो नूनं मुक्ता एव न संशयः ॥ तस्मादशेषवर्णानां त्रिपुराराधनं विना। न स्तो भोगापवर्गौ तु यौगपद्येन कुत्रचि'दिति ब्रह्माण्डपुराणात्। 'पुरुषो वै रुद्र' इति श्रुत्या रुद्रः अर्थप्रदः पुरुषार्थदातृत्ववान्यया सेति वा। निष्कलस्य ब्रह्मण उपास्यत्वं फलप्रदत्वं च शक्त्यायत्तमिति भावः। देशकालवस्तुकृतपरिच्छेदराहित्यात्पूर्णा। 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इति श्रुतेः। पञ्चमीदशमीपञ्चदशीतिथिस्वरूपा दितो। शुक्लपक्षचतुर्दशीरात्रिस्वरूपा वा। नदीविशेषरूपा वा। भोगः सुखसान्मुमुक्षुत्कारस्तद्वती भोगिनी वा। नागकन्यात्मिका वा। भुवनानां चतुर्दशसंख्याब्राह्मणादीन्सभीश्वरी स्वामिनी। भुवनशब्दो जलपरो वा। हृल्लेखाभिमानिदेवताशब्दभावनात हृल्लेखात्मकमन्त्रस्वरूपा वा। त्रिपुरासिद्धान्ते तु 'भुवनानन्दनाथस्य प्रसभावनार्थवाहेश्वरी। भुवनेष्वतिविख्याता शांभवी भुवनेश्वरी'त्युक्तम्। भुवनान-

न्दनाथोनाम मानवौघान्तर्गतो गुरुविशेषः । दक्षिणामूर्तिसंहितायां तु घटार्गल-यन्त्रपटले 'एकाक्षरेऽपि देवेशि सन्त्यत्र भुवनानि त्वि'त्युपक्रम्य हृल्लेखाघटकाक्षरेषु हकारादिषु 'व्योमबीजे महेशानि कैलासादिप्रतिष्ठित'मित्यादिना प्रत्येकं भुवनादि-सद्भावं प्रतिपाद्य 'अतएव महेशानी भुवनाधीश्वरी स्मृते'त्युपसंहृत्य 'हकाराद्व्योम तुर्येण स्वरेणानिलसंभव' इत्यादिना भुवनजनकत्वमप्युक्त्वा 'अतएव महेशानी भुव-नेशीति कथ्यत' इत्युपसंहारेण द्वेधा निरुक्तम् । अम्बैवाम्बिका । जगन्माताभारतीः पृथ्वीरुद्राण्यात्मकेच्छाज्ञानक्रियाशक्तीनां समष्टिरम्बिकेत्युच्यते तद्रूपा वा । रात्रिरूपा निद्रारूपा वा । 'अम्बिका कैतवे सिद्धे निद्रायां निशि कीर्त्यत' इति विश्वः । उक्तंच नवरात्रदीपे स्कान्दे 'रात्रिरूपा महादेवी दिवारूपो महेश्वर' इति । हरिवंशेऽपि 'या ह्येषा गह्वरी माया निद्रेति जगति स्थिता । तस्यास्तनुस्तमोद्वारि निशादिवसनाशिनी ॥ जीवितार्धहरी घोरा सर्वप्राणिभृतां भुवि । नैतया कश्चिदाविष्टो जृम्भमाणो मुहुर्मुहुः ॥ सक्तः प्रसहितुं वेगं मज्जन्निव महार्णवे । देवीष्वपि दधारैनां नान्यो नारायणादृते' इति । मार्कण्डेयपुराणेऽपि 'विष्णेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् । निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः' इत्यादि । आदिर्जननं निधनं मरणं च न विद्यते यस्याः साऽनादिनिधना । अथवाऽनादिशब्दादादिशब्दाद्वा वररुचिपरिभाषानुसारेणाशीति-संख्योच्यते । आदिसंख्याकानि च तानि निधनानि च । आयुर्घृतमितिवत्साधन-लक्षणया मरणसाधनान्यमृतत्वविघातकानीति यावत् । न विद्यन्ते आदिनिधनानि यस्या उपासनया साऽनादिनिधना । निधनसाधनानि तावत्पाशवधभेदेन द्विविधानि तत्र वधा अष्टाविंशति विधाः । 'अहंकृता अहंमाना अष्टाविंशद्वधात्मिका' इति विष्णुपुराणात् । पाशास्तु द्विपञ्चाशद्विधाः । 'द्वापञ्चाशदमी पाशा अविद्यापर्वसंभवा' इति लिङ्गपुराणात् । एवमशीतिः । तेषु वधनिरूपणं सांख्यतन्त्रे । तत्र समास-सूत्राणि 'अष्टाविंशतिधा शक्तिः' । 'नवधा तुष्टिः' । 'अष्टधा सिद्धि'रिति । एतेषा-मर्थस्तु कारिकाभिरुक्तः 'एकादशेन्द्रियवधाः सहबुद्धिवधैरशक्तिरुदिष्टा । सप्तदशधा तु बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः । बाह्या विषयोपरमात्पञ्चान्यास्तुष्टयोऽभिहिताः ॥ ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः । दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वाङ्कुशस्त्रिविध' इति । अयमर्थः—मुक्तेः पूर्वाङ्कुशः प्रतिघातकस्त्रिविधः अशक्तिस्तुष्टिः सिद्धिश्चेति । तत्राशक्तिर्नामेन्द्रियाणां स्वार्थग्रहणासामर्थ्यमान्ध्यबाधिर्यादिवैकल्यकृतम् । साचेन्द्रियाणामेकादशत्वादेका-दशधा । तुष्टिस्तावद्विविधा । आध्यात्मिकबाह्यभेदात् । तत्राद्या प्रकृत्यादिभेदाच्चतुर्धा । अष्टविधायां प्रकृत्यां चित्तलयान्मुक्तोऽस्मीति तुष्टिः प्रकृत्याख्या । संन्यासवेषमात्रो-पादानात्कृतार्थोऽस्मीति तुष्टिरुपादानाख्या । कालत एव सेत्स्यति किं ध्यानक्लेशेनेति तुष्टिः कालाख्या । दैवोदयादेव सेत्स्यतीति तुष्टिर्भाग्याख्या । एताश्चात्मानमधिकृत्य भवन्तीत्याध्यात्मिकाः । बाह्यास्तु शब्दादिविषयपञ्चकभेदेन पञ्चविधाः अर्थानामर्जन-रक्षणव्ययनाशादिदोषाणां शब्दादिषु विद्यमानानां कतिपयेषां दोषाणां च दर्शनेन तत्तद्विषयेष्वलंबुद्धिरूपाः । एवं नव तुष्टयः । एतासां सलिलाद्युत्तमाम्भःपर्यन्तानि

नारायणी नादरूपा नामरूपविवर्जिता।

नामानि तारादिसमुदितान्तानि सिद्धिनामानि चाकर एव द्रष्टव्यानि। सिद्धिरष्टविधा। ऊहादिभेदात्। उपदेशानपेक्षमेवार्थोन्नयनमूहसिद्धिः। प्रासङ्गिकाच्छब्दश्रवणादर्थज्ञानं शब्दसिद्धिः। गुरूपदेशादेव ततो विवेकार्थज्ञानमध्ययनसिद्धिः। आध्यात्मिकाधिदैविकाधिभौतिकरूपदुःखत्रयविघातात्मिकाप्तिरूपः सिद्धयः। सुहृत्प्राप्तितोऽर्थसिद्धिरेका। विद्वत्तपस्विशुश्रूषालभ्यार्थसिद्धिरेकेत्यष्टौ सिद्धयो नव तुष्टयश्च। एतासां सप्तदशानां विपर्ययोऽपि सप्तदशविधः। अस्तेत्यादिप्रमुदितान्तानि तन्नामान्याकरे द्रष्टव्यानि। एतेऽप्यशक्तिबुद्धिपदवाच्याश्चेति सप्तदश। एकादशभिरिन्द्रियशक्तिभिः सहाष्टाविंशतिर्वधा इति। एतेषां च व्यवस्थोक्ता वायुपुराणे 'अष्टमोऽनुग्रहः सर्गः स चतुर्धा व्यवस्थितः। विपर्ययेण चाशक्त्या सिद्ध्या तुष्ट्या तथैव च॥ स्थावरेषु विपर्यासात्तिर्यग्योनिष्वशक्तितः। सिद्ध्यात्मना मनुष्येषु तुष्ट्या देवेषु कृत्स्नशः' इति दिक्। हरिब्रह्मेन्द्रैर्विष्णुविधिशक्रैः सेवितोपासिता। श्रीनगरेऽष्टादशसप्तदशप्राकारयोर्मध्ये, विष्णोः सप्तदशषोडशयोर्मध्ये, ब्रह्मणः पञ्चदशचतुर्दशयोर्मध्ये चेन्द्रादिलोकपालानां देवीसेवार्थं निवासस्मरणात्। देवीभागवतेऽपि 'ब्रह्मा विष्णुस्तथा शंभुर्वासवो वरुणो यमः। वायुरग्निः कुबेरश्च त्वष्टा पूषाऽश्विनौ भगः॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः। सर्वे ध्यायन्ति तां देवीं सृष्टिस्थित्यन्तकारिणी'मिति। एतेन विष्णुब्रह्मादिमात्रविषयकागमद्रष्टॄणां विष्ण्वादिविषयकतत्त्वज्ञानाभावात्तदुपासनायां प्रवृत्तापि देव्यागमदर्शिनां विशेषदर्शनान्न तदुपासनायां प्रवृत्तिः। 'नहि भिक्षुको भिक्षुकान्याचितुमर्हति सत्यन्यस्मिन्भिक्षुके' इति न्यायविरोधादिति ध्वन्यते। तदिदमुक्तमस्माभिः शिवस्तवे 'त्वद्दृष्टैश्वर्यभाजः परमशिव कथंकारमन्यानमर्त्यान्याचे देहीति शक्रद्रुहिणहरिमुखान्भिक्षुकान्भिक्षुकोऽहम्। अज्ञोऽपि द्वादशाहक्रतुविकृतिशतोक्थ्याङ्गभूतोऽपि चोक्थ्यो ज्योतिष्टोमोक्थ्यधर्मानभिलषति नतु द्वादशाहोक्थ्यधर्मा'निति॥ १२०॥ नरस्यापत्यमित्यर्थे नडादित्वात्फकि नारायणः शिवो विष्णुर्वा तस्येयं नारायणी। नारायणपदनिरुक्तिस्तावन्मनुस्मृतौ 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ता यस्मात्तेन नारायणः स्मृत' इति। ब्रह्मवैवर्तेऽपि 'नराणामयनं यस्मात्तस्मान्नारायणः स्मृत' इति। अत्र नारशब्दो जीवपरः। 'नॄ नये' इति धातुमभिप्रेत्य 'नयतीति नरः प्रोक्तः परमात्मा सनातनः' इति देवीभागवतात्। नरस्येमे नारा इति व्युत्पत्तिसंभवात्। महाभारते तु 'नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः। तान्येव चायनं तस्य तेन नारायणः स्मृत' इत्युक्तस्य नारायणस्य परमशिवस्य स्त्री नारायणी। तुरीयं प्रकृत्य 'सः श्रीपतिः सोऽपि च पार्वतीपति'रिति काशीखण्डात्। लक्ष्यभेदाभिप्रायेण वेयमुक्तिः। वस्तुतस्तु 'पुंयोगादाख्याया'मिति सूत्रे पुंयोगपदेन न वधूवरभाव एव विवक्षितः। पितृपुत्रीभावरूपसंबन्धस्यापि तत्रोदाहरणदर्शनात्। तेनेह भ्रातृभगिनीभावरूपे पुंयोगे ङीप्। नारायणभगिनीत्यर्थः। अतएव 'नारा-

ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥ १२१ ॥

यणीसहचराय नमः शिवाये'त्यत्रैवमेव व्याचक्षते । नारायणस्य गौर्या सहाभेदादपि नारायणी । तदुक्तं कूर्मपुराणे गुणिशिवेन 'अहं नारायणो गौरी जगन्माता सनातनी । विभज्य संस्थितो देवः स्वात्मानं परमेश्वरः ॥ न मे विदुः परं तत्त्वं देवाद्या न महर्षयः । एकोऽहं वेद विश्वात्मा भवानी विष्णुरेव चे'ति । देवीपुराणे तु 'जलायनानले कुर्यात्समुद्रशयनाथवा । नारायणी समाख्याता नरनारीः प्रकुर्वती'ति । इयं च सुपार्श्वक्षेत्रे प्रसिद्धा । उक्तंच पाद्मे देवीक्षेत्राध्याये 'नारायणी सुपार्श्वे तु त्रिकूटे भद्रसुन्दरी'ति । ह्रींकारादिषु बिन्दोरुपर्यर्धचन्द्ररोधनीनादनादान्तशक्तिव्यापकाः समनोन्मन्याख्याः सूक्ष्मसूक्ष्मतरसूक्ष्मतमरूपा अष्टौ वर्णा वर्तन्ते तेषु तृतीयो वर्णो नाद इत्युच्यते । तत्स्वरूपं च महास्वच्छन्दतन्त्रे 'रोधिन्याख्यं यदुक्तं ते नादस्तस्योर्ध्वसंस्थितः । पद्मकिञ्जल्कसंकाशः कोटिसूर्यसमप्रभः । पुरैः परिवृतोऽसंख्यै'रित्यारभ्य 'तस्योत्सङ्गगतामूर्ध्वगामिनीं परमां शिवाम् । ध्याये'दित्यन्तं तादृशे नादे रूपं यस्याः सा । नाद एव रूपं यस्या इति वा । सन्ति हि परस्परविवेकेन चिदचिद्ग्रन्थिरूपेण भासमानानि जगतः पञ्च रूपाणि । 'अस्ति भाति प्रियं नाम रूपं चेत्यंशपञ्चकम् । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वय'मित्यभियुक्तैर्विवेचितानि । तत्र जगद्रूपयोर्नामरूपयोर्मिथ्यात्वात्ताभ्यां विवर्जिता । असत्यसत्ययोः संबन्धस्यापि मिथ्यात्वेन वास्तविकस्ताभ्यां संबन्धः सत्येन सह भवतीति भावः । आमनन्ति च छन्दोगाः 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे'ति । चिच्छक्तिरूप आकाश एव नामरूपयोर्निर्वाहकस्तदुभयं विना यदधिष्ठानमात्रमवशिष्यते तदेव ब्रह्मेति तदर्थः ॥ **इति भास्कररायेण कृते सौभाग्यभास्करे । मरीच्याख्या कला तुर्या जाता नाम्नां शतत्रयात् ॥ ३०० ॥ इति श्रीमत्पदवाक्येत्यादिभास्कररायोन्नीते ललितासहस्रनामभाष्ये तृतीयशतकं नाम चतुर्थी मरीचिः कला ॥ ४ ॥**

ह्रीं लज्जां करोतीति ह्रींकारी । कर्मण्यण् । अण्णन्तान्ङीप् । द्वितीयाया अलुक् । यद्वा ह्रीमिति स्वरादेराकृतिगणत्वादव्यत्वम् । अतएव त्रिशत्यामेकोनशततमस्य नाम्नश्चतुर्थ्यन्तो ह्रींनम इत्येव प्रयोगः । तस्यार्थस्तु स्वतन्त्रतन्त्रे व्याकुलाक्षरश्लोकेनोक्तः 'त्वंकामान्नानप्रशव्यो नानमसम्निमात्वम्परोमईयोकार्विर्शतनन्तफादुलनान्निबिं' इति । 'देवतारथगो मूक इति यो वेत्ति न क्रमम् । स व्याकुलाक्षरे मूको देवतारथगोऽपि स'न्निति तु वाचनक्रमः । सृष्टिस्थितिसंहारास्तदर्थत्वेन पर्यवस्यन्ति तान्करोतीति ह्रींकारी । अथवा वर्णात्कारप्रत्ययोयम् गौरादेराकृतिगणत्वान्ङीष् । भुवनेश्वरीबीजस्वरूपेत्यर्थः । ह्रीरस्या अस्तीति ह्रीमती । तथाच श्रूयते 'लज्जामती तुष्टिरिष्टा च पुष्टे'ति ॥

अथ परिभाषायामष्टत्रिंशन्नामानि विभजते ॥ **राजतरेखितलिङ्गैरहरत्तैर्द्विर्विभूरतौ रेतः । हालामदभुविरक्तो गुणदम्भो वाजिगीर्णे**

---

१ न विघ्नोऽस्य पद्यस्य परिभाषां वयमतस्तज्ज्ञान्विशापयामोऽर्थावगत्यै.

राजराजार्चिता राज्ञी रम्या राजीवलोचना।
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला॥ १२२॥
रमा राकेन्दुवदना रतिरूपा रतिप्रिया।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा॥ १२३॥

द्विः॥ १५॥ द्विर्द्विरिति चतुश्चतुरक्षरे द्वे द्वे नामनी॥ १५॥

हृदि भवा हृद्या मुनिहृन्निवासिनी, रमणीया वा। हातुमुपादातुं च योग्ये हेयोपादेये ताभ्यां वर्जिता। प्रवृत्तिनिवृत्तिबोधकशास्त्राणामविद्यावद्विषयत्वात्॥ १२१॥ राजराजो मनुः कुबेरश्च ताभ्यामर्चितोपासिता, कुबेरादिविद्यारूपा वा। अतएव चतुर्दशपञ्चदशप्रकारयोर्मध्यभूमिं वर्णयतोक्तं दुर्वाससमुनिना 'तल्लोकपूर्वभागे धनदं ध्यायामि शेवधिकुलेशम्। अपि माणिभद्रमुख्यानम्बाचरणावलम्बिनो यक्षा'निति। तल्लोकेति तत्पदस्य वायुरर्थः। राजराजेश्वरस्य पट्टमहिषीत्वाद्राज्ञी। रम्या सौन्दर्यवती। राजीवशब्देन पद्मं हरिणो मत्स्यो वा गृह्यते। तद्वल्लोचने यस्याः सा राजीवलोचना। 'राजीवाख्या मृगे मत्स्ये पद्मे राजोपजीविनी'ति विश्वः। राजोपजीविनो लोचयति पश्यतीति वा। भक्तान्नञ्जयतीति रञ्जनी। शुद्धस्फटिकसंकाशं परमशिवं अरुणादेवी जपाकुसुमवत्सांनिध्यमात्रेण रञ्जयतीति वा। भक्तान्नमयति तैः सह क्रीडतीति रमणी। 'जक्षन् क्रीडन् रममाणः' इति श्रुतेः। रसयितुमास्वादितुं योग्या रस्या। 'रसो वै सः' इति श्रुतेः। रणन्त्यः किङ्किणयः क्षुद्रघण्टिका यस्यां तादृशी मेखला रशना यस्याः सा॥ १२२॥ सूतसंहितायां 'लक्ष्मीर्वागादिरूपेण नर्तकीव विभाति ये'त्युक्तरीत्या लक्ष्मीस्वरूपत्वाद्रमा। 'कलाहीने सानुमतिः पूर्णे राका निशाकरे।' इत्याग्नेयपुराणस्थकोशबलाद्राकेन्दुवत्पूर्णचन्द्रवद्वदनं यस्याः। रतिरेव रूपं यस्याः कामपत्नीत्वात्। रमा ईकारः। राकेन्दुवदना अनुस्वारसहिता चेद्रतिरूपा कामकला भवतीत्युद्धारः। रतिः कामपत्नीं रतं वा प्रियं यस्याः। रक्षा रक्षणं भस्म वा तत्कर्तृत्वाद्रक्षाकरी स्थितिसंहारकर्त्री। रक्षांस्येव राक्षसास्तान्हन्तीति राक्षसघ्नी। रामा स्त्रीमात्रस्वरूपा। रमन्तेऽस्यां योगिन इति वा। 'ज्वलितिकसन्तेभ्यो णः' इति णः। 'स्त्रीलिङ्गमखिलं गौरी'ति लैङ्गात्। तत्रैव स्थलान्तरे 'शंकरः पुरुषाः सर्वे स्त्रियः सर्वा महेश्वरी। पुंलिङ्गशब्दवाच्या ये ते च रुद्राः प्रकीर्तिताः॥ स्त्रीलिङ्गशब्दवाच्या याः सर्वा गौर्या विभूतयः। एवं स्त्रीपुरुषाः प्रोक्तास्तयोरेव विभूतय' इति। विष्णुपुराणेऽपि 'देवतिर्यङ्मनुष्यादौ पुंनाम्नि भगवान्हरिः। स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते पर'मिति। ब्रह्मवैवर्तेऽपि 'यत्किंचित्त्रिषु लोकेषु स्त्रीरूपं देवि दृश्यते। तत्सर्वं त्वत्स्वरूपं स्यादिति शास्त्रेषु निश्चय'इति। अतएव बृहत्पाराशरस्मृतौ 'स्त्रियस्तुष्टाः स्त्रियो रुष्टास्तुष्टा रुष्टाश्च देवताः। वर्धयन्ति कुलं तुष्टा नाशयन्त्यप्रमानिता' इति। निखिलस्त्रीरूपत्वादेव स्वस्वरमणेषु पतिषु रमणे संभोगे वा क्रीडायां वा लम्पटा लालसा सतृष्णा॥ १२३॥ ज्ञानेन प्राप्तव्यत्वेन मुमुक्षुभिः काम्यमा-

काम्या कामकलारूपा कदम्बकुसुमप्रिया ।
कल्याणी जगतीकन्दा करुणारससागरा ॥ १२४ ॥
कलावती कलालापा कान्ता कादम्बरीप्रिया ।
वरदा वामनयना वारुणीमदविह्वला ॥ १२५ ॥

नत्वात्कान्ता । कृष्णपक्षद्वादशीरात्रिरूपा वा । 'बिन्दुत्रयं हार्धकला चे'त्यत्र प्रथमो बिन्दुः कामाख्यश्चरमा कला चेति प्रत्याहारन्यायेन कामकलेत्युच्यते । तस्याः स्वरूपं 'स्फुटशिवशक्तिसमागमबीजाङ्कररूपिणी पराशक्ति'रित्यारभ्य 'कामः कमनीयतया कला च दहनेन्दुविग्रहौ बिन्दू' इत्यन्तेन निर्णीतं कामकलाविलासे तद्रूपेत्यर्थः । कामो योनिः कमलेति वा । तदुक्तं त्रिपुरासिद्धान्ते 'तस्य कामेश्वराख्यस्य कामेश्वर्याश्च पार्वति । कलाख्या सविलासा च ख्याता कामकलेति से'ति । कामा चासौ कलारूपा चेति वा । कामपदमात्रवाच्यतायाः कालीपुराणे प्रतिपादनात् 'कामार्थमागता यस्मान्मया सार्धं महागिरौ । कामाख्या प्रोच्यते देवी नीलकूटे रहोगता ॥ कामदा कामिनी काम्या कान्ता कामाङ्गदायिनी । कामाङ्गनाशिनी यस्मात्कामाख्या तेन कथ्यते' इति । कदम्बकुसुमानि नीपपुष्पाणि प्रियाणि यस्याः सा । मङ्गलस्वरूपत्वात्कल्याणी । पाद्मे देवीपुराणे च 'कल्याणी मलयाचल' इति परिगणितमूर्तिविशेषरूपा । शुभात्मिका वाणी कल्या तामेवाणति शब्दायतेऽसौ कल्याणी । जगत्याः कन्दः पूरणं मूलं वा यस्याः सा । 'कन्दः स्यात्पूरणे सस्यमूले जलधरेऽपि चे'ति यादवः । करुणैव रसो येषु तादृशाः सागरा यस्यां सा । सागरेभ्योऽप्यधिकतमकरुणाशीलेति यावत् । तत्पुरुषपक्षे कन्दसागरपदयोः परवल्लिङ्गतया पुंस्त्वापत्तिः ॥ १२४ ॥ चतुःषष्टिसंख्याः कला अस्यां सन्तीति कलावती । कल एवालापो भाषणं यस्याः । कलो मञ्जुल आलापो यस्या इति वा । 'ध्वनौ तु मधुरास्फुटे । कल' इत्यमरः । कं ब्रह्म तस्य लालावत् लक्षणया अतिसुलभ आपः प्राप्तिर्यस्याः सकाशादिति वा । कं लालापं लालाजलप्रायं ययेति वा । अपां समूह आपं 'ऋक्पूरब्धू'रिति समासान्तो वा । कान्ता कमनीयत्वात् । कं ब्रह्मवान्तः सिद्धान्तो यस्या इति वा । कृष्णैकादशीरात्रिरूपा वा । कादम्बरी उत्तमा मदिरा सैव प्रिया यस्याः । अतएव श्रुतिः 'परिस्रुतं ह्यमाद्यं पलं च भक्तानि योनीः सुपरिष्कृतानि । निवेदयन्देवतायै महत्यै स्वात्मीकृत्य सुकृती सिद्धिमेती'ति । ब्रह्मविष्ण्वादिभ्य उपासकेभ्यो वरान् दत्त इति वरदा । तदुक्तं मात्स्यपाद्मयोर्नारदेन 'यच्चाहमुक्तवानस्या उत्तानकरतां सदा । उत्तानो वरदः पाणिरेषं देव्याः सदैव तु ॥ सुरासुरमुनिव्रातवरदेयं भविष्यती'ति । अत्र दानस्य प्रायेण हस्तकरणकत्वाद्वरदः पाणिरित्युक्तम् । वस्तुतो देवकामनापूर्तिमात्रे तात्पर्यं ननु वरदमुद्राधारणेऽपि । भगवत्पादाचार्यैः 'त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया' इत्युक्तैः 'वरा

विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥ १२६ ॥

र्थिभ्यः सुरादिभ्यः कामान्पूरयतीश्वरी । धातुर्वृञ् वरणे प्रोक्तस्तेन सा वरदा स्मृते'ति देवीभागवताच्च । वाराहेऽपि वेत्रासुरवधप्रकरणे 'नवम्यां च सदा पूज्या इयं देवी समाधिना । वरदा सर्वलोकानां भविष्यति न संशय' इति । वामानि सुन्दराणि नयनानि नेत्राणि प्रमाणानि वा यस्याः । वामं मार्गविशेषं नयतीति वा । अथवा कर्मजन्यफलं वाममित्युच्यते 'एष उ एव वामनी'रिति श्रुतौ संयद्वामादिश्रुतौ च वामपदस्य तथा व्याख्यानदर्शनात्तन्नयति प्रापयतीति वामनयना । वरुणस्येयं वारुणी सास्यास्तीति वारुणीमान्सहस्रफणः शेषः । शेषं प्रस्तुत्य विष्णुपुराणे 'उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्तये'ति पाठात्स यथा भूधरणे विह्वलो न भवति तद्वदविह्वला यद्वा खर्जूरीसमुद्भवो रसो वरुणप्रियत्वाद्वारुणी तस्या मदेन पानजन्यानन्देन विह्वला बाह्यपदार्थविस्मरणशीला । स्वात्मानन्दैकचर्वणवतीति यावत् । वारुणीमन्तः अविह्वला ययेति वा । वारुण्याख्यां वायुदेवत्यां नाडीं जितवन्तो वारुणीमन्तः इत्युच्यन्ते । उक्तं च योगशास्त्रे 'अधश्चोर्ध्वं स्थिता नाडी वारुणी सर्वगामिनी । पूषा दिग्देवता प्रोक्ता वारुणी वायुदेवते'ति ॥ १२५ ॥ विश्वस्मादिश्लादिशिवान्तादधिकोत्कृष्टा । 'विश्वाधिको रुद्रो महर्षि'रिति श्रुतेः । वेदैः ऋग्यजुःसामाथर्वणैर्वेद्या ज्ञेया । 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रुतेः स्मृतेश्च । यद्वा चिन्तामणिगृहस्य चत्वारि द्वाराणि चतुर्वेदरूपाणि । द्वारप्रवेशमन्तरेण देवतादर्शनाभावाद्वेदैकवेद्यत्वम् । तथाच श्रुतिः 'ऋचां प्राची महती दिगुच्यते दक्षिणामाहुर्यजुषामपाराम् । अथर्वणामङ्गिरसां प्रतीची साम्नामुदीची महती दिगुच्यत' इति । शुद्धविद्यादिभिः सौभाग्यादिभिर्लोपामुद्रादिभिस्तुरीयाम्बादिभिश्चर्यजुषाथर्वसामदेवताभिर्वेद्येत्यप्यर्थः । विन्ध्याख्ये अचले पर्वते निवसतीति तथा । तथाच पाद्मे देवीक्षेत्रगणनायां 'त्रिकूटे च तथा सीता विन्ध्ये विन्ध्याधिवासिनी'ति । पाञ्चरात्रलक्ष्मीतन्त्रेऽपि 'वैवस्वतेऽन्तरे तौ च पुनः शुम्भनिशुम्भकौ । उत्पत्स्येते वरान्मत्तौ देवोपद्रवकारिणौ ॥ नन्दगोपकुले जाता यशोदागर्भसंभवा । तावहं नाशयिष्यामि नन्दाख्या विन्ध्यवासिनी'ति । मार्कण्डेयपुराणेऽप्येषोऽर्थः प्रसिद्धः । विदधाति धारयति पोषयति वा जगदिति विधात्री । 'धात्री माता समाख्याता धारणाच्चोपगीयत' इति देवीपुराणात् । विधातुर्ब्रह्मणः पत्नी वा । विशिष्टा विशेषप्रीतिविषया धात्री आमलकी यस्या इति वा । वेदानां जननी उत्पादिका । 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद' इत्यादिश्रुतेः । 'ऋचः सामानि जज्ञिर' इत्यादिश्रुतेश्च । देवीपुराणे तु 'यतः शङ्खाटकाकारकुण्डलिन्याः समुद्गता । स्वराश्च व्यञ्जनानीति वेदमाता ततः स्मृते'त्युक्तम् । विष्णोर्व्यापनशीलस्य देशकालादिभिरनवच्छिन्नस्यापि माया आवरणकर्त्री । परिच्छेदिकेति यावत् । तत्संबन्धिनी मायेति वा । 'दैवी ह्येषा गुणमयी मम माया

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी ।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ॥ १२७ ॥

दुरत्यये'ति भगवद्वचनात् । कालिकापुराणेऽप्युक्तम् 'अव्यक्तव्यक्तरूपेण रजःसत्त्वतमोगुणैः । विभज्य यार्थं कुरुते विष्णुमायेति सोच्यत' इति । विलासो विक्षेपशक्तिरस्या अस्तीति तथा । पीठशक्तिविशेषरूपा वा । 'नित्या विलासिनी दोग्ध्री'त्यादिना तासु परिगणनात् । विले ब्रह्मरन्ध्रे आस्त इति वा विलासिनी । तदुक्तं स्वच्छन्दतन्त्रे 'तत्र ब्रह्मविलं ज्ञेयं रुद्रकोट्यर्बुदैर्वृत'मिति प्रस्तुत्य 'ब्रह्माणीत्यपरा शक्तिर्ब्रह्मणोत्सङ्गगामिनी । द्वारं सा मोक्षमार्गस्य रोधयित्वा व्यवस्थिते'ति ॥ १२६ ॥

अथ परिभाषायामष्टत्रिंशन्नामानि विभजते ॥ **मृगजो द्विर्बालः खे जीवाभं पञ्चपादार्धम् । गुणभूवरतेजोर्धं रतिगुणदेशो दहेद्गणं दुरितम् ॥ १६ ॥**
द्विरित्यष्टाक्षरे द्वे नामनी ॥ १६ ॥

क्षेत्रं कामरूपादिकं वसुधादिशिवान्तषट्त्रिंशत्तत्त्वात्मकं शरीरं वा । तत्स्वं निजं रूपं यस्याः सा । तथाच लैङ्गे 'बिभर्ति क्षेत्रतां देवी त्रिपुरान्तकवल्लभा । क्षेत्रज्ञत्वमजो धत्ते भगवानन्तकान्तक' इति । क्षेत्रस्य शरीरस्येशः शिवस्तस्येयं क्षेत्रेशी । क्षेत्रं क्षेत्रज्ञो जीवस्तं च पालयतीति क्षेत्रक्षेत्रज्ञपालिनी । तथाच विष्णुस्मृतौ 'इदं शरीरं वसुधे क्षेत्रमित्यभिधीयत' इति । 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः । क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारते'ति गीतास्वप्येवमेव कौन्तेयभारतसंबोधनाभ्यां घटितमिदमेव । लैङ्गेपि 'चतुर्विंशतितत्त्वानि क्षेत्रशब्देन सूरयः । आहुः क्षेत्रज्ञशब्देन भोक्तारं पुरुषं तथे'ति । वायुपुराणे तु 'अव्यक्तं क्षेत्रमुद्दिष्टं ब्रह्मा क्षेत्रज्ञ उच्यत' इत्युक्तम् । ब्रह्मपुराणेऽपि 'क्षेत्राख्यानि शरीराणि तेषां चैव यथासुखम् । तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यत' इति । मनुस्मृतौ तु 'योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् । येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥ तावुभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव च । उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥ असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरतः । उच्चावचानि भूतानि संततं चेष्टयन्ति याः' इत्युक्तम् । क्षयवृद्ध्योः क्षेत्रसंबन्धिभावविकाररूपत्वेन तदधिष्ठातृत्वेऽपि ताभ्यां विनिर्मुक्ता । 'नैनं छिन्दन्ति शस्त्राणी'त्यादिस्मृतेः । कर्मकृताभ्यां वा ताभ्यां विनिर्मुक्ता । 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयानि'ति काठकश्रुतेः । 'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानि'ति वाजसनेयश्रुतेश्च । दारुकासुरवधार्थं शिवेन काली निर्मिता सती दारुकं हतवती । तदुत्तरमप्यशान्तेन तस्याः क्रोधाग्निना जगदाकुलमालोक्य शिवस्तत्क्रोधनिरासाय बालो भूत्वाऽरोदीत् । सा तं बालं स्तनावपाययत् । स पयोद्वारा तस्याः क्रोधाग्निमपि पपौ । सोऽयं क्षेत्रपालः शिवावतारविशेष इति कथा लैङ्गादिषु प्रसिद्धा । क्षेत्रं यागायतनं पालयतीति व्युत्पत्तिः तेन सम्यगर्चिता ॥ १२७ ॥

विजया विमला वन्द्या वन्दारुजनवत्सला।
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी॥ १२८॥
भक्तिमत्कल्पलतिका पशुपाशविमोचिनी।
संहृताशेषपाखण्डा सदाचारप्रवर्तिका॥ १२९॥

विशिष्टो जयो यस्याः सा विजया संविद्रूपा वा। देवीपुराणेऽष्टषष्टिशिवतीर्थेषु 'विजयं चैव काश्मीर' इति गणित इति शिवस्वरूपा वा। तत्रैव निर्वचनाध्याये 'विजित्य पद्मनामानं दैत्यराजं महाबलम्। त्रिषु लोकेषु विख्याता विजया चायराजिते'ति विश्वकर्मशास्त्रप्रसिद्धविजयाख्यगृहविशेषरूपा वा। विजयाख्यो मुहूर्त उक्तश्चिन्तामणौ 'आश्विनस्य सिते पक्षे दशम्यां तारकोदये। स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धिदः' इति। रत्नकोशे तु 'ईषत्संध्यामतिक्रान्तः किंचिदुन्निद्रतारकः। विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः॥ एकादशो मुहूर्तो यो विजयः परिकीर्तितः। तस्मिन्यात्रा विधातव्या सर्वैर्विजयकाङ्क्षिभि'रिति तादृशकालरूपेत्यर्थः। विगतो मल आविद्यको यस्याः सा विमला। पाद्मे 'विमला पुरुषोत्तमे' इति देवीतीर्थेषु परिगणितमूर्तिविशेषरूपा वा। गृहविशेषरूपा वा। तदुक्तं विश्वकर्मशास्त्रे गृहाण्यधिकृत्य 'ध्रुवं धान्यं जयं कान्तं विपुलं विजयं तथा। सुमुखं विमलं नन्दं निधनं च मनोरम'मिति। वन्दितुं योग्या वन्द्या। योग्यतामेवाह—**वन्दारुवृन्देति**। वन्दन्ते ते वन्दारवः। 'शृवन्द्योरारु'रित्यारुप्रत्ययः। तादृशान् जनान्वत्सवल्लात्यनुगृह्णाति 'वत्सांसाभ्यां कामबले' इति लप्रत्ययो वा। वाचं वदतीति वाग्वादिनी काचिद्देवता तद्रूपा वा। वाचं वादयतीति वा। एतन्निर्वचनं च त्रिपुरासिद्धान्ते 'सर्वेषां च स्वभक्तानां वादरूपेण सर्वदा। स्थिरत्वाद्वाचो विख्याता लोके वाग्वादिनीति से'ति। 'शब्दानां जननी त्वमेव भुवने वाग्वादिनीत्युच्यस' इति लघुस्तवेऽपि। वामाः सुन्दराः केशा यस्याः सा। वामा एव वामकास्तेषामीशः शिवः। देवीपुराणेऽष्टषष्टिशिवतीर्थेषु 'जटे वामेश्वरं विद्यादि'ति प्रतिपादितस्तस्य स्त्री वा। वामकेशेन प्रोक्तं तन्त्रं वामकेशं तत्र प्रतिपाद्यतया तत्संबन्धिनी वा। वह्नेर्मण्डलं मूलाधारे परमाकाशे वा विद्यमानं तत्र वसतीति तथा। वह्निशब्दस्त्रित्वसंख्यावच्छिन्नपरो वा। तेन सोमसूर्याग्निमण्डलत्रयवासिनीत्यर्थः॥ १२८॥ भक्तिमतां जनानां कल्पलतिकेव अभिमतार्थदातृत्वात्। अथवा ईषदसमाप्तौ कल्पप्रत्ययेनाऽपूर्णभक्ता भक्तिमत्कल्पाः। तेषां लतिकेव विस्तारकारिणी। कस्तूरिकेवामोदयित्री वा। 'ज्योतिष्मत्यां च कस्तूर्यां माधवीदूर्वयोर्लते'ति रभसः। अर्धभक्तानां भक्तिपूर्तिदानद्वारा संतोषिकेति यावत्। तदुक्तं शक्तिरहस्ये 'अकृत्स्नेमार्धभक्त्या वा भवान्याः कृतमर्चनम्। जन्मान्तरे क्रमप्राप्त्यै पूर्णभक्त्यै च कल्पत' इति। अभेदज्ञानरूपविद्याविहीनाः पशवः। तदुक्तं बृहदारण्यके 'योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति। इह योन्यां त्रिकोण-

चक्र इत्यर्थः। 'तस्मिन् हिरण्मये कोशे त्र्यरे च त्रिप्रतिष्ठित' इति श्रुत्यन्तरात्। ईदृशानां पशूनां विद्याविहीनानां पाशे पिपासाऽशनाये विशिष्य मोचयतीति तथा। पिवतेरश्नातेश्च धातुद्वयस्य पाशपदेन निर्देशः। पातेरश्नातेश्च क्विपि पा अश हलन्ताद्यापि तयोः समाहारे पाशमिति रूपम्। तावन्मात्रवत्त्वादेव हि पशुत्वं निर्विद्यानाम्। तथाच श्रूयते 'अथेतरेषां पशूनामशनापिपासे एवाभिज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोका'विति। अथवा पशु इत्यव्ययं सम्यगर्थे 'लोष्टं नयन्ति पशु मन्यमानाः' इति श्रुतौ तथा व्याख्यानदर्शनात्। पशु यथाभवति तथा पाशान् वरुणपाशान् विमोचयतीति। यद्वा सम्यक्पाशानक्षान्पातयतीति। शिवेन सह द्यूतक्रीडायां सम्यक्पाशान् फलके पातयित्वा शिवं जयतीति यावत्। अथवा पशुपस्य परशिवस्याशा प्रेप्सा येषां ते पशुपाशास्तान् विशेषेण मोचयति प्राप्तशिवांस्तनोतीति। अथवा ब्रह्मादिस्थावरान्ताः पशुसमानधर्मत्वात्पशवः तेषां बन्धसाधनत्वादविद्यैव पाशः। तदुक्तं सौरसंहितायामविद्यानामनिर्वचनप्रकरणे 'सर्वाधारतयाधारः पाशो बन्धस्य हेतुत' इति। तद्विकारास्तत्त्वादयो वा पाशास्तान् शिवभक्त्या मोचयति। तदुक्तं लैङ्गे 'ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः। पशवः परिकीर्त्यन्ते समस्ताः पशुवर्तिनः॥ चतुर्विंशतितत्त्वानि मायाकर्मगुणा इति। विषया अपि कीर्त्यन्ते पाशानीवनिबन्धनात्॥ तैर्बद्धाः शिवभक्त्यैव मुच्यन्ते सर्वदेहिन' इति। अथवा अविद्याऽस्मिता रागो द्वेषोऽभिनिवेशश्चेति पञ्चविधः क्लेशः। आत्मानात्मविवेकाभावोऽविद्या। अनात्मनि देहादावात्मत्वविपर्योऽस्मिता। तेनच देहोपभोगकरणे स्वकचन्दनादावभिलाषो रागः। तत्प्राप्तिपरिपन्थिनि क्रोधो द्वेषः। तदिदमहितमिति ज्ञात्वाप्यज्ञवत्तदपरित्यागोऽभिनिवेश इति। तदिदं योगसूत्रे प्रथमपादोपान्त्यसूत्रेणोद्देशमात्रं कृत्वा द्वितीयपादे पञ्चभिः सूत्रैः सलक्षणमुक्तम्। यत्तूक्तं देवीभागवते 'तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः। महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा॥ मरणं त्वन्धतामिस्रं तामिस्रं क्रोध उच्यते। अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मन' इति। तत्र तमःप्रभृतीन्यविद्यादीनामेव नामान्तराणि। मरणशब्दो मिथ्याभिनिवेशपरः। तदिदमुक्तं लैङ्गे 'अविद्यामस्मितां रागं द्वेषं च द्विपदां वर। वदन्त्यभिनिवेशं च क्लेशान्पाशत्वमागतान्॥ तमो मोहो महामोहस्तामिस्रमथ पण्डिताः। अन्धतामिस्रमित्याहुः क्लेशान्वै पञ्चधास्थितान्॥ अविद्या तम इत्याहुरस्मिता मोह इत्यपि। रागं चैव महामोहं द्वेषस्तामिस्रमित्यपि॥ अन्धतामिस्रकं मिथ्याभिनिवेशं प्रचक्षत' इति। एतेषां पञ्चानां क्लेशानां प्रभेदा अपि तत्रैव 'तमसोऽष्टविधो भेदो मोहश्चाष्टविधः स्मृतः। महामोहप्रभेदास्तु बुधैर्दश विचिन्तिताः॥ अष्टौ विधास्तथा प्राहुस्तामिस्रस्य विचक्षणाः। अन्धतामिस्रभेदाश्च तथाष्टादश कीर्तिता' इति संहृत्य द्विपञ्चाशत्। तामिस्रस्याप्यष्टादशविधत्वमाश्रित्य द्विषष्टिः पाशा इति केचित्। एते च क्लेशा वैषयिकयोगितत्त्वज्ञरूपपशुत्रैविध्यात्तांस्तान्प्रति विलक्षणाः। तदुक्तं देवीभागवते 'प्रसुप्तास्तत्त्ववेत्तृणां दग्धदेहास्तु योगिनाम्। अविच्छिन्नोदाररूपाः क्लेशा विषयसङ्गिना'मिति। यत्तु

कुलार्णवे 'घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी । कुलं शीलं च जातिश्चेत्यष्टौ पाशाः प्रकीर्तिताः' इति तदविद्यादिक्लेशपञ्चकस्योक्तत्वेन द्विपञ्चाशद्भेदेषु कतिपयानामव्युत्पानुवादः । तेन भेदा विस्तरभयान्नोक्ताः । इत्थंच मूले पशुशब्द उक्तपरिभाषयैकपञ्चाशत्संख्यापरोऽपि प्रत्यासत्तिसंबन्धेन लक्षणया द्विपञ्चाशत्परः । 'नित्यानन्दवपुर्निरन्तरगलपञ्चाशदर्णैः क्रमा'दिति शारदातिलकश्लोके पञ्चाशत्पदस्येदृशलक्षणयैव हर्षदीक्षितादिभिरेकपञ्चाशत्परत्वेन व्याख्यानात् । तेन पशुसंख्यान् द्विपञ्चाशत्पाशान्विमोचयतीत्यर्थः । तदुक्तं शिवरहस्ये 'पञ्चकैर्दशभिर्द्विपञ्चाशत्पाशैर्बध्नाति यः पशून् । स एव मोचकस्तेषां भक्त्या सम्यगुपासित' इति तु पौराणिकरीत्या निष्कर्षः । अथवा अणुभेदः कर्म चेति त्रयः पाशाः । तत्राज्ञानमणुः । तच्च चैतन्यस्वरूपे आत्मन्यात्मत्वज्ञानाभावो देहादावनात्मन्यात्मत्वज्ञानं चेति द्विविधम् । द्विविधमप्येतत्संभूयाणवं मलमित्युच्यते । अणुपदवाच्यत्वं चास्यापरिच्छिन्नस्याप्यात्मनः परिच्छेदकत्वात् । तदुक्तं सौरसंहितायाम् 'आत्मनोऽणुत्वहेतुत्वादणुर्मालिन्यतो मल'मिति । एकस्यैवात्मनो नानात्वं तु भेदः । तत्र मूलकारणं मायाख्यं तत्त्वेषु षष्ठमेकम् । तज्जन्यं सप्तमादिषट्त्रिंशान्ततत्त्वब्रन्दमपरमिति द्विविधमपि मायीयं मलमुच्यते । विहितनिषिद्धक्रियाजन्यं शरीरदानक्षममदृष्टं तु कर्म । तदपि पुण्यपापभेदेन द्विविधमपि संभूय कार्मणं मलमुच्यते । एतेष्वणुकर्मभेदेषूत्तरोत्तरं पूर्वपूर्वव्याप्यं सर्वमिदमभिहितं प्रत्यभिज्ञाशास्त्रे 'स्वातन्त्र्यहानिर्बोधस्य स्वतन्त्रस्याप्यबोधता । द्विधाणवं मलमिदं स्वस्वरूपापहारतः । भिन्नवेद्यप्रथात्मैव मायीयं जन्म भोगदम् । कर्तव्यबोधकार्मं तु मायाशक्त्यैव तत्त्रय'मिति । स्पष्टतरमुक्तं शैवसूत्रवार्तिके 'नन्वेवंविधविश्वस्य चैतन्यं चेद्वपुस्तदा । कथं बन्धस्य संबन्ध इति शङ्कां व्यपोहितुम् । अश्लेषश्लेषपाठाभ्यां सूत्रमाह महेश्वरः' । अज्ञानं बन्धः । 'अज्ञानमिति तत्राद्यं चैतन्यस्फाररूपिणी । आत्मन्यनात्मताज्ञानं ज्ञानं पुनरनात्मनि ॥ देहादावात्ममानित्वं द्वयमप्येतदाणवम् । मलं स्वकल्पितं स्वस्मिन्बन्धस्वेच्छाविभावितः ॥ किमाणवमलात्मैव बन्धोऽयं नेत्युदीर्यते' । योनिवर्गः कलाशरीरम् । 'योनिर्भेदप्रथाहेतुर्मायावर्गस्तदुत्थितः । कालादिक्षितिपर्यन्ततत्त्वराशिस्तदात्मकः ॥ मायीयाख्यं मलं तत्तद्भिन्नवेद्यप्रथामयम् । कलेति कायमाविश्य परिच्छेदकरी नृणाम् ॥ व्यावृत्तिः पुण्यपापात्मा शरीरं यस्य तत्पुनः । कार्मणं मलमेतस्मिन्द्वये बन्धोऽनुवर्तत' इति । एवंभूतेषु त्रिषु पाशेष्वेकेन द्वाभ्यां त्रिभिरपि बन्धप्रयुक्ता जीवा अपि त्रिविधाः पशुपदेनोच्यन्ते । यद्यपि त्रयाणां प्रस्तारेष्वेककाख्रयो द्विकाख्रयस्त्रिक एक इति सप्तधा जीवाः संपद्यन्ते तथाप्यणुकर्मभेदानामुत्तरोत्तरस्य पूर्वपूर्वव्याप्यत्वनियमात्तिस्र एव पशोर्विधाः । ते च पशवो नित्याहृदये शुद्धमिश्राशुद्धपदैर्व्यवहियन्ते । स्वच्छन्दतन्त्रादौ तु विज्ञानकेवलाः प्रलयाकलाः सकला इति व्यवहृताः । तथाचोक्तं 'पशवस्त्रिप्रकाराः स्युस्तेष्वेके सकला मताः । प्रलयाकलनामानस्तेषां केचिन्महेश्वरि । विज्ञानकेवलास्त्वन्ये तेषां रूपं क्रमाच्छृणि'ति । तेषु त्रिभिरपि पाशैर्बद्धः सकलः । तदुक्तम् 'अनादि-

मलसंछन्नो मायाकर्मावृतो विभुः । शरीरशिवतत्त्वज्ञो भेदैकरसिको लघुः ॥ सर्वदा कर्मकर्ता च स्वकर्मफलभोजकः । नित्यं विषयसंरक्तः सकलः पशुरुच्यत' इति । अत्र मलमायाशब्दावणुभेदपरौ । एते च सकलाः पशवो मलपाकापाकाभ्यां द्विविधाः । तत्र ये पक्वमलत्रयस्तेषां मध्येऽष्टादशोत्तरशतसंख्याकाः सिद्धाः परिपूर्णशिवानुग्रहवशान्मन्त्रेश्वरतामात्रा वर्तन्ते । ते च शैतरुद्राख्या अष्टौ शतमण्डलिनोऽष्टौ क्रोधभट्टारकादयो वीरेश्वरः श्रीकण्ठश्चेति द्वाविंशतिः । अन्यानप्याचार्यरूपेण शिव एवानुगृह्णाति अपरिपक्वमलत्रयांस्तु भोगेन मलपाकाय नानायोनिषु विनियुङ्क्ते सोऽपि चानुग्रह एव । तदुक्तं 'मलादीनामपाके तु सामान्यानुग्रहो भवेत् । आधिकारिकमैश्वर्यं शिवानुग्रहमात्रतः । पशवस्त्रिप्रकारास्तु प्राप्नुयुः परमेश्वरी'ति । 'नानायोनिषु पाकाय नियुङ्क्तेऽनुजिघृक्षये'ति च । अणुकर्माख्यपाशद्वयबद्धास्तु प्रलयाकलाः । तेपि तयोः परिपाकतदभावाभ्यां द्विविधाः । तेष्वन्त्याः कर्मवशादुत्तमयोनिषु जायन्ते । आद्येषु यत्रेश्वरानुग्रहस्ते भुवनेश्वरा भवन्ति । तदुक्तं स्वच्छन्दसंग्रहे 'मिश्राः प्रमातृरूपाः स्युः प्रलयाकलसंज्ञकाः । पुर्यष्टकशरीराश्च पृथक्कर्मवशात्प्रिये ॥ सर्वयोनिषु संप्राप्य भोगाद्यं स्वस्वकर्मणाम् । भुक्त्वा भोगानि तेषां तु कर्मसाम्ये शिवः स्वयम् ॥ सुपक्वमलकर्माणस्तान्किंचिदनुगृह्य च । जलतत्त्वादि तत्त्वानां मध्ये लोकेश्वरान्विधे'ति । आणवमलमात्रबद्धा विज्ञानकेवलाः । तदुक्तं 'मलमात्रेण संबद्धः पशुर्विज्ञानकेवलः । सुपक्वमलविज्ञानकेवलः स स्वयं प्रिये' इति । तेऽपि समाप्तकलुषा असमाप्तकलुषाश्चेति द्विविधाः । तत्राद्या विद्येश्वराः । अन्त्यास्तु सप्तकोटिमहामन्त्रात्मकाः । नच तेषां जडत्वमिति शङ्क्यम् । शब्दरूपशरीराणां जडत्वेऽपि शरीरिणामस्माकमिव चेतनत्वोपपत्तेः । अतएव मृगेन्द्रसंहितायाम् । 'अथानादिमलापेतः सर्वकृत्सर्वदृक् शिवः । पूर्वं व्यत्यासितस्याणोः पाशजालमपोहती'ति । आगमिका अप्याहुः 'भुक्तिं मुक्तिमणूनां स्वव्यापारे समर्थानाम् । जडवर्गस्य विधत्ते सर्वानुग्राहकः शंभु'रिति । अपक्वाणवमलवज्जीवत्वादेव मन्त्राणामणुसंज्ञापि । एवं षड्विधानामपि पशूनां मलपाकतारतम्यानन्त्यादनन्ता भेदाः । तेषां च तत्तत्तारतम्यार्हयोनिप्रापणैश्वर्यदानान्यपि भोगेन मलपाकार्थत्वात्पाशविमोचनरूपाण्येव । तथाच पशूनामुक्तरूपाणां पाशान्मलान्विशेषेण तत्तद्योग्यतानुसारेण मोचयतीति पशुपाशविमोचिनी । नच मोचनस्य शिवकार्यत्वात्कथं तत्र देव्याः कर्तृत्वमिति वाच्यम् । मोचकत्वशक्तिमन्तरेण शिवस्य तदयोगेन मोचनकर्तृताया अन्वयव्यतिरेकाभ्यां शक्तावेव स्वीकर्तुं युक्तत्वात् । तदुक्तमभियुक्तैः 'शक्तो यया स शंभुर्भुक्तौ मुक्तौ च पशुगणस्यास्य । तामेनां चिद्रूपामाद्यां सर्वात्मनास्मि नत' इति । किंच स्वातन्त्र्यं हि कर्तृत्वम् । 'स्वतन्त्रः कर्ते'ति पाणिनिसूत्रात् । तच्च शक्तिगतमेव । तथाच शक्तिसूत्रं 'चितिः स्वतन्त्रा विश्वसिद्धिहेतु'रिति । यत्तु 'चैतन्यमात्मे'ति शिवसूत्रं तत्स्वातन्त्र्यानिर्देशान्नपुंसकलिङ्गबलाच्च कर्तृत्वादिधर्माभावपरम् । यत्तु 'चितिः स्वतन्त्रा विश्वसिद्धिहेतु'रित्याद्यसूत्रं किल शक्तिशास्त्रे । चैतन्यमात्मेति तु शैवशास्त्रे 'शिवश्च शक्तिश्च चिदेव तस्मा'-

तापत्रयाग्निसंतप्तसमाह्लादनचन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोपहा ॥ १३० ॥
चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी ।

दित्यभियुक्तैरुच्यते तत्तु शक्तिशक्तिमतोरभेदाभिप्रायेणेति तु शैवरहस्यनिष्कर्षः । संहृता नाशिता अशेषाः समस्ताः पाखण्डा यया सा तथोक्ता । पाखण्डस्वरूपं च लैङ्गे 'वेदबाह्यव्रताचाराः श्रौतस्मार्तबहिष्कृताः । पाखण्डिन इति ख्याता न संभाष्या द्विजातिभि'रिति । ब्रह्मवैवर्तेऽपि 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशे'ति परिगणितानि विद्यास्थानान्यधिकृत्य 'एतत्सत्यमितश्चान्यत्पाखण्डं बुद्धिकल्पितम् । दैत्यानां मोहनार्थाय महामोहेन निर्मित'मिति । 'पाशब्देन तु वेदार्थः खण्डाः स्युस्तस्य खण्डका'इति तु निरुक्तिः, अतएवाह सदाचारप्रवर्तिकेति । सत्तमः सतां शिष्टानां वा सतो ब्रह्मणो वा आचारः सदाचारस्तस्य प्रवर्तिका । कर्मकाण्डोक्ते धर्मे ब्रह्मकाण्डोक्तेऽद्वैतब्रह्मणि चाभिरतिपूर्वकं तत्तत्प्राप्तिसाधनानि पुराणादिषूपदिशत्यनुष्ठापयतीति यावत् । उक्तंच कूर्मपुराणे भगवत्यैव 'अष्टादश पुराणानि व्यासेन कथितानि तु । नियोगाद्ब्रह्मणो राजंस्तेषु धर्मः प्रतिष्ठितः ॥ अन्यान्युपपुराणानि तच्छिष्यैर्व्यासकृतानि तु । युगे युगे तु सर्वेषां कर्ता वै धर्मशास्त्रवित् ॥ शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च । ज्योतिःशास्त्रं न्यायविद्या सर्वेषामुपबृंहणम् ॥ एवं चतुर्दशैतानि विद्यास्थानानि सत्तम । चतुर्वेदैः सहोक्तानि धर्मो नान्यत्र विद्यते ॥ एवं पैतामहं धर्मं मनुव्यासादयः परम् । स्थापयन्ति ममादेशाद्यावदाभूतसंप्लव'मिति ॥ १२९ ॥ आध्यात्मिकाधिभौतिकाधिदैविकाख्यानां तापानां त्रयं यस्य तेनाग्निना संसारलक्षणेन सम्यक्तप्तानां जनानां सम्यगाह्लादनेनापहरणपूर्वकानन्दनविषये चन्द्रिकेव वा । 'अजरोऽमृत'इति श्रुतेर्नित्यतारुण्यवत्त्वात्तरुणी । '–तरुणतलुनानामुपसंख्यान'मिति वार्तिकान्वयेन ङीप् । तापसैस्तपस्विभिराराध्या । तापस्तज्जनकः संसारस्तत्र सारभूता । आध्या आसमन्ताद्ध्यानं यस्या इति वा । तनुः कृशो मध्यो यस्याः सा । काञ्चीदेशे तनुमध्याख्या देवी प्रसिद्धा । यदाह 'मां पातु निवायास्तीरे निवसन्ती । बिल्वेश्वरकान्ता देवी तनुमध्या' । तनुमध्यारूयसमवृत्तविशेषरूपा वा । तथाच पिङ्गलसूत्रं 'तनुमध्या स्त्रौ' । पदचतुरूर्ध्वसूत्रात्प्रतिपादमिलस्यानुवृत्त्या प्रतिपादं तगणयगणौ चेत्सा तनुमध्येत्युच्यते इति सूत्रार्थः । पूर्वोक्तमुदाहरणं 'गायत्री छन्दसामह' मिति कौर्मे देवीवचनादस्य वृत्तस्य तच्छन्दस्कत्वात्तद्रूपता । तमोऽविद्यामपहन्तीति तमोपहा । तथाचेशावास्ये श्रूयते 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासत'इति । अविद्यामिति पदकाराणां पाठः । 'विद्यान्योपासकानेवं निन्दत्यारण्यकश्रुति'रिति ब्रह्माण्डपुराणस्थमुपबृंहणं च ॥ १३० ॥ अतएवाह । चितिः अविद्यापरिपन्थिज्ञानस्वरूपा । 'चितिः स्वतन्त्रा विश्वसिद्धिहेतु'रिति

स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंततिः ॥ १३१ ॥
परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥ १३२ ॥

शक्तिसूत्रोक्तस्वरूपेत्यर्थः । 'सैषा चितिरिति प्रोक्ता जीवनाज्जीवितैषिणा'मिति महावासिष्ठे । तत्त्वमस्यादिमहावाक्यघटकतत्पदस्य जगज्जन्मादिकर्तृत्वविशिष्टं शबलं ब्रह्म वाच्योऽर्थः। तदेवेह स्तूयमानम् । धर्मिमात्रं तु शुद्धं ब्रह्म लक्ष्योऽर्थः । अनयोश्च विशिष्टकेवलयोस्तादात्म्यं संबन्धः । तदेतदाह । तदिति पदेन लक्षणीयोऽर्थो यस्याः यत्तादात्म्यापन्नः सा तत्पदलक्ष्यार्था । धर्मिमात्रपरत्वे तु तत्पुरुषापत्त्या 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति नियमात्पुंलिङ्गतापत्तिः । ननु केवलमपि रूपमानन्दादिधर्मविशिष्टमेवेति वाच्यमेवास्त्वत आह । चिता सहैको रसः स्वरूपं येषां, चिदेव मुख्यो रसो येषां तानि चिदेकरसानि रूपाण्यानन्दचैतन्यादिधर्मा अस्याः सन्तीति चिदेकरसरूपिणी । स्वाभिन्नधर्मवतीति यावत् । उक्तंच पंचपादिकायां, 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्त' इति । तथाच शक्यतावच्छेदकभूतसृष्टिकर्तृत्वादिधर्माणां स्वरूपानन्तर्गतत्वात्तदन्तर्गतधर्माणां चात्यन्ताभेदेन शक्यतावच्छेदकत्वाभावाद्भागत्यागलक्षणावश्यकीति भावः । यद्वा केवलं ब्रह्म नेश्वरस्य धर्मीति तयोर्भेदादुक्तः संबन्धो न घटत इत्यत आह । चिदेकरसं चिन्मात्राभिन्नं रूपमस्या एवेत्यर्थः । तयोर्भेदेऽप्यभेदस्यापि सत्त्वाद्भेदसमानाधिकरणाभेदस्यैव तादात्म्यरूपत्वादुक्तसंबन्धो घटत एवेति भावः । ननु सृष्टिकर्तृत्वादिधर्माणां स्वरूपानन्तर्गतत्वेऽपि शक्यतावच्छेदकत्वसंभवात्तद्विशिष्टस्यैव तत्पदेन प्रतिपादने तदभेद एव वाक्यार्थोऽस्तु । वचनबलाद्विशिष्टयोरपि तादात्म्यस्वीकारसंभवात् । 'यो यच्छ्रद्धः स एव स' इत्यादिवचनानामुपास्योपासकत्वादिधर्मविशिष्टयोरेवाभेदप्रतिपादने स्वारस्यात् । एतेनैतदन्यथानुपपत्त्या कल्प्यमानस्य निर्गुणस्यापि निरासाद्विशिष्टकेवलयोः संभवन्नपि संबन्धोऽप्रयोजक एवेत्यत आह–**स्वात्मेति** । स्वस्या आत्मरूपो य आनन्दस्तस्य लवीभूता इन्द्राद्यानन्दबिन्दुपर्यालोचनया सागरायमाणत्वेनालवा अपि दैव्यानन्दसारस्य लवाः संपद्यमानाः ब्रह्मादीनां सृष्टिकर्तृत्वादिधर्मविशिष्टानां ब्रह्मविष्णुरुद्राणामानन्दानां संततयः सम्यक्समूहा यस्याः सा । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः । तैत्तिरीये मानुषानन्दमारभ्योत्तरोत्तराधिक्येन वर्ण्यमानानामानन्दानां मध्ये परिगणितानां प्रजापत्याद्यानन्दानामपि परिच्छिन्नत्वेनापरिच्छिन्नब्रह्मानन्दतोऽल्पत्वेन पुरुषार्थत्वायोगेनापरिच्छिन्नानन्दस्य निर्गुणस्य सिद्धत्वाच्च पुरुषार्थसाधनज्ञानोपक्रमादितात्पर्यनिर्णायकप्रमाणाविरोधाय तत्पदस्य निर्धर्मकात्मलक्षकत्वमेव युक्तमित्याशयः । 'लवो लेशे विलासे चेति' विश्वः ॥ १३१ ॥ ननु शब्दार्थयोस्तादात्म्यस्यैव शक्तिपदार्थत्वान्निर्गुणस्यापि ब्रह्मणः शब्दब्रह्माभिन्नत्वेन किमिति तत्र सत्यादिशब्दानां लक्षणेत्याशङ्क्य वैखर्यात्मकपदानां

विराट्पुरुषेणैव सह तादात्म्येन शुद्धब्रह्मतादात्म्यं नास्त्येवेति समाधित्सया वाचं विभजते। अत्रेदं बोध्यम्–प्रलये सृज्यमानप्राणिकर्मणामपरिपाकदशायां तादृशकर्माभिन्नमायावच्छिन्नं ब्रह्म घनीभूतमित्युच्यते। कालवशात्कर्मणां परिपाके सति विनश्यदवस्थः परिपाकप्रागभावो विचिकीर्षेत्युच्यते। ततः परिपाकक्षणे मायावृत्तिरुत्पद्यते। तादृशं परिपक्वकर्माकारपरिणतमायाविशिष्टं ब्रह्माव्यक्तपदवाच्यम्। अतएव तस्योत्पत्तिरपि स्मर्यते 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे'ति। स एव जगदङ्कुरकन्दरूपत्वात्कारणबिन्दुपदेन व्यवह्रियते। तदुक्तं प्रपञ्चसारे 'विचिकीर्षुर्घनीभूता सा चिदभ्येति बिन्दुता'मिति। अस्माच्च कारणबिन्दोः सकाशात्क्रमेण कार्यबिन्दुस्ततो नादस्ततो बीजमिति त्रयमुत्पन्नम्। तदिदं परसूक्ष्मस्थूलपदैरप्युच्यते। चिदंशश्चिदचिन्मिश्रोऽचिदंशश्चेति तेषां रूपाणि। तदुक्तं रहस्यागमे 'कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा। स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते। स बिन्दुनादबीजत्वभेदेन च निगद्यत' इति। एते च कारणबिन्द्वादयश्चत्वारोऽधिदैवतमव्यक्तेश्वरहिरण्यगर्भविराट्स्वरूपाः, शान्तावामाज्येष्टारौद्रीरूपाः, अम्बिकेच्छाज्ञानक्रियारूपाश्च। अधिभूतं तु कामरूपपूर्णगिरिजालन्धरोड्याणपीठरूपा इति तु नित्याहृदये स्पष्टम्। अध्यात्मं तु कारणबिन्दुः शक्तिपिण्डकुण्डल्यादिशब्दवाच्यो मूलाधारस्थः 'शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमां ज्ञात्वेत्थं न पुनर्विशन्ति जननीगर्भेऽर्भकत्वं नराः' इत्यादिरीत्याचार्यैर्व्यवहृतः सोऽयमविभागावस्थः कारणबिन्दुः। अयमेव च यदा कार्यबिन्द्वादित्रयजननोन्मुखो भिद्यते तदृशायामव्यक्तः शब्दब्रह्माभिधेयो रवस्तत्रोत्पद्यते। तदप्युक्तम् 'बिन्दोस्तस्माद्भिद्यमानादव्यक्तात्मा रवोऽभवत्। स रवः श्रुतिसंपन्नैः शब्दब्रह्मेति गीयत'इति। सोऽयं रवः कारणबिन्दुतादात्म्यापन्नत्वात्सर्वगतोऽपि व्यञ्जकयत्नसंस्कृतपवनवशात्प्राणिनां मूलाधार एवाभिव्यज्यते। तदुक्तं 'देहेऽपि मूलाधारेऽस्मिन्समुदेति समीरणः। विवक्षोरिच्छयोत्थेन प्रयत्नेन सुसंस्कृतः॥ स व्यञ्जयति तत्रैव शब्दब्रह्मापि सर्वग'मिति। तदिदं कारणबिन्द्वात्मकमभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं तदेव च परावागित्युच्यते। अथ तदेव नाभिपर्यन्तमागच्छता तेन पवनेनाभिव्यक्तं विमर्शरूपेण मनसा युक्तं सामान्यस्पन्दप्रकाशरूपकार्यबिन्दुमयं सत्पश्यन्तीवागुच्यते। अथ तदेव शब्दब्रह्म तेनैव वायुना हृदयपर्यन्तमभिव्यज्यमानं निश्चयात्मिकया बुद्ध्या युक्तं विशेषस्पन्दप्रकाशरूपनादमयं सन्मध्यमावागित्युच्यते। अथ तदेव वदनपर्यन्तं तेनैव वायुना कण्ठादिस्थानेष्वभिव्यज्यमानमकारादिवर्णरूपपरं श्रोत्रग्रहणयोग्यस्पष्टतरप्रकाशरूपबीजात्मकं सद्वैखरीवागुच्यते। तदुक्तमाचार्यैः 'मूलाधारात्प्रथममुदितो यश्च भावः पराख्यः पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः। व्यक्ते वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्णाबद्धस्तस्माद्भवति पवने प्रेरिता वर्णसंज्ञा'इति। नित्यातन्त्रेऽपि 'मूलाधारे समुत्पन्नः पराख्यो नादसंभवः। स एवोर्ध्वतयानीतः स्वाधिष्ठाने विजृम्भितः॥ पश्यन्त्याख्यामवाप्नोति तथैवोर्ध्वं शनैःशनैः। अनाहते बुद्धितत्त्वसमेतो मध्यमाभिधः॥ तथा तयोर्ध्वगुम्नः

कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गाररससंपूर्णा जया जालन्धरस्थिता ॥ १३३ ॥

सन्विशुद्धौ कण्ठदेशतः । वैखर्यारूप्य' इत्यादि इत्थं चतुर्विधासु मातृकासु परादित्रयमजानन्तो मनुष्याः स्थूलदृशो वैखरीमेव वाचं मन्वते । तथाच श्रुतिः 'तस्माद्याद्वाचोऽनाप्तं तन्मनुष्या उपजीवन्ती'ति । अनाप्तं अपूर्णं तिसृभिर्विरहितमित्यर्थ इति वेदभाष्ये । श्रुत्यन्तरेऽपि 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ती'ति । स्कान्दे यज्ञवैभवखण्डेऽपि 'अपदं पदमापन्नं पदं चाप्यपदं भवेत् । पदापदविभागं च यः पश्यति स पश्यती'ति । अपदं गतिरहितं निःस्पन्दं शब्दब्रह्मैव परादिपदचतुष्टयं जातं तदिदं पदचतुष्टयमेव ज्ञातं सदपदं ब्रह्मैव भवतीति तदर्थः । एवं श्रुतिस्मृतिभ्यां तदिति पदस्य चातुर्विध्यात् 'ते विभक्त्यन्ताः पद'मिति गौतमसूत्रेण, 'सुप्तिङन्तं पद'मिति पाणिनिसूत्रेण च प्रतिपादितपदलक्षणान्तर्गतसुप्रत्ययादेरपि चातुर्विध्यात्परात्मकतत्पदस्यापि त्रिगुणाव्यक्तमात्रतादात्म्यवत्त्वेन ततोऽपि परतरनिर्गुणब्रह्मतादात्म्याभावेन वैखर्यात्मकतत्पदस्य कैमुतिकन्यायेन दूरापास्तं तत्तादात्म्यमिति शब्दार्थयोस्तादात्म्यमेव शक्तिरिति पक्षेऽपि तत्पदस्य केवले लक्षणैव स्वीकार्येति भावः । केवलं वेति मातृकाभेदेषु तिसृभ्यः परत्वात्परा । त्रिपुरासिद्धान्ते तु प्रकारान्तरैरपि निरुक्ता 'श्रीपरानन्दनाथस्य प्रसन्नत्वात्परेति सा । परानन्दाभिधे तन्त्रे प्रसिद्धत्वाच्च सा परा । प्रासादरूपिणी चेति परा सा शांभवीपरे'ति । प्रतिकूलं स्वात्माभिमुखमञ्चतीति प्रतीची साच सा चिती च प्रत्यक्चिती अव्यक्तसंज्ञं ब्रह्म सैव रूपं यस्यास्तथा । चिनोतेः क्तिजन्तात् 'कृदिकारादि'ति ङीप् । पश्यतीति पश्यन्ती । अस्या एवोत्तीर्णेत्यपि संज्ञा । उक्तंच सौभाग्यसुधोदये 'पश्यति सर्वं स्वात्मनि करणानां सरणिमपि यदुत्तीर्णा । तेनेयं पश्यन्तीत्युत्तीर्णेत्यप्युदीर्यते माते'ति । परा उत्कृष्टा चासौ देवता च परदेवता । उपास्येश्वरस्वरूपेत्यर्थः । मध्ये स्थिता मध्यमा । तदुक्तं 'पश्यन्तीव न केवलमुत्तीर्णा नापि वैखरीव बहिः । स्फुटतरनिखिलावयवा वाग्रूपा मध्यमा तयोरस्मा'दिति । विशेषेण खरः कठिनस्तस्येयं वैखरी सैव रूपं यस्याः । घनभावमापन्नेति यावत् । वै निश्चयेन खं कर्णविवरं राति गच्छतीति व्युत्पत्तिः सौभाग्यसुधोदये कथिता 'प्राणेन विखराख्येन प्रेरिता वैखरी पुन'रिति योगशास्त्रवचनाद्विखरवायुनेति वा । भक्तानां मानसे चित्ते श्लेषभित्तिकाभेदाध्यवसायेन सरोविशेषे हंसीव हंसिका । परैरज्ञातत्वात्कप्रत्ययः ॥ १३२ ॥ कामेश्वरस्य शिवकामस्य प्राणनाडी जीवनाडीव । तदुक्तमाचार्यभगवत्पादैः 'करालं यत्क्ष्वेलं कवलितवतः कालकलना न शंभोस्तन्मूलं तव जननि ताटङ्कमहिमे'ति । कृते सुकृतदुष्कृते जानातीति कृतज्ञा । 'सूर्यः सोमो यमः कालो महाभूतानि पञ्च च । एते शुभाशुभस्येह कर्मणो नव साक्षिण' इत्युक्तनवकाभिज्ञेति वा । कृतस्योपकारस्य ज्ञानेन प्रत्युपकर्त्री वा । कृतवत् ज्ञा ज्ञानं

ओड्याणपीठनिलया बिन्दुमण्डलवासिनी।
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥ १३४ ॥

यस्या इति वा। कृतादियुगेषु धर्मस्येव ज्ञानस्याप्युत्तरोत्तरं ह्रासात्कृते यथा पूर्णं ज्ञानं तादृशज्ञानवतीत्यर्थः। यद्वा द्यूतशास्त्रे कृतत्रेताद्वापरकलिसंज्ञानि चत्वारि द्यूतानि प्रसिद्धानि। तानि चतुस्त्रिद्व्येकाङ्कघटितान्यपि दशषट्त्र्येकरूपाणि। पूर्वपूर्वद्यूते उत्तरोत्तरद्यूतानामन्तर्भावात्। तथाच श्रूयते 'ते वा एते पञ्चान्ये पञ्चान्ये दश संतस्तत्कृत'मिति दशानां कृतसंज्ञा। अतएव कृतद्यूतं जितता त्रेतादिद्यूतत्रयमपि जितं भवतीति द्यूतशास्त्रमर्यादापि। श्रूयते च 'कृतायविजितायाधरेऽयाः संयन्ती'ति। अयो द्यूतक्रीडा कृतरूपोऽयो विजितो येन तस्मै अधरे तदधस्तना अयास्त्रेतादिक्रीडाः संयन्ति उपनमन्ते जिता भवन्तीति तदर्थात्। तेन कृतं यथा सर्वव्यापकमेवं सर्वविषयकं ज्ञानं यस्या इत्यर्थः। कृतं जानातीति वा। शिवेन सह द्यूतक्रीडायामवश्यं कृतज्ञत्वाद्देव्या एव जय इति ध्वन्यम्। कामेन मन्मथेन पूजितोपासिता। अतएव वारुणोपनिषदि 'पुत्रो निर्ऋत्या वैदेह अचेता यश्च चेतनः। स तं मणिमविन्द'दिति श्रूयते। लक्ष्म्याः पुत्रोऽनङ्गो विद्यारत्नं प्राप्तवानित्यर्थः। शृङ्गाराख्यरसेन सम्यक् पूर्णा। अथवा उत्तरत्र जालंधरोड्याणपीठयोः परामर्शदर्शनादनयोर्नाम्नोः कामरूपपूर्णगिरिपरत्वं नामैकदेशन्यायेनास्येयम्। सम्यक् पूर्णे आस्ते इति संपूर्णास्। आस्तेः क्विपि रुत्वयत्वयलोपाः। शृङ्गपदेन द्विसंख्या। अपरपदेन दलम्। रसाः षट्। द्विदलषट्कं द्वादशदलं। अनाहतचक्रमिति यावत्। अधिभूतं प्रसिद्धस्य पीठचतुष्कस्याध्यात्मं मूलाधारानाहतविशुद्ध्याज्ञास्थिते तन्त्रेषु कथनाद्वादशदलेति पूर्णगिरिविशेषणम्। यद्वा शृङ्गं प्रधानभूतं अररं कपाटं आवरकाविद्येति यावत् यस्याः सा शृङ्गारा। संपूर्णेन ब्रह्मणा सहिता ससंपूर्णा। उभयोः कर्मधारये शबलब्रह्मशुद्धब्रह्मोभयवतीति यावत्। जयस्वरूपत्वाज्जया। पाद्मे 'जया वराहशैले त्वि'ति परिगणिता। जालन्धरे पीठविशेषे स्थिता। पाद्मे 'जालन्धरे विष्णुमुखी'ति प्रतिपादितविष्णुमुख्याख्या ॥ १३३ ॥

अथ नामपरिभाषामण्डले चतुश्चत्वारिंशत्पदानि विभजते ॥ **द्वेद्वे चेद्वेद्वेभवदोर्हदभुविलेशशीलजलमोहैः। द्व्यर्धचतुर्भवगाः स्मो भुवि जलशोभा भगोलः खे ॥१७॥** अत्र तृतीयं द्वे इति पदं षडक्षरनामद्वयपरम्। इतराणि त्वष्टाक्षरपराणि। चतुःपदं चतुरक्षरकनामचतुष्टयपरम् ॥ १७ ॥

ओड्याणाख्यं पीठमेव निलयो वासस्थानं यस्याः। बिन्दुरेव मण्डलं सर्वानन्दमयात्मकं चक्रवालं तत्र वसति। बिन्दुः शुक्रं तस्य मण्डलं ब्रह्मरन्ध्रमित्यन्ये। 'सहस्रारे पद्मे सह रहसि पत्या विहरसे' इत्याचार्योक्तेः। रहसि विविक्ते क्रियमाणो यागश्चिदग्नौ अनुच्चकुण्डलिन्यधिष्ठिते पुण्यादिहोमाष्टकरूपो रहोयागस्तस्य क्रमेण प्रयोगेणाराध्या। 'यजदेवपूजासंगतिकरणदानेष्वि'ति धातुपाठादेकान्तसंगतिरेव वा रहोयागः तत्र क्रमेण पादवि-

सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥ १३५ ॥
नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी ।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी ॥ १३६ ॥

क्षेत्रेणाराध्या प्राप्या । यदाहापस्तम्बः 'न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य । न भोजनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥ एकान्तशीलस्य दृढव्रतस्य मोक्षो[1] भवेत्प्रीतिनिवर्तकस्य । अध्यात्मयोगे निरतस्य सम्यङ्मोक्षो[2] भवेन्नित्यमहिंसकस्ये'ति । अरुणोपनिषदपि 'यदि प्रविशेत् मिथो चरित्वा प्रविशेदि'ति । श्रीविद्योपासनामार्गे रहःसंपाद्यैव प्रविशेदिति तदर्थः । 'मिथोऽन्योन्यं रहस्यपी'ति कोशात् 'प्रकाशामर्शहस्ताभ्यामवलम्ब्योन्मनी स्रुचम् । धर्माधर्मकलाल्लेहं पूर्णवह्नौ जुहोम्यह'मिति । मन्त्रोक्तार्थविभावनं 'अन्तर्निरन्तरनिरिन्धनमेधमाने मोहान्धकारपरिपन्थिनि संविदग्नौ । कस्मिंश्चिदद्भुतमरीचिविकासभूमौ विश्वं जुहोमि वसुधादिशि वा वसान'मिति मन्त्रार्थविभावनं च रहस्तर्पणं तेन तर्पिता ॥ १३४ ॥ तादृशयागतर्पणाभ्यां सद्यस्तदात्व एव प्रसीदतीति तथा । विश्वस्य द्रष्ट्री साक्षादव्यवधानेन स्वरूपात्मकबोधेनेति विश्वसाक्षिणी । 'साक्षाद्द्रष्टरि संज्ञाया'मितीन् । सर्वसाक्षिण्याः साक्ष्यन्तरायोगात्साक्षिवर्जिता । षडवयवकान्यङ्गानि हृदयशिरःशिखानेत्रकवचास्त्राणि तेषां देवताभिः शक्तिभिर्युक्ता आवृता । ज्ञानार्णवादिषु 'अथाङ्गावरणं कुर्याच्छ्रीविद्यामनुसंभवम् । षडङ्गावरणाद्बाह्यसमीपे क्रमतोऽर्चयेत् । परिवारार्चनं पश्चादादावङ्गावृतिः प्रिये' इत्यादिव्यवहारदर्शनेन तासामप्यावरणदेवतात्वात्, ताभिः सहैव नवावरणसंख्यापूर्तेः संभवाच्च । षण्णामङ्गानामधिष्ठात्री देवता महेश्वर एव । तेन युक्ता वा । उक्तंच देवीभागवते 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तता चेति विधेर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्ये'ति । शिक्षाकल्पादिषडङ्गाभिमानिदेवतासाहित्याच्छ्रुतिस्वरूपेति वार्थः । संधिविग्रहयानासनद्वैधीभवसमाश्रयाणां कामन्दकोक्तानामैश्वर्यधर्मयशःश्रीज्ञानवैराग्याणां पुराणप्रसिद्धानां वा षण्णां गुणानां समूहः षाड्गुण्यं तेन परितः पूरिता ॥ १३५ ॥ नित्यं दयया क्लिन्ना सार्द्रा । तृतीयातिथिनित्या नित्यक्लिन्नेत्युच्यते । इयं गरुडपुराणे 'नित्यक्लिन्नामथो वक्ष्ये त्रिपुरां भुक्तिमुक्तिदा'मित्यादिना प्रपञ्चिता तद्रूपा वा । निर्गतोपमा सादृश्यं यस्याः सा निरुपमा । 'न तस्य प्रतिमा अस्ती'ति श्रुतेः । निर्गतं बाणं शरीरं यस्मिंस्तदशरीरम् । 'एतद्बाणमवष्टभ्ये'ति श्रुतौ वेदान्तिभिर्गीर्वाणपदे च मीमांसकैर्बाणशब्दस्य शरीरपरत्वेन व्याख्यानात् । 'शरीरे बाणमुद्गला'वित्यमरशेषाच्च । अशरीरं इयत्तानवच्छिन्नं सुखं मोक्षाख्यं ददातीति तथा । कौमें हिमवन्तंप्रति देवीवाक्यं 'मामनादृत्य परमं निर्वाणममलं पदम् । प्राप्यते नहि शैलेन्द्र ततो मां शरणं व्रज ॥ एकत्वेन पृथक्त्वेन तथाचोभयतोऽपि वा । मामुपास्य महाराज ततो

---

१ पञ्चेन्द्रियप्रीति. २ विद्यारतमानसस्य. ३ मोक्षो ध्रुवो नित्यं.

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥ १३७ ॥

यास्यसि तत्पद'मिति । षोडशैव षोडशिकाः नित्याश्च ताः षोड़शिकाश्च कामेश्वर्यादित्रिपुरसुन्दर्यन्तास्तासां रूपाणि यस्याः सा । उक्तं च तन्त्रराजे 'आद्यायां ललितायाः स्युरन्याः पञ्चदशाङ्गगाः । ललिताङ्गित्वरूपेण सर्वासामात्मविग्रहे'ति । षोडश्येव षोडशिकेति वा । नित्यो विकल्परहित आसमन्तात्षोडशिको ग्रहयागाभ्यासविशेषो येषु क्रतुषु तैरासमन्ताद्रूप्यते प्रीयत इति वा । अतिरात्रे विकल्पितस्यापि षोडशीग्रहस्य 'उत्तरेहन् द्विरात्रस्य गृह्यते' इत्यादिवचनैरुत्तरक्रतुषु नित्यत्वात् । उक्तंच शक्तिरहस्ये 'कोटिभिर्वाजपेयानां यथा षोडशकोटिभिः । प्रीयतेऽम्बा तथैकेन षोडश्युच्चारणेन मे'ति । श्रीर्विषं कण्ठे यस्य सः श्रीकण्ठः शिवस्तस्यार्धं शरीरमस्याः । श्रीकण्ठेनार्धशरीरवतीति वा । तदभिन्नार्धशरीरशालिनीति यावत् । अतएवैकस्यैव द्वयात्मकत्वं बृहदारण्यके श्रूयते 'आत्मैवेदमग्र आसी'दिति प्रक्रम्य 'स इममेवात्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतामि'ति । अथवा श्रीकण्ठवदर्धे शरीरे अस्याः श्रीकण्ठस्य यथा किंचिन्नीलं किंचिच्छुक्लं शरीरं तद्वदुभयरूपेति यावत् । तदुक्तं वायुपुराणे 'तत्र या सा महाभागा शंकरस्यार्धकायिनी । कायार्धं दक्षिणं तस्याः शुक्लं वामं तथा सितम् ॥ आत्मानं विभजस्वेति प्रोक्ता देवी स्वयंभुवा । तदैव द्विविधा भूता गौरी कालीति सा द्विजा' इति । यद्वा 'अः श्रीकण्ठः सुरेशश्च ललाटं केशवोऽमृते'ति मातृकाकोशाच्छ्रीकण्ठोऽकारः स एवार्धं शरीरमस्या वाग्रूपाया इत्यर्थः । तथाच श्रूयते 'अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवती'ति । अकाररूपा पराख्या प्रथमा वागेव वैखर्यात्मिका जातेति फलितार्थः । उक्तंच सूतसंहितायां 'वागुद्भूता पराशक्तिर्या चिद्रूपा पराभिधा । वन्दे तामनिशं भक्त्या श्रीकण्ठार्धशरीरिणी'मिति । यद्वा एकार्धरूपाया देव्या अर्धान्तरः श्रीकण्ठः परिपूर्तिकर इति यावत् । तदपि तत्रैवोक्तम् 'इच्छासंज्ञा च या शक्तिः परिपूर्णा शिवोदरे'ति । शैवे मातृकान्यासेऽर्धं पूर्णोदर्यादिशक्तिभिरर्धं श्रीकण्ठादिशिवैः पूर्यत इति फलितार्थः । यद्वा अकारस्य यल्लेखनदशायां कामकलासमानजातीयमर्धं तदभिन्नशरीरवतीति ॥ १३६ ॥ प्रभा अणिमाद्या आवरणदेवताः । 'अणिमादिभिरावृतां मयूखै'रिति वचनात् तद्वती । ताभिरावृता किरणास्तावद्गुणस्वरूपा न पुनर्द्रव्यान्तराणीति प्राचां पक्षः 'किरणा गुणा न दव्वं तेषु पयासो गुणो न सो दव्वो' इति धर्मसंग्रहिण्यादौ ग्रन्थे हरिभद्रादिभिर्जैनसूरिभिरुद्दङ्कितः । 'किरणा गुणा न द्रव्यं तेषु प्रकाशो गुणो न स द्रव्य' मिति तु तच्छाया । ततश्च गुणगुणिनोरभेदादाह । प्रभारूपा अणिमाद्या देवताः स्वरूपमेव यस्याः । 'मनोमयो भारूप'इति श्रुतेः । सर्वैरहमिति वेद्यत्वात्प्रसिद्धा । तथाच देवीभागवते 'तामहंप्रत्ययव्याजात्सर्वे जानन्ति जन्तव' इति । तत्रैव प्रथमस्कन्धारम्भे 'सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमही'ति । परमा उत्कृष्टा च सेश्वरी स्वामिनी च । मूलस्य श्रीविद्यामन्त्रस्य प्रकृतिः कारणभूतप्रकाशविमर्शाख्या-

क्षरद्वयरूपा। सांख्यमतप्रसिद्धा वा मूलप्रकृतिः। यदाहुः 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष' इति। मृगेन्द्रसंहितायां तु 'महदादिसप्तकरूपसुषुम्णावेष्टिता कुण्डलिन्येवाष्टप्रकृतिरूपा मूलप्रकृतिरुच्यत'इत्युक्तम्। तेन तद्रूपा वा। अथवा पृथिव्यादीनामाकाशान्तानां मध्ये पूर्वपूर्वस्य विकृतिभूतस्योत्तरोत्तरं भूतं प्रकृतिः। आकाशस्य तु ब्रह्मैव प्रकृतिः। 'आत्मन आकाशः संभूत' इति श्रुतेः। तस्य तु न प्रकृत्यन्तरमतो मूलस्थानीया प्रथमा प्रकृतिरित्यर्थः। अतएव पञ्चरात्रागमे शिववाक्यम् 'प्रादुरासीज्जगन्माता वेदमाता सरस्वती। यस्या न प्रकृतिः सेयं मूलप्रकृतिसंज्ञिता। तस्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभि'रिति। अत्रेदं बोध्यम्—नियतकालपरिपाकानां हि कर्मणां मध्ये परिपक्वानामुपभोगेन क्षयादितरेषां च पक्वानां भोगसंभवेन तदर्थायाः सृष्टेरनुपयोगात्प्राकृतप्रलयो भवति। तदा प्रस्तसमस्तप्रपञ्चा माया स्वप्रतिष्ठे परमशिवे निष्कले विलीना सती यावदवशिष्टकर्मपरिपाकं तथैव तिष्ठति। तदुक्तं 'प्रलये व्याप्यते तस्यां चराचरमिदं जग'दिति। विष्णुपुराणेऽपि 'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥ वायुः प्रलीयते व्योम्नि तदव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयत'इति। अव्यक्तं माया। तस्याश्च लयो नाम मुक्ताविव नात्यन्तिको नाशः किंतु सुषुप्तावन्तःकरणवृत्तीनामिव मायावृत्तीनामनुदयादत्यन्तनिर्विकल्पात्मनः परमात्मप्रकाशस्य बलाद्भानसत्त्वेऽप्यप्रतिभातप्रायत्वम्। सर्वथा भानाभावे वस्तुन एवाभावापत्तेः इष्टापत्तावुत्तरत्र सर्गानुपपत्तेः। अवशिष्टैः प्राणिकर्मभिश्च तस्यां मायायां विलीयैव क्रमेण प्राप्तपरिपाकैः स्वफलप्रदानाय परशिवस्य सिसृक्षात्मिका मायावृत्तिरुत्पाद्यते। सैषा मायावस्था ईक्षणकामतपोविचिकीर्षादिशब्दैरुच्यते। 'स ईक्षत लोकान्नु सृजा' इत्यैतरेये। 'तदैक्षत बहु स्यां प्रजायेये'ति छान्दोग्ये। 'सोऽकामयत बहु स्यां प्रजायेये'ति तैत्तिरीये। 'तपसा चीयते ब्रह्मे'ति मुण्डके। तादृशवृत्तिविषयतया सविकल्पकत्वेन मायाया यत्स्फुरणं सोऽयमबुद्धिपूर्वकस्तमसः सर्गः प्रथमः। 'नासदासीन्नो सदासी'दित्यारभ्य 'तम आसीत्तमसा गूळ्हमग्र'इत्यन्ता श्रुतिः 'तस्माद्व्यक्तमुत्पन्न'मित्यादिस्मृतिरप्येतत्परैव। एतस्मादविभागापन्नगुणत्रयादव्यक्ततमःपदवाच्यादन्तर्विभागस्थगुणत्रयात्मकस्येषदव्यक्तस्य महतः सर्गो द्वितीयः। तदुक्तं 'अव्यक्तादन्तरुदितत्रिभेदग्रहणात्मकम्। महन्नाम भवेत्तत्त्वं महतोऽहंकृतिस्त्थे'ति। तस्माद्बहिर्विभागगुणत्रयावस्थस्याहंकारस्य सर्गस्तृतीयः। वैकारिकस्तैजसश्च भूतादिश्चैव तामसः। त्रिविधोऽयमहंकारो महत्तत्त्वादजायते'ति वचनात्। अत्र भूतादेस्तामसत्वेन विशेषणादन्ययोः सात्त्विकराजसत्वे सूचिते। तत्र भूतादिनामकात्तामसादहंकाराद्रजसावष्टब्धात्पञ्चतन्मात्राणां सर्गश्चतुर्थः। वैकारिकनाम्नः सात्त्विकादहंकाराद्रजोवष्टब्धादेकादशेन्द्रियगणस्य सर्गः पञ्चमः। राजसात्तैजसादहंकारादुभयाधिष्ठातृदिग्वातार्कप्रचेतोश्व्यादिदेवतासर्गः षष्ठः। यदाहुः सांख्याः 'सात्त्विक एकादशकः प्रवर्तते वैकृतादहं-

कारात्। भूतादेस्तामसतस्तन्मात्रं तैजसादुभय'मिति। शैवमते तु सात्त्विकादहमो मनः, राजसादहमो दशेन्द्रियाणीति विशेषः। यदाहुः शैवाः 'सात्त्विकराजसतामसभेदेन स जायते पुनस्त्रेधा। स च तैजसवैकारिकभूतादिकनामभिः समुल्लसति॥ तैजसतस्तत्र मनो वैकारिकतो भवन्ति चाक्षाणि। भूतादेस्तन्मात्राण्येषां सर्गोऽयमेतस्मा'दिति। एते च षट्सर्गाः प्राकृताः। वृक्षादिरूर्ध्वस्रोतोरूपः, पश्वादिस्तिर्यक्स्रोतोरूपो भूतप्रेतादिरर्वाक्स्रोत इति त्रयो वैकृताः। प्राकृतवैकृतात्मक एकः कौमारसर्ग इति। तदुक्तं विष्णुभागवते 'आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः। द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः॥ भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः॥ वैकारिको देवसर्गः पञ्चमो यन्मयं मनः। षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः॥ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु' इत्यादि। अत्राव्यक्ताख्यतमःसर्गस्य षष्ठत्वोक्तिः पाठक्रमानुसारेण। आर्थक्रमात्तु तस्य प्रथमत्वमेव। अस्मिन्नेवार्थे वायुपुराणादीन्यप्युदाहार्याणि। एवं चाव्यक्तादिसर्गाणां मध्ये उत्तरोत्तरस्य पूर्वपूर्व प्रकृतिः अव्यक्तस्य तु ब्रह्मैव प्रकृतिरिति सर्वसृष्टीनां मूलभूतत्वात्तस्य मूलान्तराभावाच्च मूलप्रकृतिरित्यर्थः। अतएव श्रूयते 'इन्द्रियेभ्यः परा ह्यर्था' इत्यारभ्य 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गति'रिति। अथवा मूकारः पञ्चसंख्यानां तन्मात्राणां लकारस्त्वव्यक्तमहददंकाराणां त्रयाणां बोधकः। तेनाष्टविधा प्रकृतिरित्यर्थः। तथाच समाससूत्रं 'अष्टौ प्रकृतय' इति। अथ क्रमेण सर्वेस्वरूपैः स्तोतुमुपक्रमते। अव्यक्ता प्राथमिकमायास्फूर्तिरूपा। सांख्यमते प्रधानप्रकृत्यादिपदवाच्यमव्यक्तं तद्रूपा वा। तदुक्तं सांख्यसप्तत्यां 'सूक्ष्ममलिङ्गमचेतनमनादिनिधनं तथा प्रसवधर्मि। निरवयवमेकमेव हि साधारणमेतदव्यक्त'मिति। पञ्चशिखाचार्यैरपि 'अनादिमध्यं महतः परं ध्रुवं प्रधानमव्यक्तमुशन्ति सूरय' इति। तच्च गुणत्रयसमष्टिरूपमेवेति 'सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वादि'ति सांख्यप्रपञ्चनसूत्रे स्पष्टम्। ब्रह्मैव वाऽव्यक्तपदेनोच्यते। 'तदव्यक्तमाह ही'त्यधिकरणे 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वे'त्यादिश्रुतिभिस्तथा निर्णयात्। विष्णुस्वरूपेति वार्थः। 'प्रधानमव्ययं योनिरव्यक्तं प्रकृतिस्तमः। विष्णोरेतानि नामानि नित्यं प्रभवधर्मिण' इति लैङ्गात्। व्यक्तं महत्तत्त्वं पूर्वस्मादभिव्यक्तत्वान्महत्वाच्च। आसमन्ताद्व्यक्त आव्यक्तस्तज्जन्योऽहंकारः तदुभयस्वरूपिणीत्येकं पदम्। व्यक्तेत्यस्य भिन्नपदत्वं स्वीकृत्योत्तरत्र ब्रह्मजननीति नामद्वयस्यैक्यमपि कर्तुं युक्तं पौनरुक्त्यादिदोषाप्रसरात्। प्रत्युत वकारवकारादिनामप्रायपाठानुगुण्याच्च। अस्मिन्पक्षे व्यक्तं स्वरूपमहन्तात्मकमस्या इति योज्यम्। पराहन्तायास्त्रिपुरसुन्दरीरूपत्वात् अहंकाराख्यतत्त्वे तदभिव्यक्तेः। व्यक्तमव्यक्तं चेति स्वरूपे अस्या इति वा। भूतभावविकारसाहित्यराहित्यवतीत्यर्थः। तदप्युक्तं लैङ्गे 'भूतभावविकारेण द्वितीयेन सदुच्यते। व्यक्तं तेन विहीनत्वादव्यक्तमसदित्यपी'ति। क्षराक्षररूपेति वार्थः 'उक्तमक्षरमव्यक्तं व्यक्तं क्षरमुदाहृत'मिति मत्स्यपुराणात्। समष्टिव्यष्टिरूपेति वा। 'समष्टि-

व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी ।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥ १३८ ॥

विदुरव्यक्तं व्यक्तं चष्टिं मुनीश्वरा'इति नृसिंहपुराणात् । त्रयोविंशतितत्त्वप्रकृतिरूपा वा । 'त्रयोविंशतितत्त्वानि व्यक्तशब्देन सूरयः । वदन्त्यव्यक्तशब्देन प्रकृतिं च परां तथे'ति ब्रह्माण्डपुराणात् । अथवा व्यक्ताव्यक्ते च व्यक्ताव्यक्तं चेति पुनरेकशेषान्तरेण व्यक्तमव्यक्तं व्यक्ताव्यक्तं चेति त्रिविधलिङ्गरूपेत्यर्थः । तल्लक्षणानि ब्रह्मवैवर्तपुराणे 'स्वायंभुवं बाणलिङ्गं शैललिङ्गमिति त्रिधा । कीर्तितं व्यक्तमव्यक्तं व्यक्ताव्यक्तमिति क्रमात् ॥ व्यक्तं भुक्तिप्रदं मुक्तिप्रदमव्यक्तमुच्यते । भुक्तिमुक्तिप्रदं लिङ्गं व्यक्ताव्यक्तं प्रचक्षते ॥ द्वित्रिस्तुलां समारूढं वृद्धिमेति न हीयते । तद्बाणलिङ्गमुदितं शेषं शैलं विदुर्बुधा' इति । अथवा पञ्चमलेषु सुव्यक्तं पाशबद्धेष्वव्यक्तं स्वरूपमस्याः । तदुक्तं शक्तिरहस्ये शक्तिपातशब्दार्थनिरूपणावसरे 'व्यापिनी परमा शक्तिः पतितेत्युच्यते कथम् । उर्ध्वादधोगतिः पातो मूर्तस्यासर्वगस्य च ॥ सत्यं सा व्यापिनी नित्या सहजा शिववत्स्थिता । किं त्वियं मलकर्मादिपाशबद्धेषु संवृता ॥ पञ्चदोषेषु सुव्यक्ता पतितेत्युपचर्यत'इति ॥ १३७ ॥ अहंकारत्रयकार्यरूपावशिष्टप्राकृतसर्गत्रितयात्मकतया परिणामाद्व्यापिनी । सर्वजगद्व्यापिका वा ॥

इति भास्कररायेण कृते सौभाग्यभास्करे । चतुर्थशतकेनाभूत्पञ्चमी ज्वालिनी कला ॥ ४०० ॥ इति श्रीमल्ललितासहस्रनामभाष्ये चतुर्थशतकं नाम पञ्चमी कला ॥ ५ ॥

प्राकृता वैकृताः सर्गाः कौमारसर्गश्चेत्येवं विविधा आकारा यस्याः सा । 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत'इति श्रुतौ प्रसिद्धे विद्याविद्ये । विद्या स्वात्मरूपं ज्ञानम् । अविद्या चरमवृत्तिरूपं ज्ञानम् । तदुभयं स्वरूपमस्याः । उक्तंच बृहन्नारदीये 'तस्य शक्तिः परा विष्णोर्जगत्कार्यपरिक्षमा । भावाभावस्वरूपा सा विद्याविद्येति गीयत' इति । देवीभागवतेऽपि 'ब्रह्मैव सातिदुष्प्रापा विद्याविद्यास्वरूपिणी'ति । तत्रैव स्थलान्तरे 'विद्याविद्येति देव्या द्वे रूपे जानीहि पार्थिव । एकया मुच्यते जन्तुरन्यया बध्यते पुन'रिति । यद्वा विद्यैव चरमवृत्तिरूपं ज्ञानम् । अविद्या भेदभ्रान्तिरूपं ज्ञानम् । स्वः परब्रह्मात्मकं ज्ञानम् । स्वपदस्यात्मवाचित्वात् । 'स्वो ज्ञातावात्मनी'ति कोशात् । एतत्त्रयं रूपमस्याः । उक्तंच लैङ्गे 'भ्रान्तिर्विद्या परं चेति शिवरूपमिदं त्रयम् । अर्थेषु भिन्नरूपेषु विज्ञानं भ्रान्तिरुच्यते ॥ आत्माकारेण संवित्तिर्बुधैर्विद्येति कथ्यते । विकल्परहितं तत्त्वं परमित्यभिधीयत'इति । महांश्चासौ कामेशश्चेति वा महाकामो महेच्छो महाशयश्चासौ वीशश्चेति वा महाकामेशस्तस्य नयने एव कुमुदे कैरवे रक्तपङ्कजे वा तयोराह्लादे विकासे सुखातिशयकृतनिमीलने वा कौमुदी चन्द्रिकेव । कार्तिकपूर्णिमेवेति वा । 'कुमुदं कैरवे रक्तपङ्कजे कुमुदः कपौ । कौमुदः कार्तिके मासि चन्द्रिकायां च कौमुदी'ति यादवः । अथवा । कुत्सिता नश्वरत्वाधिकदुःखसंमिश्रत्वादि-

भक्तहार्दतमोभेदभानुमद्भानुसंततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ॥ १३९ ॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशाऽमनोवाचामगोचरा ॥ १४० ॥

हेतुभिर्निन्द्या मुत्प्रीतिर्येषां ते कुमुदो वैषयिकाः । अतएव तेषामनुकम्प्यत्वाभिप्रायेण 'कृपणे कुमुदे कुमुदि'ति शाश्वतः । 'स्यात्कुमुत्कृपणेऽन्यवदि'ति विश्वश्च । तेषामासमन्ताद्याप्तो ह्लादः सुखातिशयो मोक्षरूप इति यावत् । सच महाकामेशंप्रति नयनेन प्रापणेनेति तृतीयासमासः । शिवप्रापणजन्यस्य वैषयिकनिष्टस्य सुखस्य कौमुदी प्रकाशिका ॥ १३८ ॥ भक्तनां हृदि भावनीयानि तमांस्यावरणशक्तिमन्त्यज्ञानानि तेषां भेदे नाशने भानुमतः सूर्यस्य भानुसंततिः किरणपरम्परेव । 'हृदयस्य हृल्लेखयदण्लासेष्वि'ति हृदादेशः । 'तत्र भवः' इत्यण् । शिवो दूतोऽस्यं यथा भवति तथा संदेशप्रापको यस्याः सा शिवदूती । 'दूञ् उपतापे' । यथोक्तवदकृत्वा दूतोऽप्युपतापकः । 'दूती संचारिके समे' इति कोशे संचारशब्दोऽपि संदेशसंचारणपरः । दुनोतेर्निष्ठायां 'दुतनिभ्यां दीर्घश्चे'ति दीर्घः । 'क्तादल्पाख्यायां'मिति ङीष् । बहुव्रीहेः क्तान्तादद न्तादल्पत्वे द्योत्ये स्त्रियां ङीषिति तदर्थः । उक्तंच मार्कण्डेयपुराणे 'यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् । शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागते'ति । एतद्व्याख्याकारास्तु शिवेन संदेशं प्रापयतीति शिवदूती । गौरादेराकृतिगणत्वान्ङीष् । बहुव्रीहौ तु टाप् स्यादित्याहुस्तच्चिन्त्यम् । इयं च पुष्कराख्ये तीर्थे स्थिता । तदुक्तं पद्मपुराणे पुष्करखण्डे 'अथ तेऽन्याः प्रवक्ष्यामि पुष्करे या व्यवस्थिता'इति प्रकृत्य 'शिवदूती तथा वेदी क्षेमा क्षेमंकरी सदे'त्यादि । शिवेनाराध्योपास्या । तदुक्तं ब्रह्माण्डपुराणे 'शिवोऽपि यां समाराध्य ध्यानयोगबलेन च । ईश्वरः सर्वसिद्धीनामधीनारीश्वरोऽभवदि'ति । शंकरोपासितचतुष्कूटविद्यास्वरूपा वा । शिव एव मूर्तिः स्वरूपं यस्याः शिवशक्त्योरभेदात् । तदुक्तं 'एको रुद्रः सर्वभूतेषु गूढो माया रुद्रः सकलो निष्कलश्च । स एव देवी न च तद्विभिन्ना ह्येतज्ज्ञात्वैवामृतत्वं व्रजन्ती'ति । शिवा मङ्गलमयी मूर्तिर्यस्या इति वा । शिवो मोक्ष एव रूपं यस्या वा । मोक्षस्यात्ममात्रस्वरूपत्वात् । तदुक्तं सौरसंहितायां चतुर्दशाध्याये 'अथ मुक्तेः स्वरूपं ते प्रवक्ष्यामि समासत' इत्यारभ्य 'तस्मादात्मस्वरूपैव परा मुक्तिरविद्यया । प्रतिबद्धा विशुद्धस्य विद्यया व्यज्यतेऽनघे'त्यन्तम् । भक्तं शिवमेव करोति अविद्यापाशनिरासेन मुक्ताप्राप्यं ब्रह्म करोतीवेत्युपचारात् । मङ्गलं करोतीति वा शिवंकरी । 'कृञो हेतुताच्छील्यानुलोम्येष्वि'ति टः । 'शिवशमरिष्टस्य करे' इति मुम् ॥ १३९ ॥ शिवस्य प्रिया । शिवः प्रियो यस्या इति वा । शिवात्परा शिवस्य शक्त्यधीनात्मलाभकत्वात् । शिवः परो यस्या इति वा । शिवप्रतिपादकत्वाद्वा शिवपरा । अयं शिवशब्द एतत्पर इत्यत्रैवमेव व्याख्यादर्शनात् । शिष्टान्यनुशिष्टानि विहितकर्माणि इष्टानि इच्छाविषयाः प्रियाणि यस्याः सा शिष्टेष्टा । 'इषु इच्छाया'मिति धातोः कर्मणि निष्ठायामिष्टमिति

चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका।

रूपम्। यद्वा शिष्टैर्विहितकर्मभिरिष्टा पूजिता। यजतेर्निष्ठायां संप्रसारणे 'व्रश्चे'ति षत्वे च रूपम्। 'स्वस्ववर्णाश्रमैर्धर्मैः सम्यग्भगवदर्पितैः'। यत्पूजनं न तद्गन्धमाल्यादीनां समर्पणे'रिति वचनात्। 'आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युत'इति महाभारतबृहन्नारदीययोर्वचनाच्च। यद्वा 'न पाणिपादचपलो न नेत्रचपलो भवेत्। नच वाग्जचपल इति शिष्टस्य गोचरः॥ पारंपर्यागतो येषां वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः' इति वसिष्ठसूत्रोक्तलक्षणकाः शिष्टास्ते इष्टा यस्याः सा। यद्वा शिष्टैरिष्टा पूजिता। इममेवार्थं स्पष्टमाचष्टे शिष्टपूजिता। प्रमातुं योग्या प्रमेया। प्रमेया न भवतीत्यप्रमेया। अकारार्थैर्ब्रह्मविष्ण्वादिभिः प्रमेया वा। अप्सु प्रमेया वा। 'मन योनिरप्स्वन्तःसमुद्र'इति श्रुतेः। स्वः आत्माभिन्नः प्रकाशो यस्याः। दृश्यत्वाभावेन पराप्रकाश्यत्वात्। 'अत्रायं पुरुषः स्वयंज्योति'रिति श्रुतेः। सुषु अप्सु प्रकाशो यस्या वा। मनांसि च वाचश्च मनोवाचस्तेषां तासां चागोचरा अविषयः। 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सहे'ति श्रुतेः। विष्णुपुराणे प्रह्लादवचनं च 'यातीतगोचरा वाचां मनसां चाविशेषणा। ज्ञानिज्ञानपरिच्छेद्या वन्दे तामीश्वरीं परा'मिति। 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरे'त्यादाविव गोचरशब्दस्य स्त्रीलिङ्गत्वम्। न विद्यते गोचरो यस्यामिति वा। वाङ्मनसविषय एकोऽपि पदार्थो यस्यां नास्ति। तदुक्तानामप्यानन्त्येन वाङ्मनसातीतत्वादिति भावः। यत्तु अन्या इत्यधिकृत्य 'निर्मन् द्वे क्तिष्टे' इति छलाक्षरसूत्रद्वयं पठ्यते। निः मन् क्तिः ष्टा इत्येतदक्षरान्तानि चत्वार्येव नामानि द्विद्विपदघटितानि भवन्तीति तदर्थः। तत्समानविभक्तिकपदद्वयपरम्। 'अप्राप्ते वाक्यमर्थवे'दिति न्यायेन तादृशस्थल एव नामद्वयभ्रमनिरासकत्वेन सार्थक्यात्। यथा 'परं ज्योतिः परं धाम परा शक्तिः परा निष्टे'ति। इदं तु भिन्नविभक्तिपदद्वयघटितमेकं नामेत्यदोषः। यद्यपि मनश्च वाचा च मनोवाचे ते च ते आमे च अपक्के च मनोवाचामे। 'विशेषणं विशेष्येण बहुल'मित्युक्तेर्न पूर्वनिपातः। ते न भवत इत्यमनोवाचामे। तयोर्गोचरेत्येकपदमेवेदं नाम सुवचम्। 'यतो वाचो निवर्तन्ते'इति श्रुतेर्वैदैकवेद्यत्वश्रुत्या 'मनसैवानुद्रष्टव्य'इत्यादिश्रुत्या च सह विरोधस्य भामत्यां शक्तिलक्षणापरतया पक्वापक्वमनःपरतया च व्यवस्थाकल्पनेन परिहृतत्वात्। तथापि 'गस्थियाद्दढीठकां पृण' इति छलाक्षरसूत्रविरुद्धम्। तस्य च छाया 'पृक्किर्कुरवीरिवद्दढीठकांपृ' इत्येकादशभिरक्षरैः भाष्यकारैरुक्ता। तेषु च प्रकृतं नामारभ्य पञ्चकोशान्तरस्थितेत्यन्तानि चतुर्दश नामानि प्रतिपाद्यन्ते। पवर्गीयाद्यक्षरकाष्ठाक्षरनामभ्यां संपुटीकृतानि द्वादश नामानीत्यर्थः। 'प्रकृतनामन्येकाक्षरप्रश्लेषे तु नवाक्षरत्वं स्वरादित्वं च स्यादिति तादृशेन संपुटीकरणाभावाद्भवति सूत्रविरोधः। सूत्राणामपि दृष्टोपायनिबन्धनमात्ररूपत्वेन तदुक्तोपायस्योपायान्तरादूषकत्वपर्यालोचने तु सोऽपि पक्षः साधुरेव। एवमन्यत्रापि द्रष्टव्यम्॥ १४०॥ चिच्छक्तिरौपम्यशक्तिः। 'चिदित्युपमाया'मिति

१ अस्यार्थो मात्रिकविद्वद्वेद्यशिक्कवेद्यः.

गायत्री व्याहृतिः संध्या द्विजवृन्दनिषेविता ॥ १४१ ॥

यास्कस्मृतेः । 'चिदिति चोपमार्थे प्रयुज्यमाने' इति पाणिनिस्मरणाच्च । 'द्वे अक्षरे ब्रह्मपरे अनन्ते विद्याविद्ये निहिते यत्र गूढे । क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याऽविद्ये ईशते यस्तु सोऽन्यः ॥' इति श्वेताश्वतरनिर्दिष्टं विद्यापदेनोच्यते । अविद्यानिवारकत्वरूपं सामर्थ्यं चैतन्यापरपर्यायं वा चिच्छक्तिः । देवीभागवते पञ्चमस्कन्धे 'वर्तते सर्वभूतेषु शक्तिः सर्वात्मना नृप । शववच्छक्तिहीनस्तु प्राणी भवति सर्वथा । चिच्छक्तिः सर्वभूतेषु रूपं तस्यास्तदेव ही'ति । तदेवाह—चेतनारूपा । 'चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते' इति संक्षेपशारीरकाचार्याः । 'चैतन्यस्वरूपा शक्तिः' इति गौडपादीयसूत्रं च । देवीभागवते प्राथमिकश्लोकेऽपि 'सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमहि । बुद्धिं या नः प्रचोदयात्' इति । इयं च त्रिचरणा गायत्री । अतएव मात्स्ये 'गायत्र्या च समारम्भस्तद्वै भागवतं विदु'रिति । 'सैषानन्दस्य मीमांस्या भवती'ति श्रुतिरपि । आनन्दस्य ब्रह्मणः सैषा चिद्रूपा शक्तिर्मीमांसा भवति विमर्शात्मिका भवतीति शंकरारण्यचरणैर्विद्यारत्ने व्याख्यानदर्शनात् । स्रष्टव्यजगदात्मकशैक्यप्रतियोगिको मायापरिणामविशेषो जडशक्तिः । सृज्यशक्तिमात्रोपलक्षणमेतत् । उक्तंच विष्णुपुराणे 'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥ भवन्ति तपसां श्रेष्ठ पावकस्य यथोष्णता । निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ॥ प्रधानकारणीभूता यतो वै सृज्यशक्तयः । निमित्तमात्रं मुक्त्वैकं नान्यत्किंचिदपेक्षते ॥ नीयते तपसां श्रेष्ठ स्वशक्त्या वस्तु वस्तुता'मिति । जडं दृश्यमात्रमात्मा स्वरूपं यस्या मायायाः सा जडात्मिका । चतुर्विंशत्यक्षरं छन्दो गायत्री । 'गायत्री छन्दसामहं'मिति गीता । 'गायत्री छन्दसामसी'ति कौर्मे देवीस्तवे च । यद्वा गायत्र्याख्या गोपकन्या ब्रह्मणः कनिष्ठपत्नी । तदुक्तं पद्मपुराणे पुष्करक्षेत्रे ब्रह्मणि यागं कुर्वति सति समाहूता सावित्री, लक्ष्म्यादिका अद्यापि नागतास्ताभिः सहागच्छामीत्युत्तरमदात् । तेन वचनेन कुपितो ब्रह्मा शक्तिहस्तात्कांचिद्गोपकन्यामानाय्य विष्णुं प्रत्युक्तवानिति प्रकृत्य 'तावद्ब्रह्मा हरिं प्राह यज्ञार्थं सत्वरं च नः । दैवी चैषा महाभाग गायत्री नामतः प्रभो ॥ एवमुक्ते तदा विष्णुर्ब्रह्माणं प्रोक्तवानिदम् । तदेनामुद्वहस्वाद्य मया दत्तां तव प्रभो ॥ गान्धर्वेण विवाहेन विकल्पं मा कृथाश्चिरम् । गृहाण गोपकन्याया अस्याः पाणिमनाकुलम् ॥ गान्धर्वेण ततो गोपीमुपयेमे पितामहः' इत्यादि । तेन तादृशगोपकन्यारूपेत्यर्थः । अथवा 'गायन्तं त्रायते यस्माद्गायत्री तेन कथ्यत' इति गायत्रीकल्पे भरद्वाजस्मृत्युक्तनिर्वचनाद्वेदमातरि प्रसिद्धो गायत्रीशब्दस्तदभेदादम्बाया अपि वाचकः । 'आतोऽनुपसर्गे क' इति कः । गौरादित्वान्ङीष् । तदुक्तं पद्मपुराणे 'विशेषात्पुष्करे स्नात्वा जपेन्मां वेदमातरम् । अष्टाक्षरा स्थिता चाहं जगद्व्याप्तं मया त्विद'मिति । देवीपुराणे तु 'गायनाद्गमनाद्वापि गायत्री त्रिदशार्चिते'त्युक्तम् । 'गायति च त्रायते चे'ति तु छान्दोग्यम् । 'गायत्री गायनात्मत्वा'दिति महावासिष्ठरामायणं च । व्याहृति-

व्याहरणमुच्चारणं तद्रूपा । मन्त्रविशेषरूपा वा । वायुपुराणे तु 'मयाभिव्याहृतं यस्मात्त्वं चैव समुपस्थिता । तेन व्याहृतिरित्येवं नाम ते सिद्धिमेष्यती'ति निरुक्तम् । आदित्यावच्छिन्नचैतन्यस्य स्वस्य चाभेदभावनं संध्यापदार्थः । सम्यग्ध्यायन्त्यस्यामिति व्युत्पत्तेश्च । तदुक्तं महाभारते 'संध्येति सूर्यगं ब्रह्म संध्यानाद्विभागतः । ब्रह्मावयैः सकलैर्भूतैस्तदंशैः सच्चिदात्मनः ॥ तस्य दासोऽहमस्मीति सोऽहमस्मीति या मतिः । भवेदुपासकस्येति ह्येवं वेदविदो विदु'रिति । तदभेदादियमपि संध्या । तथाच व्यासः 'न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । साहमस्मीत्युपासीत विधिना येनकेनचि'दिति । भारद्वाजस्मृतावपि 'ब्रह्माद्याकारभेदेन या भिन्ना कर्मसाक्षिणी । भास्वतीश्वरशक्तिः सा संध्येत्यभिहिता बुधै'रिति । 'गायत्री सशिरास्तुरीयसहिता संध्यामयीत्यागमैराख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणा'मित्यभियुक्तोक्तिरिति । अतएव संधिकालोपास्यदेवतापरोऽयं शब्द इति माधवः । सम्यग्ध्येयत्वात्संध्या । 'आतश्चोपसर्ग' इति 'कर्मण्यणि'ति पारिजातकारः । इयं च ब्रह्मणो मानसपुत्री । तदुक्तं कालिकोपपुराणे 'तदा तन्मनसो जाता चारुरूपा वराङ्गना । नाम्ना संध्येति विख्याता सायंसंध्या जयन्तिका ॥ ब्रह्मणो ध्यायतो यस्मात्सम्यग्जाता वराङ्गना । अतः संध्येति लोकेऽस्मिन्नाम्नाः ख्यातिर्भविष्यती'ति । भगवतीपुराणेऽपि 'या सा संध्या ब्रह्मसुता मनोजाता पुराऽभवत् । तपस्तप्त्वा तनुं त्यक्त्वा सैव भूता ह्यरुन्धती'ति । रेणुकापुराणे तु 'इडैकास्य महाकाली महालक्ष्मीस्तु पिङ्गला । एकवीरा सुषुम्णेयमेवं संध्या त्रयात्मिके'त्युक्तम् । एकवर्षात्मककन्यारूपा वा 'एकवर्षा भवेत्संध्ये'ति कन्याप्रकरणे धौम्यवचनात् ॥

अथ परिभाषायां षट्त्रिंशत्पदानि विभजते ॥ **दिवि कूटैरुदिते द्वे द्विर्द्वि-र्गीर्णा विभाति नदी । चत्वारो रूढफलं शंभुर्भोजो बली राजा ॥ १८ ॥**

द्वे इति पञ्चाक्षरे । चत्वार इति द्व्यक्षराः शब्दाः एकस्मिन्नर्थे 'अविशिष्टेषु समं स्या'दिति न्यायेन तथैव पर्यवसानान्नकारस्य दशाक्षरं नामेत्यर्थः । स्पष्टमन्यत् ॥१८॥

द्विजवृन्दैस्त्रैवर्णिकसमूहैर्निषेवितोपास्या संध्यात्वादेव । उक्तंच रेणुकापुराणे 'संध्यैका सर्वदा देवैर्द्विजैर्वन्द्या महात्मभिः । आसने शयने याने भोजने रेणुकैव ही'ति । अथवा व्याहृत्यादिनामत्रयमवस्थात्रयवत्परम् । व्याहृतिर्वाग्व्यापारो जाग्रदवस्थोपलक्षकः । संध्याशब्दो'ऽवस्थयोः संधौ जात' इति व्युत्पत्त्या 'संध्ये सृष्टिराह ही'ति व्याससूत्रे प्रयोगाच्च स्वप्नपरः । अवस्थाविशेषत्वाभिप्रायेण सदवच्छिन्नदेव्यभिप्रायेण च स्त्रीलिङ्गः । द्विजाः पक्षिण इव द्विजा जीवास्तेषां वृन्देन नितरामभेदेन सेविता संबद्धेति सुषुप्तिदृशोक्तिः । यथा पक्षिणः संचारेण श्रान्ताः पक्षौ संकोच्य नीडे लीयन्ते तथा जीवा अपि श्रान्ता जागरस्वप्नौ संकोच्य परब्रह्मणि निलीयन्त इत्युक्तेः । यच्छ्रुतं बृहदारण्यके 'तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्या अन्ताय धावति यत्र सुप्तो न

तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता ।
निःसीममहिमा नित्ययौवना मदशालिनी ॥ १४२ ॥

कंचन कामं कामयते न कंचन स्वप्नं पश्यती'ति । 'सता सोम्य तदा संपन्नो भवती'ति श्रुतेश्च । 'तदभावो नाडीषु तच्छ्रुतेरात्मनि चे'ति तृतीयीकाधिकरणे तथा निर्णयाच्च ॥ १४१ ॥ शिवादिक्षित्यन्तानि षट्त्रिंशत्तत्त्वान्येवासनं योगपीठाख्यमासनं यस्याः । तत्त्वान्यस्यति क्षिपतीति वा । तत्पदस्य बुद्धिविषयवृत्तिविषये शक्तिः । भगवत्यपि सर्वेषां बुद्धौ विपरिवर्तत एवेति भवति तत्पदवाच्या । एवमेव चोक्तं 'यत्तत्पदमनुत्तम'मिति विष्णुसहस्रनामभाष्ये आचार्यभगवत्पादैः । ततश्च तत्र 'यदे नमः तदे नमः' इति केषांचिच्चतुर्थ्यन्तमन्त्रकल्पनं चिन्त्यं, यत्तत्पदशक्यतावच्छेदकापरित्यागेनैव ब्रह्मणि प्रवृत्तौ संज्ञात्वाभावेन सर्वनामत्वानपायात् । किंच तवर्गीयाक्षरचतुष्टयान्यतमान्तत्वेऽपि चर्त्वेन यत्तत्पदमिति संहितोपपत्तेर्दकारान्तत्वमेवेति तयोः प्रातिपदिकयोर्हुरुपपादम् । तस्मात् यस्मै नमः तस्मै नमः इत्येव प्रयोगः । ब्रह्मविशेष्यकत्वाभिप्रायेण नपुंसकलिङ्गोपपत्तिः । एवमेव त्वंपदेनापि भगवती वाच्येति तुभ्यं नम इत्येव प्रयोगः । यदा तु तत्त्वमसीत्यत्रैव निर्गुणब्रह्मलक्षके तत्त्वंपदे तदापि सर्वनामतानपायादुक्तविध एव प्रयोगः । नहि संकुचितवृत्तिकमपि विश्वपदं विश्वेदेवा इत्यादौ सर्वनामतां जहाति । अयीति कोमलामन्त्रणेऽव्ययम् । गौरादेराकृतिगणत्वात्ततो ङीषि रूपमिदम् । जनमातृत्वाज्जनैरामन्त्रणीयेत्यर्थः । अयः शुभावहो विधिस्तद्रूपा वा । असीति पदार्थस्यैक्यस्य वाचकं वाऽयीति पदम् । 'अय पय गता'विति धातुपाठेन गत्यर्थस्य तत्रैव पर्यवसानात् अय्यैनमः इति प्रयोगः । चरमशतकान्तर्गतेन नाम्ना पौनरुक्त्यपरिजिहीर्षयेयं कल्पना सूत्रकृतामित्युपपत्तिः । एवमन्यत्राप्यूह्यम् । पञ्चसंख्याकाः कोशाः पञ्चकोशा इति मध्यमपदलोपी समासः । ते च पञ्च पञ्चिकापूजने प्रसिद्धा मन्त्रविशेषाः । तदभेदात्तद्देवता अपि । ताश्च ज्ञानार्णवे 'श्रीविद्या च परंज्योतिः परा निष्कलशांभवी । अजपा मातृका चेति पञ्च कोशाः प्रकीर्तिता' इति । एतासु पञ्चदेवतासु श्रीचक्रराजेऽर्च्यमानासु परंज्योतिराद्याश्चतस्रो देवता अभितः सृष्ट्यादिचक्रेषु व्यष्टिसमष्टिभेदेन पूज्यन्ते । श्रीविद्या तु मध्ये बिन्दिति स्थितिः । तेन पञ्चकोशानामन्तरे मध्ये स्थितेत्यर्थः । यद्वा सन्ति तावदस्मदादिशरीरेष्वन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्या अन्तरन्तः कक्ष्याक्रमेण पञ्चकोशपदवाच्याः पदार्थाः । एतेषां पञ्चानां मध्ये आन्तर आनन्दमयः कोशस्तत्राभेदेन स्थिता । आनन्दमयाधिकरणे वृत्तिकारैः 'अन्योऽन्तर आत्मानन्दमय' इत्यादिश्रुतिष्वानन्दमयस्य ब्रह्मरूपतोक्तेः । आचार्यभगवत्पादैस्त्वानन्दमयस्य शोधनीयेषु गणनादशुद्धत्वे सिद्धे ब्रह्मता नोपपद्यत इत्याशयेन ब्रह्मपुच्छवाक्य एव ब्रह्मनिर्देशो व्यवस्थापितः । तत्पक्षे 'यदयमाकाश आनन्दो न स्या'दिति सामानाधिकरण्येन प्रयोगादानन्दमयकोशस्य पराकाशात्मकब्रह्मशरीरभूतचिच्छक्तिरूपत्वम् । श्रीकण्ठभाष्यतट्टीकादावयमर्थः स्पष्टः । ब्रह्मपुच्छपक्षे तु पञ्चानामन्तरे मध्ये स्थितेत्यर्थः

मदाघूर्णितरक्ताक्षी मदपाटलगण्डभूः ।
चन्दनद्रवदिग्धाङ्गा चाम्पेयकुसुमप्रिया ॥ १४३ ॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौलमार्गतत्परसेविता ॥ १४४ ॥

युक्तं चैतत् । ब्रह्मगीतायां तथैवोपबृंहणदर्शनात् । तदुक्तं 'तथानन्दमयश्चापि ब्रह्मणान्येन साक्षिणा । सर्वोत्तरेण संपूर्णो ब्रह्म नान्येन केनचित् ॥ यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानाद्वयात्मकम् । सरसः सर्वदा साक्षान्नान्यथा सुरपुंगवाः' इति । क्रोधभट्टारका अप्याहुः 'अन्नप्राणमनःप्रबोधपरमानन्दैः शिरःपक्षयुक् पुच्छात्मप्रकटैर्महोपनिषदां वाक्यैः प्रसिद्धीकृतः । कोशैः पञ्चभिरेभिरेव भवतीमेतत्प्रलीनामिति ज्योतिःप्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित्' इति । निष्क्रान्तः सीमानं सीमा वा निःसीमा । निःसीमो वा निरवधिको महिमा यस्याः । 'मनः' इति निषेधान्न ङीप् । वैकल्पिको डाप् । अतो निःसीममहिम्ने नम इति वा निःसीममहिमायै नम इति वा प्रयोगः । कालत्रयेऽपि रजसोऽविरहान्नित्ययौवना । विषयान्तरसंपर्कशून्य आनन्दैकविषयको वृत्तिविशेषो मदस्तेन शालते शोभत इति तथा ॥ १४२ ॥ **मदेन घूर्णितानि रक्तानि चाक्षीणि यस्याः । बाह्यविषयवैमुख्यं घूर्णनम् । मदेन पाटले श्वेतरक्ते गण्डभुवौ कपोलभित्ती यस्याः । मदो मद्यं लक्षणया तत्पानम् । यद्वा मदः कस्तूरी । पाटलं पुष्पविशेषः । मत्वर्थीयोऽच् । तद्वत्यौ मकरिकाचित्रिते कर्णावतंसवत्यौ च गण्डभुवौ यस्याः । 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः । मद्येऽपि मद आख्यात' इति विश्वः । चन्दनस्य मलयजस्य द्रवेण घृष्टसारेण दिग्धानि लिप्तान्यङ्गानि यस्याः ॥ चाम्पेयकुसुमं नागकेसरपुष्पं, चम्पासंबन्धिपुष्पं वा प्रियं यस्याः ॥ १४३ ॥ सृष्ट्यादिनिर्माणकौशलवत्त्वात्कुशला । कुशं जलं लाति आदत्ते इति वा आदन्तत्वात्कः कुत्सितः शलश्चन्द्रमा यस्या अग्रे तदधिककान्तिमत्त्वादिति वा । 'शलं तु शल्लकीलोम्नि शलो भृङ्गीगणे विधा'विति विश्वः । कोमलः सुकुमार आकारोऽवयवविन्यासो यस्याः । कुरुकुल्लाख्यदेवी श्रीपुरेऽहंकारचित्तमयप्राकारयोर्मध्ये विमर्शमयवाप्यामधिकृता । तदुक्तं ललितास्तवरत्ने वापीं प्रकृत्य 'कुरुविन्दतरणिनिलयां कुलाचलस्पर्धिकुचनमन्मध्याम् । कुङ्कुमविलिप्तगात्रीं कुरुकुल्लां मनसि कुर्महे सतत'मिति । तन्त्रराजे च द्वात्रिंशे पटले निरूपिता तद्रूपा । सजातीयानां मातृमानमेयानां समूहः कुलं तस्येश्वरी । मूलाधारकर्णिकामध्यगतो विन्दुः कुलकुण्डं कमलकन्दमध्यस्थितच्छिद्रतुल्यं तदेवालयः स्वापस्थानं यस्याः । तस्मिन्नासमन्तात्लयः सुप्तिरिव यस्या इति वा । सा कुण्डलिनीतियावत् । तदुक्तमाचार्यभगवत्पादैः 'अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणी'ति । स्वस्ववंशपरंपराप्राप्तो मार्गः कुलसंबन्धित्वात्कौलः । तदुक्तं व्रतखण्डे 'यस्य यस्य हि या देवी कुलमार्गेण संस्थिता । तेन तेन च सा पूज्या बलिगन्धानुलेपनै'रिति । 'नैवेद्यैर्विविधैश्चैव पूजयेत्कुलमार्गत' इति च । यद्वा**

कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥१४५॥
तेजोवती त्रिनयना लोलाक्षी कामरूपिणी ।

समयमतं कौलमतं मिश्रमतं चेति विद्योपासौ मतत्रयम् । शुकवसिष्ठादिसंहितापञ्चकोक्तं वैदिकमार्गकरम्बितमाद्यम् । चन्द्रकुलादितन्त्राष्टकोक्तं तु चरमम् । कुलसमयोभयानुसारित्वात् । एतद्भिन्नतन्त्रोदितं कौलमार्गम् । कौलैर्मृग्यत इत्यर्थे कर्मणि घञ् । तत्तदुपास्तिभेदोऽधिकारभेदश्च तत्तत्तन्त्रेष्वेव स्पष्टः । तस्मिंस्तत्परैरासक्तैः सेविता ॥ १४४ ॥ कुमारः स्कन्दो गणनाथो गजाननस्तयोरम्बा माता । कुत्सितो मारगणः स्मरविकारसमूहो येषां तान्नाथानम्बते बध्नातीति वा । 'अबि बन्धन' इति धातुः । कुमारशब्देन तद्देवत्योऽहंकारो वा गृह्यते । तदुक्तं वराहपुराणे 'पुरुषो विष्णुरित्युक्तः शिवो वा नाम नामतः । अव्यक्तं तु उमादेवी श्रीर्वा पद्मनिभेक्षणा । तत्संयोगादहंकारः स च सेनापतिर्गुहः' इति । तद्गणैर्नाथानतीवाहन्ताविष्टानम्बत इति । तुष्ट्यादीनि सप्त नामानि तोषपोषज्ञानधैर्यशमकल्याणवत्त्वकमनीयतावाचकानि सन्ति तादृशभगवतीस्वरूपत्वाभिप्रायेण तामप्यभिदधति । तथाच मार्कण्डेयपुराणे 'या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः' इत्यादि । मल्लारिमाहात्म्येऽपि 'यो देवः सर्वभूतेषु तोषरूपेण संस्थितः । नमस्तस्मै नमस्तस्मै नमस्तस्मै नमोनमः' इत्यादि । देवीभागवते तृतीयस्कन्धे 'बुद्धिः कीर्तिर्धृतिर्लक्ष्मीः शक्तिः श्रद्धा मतिः स्मृतिः । सर्वेषां प्राणिनां साम्बा प्रत्यक्षं तन्निदर्शन'मिति । पद्मपुराणे देवीक्षेत्रगणनावसरे 'तुष्टिर्वेत्रेश्वरे तथा । देवदारुवने पुष्टिः', 'धृतिः पिण्डारकक्षेत्रे' इत्येवं तत्तत्क्षेत्राधिष्ठात्र्या भगवत्या नामेत्युक्तम् । मतिस्तु वायुपुराणे निरुच्यते 'बिभर्ति मानं मनुते विभागं मन्यतेऽपि च । पुरुषो भोगसंबद्धस्तेन चासौ मतिः स्मृते'ति । तस्याश्च देवीरूपता सूतसंहितायाम् । 'यानुभूतिरुदिता मतिः परा वेदमाननिरता शुभावहा । तामतीव सुखदां वयं शिवां केशवादिजनसेवितां नुमः' इत्यादि । शान्तिशब्देन वायवीयः कलाविशेषो वा कथ्यते । तदुक्तं शैवागमे 'मलमायाविकारौघशान्तिः पुंसः पुनर्यया । सा कला शान्तिरित्युक्ता साधिकारास्पदं पद'मिति । बृहत्पाराशरस्मृतावपि 'दशपञ्चाङ्गुलव्याप्तं नासिकाया बहिःस्थितम् । जीवो यत्र विशुध्येत सा कला षोडशी स्मृते'ति प्रकृत्य 'सा च शान्तिः प्रकीर्तिते'त्यन्तम् । सुष्ठु अस्तिः सत्ता तद्वत्त्वेन वा स्वस्तिमती । सत्तायाः शोभनत्वं च पारमार्थिकत्वं व्यावहारिकसत्ताधिकत्वम् । 'प्राणा वै सत्यं तेषामेष सत्यम्' । 'तत्सत्यस्य सत्य'मिति च श्रुतेः । 'स्वस्त्याशीःक्षेमनिष्पापपुण्यमङ्गलवाचक' इति रत्नकोशः । 'स्वस्तीत्यविनाशिनामे'ति यास्कश्च । कान्तिशब्देनेच्छाशक्तिर्वोच्यते । नन्दयितृत्वान्नन्दिनी कामधेनुवंशोद्भवगोविशेषो वा । गङ्गास्वरूपा वा । विशेषेण घ्नन्तीति विघ्ना विद्यान्तरायास्तान्नाशयितुं शीलमस्यास्तथा ॥ १४५ ॥ तेजसामादित्यादी-

मालिनी हंसिनी माता मलयाचलवासिनी ॥ १४६ ॥

ज्ञानाधारभूतत्वात्तेजोवती । 'एतस्मिन् खल्वक्षरे गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत' इति श्रुतेः । त्रीणि सोमसूर्याग्निरूपाणि नयनानि नेत्राणि यस्याः । क्षुन्नादेराकृतिगणत्वात्संज्ञाशब्दत्वेऽपि णत्वाभावः । वौषडिति शब्दस्य त्रिनयनेति संज्ञा नामपारायणे प्रसिद्धा तद्रूपा वा । यद्वा नयनशब्दो लक्षणया प्रमाणपरः । नयति प्रापयति प्रमाणमिति व्युत्पत्तेश्च । तथाच शाण्डिल्यसूत्रे प्रयोगः 'त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्भवं'दिति । त्रीणि प्रत्यक्षानुमानशब्दरूपाणि प्रमाणानि यस्याः । यद्विषयकप्रमाजनने त्रिविधमेव प्रमाणम् । श्रवणरूपं शाब्दज्ञानं । मननं यौक्तिकत्वादानुमानिकं । निदिध्यासनं तु स्वानुभवरूपं प्रत्यक्षमेव । परंतु विजातीयप्रत्ययैः कदाचिन्मध्येमध्येऽन्तरितम् । एतदभिप्रायेणैव शाण्डिल्यमुनिना शब्दमारभ्यैव प्रमाणानि गणितानि । उपमानस्य शक्तिग्रहमात्रविषयकत्वेन प्रकृतानुपयोगात् । अत एवोक्तं मनुस्मृतौ 'प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सते'ति । सांख्यानां समाससूत्रमपि 'त्रिविधं प्रमाण'मिति । योगसूत्रमपि 'प्रत्यक्षानुमानागमाः प्रमाणानी'ति । त्रीन्मार्गान्प्रत्यधिकारिणो नयतीति वा । दक्षिणोत्तरमार्गौ ब्रह्ममार्गश्चेति त्रयो मार्गा उत्तरत्र विवेचयिष्यन्ते । तथा चोक्तं देवीपुराणे 'दक्षिणं चोत्तरं लोकं तथा ब्रह्मायनं परम् । नयं सन्मार्गवर्गं च नेत्री त्रिनयना मते'ति । लोलाक्षीणां स्त्रीणां यः कामो मन्मथस्तद्रूपिणी । शिवकामनिरासाय लोलाक्षीसंबन्धित्वं कामविशेषणम् । कामाभिमानियोगेश्वरीरूपा वा । तदुक्तं वराहपुराणे 'कामः क्रोधस्तथा लोभो मदो मोहश्च पञ्चमः मात्सर्यं षष्ठमित्याहुः पैशुन्यं सप्तमं तथा ॥ असूया त्वष्टमी ज्ञेया इत्येता अष्ट मातरः । कामं योगेश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥ लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च । मोहः स्वयंभूः कल्याणी मात्सर्यं चेन्द्रजां विदुः ॥ यमदण्डधरा देवी पैशुन्यं स्वयमेव च । असूया च वराहास्या इत्येताः परिकीर्तिता' इति । मालावत्त्वान्मालिनी । व्रीह्यादित्वादिनिः । एकपञ्चाशन्मातृकाभिमानिदेवताया मालिनीति संज्ञा तद्रूपा वा । यद्वा अस्ति देव्याः सखी मालिनीनाम्नी तद्रूपा । तदुक्तं वामनपुराणे पार्वतीविवाहप्रकरणे सप्तपदीक्रमणं प्रकृत्य 'ततो हराङ्गिर्मालिन्या गृहीतो दायकारणात् । किं याचसे ददाम्येष मुञ्चस्वेति हरोऽब्रवीत् ॥ मालिनी शंकरं प्राह मत्सख्यै देहि शंकर । सौभाग्यं निजगोत्रीयं ततो मोक्षमवाप्स्यसि ॥ अथोवाच महादेवो दत्तं मालिनि मुञ्च मा'मित्यादि । वृत्तविशेषरूपा मन्दाकिनीरूपा वा । 'मालिनी वृत्तभेदे स्यान्मालाकारस्त्रियामपि । चम्पानगर्यां गौर्यां च मन्दाकिन्यां च मालिनी'ति विश्वः । सप्तवर्षा कन्या मालिनीत्युच्यते तद्रूपा वा । 'सप्तभिर्मालिनी सा स्यादि'ति कन्याप्रकरणे धौम्यवचनात् । हंसा यतिविशेषा अस्यामभेदेन सन्तीति हंसिनी । हंस इत्यजपामन्त्रो वा । सर्वजनयितृत्वान्माता । मातृकारूपा वा । 'मन्त्राणां मातृभूता च मातृका परमेश्वरी'ति स्कान्दात् । प्रमात्रर्थकं पुंलिङ्गं वा । प्रकाशोऽत्र विशेष्यः ।

सुमुखा नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥ १४७ ॥

अथवा दक्षमीतिथिनित्यामन्त्रस्य मातेति संज्ञा । नामपारायणे तथा दर्शनात् तद्रूपेत्यर्थः । कायावरोहणाख्यक्षेत्राधिष्ठात्रीयम् । 'गाता कायावरोहण' इति पाठात् । लक्ष्मीबीजस्यापि मातेति संज्ञा । 'श्रीर्मा रमा च कमला माता लक्ष्मीश्च मङ्गले'ति विश्वाख्योक्तेः । शाबरचिन्तामणौ प्रसिद्धा मलयालया भगवती तद्रूपत्वान्मलयाचले वसतीति तथा ॥ १४६ ॥

अथ परिभाषायां पञ्चत्रिंशन्नामानि विभजते ॥ **गलफफशोभावेगः शंभोर्वेदे चतुर्होमः । भूर्द्विस्ताद्राजैको मोदाङ्गणवासतो नतिहृत्** ॥ १९ ॥ अत्र स्ताद्राजेत्यनेनार्धसमाप्युत्तरमेकपदेनैकं नामेत्येतावन्मात्रोक्तावपि परत्र मोदाङ्गणेति पञ्चाक्षरनामकीर्तनबलात्प्रथमस्यैकादशाक्षरात्मत्वलाभो न्यायगम्यः । तावत एव परिशेषात् । चरमतकारस्य स्वरयोगाभावान्नाक्षरसंख्यापरता ॥ १९ ॥

शोभनं मुखं यस्याः सा सुमुखी । ज्ञानेन मुखकान्तेराधिक्यात् । 'शोभतेऽस्य मुखं य एवं वेदे'ति श्रुतेः । 'ब्रह्मविद इव ते सौम्य मुखमाभाती'ति श्रुतेश्च । षोडश्यङ्गत्वेनोपास्यदेवताविशेषो वा सुमुखी । करचरणमुखनेत्राद्यवयवानां कमलरूपत्वात्सृष्टिन्यायेन नलिनी । भागीरथीरूपत्वाद्वा । 'नन्दिनी नलिनी सीते'ति तदीयद्वादशनामसु गणनात् । नलाख्यो राजा यस्यामुपासनया तादात्म्येन निविष्टः सेति वा । शोभने भ्रुवौ यस्याः सा सुभ्रूः । सौन्दर्यशीलत्वाच्छोभना । 'सुषमं साधु शोभन'मिति कोशः । सुराणां नायिकेश्वरी 'महत्तरा महिमा देवताना'मिति श्रुतेः । कालः कण्ठो यस्येश्वरस्य तस्य स्त्री । उक्तंच वायुपुराणे 'पश्यतां देवसंघानां पिशाचोरगरक्षसाम् । धृतं कण्ठे विषं घोरं कालकण्ठस्ततोऽस्म्यहं'मिति देवीपुराणेऽष्टषष्टिशिवतीर्थप्रकरणे 'कालञ्जरे कालकण्ठः' इति स्मर्यते । तेन तत्क्षेत्राधिष्ठात्रीत्यर्थः । मधुरोऽस्फुटो ध्वनिः कलः स एव कालः स्वार्थिकोऽण् । कालः कण्ठो यस्या इति वा । अङ्गगात्रकण्ठेभ्यो वा ङीप् । दारुकासुरवधार्थं 'ससर्ज कालीं कामारिः कालकण्ठीं कपर्दिनी'मिति लैङ्गे कथायाः प्रसिद्धेस्तद्रूपा वा । कलपदादेव स्वार्थिकोऽण्वा । मञ्जुध्वनिरिति तदर्थः । कान्तिरस्या अस्तीति कान्तिमती । परमेश्वरौ सृष्ट्यान्मुख्येन क्षोभयतीति क्षोभिणी । तदुक्तं विष्णुपुराणे 'प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास भगवान्सर्गकाले व्यपाश्रित' इति । यद्वा । मनःक्षोभात्कांश्चिद्गणानजनयदिति क्षोभिणी । तदुक्तं वराहपुराणे मूर्तित्रयं प्रकृत्य 'या मन्दरं गता देवी तपस्तप्तुं तु वैष्णवी । तस्यास्तपन्त्याः कालेन महतः क्षुभितं मनः ॥ तस्मात्क्षोभात्समुत्तस्थुः कुमार्यः सौम्यदर्शनाः । नीलकुञ्चितकेशान्ता बिम्बोष्ठ्यः पद्मलोचनाः ॥ इन्दीवरसमा दामनूपुराढ्याः सुवर्चसः । एवंविधाः स्त्रियो देव्यः क्षोभिते मनसि हृतम् ॥ उत्तस्थुः शतसाहस्राः कोटिशो विविधानना' इत्यादि । सूक्ष्मं दुर्ज्ञेयं रूपमस्याः । 'सूक्ष्मात्सूक्ष्म-

वज्रेश्वरी वामदेवी वयोवस्थाविवर्जिता।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥ १४८ ॥
विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता ॥ १४९ ॥

तरं नित्यम्' 'अणोरणीया'निति च श्रुतेः। सूक्ष्म इति होमविशेषस्य संज्ञा। तन्त्रराजे 'नित्यानित्योदिते मूलाधारमध्येऽस्ति पावक' इत्यादिना 'एवं द्वादशधा होममक्षरैः स्यादुदीरिते'रित्यन्तेन ग्रन्थेनोक्ता तदेव रूपमस्या इति वा। देव्या अपि त्रीणि रूपाणि स्थूलसूक्ष्मपरभेदात्सन्त्येवेति व्यक्तमेव ॥ १४७ ॥ षष्ठीतिथिनित्या जालन्धरपीठाधिष्ठात्री वज्रेश्वरी। अथवा श्रीपुरस्य द्वादशः प्राकारो वज्रमणिमयस्तस्यैकादशस्य मध्ये वज्राख्या नदी तदधिपतिः। उक्तंच दुर्वाससा 'तत्र सदा प्रवहन्ती तटिनी वज्राभिधा चिरं जीयात्। चटुलोर्मिझाटनृत्यत्कलहंसीकुलकलक्वणितपुष्टा ॥ रोधसि तस्या रुचिरे वज्रेशी जयति वज्रभूषाढ्या। वज्रप्रदानतोषितवज्रिमुखत्रिदशविनुतचारित्रे'ति। इन्द्राय वज्रोऽपि देव्यैव दत्तः। तदुक्तं ब्रह्माण्डे शक्रस्य जले तपःप्रकृत्य 'तज्जलादुत्थिता देवी वज्रं दत्त्वा बलद्विषे। पुनरन्तर्दधे सोऽपि कृतार्थः स्वर्गमेयिवा'निति। वामो वननीयो देवो वामदेवः। 'तं देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेव' इत्यैतरेयश्रुतेः। वामेन भागेन दीव्यतीत्यर्धनारीश्वरो वा वामदेवः। 'कुङ्कुमक्षोदसंकाशं वामाख्यं वनवेषधृत्। वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठित'मिति शिवपुराणोक्तः सदाशिवव्यूहान्तर्गतो मूर्तिविशेषोऽपि वामदेवस्तस्येयं वामा सुन्दरी च सा देवी वा। वामानां कर्मफलानां वा देवी अधिष्ठानदेवता। वामाचारे रता वामाः। 'पूजकोऽपि भवेद्वामस्तन्मार्गे सततं रत' इति कालिकापुराणवचनात् तेषां देवीति वा। उक्तंच देवीपुराणे 'वामं विरुद्धरूपं तु विपरीतं च गीयते। वामेन सुखदा देवी वामदेवी ततः स्मृते'ति। बाल्यपौगण्डकैशोरादिवयोविशेषाणामवस्थाभिर्विवर्जिता। सदातनत्वात्। गोरक्षप्रमुखानां सिद्धानामीश्वरी स्वामिनी एतन्नाम्नैव काश्यां प्रसिद्धा। सिद्धा च सा विद्या च सिद्धविद्या। अतएव पद्मदृश्याः सिद्धारिचक्रशोधो नास्तीत्युक्तं कादिमते 'नित्यानां सिद्धमन्त्रत्वान्नावेक्ष्यास्त्वंशकादय' इति। सिद्धानां माता रक्षकत्वात्। यशोऽस्यामस्तीति यशस्विनी। 'अस्मायामेधास्रजो विनिः'। 'तस्य नाम महद्यशः' इति श्रुतेः ॥ १४८ ॥ अथ द्विषष्टिनामभिर्योगिनीन्यासक्रमेण विशुद्ध्यादिसप्तचक्राधिष्ठातृडरलकसहृयाद्ययोगिनीसप्तकस्वरूपेण भगवतीं स्तोतुमारभते—**विशुद्धीत्यादिना**। तत्रेदं डाकिनिध्यानं 'ग्रीवाकूपे विशुद्धौ नृपदलकमले श्वेतरक्तां त्रिनेत्रां हस्तैः खट्वाङ्गखड्गौ त्रिशिखमपि महाचर्म संधारयन्तीम्। वक्त्रेणैकेन युक्तां पशुजनभयदां पायसान्नैकसक्तां त्वक्स्थां वन्देऽमृतार्द्रैः परिवृतवपुषं डाकिनीं वीरवन्द्या'मिति। विशुद्धिचक्रं षोडशदलकमलस्य कर्णिकैव निलयो यस्याः। आरक्तो

पायसान्नप्रिया त्वक्स्था पशुलोकभयंकरी ।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी ॥ १५० ॥
अनाहताब्जनिलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्वलाक्षमालादिधरा रुधिरसंस्थिता ॥ १५१ ॥
कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया ।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी ॥ १५२ ॥

वर्णो यस्या इति पञ्चाक्षरं नाम । आङीषदर्थे । तेन 'श्वेतरक्तस्तु पाटल' इत्युक्तलक्षणकपाटलीकुसुमसमानवर्णेत्यर्थः । लाकिनीप्रकरणगतनाम्ना पौनरुक्त्याभावाच्च । त्रीणि लोचनानि यस्याः । खट्वाङ्गं खट्वापादः । दण्डारोपितनरकपालं वा । तदादि येषां चतुर्णां मध्ये तानि प्रहरणान्यायुधानि यस्याः । वदनं च तदेकं च । 'पूर्वकालैकेति' समासः । अनित्यत्वान्न पूर्वनिपातः । तेन समन्विता युक्ता ॥ १४९ ॥ पयोविकारः पायसश्च तदन्नं च तत्परमान्नं प्रियं यस्याः । त्वचि धातौ तिष्ठतीति त्वक्स्था । तदभिमानित्वात् । अद्वैतविद्याविहीनाः पशवस्त एव लोकास्तेषां भयं करी । 'योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु'रिति श्रुतेः । 'द्वितीयाद्वै भयं भवति', 'य एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवती'ति च श्रुतेः । अमृताख्या शक्तिरादिर्यासां ताभिः षोडशभिर्महाशक्तिभिः 'अमृताकर्षिणीन्द्राणी'त्यादिभिरक्षरान्ताभिरेकैकदलनिष्ठाभिः संवृता । उक्तंच स्वच्छन्दतन्त्रे 'तस्मादेकाङ्गुलादूर्ध्वं विशुद्धं षोडशाक्षरम् । मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरी । अमृताद्यक्षरान्ता स्युश्चन्द्रबिम्बं तदूर्ध्वतं' इति । नवानां विशेषणानां विशेष्यं नाम्ना निर्दिशति—**डाकिनीश्वरीति** । डाकिन्याख्येश्वरीत्यर्थः ॥ १५० ॥ हृदये द्वादशदलकमलेऽनाहताख्यचक्रे राकिन्याख्या योगिनी तिष्ठति । तस्या ध्यानं यथा 'हृत्पद्मे भानुपत्रे द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णामक्षं शूलं कपालं डमरुमपि भुजैर्धारयन्तीं त्रिनेत्राम् । रक्तस्थां कालरात्रिप्रभृतिपरिवृतां स्निग्धभक्तैकसक्तां श्रीमद्वीरेन्द्रवन्द्यामभिमतफलदां राकिनीं भावयाम' इति । अनाहताब्जं तत्कर्णिका निलयो यस्याः । श्यामा षोडशवार्षिकी तया तुल्या श्यामाभा । श्यामा आभा कान्तिर्यस्या इति वा । वदनयोर्द्वयं यस्याः । दंष्ट्राभिर्वराहसमानदन्तैरुज्वला शोभमाना । अक्षमाला आदिर्येषां तेषां चतुर्णामायुधानां धरा । पचाद्यच् । कर्मण्यणि धारेति स्यात् । उक्तश्लोके यदि चक्रं शूलमित्येव पाठस्तदाऽक्षस्य रथाङ्गस्य मां शोभां लाति आदत्त इत्यक्षमालं चक्रमित्याख्येयम् । रुधिरे शोणिते संस्थिता तदभिमानित्वेन ॥ १५१ ॥ अस्ति कालरात्र्याख्या काचन शक्तिः । तदुक्तं वाराहपुराणे मूर्तित्रयं प्रकृत्य 'या सा नीलगिरिं याता तपसे धृतमानसा । रौद्री तमोभवा शक्तिस्तस्याः शृणु धरे व्रत'मित्यारभ्य 'रौद्री तपोरता देवी तामसी शक्तिरुत्तमा । संहारकारिणी नाम्ना कालरात्रीति तां विदु'रिति । सा आदिर्यासां तासां

मणिपूराब्जनिलया वदनत्रयसंयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥ १५३ ॥
रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा ।
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी ॥ १५४ ॥

ठंकार्यन्तद्वादशशक्तीनामोघेन समूहेन वृता पत्रेषु वेष्टिता । स्निग्धो घृतप्लुत ओदनः प्रियो यस्याः । विविधा ईरा वा इरा वा येषां ते वीराः । पक्षद्वयेऽपि चमत्कृतवाणीकाः । स्तावका इति यावत् । अथवा महावीरं सौमिकः पात्रविशेषः । 'महावीरं तुविबाधमृजीष'मित्यादिश्रुतिप्रसिद्धः । लक्षणया च पानपात्रपरः । तस्मान्मत्वर्थीयोऽच् । ब्रह्मरसामृतपानशीला इति यावत् । अतएवेन्द्रां ब्रह्मविदः । इदमित्यापरोक्ष्येण ये साक्षिणः स्वात्मभूतं ब्रह्माहमस्मीति साक्षात्कुर्वन्ति ते इन्द्राः । तथाच श्रूयते 'इदमदर्शमिदमदर्शमिति तस्मादिन्द्रो नामे'ति । अथवा 'त्रितयाभोक्ता वीरेश' इति शिवसूत्रोक्तलक्षणा जागराद्यवस्थात्रयेऽपि तुर्यानुसंधानपरा वीरेन्द्राः । उक्तंच वरदराजेन 'वीरेश इति वीराणां भेदव्यसनकारिणाम् । अन्तर्बहिर्विसरतामिन्द्रियाणामधीश्वर' इति । अथवा महावीरः प्रह्लादः इन्द्रः शक्रश्च । देवीभागवते चतुर्थस्कन्धे शक्रप्रह्लादयोर्दिव्यवर्षशतं युद्धे जाते पश्चादुभाभ्यां स्तुता भगवती द्वयोरपि वरमदादिति कथानकस्मरणात् तेभ्यो वरं ददातीति तथा ॥

अथ परिभाषायामेकोनचत्वारिंशन्नामानि विभजते ॥ **पञ्चपदी भाविचतुष्पदी द्विचरणीव शंभोर्वाक् । चतुरङ्घ्रिवशे पञ्चाङ्घ्रिभवे द्वैकं चतुष्पदं च मम ॥ २० ॥** षट्पदीति वक्तव्ये चतुर्णां द्वयोश्च विभज्योक्तिश्छन्दःपूरणाय । एकपदेन द्वादशाक्षरमेकं नाम अर्धे तावत एव परिशेषात् ॥ २० ॥

राकिणीनामिकाया अम्बायाः स्वरूपमस्याः ॥ १५२ ॥ मणिपूराख्यं दशदलं नाभौ पद्मं तत्र लाकिन्याख्या योगिनी तिष्ठति । तदुक्तं 'दिक्पत्रे नाभिपद्मे त्रिवदनविलसद्दंष्ट्रिणीं रक्तवर्णां शक्तिं दम्भोलिदण्डावभयमपि भुजैर्धारयन्तीं महोग्राम् । डामर्याद्यैः परीतां पशुजनभयदां मांसधात्वेकनिष्ठां गौडान्नासक्तचित्तां सकलसुखकरीं लाकिनीं भावयाम' इति । मणिपूराख्यमब्जं निलयो यस्याः । वदनानां त्रयेण संयुता । वज्रादिकैश्चतुर्भिरायुधैरुपेता । डामर्याद्याभिः फट्कारिण्यन्ताभिर्दशभिः शक्तिभिरावृता ॥ १५३ ॥ रक्तो वर्णो यस्याः । मांसे नितरां तिष्ठति तद्भावभिमानित्वेनेति तथा ॥ **इति श्रीभासुरानन्दकृते सौभाग्यभास्करे । पञ्चभिः शतकैरासीत्षष्ठी नाम्ना रुचिः कला ॥ ५०० ॥ इति श्रीभास्कररायेत्यादिश्रीमल्ललितासहस्रनामभाष्ये पञ्चमशतकं नाम षष्ठी कला ॥ ६ ॥**

गुडेन मिश्रमन्नं गुडान्नम् । 'भक्ष्येण मिश्रीकरण'मिति समासः । तेन प्रीतं मानसं यस्याः । समस्तेभ्यो भक्तेभ्यः सुखं ददातीति तथा । लाकिन्याख्याया अम्बायाः

स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुधसंपन्ना पीतवर्णातिगर्विता ॥ १५५ ॥
मेदोनिष्ठा मधुप्रीता बन्धिन्यादिसमन्विता ।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥ १५६ ॥
मूलाधाराम्बुजारूढा पञ्चवक्त्रास्थिसंस्थिता ।
अङ्कुशादिप्रहरणा वरदादिनिषेविता ॥ १५७ ॥
मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी ।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥ १५८ ॥

स्वरूपमस्याः ॥ १५४ ॥ स्वाधिष्ठानाख्ये षड्दले पद्मे काकिन्याख्या योगिनी तिष्ठति । तदुक्तम् 'स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां हस्ताभ्यां धारयन्तीं त्रिशिखगुणकपालाभयान्यात्तगर्वाम् । मेदोधातुप्रतिष्ठामलिमदमुदितां बन्धिनीमुख्ययुक्तां पीतां दध्योदनेष्टामभिमतफलदां काकिनीं भावयामः' इति । स्वाधिष्ठानाख्यमम्बुजं गता प्राप्ता । चतुर्भिर्वक्त्रैर्मनोहरा रुचिरा । शूलादिभिरुक्तसंख्याकायुधैः संपन्ना । पीतो वर्णो यस्याः सा । अतीव सौन्दर्यादिकृतो गर्वो यस्याः संजातो गर्वधातोर्निष्ठया वाऽतिगर्विता ॥ १५५ ॥ मेदसि धातुविशेषे निष्ठा स्थितिर्यस्याः । मधुना मद्येन क्षौद्रेण वा प्रीता । तथाच श्रुतिः 'यन्मधुना जुहोति महतीमेव तद्देवतां प्रीणाती'ति । महादेवीं प्रीणयतीत्यर्थः । बन्धिन्यादिभिर्लम्बोष्ठ्यन्ताभिः षड्भिः समन्विता । दध्ना अन्नं दध्यन्नं । 'अन्नेन व्यञ्जन'मिते समासः । दधिसिक्तं ओदनं इति यावत् । तस्मिन्नासक्तं हृदयं यस्याः । काकिन्या रूपं स्वरूपं धारयतीति तथा ॥ १५६ ॥ मूलाधाराख्ये चतुर्दले कमले साकिन्याख्या योगिनी तिष्ठति । तदुक्तं 'मूलाधारस्थपद्मे श्रुतिदललसिते पञ्चवक्त्रां त्रिनेत्रां धूम्राभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम् । बिभ्राणां बाहुदण्डैः सुललितवरदापूर्वशक्त्या वृतां तां मुद्गान्नासक्तचित्तां मधुमदमुदितां साकिनीं भावयाम' इति । मूलाधाराख्येऽम्बुजे आरूढा तत्कर्णिकायां स्थिता । पञ्चसंख्यानि वक्त्राणि यस्याः । अस्थि अस्थिषु वा संस्थिता । अङ्कुशादीनि चत्वारि प्रहरणानि यस्याः । वरदादिभिः सरस्वत्यन्ताभिश्चतसृभिः शक्तिभिर्निषेविता ॥ १५७ ॥ मुद्गसूपमिश्र ओदने आसक्तं चित्तं यस्याः । तल्लक्षणं च कुमारसंहितायां 'सुशालितण्डुलप्रस्थं तदर्धं मुद्गभिन्नकम् । चतुःपलं गुडं प्रोक्तं तन्मानं नालिकेरकम् । मुष्टिमात्रं मरीचं स्यात्तदर्धं सैन्धवं रजः । तदर्धं जीरकं विद्यात्कुडवं गोघृतं विदुः । गोक्षीरेण स्वमात्रेण संयोज्या कमलासनम् । मन्दाग्निपचनादेव सिद्धान्नमिदमुत्तम'मिति । साकिन्यम्बायाः स्वरूपमस्याः । भ्रूमध्ये आज्ञाचक्रं नाम द्विदलं पद्मं तत्र हाकिन्याख्या योगिनी तिष्ठति । तदुक्तं 'भ्रूमध्ये विन्दुपद्मे दलयुगकलिते शुक्लवर्णां कराब्जैर्बिभ्राणां ज्ञानमुद्रां डमरुकममलामक्षमालां कपालम् । षट्चक्राधारमध्यां त्रिनयन-

मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता ।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी ॥ १५९ ॥
सहस्रदलपद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥ १६० ॥
सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी ।
स्वाहा स्वधा मतिर्मेधा श्रुतिस्मृतिरनुत्तमा ॥ १६१ ॥

ललितां हंसवत्यादियुक्तां हारिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयाम' इति । आज्ञाचक्राब्जमेव निलयो यस्याः । शुक्लो वर्णो यस्याः । षट्संख्यान्याननानि यस्याः ॥ १५८ ॥ मज्जशब्दो नकारान्तः पुंलिङ्गः । 'सारो मज्जा नरी'त्यमरात् । तदुत्तरमाङ्प्रश्लेषेण मज्ञि आसमन्तात्सम्यक् तिष्ठतीति विग्रहे मज्जधात्वभिमानिनीत्यर्थः । आबन्तो वा मज्जाशब्दः । तथा 'चिद्विल्वफलमज्जेयं' 'चिन्मज्जारूपमखिलं निजमज्जाचमत्कृति'रित्यादेर्ज्ञानवासिष्ठे प्रयोगात् । 'मज्जा स्यान्मज्जया सहे'ति कोशाच्च टाबन्त एव वा । तेन वाङ्प्रश्लेषः । मुखे भवा मुख्या हंसवत्येव मुख्या आदिर्ययोस्ताभ्यां शक्तिभ्यां हंसवतीक्षमावतीभ्यां समन्विता । हरिद्रामिश्रेऽन्ने एको मुख्यो रसो रसवत्तावुद्धिः प्रीतिर्यस्याः । हाकिन्याख्याया देव्या रूपं धारयितुं शीलमस्या इति तथा ॥ १५९ ॥ ब्रह्मरन्ध्रे सहस्रदलं पद्मं तत्र याकिन्याख्या योगिनी तिष्ठति । तदुक्तं 'मुण्डव्योमस्थपद्मे दशशतदलके कर्णिकाचन्द्रसंस्थां रेतोनिष्ठां समस्तायुधकलितकरां सर्वतोवक्त्रपद्माम् । आदिक्षान्तार्णशक्तिप्रकटपरिवृतां सर्ववर्णां भवानीं सर्वान्नासक्तचित्तां परशिवरसिकां याकिनीं भावयाम' इति । सहस्रदले पद्मे तिष्ठतीति तथा । सर्वैर्वर्णैः पाटलश्यामरक्तपीतादिरूपैरुपशोभिता । चित्रवर्णेति यावत् । यद्वा सर्वाण्यकारादिक्षकारान्तानि वर्णा अक्षराणि यासां ताभिरमृताद्यक्षमावल्यन्ताभिः पञ्चाशच्छक्तिभिरुप समीपे दलेषु शोभिता आवृता अनुलोमविलोमरीत्या शतसंख्याभिस्ताभिर्दशवारं दलेषु स्थिताभिः परिवृतेति यावत् । उपशब्दस्योक्तपरिभाषया दशसंख्याबोधकत्वासंभवाच्च । अतएव योगिनीन्यासे दशवारं तासां न्यासं केचिदिच्छन्ति । सर्वेषामायुधानां धरा धारयित्री । 'सहस्राणि सहस्रधा बाह्वोस्तव हेतय' इति श्रुतेः । शुक्ले वीर्याख्यधातौ सम्यक् तदभिमानित्वेन स्थिता । भविष्योत्तरपुराणे रमणकालीनध्यानविशेषः शुक्लसंज्ञः कथितस्तत्र स्थिता वा । सर्वतः सर्वासु दिक्षु मुखानि यस्याः सा । 'सर्वतोऽक्षिशिरोमुख'मितिवचनात् ॥ १६० ॥

अथ परिभाषायां द्वात्रिंशन्नामानि विभजते ॥ **हेदाराः फलरेखारम्भविवादे तमोंशोऽस्ति । खेदो देहे भीष्मो देवे वा व्यङ्गिलिङ्गफले ॥ २१ ॥** स्पष्टार्थः ॥ २१ ॥

सर्वैः पायसादिभिर्हरिद्रान्नान्तैरविशेषादन्यविधैरप्योदनैः प्रीतं तुष्टं चित्तं यस्याः । याकिन्याख्याया अम्बायाः स्वरूपमस्याः । एवं योगिनीस्वरूपतया वर्णयित्वा प्रकारान्तरैरपि वर्णयितुमारभते—**स्वाहास्वधेत्या-**

दिना । 'स्वाहा देवहविर्दाने श्रौषट्वौषड्वषट्स्वधे'ति कोशादुद्देश्यकद्रव्यत्यागवचनौ स्वाहास्वधाशब्दौ । तदर्थरूपापि देव्येव । तदुक्तं मार्कण्डेयपुराणे 'सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च सप्त याः । तास्त्वदुच्चारणादेवि क्रियन्ते ब्रह्मवादिभि'रिति । अन्यत्रापि 'यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि । स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमतएव जनैः स्वधा च' । अस्मिन्पक्षेऽनयोरव्ययत्वात्स्वाहानमः स्वधानम इति प्रयोगः । तन्निरुक्तिः प्रपञ्चसारे 'स्वेति स्वर्गं स्वेति चात्मा प्रदिष्टो हेत्याहेती हेति विद्याद्गतिं च । स्वर्गात्मा च स्वात्मना सामशाखा वह्नेर्जाया हूयते यत्र सर्वे'मिति । 'सैव ते वाग्त्यब्रवीदि'ति तैत्तिरीयश्रुतौ स्वाहापदस्य स्वीया वागित्यर्थ उक्तः । सामब्राह्मणे 'स्वाहा कल्पक्षरे'त्यादिप्रश्नास्तदुत्तराणि च श्रूयन्ते । एतेषु निर्वचनेषु पृषोदरादिप्रवेश एव गतिः । एवं यास्कस्य निरुक्तावपि 'सु आहेति स्वमाहेति वे'त्यादौ बोध्यम् । अन्ये त्वाहुः । सुष्ठु आहूयतेऽनयेति व्युत्पत्तिः । 'अन्येभ्योऽपि दृश्यते' इति डप्रत्ययः । स्वान् स्वकीयान् आजिहीते गच्छति स्वीयत्वेन सम्यग्जानातीति वा स्वाहा । सुष्ठु अं पितामहं जिहीत इति वा । इयं च वह्निमूर्तेः शिवस्य भार्या स्कन्दमाता । तदुक्तं लिङ्गपुराणे 'स्वाहा वह्न्यात्मनस्तस्य प्रोक्ता पशुपतेः प्रिया । षण्मुखो भगवान् देवो बुधैः पुत्र उदाहृतः' इति । वायवीयेऽपि 'नाम्ना पशुपतेर्या तु तनुरग्निर्द्विजैः स्मृता । तस्य पत्नी स्मृता स्वाहा स्कन्दश्चापि सुतः स्मृतः' इति । एषा च माहेश्वरपीठाधिष्ठात्री । 'स्वाहा माहेश्वरे पुरे' इति पाद्मात् । सुष्ठु आधीयतेऽनयेति वा । सुष्ठु अं विष्णुं स्वान्वा दधाति पोषयतीति स्वधा । अस्मिन्पक्षे स्वाहायै नमः स्वधायै नमः इति प्रयोगः । 'यन्न व्येति तदव्यय'मिति आथर्वणश्रुतौ न व्येतीत्यस्य लिङ्गसंख्याकारकरूपान्सत्त्वधर्मान् गृह्णातीति व्याख्यानेन हविर्दानेऽथर्व एव तयोरसत्त्वार्थकत्वात् अमतिरिति त्र्यक्षरं नाम । अविद्येत्यर्थः । नञोऽल्पार्थकत्वमाश्रित्य वृत्त्यात्मकज्ञानरूपेति वा । वैदिकनिघण्टुगतोऽयममितिशब्दः स्वात्मविज्ञानपरत्वेन नैरुक्ते दुर्गभट्टेन व्याख्यातः । तत्रैव स्थलान्तरे रूपपरत्वेनोक्तः । यद्वा पूर्वोक्ते सृष्टिक्रमे प्राथमिकी सृष्टिरबुद्धिपूर्वा तद्रूपा वा । क्रमप्राप्तत्वाद्बुद्धिपूर्वकसृष्टिरूपापि देव्येवेत्याह । मेधा 'मेधासि देवि विदिताखिलशास्त्रसारे'ति च । 'या देवी सर्वभूतेषु मेधारूपेण संस्थिते'ति वचनात् । 'धीर्धारणावती मेधे'त्यग्निपुराणवचनाच्च बुद्धिविशेषरूपा वा । 'मेधा काश्मीरमण्डले' इति पद्मपुराणोक्तदेवीरूपा वा । वेदा मन्त्रादिस्मृतयश्चैतद्रूपा एवेत्याह स्मृतिः 'ऋचो यजूंषि सामानि तथैवाथर्वणानि च । ब्रह्मणः सहजं रूपं नित्यैषा शक्तिरव्यये'ति कौर्मे । श्रवणस्मरणात्मकज्ञानरूपा वा । वायुपुराणे तु 'वर्तमानान्यतीतानि तथैवानागतान्यपि । स्मरते सर्वकार्याणि तेनासौ स्मृतिरुच्यत' इत्युक्तम् । देवीपुराणे तु 'स्मृतिः संस्मरणाद्देवी'ति । यदपेक्षयोत्तममन्यद्वस्तु नास्ति सानुत्तमा । 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतेः । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य' इति स्मृतेश्च । देवीभागवते तृतीयस्कन्धेऽपि 'रुद्रहीनं विष्णुहीनं न वदन्ति जनास्तथा । शक्तिहीनं यथा सर्वे प्रवदन्ति नराधम'मिति । न नुत्ता परप्रेरिता मा

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना।
पुलोमजार्चिता बन्धमोचनी बन्धुरालका॥ १६२॥
विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी॥ १६३॥

बुद्धिरैश्वर्यं वा यस्या इति वा। स्वतन्त्रबुद्धिः सहजैश्वर्या चेति यावत्॥ १६१॥ पुण्या पुण्यप्रदा कीर्तिर्यस्याः। पुण्यैः प्राक्तनैर्लभ्या। उक्तंच देवीभागवते तृतीयस्कन्धे 'पश्यन्ति पुण्यपुञ्जा ये ये वेदान्तास्तपस्विनः। रागिणो नैव पश्यन्ति देवीं भगवतीं शिवा'मिति। पुण्ये विहितकर्मरूपे श्रवणकीर्तने यस्याः। षष्ठ्यर्थश्चरित्रद्वारकः संबन्धः। पुलोमतो जातया इन्द्राण्यार्चिता। तथाच देवीभागवते षष्ठस्कन्धे कथा स्मर्यते। नहुषे स्वाराज्यं शासति शक्रप्रार्थ्यमिन्द्राण्या भगवत्याराधितेति 'इत्युक्ता सा तदा तेन शक्रपत्नी सुमानसा। जग्राह मन्त्रं विधिवद्गुरोर्देव्याः सुसाधनम्॥ विद्यां प्राप्य गुरोर्देवी देवीं त्रिपुरसुन्दरीम्। सम्यगाराधयामास बलिपुष्पार्चनैः शुभै'रित्यादि। बन्धमाविद्यकं मोचयति। कारागृहादपि मोचयति। तदुक्तं हरिवंशे 'अनिरुद्धेन एभिर्नामभिरन्यैश्च कीर्तिता ह्यसि शांकरि। त्वत्प्रसादाद्विमुच्येत क्षिप्रं मुच्येय बन्धनात्॥ अवेक्षस्व विशालाक्षि पादौ ते शरणं व्रजे। सर्वेषामेव बन्धानां मोक्षणां कर्तुमर्हसी'त्यारभ्य 'एवं स्तुता तदा देवी दुर्गा दुर्गपराक्रमा। बद्धं बाणपुरे वीरमनिरुद्धं व्यमोचयदि'त्यन्तम्। एवं देवीभागवते षष्ठस्कन्धे एकावलीनामिका राजकन्या कालकेतुना दानवेन बद्धा यशोवत्या तत्सख्या स्वोपासितभगवतीमन्त्रबलान्मोचितेति कथा स्मर्यते साप्यत्रोदाहर्तव्या। बन्धुरा उन्नतानता अलकाश्चूर्णकुन्तला यस्याः। बर्बरालकेति तु संप्रदायागतपाठः। बर्बरशब्दः संकुचिताग्रहस्तकेशेषु रूढः। 'आनीलस्निग्धबर्बरकचाना'मिति ललितास्तवरत्ने प्रयोगात्। बर्बरेति पाठेऽपि स एवार्थः। बावरेत्यपभ्रंशदर्शनाच्च। वस्तुतोऽयमेव बहुसंमतः पाठो न बन्धुरेति॥ १६२॥ प्रकाशात्मकस्य परब्रह्मणः स्वाभाविकं स्फुरणं विमर्श इत्युच्यते। तदुक्तं सौभाग्यसुधोदये 'स्वाभाविकी स्फुरत्ता विमर्शरूपास्य विद्यते शक्तिः। सैव चराचरमखिलं जनयति जगदेतदपि च संहरति' इति। स एव रूपं शक्तिरस्याः, विमर्शो वाचकः शब्दो वा स एव रूपं निरूपकं निरूप्यं चास्याः। तदुक्तं मातृकाविवेके 'वाचकेन विमर्शेन विना किंवा प्रकाश्यते। वाच्येनापि प्रकाशेन विना किंवा विमृश्यते। तस्माद्विमर्शो विस्फूर्तौ प्रकाशं समपेक्षते। प्रकाशश्चात्मनो ज्ञाने विमर्शं समपेक्षत' इति। मोक्षप्रदज्ञानस्वरूपत्वाद्विद्या। 'विद्यासि सा भगवती परमा हि देवी'ति देवीमाहात्म्यात्। तथाच गौडपादीयं सूत्रं 'सैव विद्ये'ति। चैतन्यस्वरूपा शक्तिरिति पूर्वसूत्रोपस्थितायाः शक्तेस्तत्पदेन परामर्शः। तेजोनिष्ठकलाविशेषरूपा वा। तल्लक्षणं च शैवतन्त्रे 'मायाकार्यविवेकेन वेत्ति विद्यापदं यया। सा कला परमा ज्ञेया विद्या ज्ञानक्रियात्मिके'ति। वियद्व्योम

अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी ।
कात्यायनी कालहन्त्री कमलाक्षनिषेविता ॥ १६४ ॥
ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥ १६५ ॥

आदित्यस्य तज्जगत्प्रसूते । 'आत्मन आकाशः संभूत' इत्यादिश्रुतेः । सर्वेषां व्याधीनां ज्वरादिरूपाणां प्रशमनी नाशकारणम् । अपमृत्युकालमृत्वादिरूपसर्वमृत्यून्निवारयति । 'ज्ञात्वा देवं मृत्युमुखात्प्रमुच्यते' इति श्रुतेः ॥ १६३ ॥ सर्वस्य जगतो मूलकारणत्वादग्रे प्रथमतो गण्या गणयितुमर्हा । गणं लब्धी गण्या अग्रे च सा गण्या चेति वा । 'धनगणं लब्धे'ति यत्प्रत्ययः । गुणसंपर्कशून्यत्वादचिन्त्यं चिन्तयितुमशक्यं रूपमस्याः । कलियुगे कल्मषाधिक्यस्यावश्यकत्वात्तन्नाशमन्यसाध्यमेवैव करोति । तदुक्तं कूर्मपुराणे 'शमायालं जलं वह्नेस्तमसो भास्करोदयः । शान्त्यै कलेरघौघस्य देवीनामानुकीर्तन'मिति । 'कृतस्याखिलपापस्य ज्ञानतोऽज्ञानतोऽपि वा । प्रायश्चित्तं परं प्रोक्तं पराशक्तेः पदस्मृति'रिति ब्रह्माण्डपुराणेऽपि । कतो नामर्षिः तस्यापत्यं स्त्रीत्यर्थे गर्गादित्वाद्यञि काल्यः । ततः 'सर्वत्र लोहितादिकतन्तेभ्य' इति ष्फः । षित्वान्ङीष् । सर्वदेवतेजःसमूहात्मिकाया देव्या इयं संज्ञा । तदुक्तं वामनपुराणे 'तच्चापि तेजो वरमुत्तमं महन्नाम्ना पृथिव्यामभवत्प्रसिद्धम् । कात्यायनीत्येव तदा बभौ सा नाम्ना च तेनैव जगत्प्रसिद्धे'ति । इयं च ओड्याणपीठाभिमानिनी । तदुक्तं कालिकापुराणे 'कात्यायनी चोड्डियाने कामाख्या कामरूपके । पूर्णेश्वरी पूर्णगिरौ चण्डी जालन्धरे स्मृते'ति । देवीपुराणे तु 'कं ब्रह्म कं शिरः प्रोक्तमसमसारं च कं मतम् । धारणाद्वासनाद्वापि तेन कात्यायनी मते'त्युक्तम् । कालस्य मृत्योर्हन्त्री । 'ज्ञः कालकालो गुणी सर्वविद्य' इति श्रुतेः । कमलाक्षेण विष्णुना नितरां सेवितोपासिता । उक्तंच पद्मपुराणे 'इन्द्रनीलमयीं देवीं विष्णुरर्चयते सदा । विष्णुत्वं प्राप्तवांस्तेने'त्यादि ॥ १६४ ॥ ताम्बूलेन पूरितं मुखं यस्याः । अस्ति फलविरहितः पुष्पमात्रशाली दाडिमीत्वव्याप्यजातिमान् वृक्षविशेषस्तस्य कुसुमस्येव प्रभा यस्याः । मृगस्येवाक्षिणी यस्याः । मोहयतीति मोहिनी । तदुक्तं लघुनारदीयपुराणे 'यस्मादिदं जगत्सर्वं त्वया सुन्दरि मोहितम् । मोहिनीत्येव ते नाम स्वगुणोत्थं भविष्यती'ति । अथवा अमृतमथने यद्विष्णुना मोहिनीरूपं धृतं प्रवरानदीतीरे निवासपुरे निवसति तदस्या एवाभेदभावनया व्यक्तिमापन्नम् । तदुक्तं ब्रह्माण्डपुराणे 'आदौ प्रादुरभूच्छक्तिर्ब्रह्मणो ध्यानयोगतः । प्रकृतिर्नाम सा ख्याता देवानामिष्टसिद्धिदा ॥ द्वितीयमुदभूद्रूपं प्रवृत्तेऽमृतमन्थने । सर्वसंमोहजनकमवाङ्मनसगोचरम् ॥ यद्दर्शनादभूदीशः सर्वज्ञोऽपि विमोहित' इत्यादि । तत्रैवाध्यायान्तरे मोहिनीरूपं प्रक्रम्य 'यज्ज्ञानवैभवाल्लब्धं रूपमद्वैतमद्भुतम् । तामेवानन्यमनसा ध्यात्वा किंचिद्विहस्य स' इत्यादि । मुखे सर्वादौ भवा मुख्या । 'अहमस्मि प्रथमजा ऋतस्ये'ति श्रुतेः । 'मृड सुखने' ।

नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ।
मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी ॥ १६६ ॥
पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी ।
माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥ १६७ ॥

जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमोनम' इति शिवरहस्यात् । सुखप्रदस्य मृडस्य परमशिवस्य पत्नीत्यर्थे आनुगागमविशिष्टो ङीष् ॥

अथ परिभाषायामेकत्रिंशत्पदानि विभजते ॥ **शंभोर्भाले मज्जजीवामेदा-ञ्चरे त्र्यंघ्रि । भवद्दढभण्डो मन्दो गौणार्धे भूशिलापाढे ॥ २२ ॥**

मित्राणां सूर्याणामिव रूपमस्याः । 'सुहृत्स्वरूपे'ति वा ॥ १६५ ॥ नित्यं सर्वकालं तृप्ता । नित्येन स्वरूपानन्देन वा तृप्ता । भक्तानां निधिरिव । कामपूरकत्वात् । नात्र पाक्षिकोऽपि निर्ध्यैनम इति प्रयोगः । जगन्नियामकत्वान्नियन्त्री । निखिलस्य कृत्स्नप्रपञ्चस्येश्वरी । मैत्रीकरुणामुदितोपेक्षा चेति चतस्रो वासनाः । सुखिषु मैत्री दुःखिषु करुणा पुण्येषु मुदिता पापिपूपेक्षेति व्यवस्थिता इति विष्णुभागवते प्रसिद्धाः । एताश्चित्तस्य शोधिकाः । तदुक्तमभियुक्तैः 'मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः । ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धु'मिति । तथाच योगसूत्रमपि 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादन'मिति । इह सुखादिशब्दैस्तद्वन्तः प्रतिपादिता इति राजमार्तण्डः । मैत्र्यादिभिश्चतसृभिर्वासनाभिर्लभ्या । परमशिवस्य महाप्रलयकालीने ताण्डवे ब्रह्मविष्ण्वादेरपि नाशात्तदैवैव तत्साक्षिणी । उक्तंच 'कल्पोपसंहरणकल्पिततण्डवस्य देवस्य खण्डपरशोः परभैरवस्य । पाशाङ्कुशैक्षवशरासनपुष्पबाणैः सा साक्षिणी विजयते तव मूर्तिरेके'ति । गुरुकलायामपि 'सुरेन्द्ररुद्रपद्मजाच्युतादयोऽपि ये मृतेर्वशंवदा न तत्स्त्रियः सुवासिनीपदं स्पृशः । महेश्वरस्य मृत्युघस्मरस्य साक्षिणी तु या सुमङ्गलीरियं वधूरिमां समेत पश्यते'ति ॥ १६६ ॥ देहे दशमधातुः पराशक्तिरित्युच्यते । तदुक्तं कामिकागमे 'त्वगसृङ्मांसमेदोस्थिधातवः शक्तिमूलकाः । मज्जशुक्रप्राणजीवधातवः शिवमूलकाः ॥ नवधातुरयं देहो नवयोनिसमुद्भवः । दशमी धातुरेकैव पराशक्तिरितीरिते'ति । यद्वा परोत्कृष्टा शक्तिः । शक्तिनाम्नस्वरूपत्वादेवोत्कर्षः 'अन्येभ्योऽपि दृश्यत' इति दीर्घः । 'परास्य शक्तिर्विविधैव श्रूयत' इति श्रुतिः । लैङ्गेऽपि 'यस्य यस्य पदार्थस्य या या शक्तिरुदाहृता । सा सा विश्वेश्वरी देवी स स सर्वो महेश्वरः ॥ शक्तिमन्तः पदार्था ये ते वै शर्वविभूतयः । पदार्थशक्तयो यायास्तास्ता गौरीं विदुर्बुधा' इति । परा निष्ठा उत्कृष्टा समाप्तिर्ज्ञानविशेषरूपा । सर्वकर्मणां सर्वजगतां चात्रैव समाप्तेः । उक्तंच गीतासु 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत' इति । सच ज्ञानविशेषः सूतगीतायामुक्तः 'शास्त्राचार्योपदेशेन तर्कैः शास्त्रानुसारिभिः । सर्वसाक्षितयात्मानं

सम्यद्विश्रिश्य सुस्थिरः ॥ स्वात्मनोऽन्यतया भातं समस्तमविशेषतः। स्वात्ममात्रतया बुद्धा पुनः स्वात्मानमद्वयम् ॥ शुद्धं ब्रह्मेति निश्चित्य स्वयं स्वानुभवेन च। निश्चयं च स्वचिन्मात्रे विलाप्याविक्रियेऽद्वये ॥ विलापनं च चिद्रूपं बुद्धा केवलरूपतः। स्वयं तिष्ठेदयं साक्षाद्ब्रह्मवित्प्रवरो मुनिः ॥ ईदृशीयं परा निष्ठा श्रौती स्वानुभवात्मिकेति। अत्र परस्यैशक्तयै नम इति परायैनिष्ठायै नम इत्याकारकः प्रयोगः। 'अम्बयेपवमानायेद'मित्यादाविवोभयत्र चतुर्थ्यन्तताया न्यायसिद्धत्वात्। 'पराशक्तिमित्रं नुमः पञ्चवक्त्र'मिति भगवत्पादानां प्रयोगाच्चैकं पदं तदा पराशक्तयैनम इत्येव प्रयुज्यताम्। परा मन्त्रस्य या शक्तिस्तद्रूपेत्यर्थः। प्रकृष्टेन वृत्तिभिन्नेन नित्येन ज्ञानेन घनं निरन्तरमविद्यालेशेनाप्यस्पृष्टं रूपमस्याः। तथाच काण्वेषु श्रूयते 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'ति। माध्वीशब्दः परिपन्थिशब्दवच्छान्दसोऽपि लोके प्रयुज्यते। 'स्वब्रह्मभावहन्त्रीं साधुविनिन्द्यां सुरां च सरणिं च। अहह कथं नु भजध्वे माध्वीं गौडीं च मोहिनीं मन्दां' इति। तेन 'छन्दसि परिपन्थिपरिपरिणा'वितिवत् 'ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसी'त्यपि प्रयोगवशाद्भाषासमुच्चयपरं सूत्रैकदेशांशे व्याख्येयम्। छान्दसत्वेऽपि वा नात्र दुष्यति। माध्व्या द्राक्षादन्यमदिरायाः पानेनालसा। अन्तरेकनिष्ठतया शीतला। अतएव मत्तेव मत्ता। यद्वा मच्छब्दोऽहमर्थकस्तस्य भावो मत्ता। परशिवनिष्ठपराहन्तारूपेत्यर्थः। मातृका अकारादिक्षकारान्तास्तासां वर्णाः शुक्लादिरूपाणि तान्येव रूपं स्वरूपमस्याः। तानि च सनत्कुमारसंहितायाम् 'अकाराद्याः स्वरा धूम्राः सिन्दूराभास्तु कादयः। डादिफान्ता गौरवर्णा अरुणाः पञ्च वादयः ॥ लकाराद्याः काञ्चनाभा हकारान्त्यौ तडिन्निभा'विति। तन्त्रान्तरे तु 'स्फटिकाभाः स्वराः प्रोक्ताः स्पर्शा विद्रुमसंनिभाः। यादयो नव पीताः स्युः क्षकारस्त्वरुणो मत' इति। सर्वे वर्णाः शुक्ला इत्यपि क्वचित्। मातृकाविवेके तु 'अकारं सर्वदेवत्यं रक्तं सर्ववशंकर'मित्यादिना प्रत्यक्षरं वर्णविशेष उक्तः। यद्वा एकपञ्चाशन्मातृकावर्णा एव रूपमस्या इति। अथवा वर्णा एव रूपा निरूपका वाचका यस्याः। तदुक्तं यज्ञवैभवखण्डे 'यथा परतरः शंभुर्द्विधा शक्तिशिवात्मना। तथैव मातृकादेवी द्विधाभूता सती स्वयम् ॥ एकाकारेण शक्तेस्तु वाचिका चेतरेण तु। शिवस्य वाचिका साक्षाद्विद्येयं पदगामिनी'ति। अकारादयः श्रीकण्ठादिवाचकाः पूर्णोदर्यादिवाचकाश्चेत्यस्यार्थ उक्तस्तट्टीकायाम्। अक्षमालास्वरूपिणीति वा। उक्तंच ज्ञानार्णवे 'अकारः प्रथमो देवी क्षकारोऽन्यस्ततः परम्। अक्षमालेति विख्याता मातृकावर्णरूपिणी। शब्दब्रह्मस्वरूपेयं शब्दातीतं तु जप्यत' इति। मातृकावर्णान् रूपयति जनयतीति वा। अनुत्तराख्यशिवस्येच्छाशक्त्या योगादिक्रमेण वर्णोत्पत्तिप्रकारः सौभाग्यसुधोदये द्रष्टव्यः। मातृकावर्णानामेव श्रीचक्रात्मकत्वं मातृकाविवेके षष्ठे पटले विस्तरेण प्रतिपादितम्। अतएव सनन्दनसंहितायां मातृकाचक्रयोरैक्यविभावनं कैलासप्रस्तार इति व्यवहृतं तादृशरूपवतीति वा। प्रचण्डाहेति

महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्यशालिनी ॥ १६८ ॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥ १६९ ॥

वक्ष्यमाणनाम्नोरन्ययोर्वैक्यमूरीकृत्य 'स्कन्दोत्पादेन मातृके'ति देवीपुराणे निरुक्त-दर्शनाच्च मातृकेति अवर्णरूपिणीति च नामद्वयं सुवचम् ॥ १६७ ॥ महाकैलासो नाम कैलासादतीव परतो लोकः परमशिवावासस्थानत्वेन शिवपुराणादौ प्रसिद्धः । पूर्वनामोक्ताभेदभावनाविशेषो वा कैलासः । 'एतत्कैलाससंज्ञं पदमकलपदं बिन्दुरूपी स्वरूपी यत्रास्ते देवदेवः' इत्यादित्रिपुरासारोक्तब्रह्मरन्ध्रस्थसहस्रारमेव वा कैलासः । सर्वाशन्यादितादात्म्यनित्यतादात्म्याख्यप्रस्तारान्तरापेक्षयोत्तमत्वान्महान् स एव निलयो यस्याः । मृणालं बिसतन्तुः तद्वन्मृदवो दोर्लता यस्याः । पूज्यत्वान्महनीया । दयैव मूर्तिः स्वरूपं यस्याः । महाकैलासाधिपत्यं महासाम्राज्यं तच्छालिनी ॥ १६८ ॥ आत्मज्ञानरूपत्वादात्मविद्या । आत्माष्टाक्षरमन्त्ररूपा वा । अतएव महाविद्या । महती च सा विद्या च । सर्वानर्थनिवारकत्वान्महत्त्वम् । नवदुर्गाविद्याया अपि महाविद्येति संज्ञा तद्रूपा वा । श्रीविद्या पञ्चदशीस्वरूपा । उक्तं च विष्णुपुराणे 'यज्ञ-विद्या महाविद्या गुह्यविद्या च शोभने । आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ आन्वीक्षिकी त्रयीवार्ता दण्डनीतिस्त्वमेवचे'ति । अत्र व्याख्यातारः । कर्मविद्या, विश्वरूपाद्युपासना, मन्त्रविद्या, ब्रह्मविद्या चेति विद्यापदचतुष्टयार्थः । वार्ता शिल्प-शास्त्रायुर्वेदादिः । दण्डनीती राजनीतिरिति । कामो महाकामेशस्तेन सेवितोपासिता । यद्वा । कामोऽनङ्गस्तेन सेविता स्यूता । 'सीवनं सेवनं स्यूति'रिति कोशात् । श्रूयते चारुणोपनिषदि 'पुत्रो निर्ऋत्या वैदेहः । अचेता यश्च चेतनः । स तं मणिमविन्दत् । सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत् । सोऽजिह्वो असश्चत । नैनमृषिमवि-दित्वा नगरं प्रविशेत् । यदि प्रविशेत् मिथो चरित्वा प्रविशेत् । तत्संभवस्य व्रत'-मिति । निर्ऋत्या लक्ष्म्याः पुत्रो वैदेही । विदेहोऽनङ्गो मन्मथः । अनङ्गत्वादेवाचेता नेत्राङ्गुलिग्रीवाजिह्वारहितश्च । सोऽन्धो मणिं विद्यारत्नमविन्दत् । तत आवयत् असीव्यत् । ततो ग्रीवायां धृतवानास्वादितवांश्च । तेन मन्त्रद्रष्टृत्वादयमेवर्षिः । अस्य ज्ञानोत्तरं नगरे बाह्यचक्रे प्रवेशः । पूजाटोपो व्यर्थत्वात्कृतकार्यत्वाच्च न कार्यः । यदि सर्वथा पूजनेच्छा तदा शिवशक्तिसामरस्यात्मकं मिथुनीभावं विज्ञाय कुर्यात् । तत्सामरस्य-मेव चित्तसंभवस्य मन्मथस्य रहस्यतरं व्रतमिति श्रुत्यर्थः । शिवशक्तिसामरस्यम-विज्ञाय क्रियमाणं पूजनं न तथा फलतीति तात्पर्यार्थः । षोडशानामक्षराणां समा-हारः षोडशाक्षरी । श्रीयुक्ता च सा षोडशाक्षरी च सा विद्या चेति तथा । यद्यपि गौडपादीयसूत्रेऽप्यविद्याष्टाविंशतिवर्णविशिष्टेति पठ्यते तथापि तत्रत्यकूटत्रयस्य पञ्चदशाक्षररूपतया विभज्य गणनाभिप्रायमित्यविरोधः । श्रीति षोडशमक्षरं

कटाक्षकिंकरीभूतकमलाकोटिसेविता ।
शिरस्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा ॥ १७० ॥
हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥ १७१ ॥

यस्यां तादृशी च सा विद्या चेति वा । गौराद्यन्तर्गतस्य पिप्पल्यादेराकृतिगणत्वान्ङीप् । ब्रह्मादीनामवस्थापीठलोकगुणादीनां वा कूटं समूहो यस्याम् । ब्राह्मभवादिकूटत्रयाभिन्ना वा । कामः परशिव एव कोटिरेकदेशो यस्याः सैव कामकोटिका । शिवशक्तिसामरस्यपरब्रह्मरूपत्वात् ॥ १६९ ॥ कटाक्षस्य दृगेकदेशपातस्य किंकरीभूताभिः कमलानां लक्ष्मीणां कोटिभिः सेविता । यस्मिन्नीपदवलोकनं तं पारेपरार्धं लक्ष्म्यो वृणत इति तात्पर्यम् । शिरसि ब्रह्मरन्ध्रे गुरुरूपतया स्थिता । ब्रह्मरन्ध्रस्याधोभागे चन्द्रोऽस्ति स च विद्यातृतीयकूटात्मक इत्याशयेनाह । चन्द्रनिभा भालहृल्लेखा बिन्दुरूपेण तिष्ठतीति भालस्था । तदुपर्यर्धचन्द्ररूपेण तिष्ठतीति द्योतनायाह । इन्द्रधनुःप्रभा । उक्तंच तिलाहृदये 'दीपाकारोऽर्धमात्रश्च ललाटे वृत्त इष्यते । अर्धचन्द्रस्तथाकारः पादमात्रस्तदूर्ध्वतः' इति ॥ १७० ॥ हृदये ध्येयत्वेन तिष्ठतीति तथा । यद्वा पराबीजं हृदयमित्युच्यते । 'प्रभुहृदयज्ञातुः पदेपदे सुखानि भवन्ती'ति कल्पसूत्रे प्रयोगात् । परमेश्वरहृदयाख्योपनिषदेव वा हृदयेनोच्यते । तत्रान्तर्यामितया प्रतिपाद्यतया वा तिष्ठति । अथवा हृदयस्य सर्वजगद्बीजत्वात्तत्र जगद्रूपेण स्थिता । तदुक्तमनुत्तरत्रिंशिकाख्ये 'यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः । तथा हृदयबीजस्थं जगदेतच्चराचर'मिति ॥

अथ परिभाषायां पञ्चत्रिंशत्पदानि विभजते ॥ **भेदभुवि द्व्यंघ्रिभुवो गुणगणजार्धे विभेजेध्यं । भर्गो रोगेणैको मूलगुरोर्दण्डमुण्डशिला ॥ २३ ॥**
अत्रैकपदेनैकादशाक्षरमेकं नामेत्यर्थः ॥ २३ ॥

हृदये तावत्सूर्यमण्डलमस्ति तच्च विद्याद्वितीयकूटमित्याशयेनाह । रविप्रख्या । निभप्रख्यशब्दौ सादृश्यपरावपीह तृतीयद्वितीयकूटयोस्तदभेदादभेदपरौ । स्वस्मिन्नेव मादृशः पुरुष इति व्यवहारदर्शनात् । सूर्यसमानकान्तिमतीति वा । मूलाधारपद्मकर्णिकामध्ये त्रिकोणमस्ति । तदन्तरेऽग्निमण्डलम् । तच्च प्रथमकूटस्वरूपं तदेतदाह । त्रिकोणस्यान्तरे मध्ये दीपवद्दीपिका तदभिन्नेत्यर्थः । तदुक्तं तन्त्रराजे 'नित्यानित्योदिते मूलाधारमध्येऽस्ति पावकः । सर्वेषां प्राणिनां तद्वद्धृदये च प्रभाकरः ॥ मूर्धनि ब्रह्मरन्ध्राधश्चन्द्रमाश्च व्यवस्थितः । तत्रयात्मकमेव स्यादाद्यानित्यात्रिखण्डक'मिति । अथवा पूर्वोक्तं रवितुल्यत्वमुपमानोपमेयनिष्ठयोर्वस्तुतो भिन्नयोरपि धर्मयोः श्लेषभित्तिकाभेदाध्यवसायेनैकीकुर्वन्साधारणधर्मं निर्दिशति—**त्रिकोणेति ।** देवीपक्षेतु पूर्ववयोजनैव । रविपक्षे यथा । मेरुं प्रदक्षिणीकुर्वन् रविरष्टकोणात्मकस्य मेरोर्त्रींस्त्रीनेव कोणानवभासयति । तथाहि इन्द्रपुरे मध्याह्ने सूर्ये स्थिते सौम्ययाम्यपुरयो-

दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥ १७२ ॥

रस्तमयोदयौ । एवं कोणत्रयतया स्थितं पुरत्रयमेव भासयति । ईशाग्निकोणौ तु त्रिकोणरेखामध्यपतिताविति तद्भासनमर्थायातम् । ईशे तदानीं तृतीयो यामः । आग्नेये तु प्रथमो यामः । एवं दिक्कयं मध्यपतितत्वाद्विदिग्द्वयं च भासयति । अग्निपुरे यदा मध्याह्नेऽस्तदेशनिर्ऋत्योरस्तमयोदयौ । इन्द्रयमपुरयोस्तृतीयप्रथमयामौ । एवं षट्कोणत्रयतया स्थितं विदिक्कयं तद्रेखास्थानापन्नं दिग्द्वयं च भासयति । एवं याम्यादिपुरेषु मध्याह्नकाल ऊह्यम् । तदुक्तं विष्णुपुराणे 'शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् । त्रिकोणौ द्वौ विकोणस्थस्त्रीन्कोणान्द्वे पुरे तथे'ति । स्वावस्थितिकोण एकः । स्वदक्षिणवामकोणौ द्वौ । एवं त्रीन्कोणान् तदन्तरे च तन्मध्यस्थिते स्वदक्षिणवामरेखे चेति पुरपञ्चकं दीपयति प्रकाशयतीति त्रिकोणान्तरदीपिका । दक्षस्य कन्या दाक्षायणी । लोहितादित्वात्ष्फः । अश्विन्यादिरूपा वा । 'दाक्षायणी त्वपर्णायां रोहिण्यां तारकासु चे'ति विश्वः । दर्शपूर्णमासयोरावृत्तिर्दाक्षायणयज्ञपदेनोच्यते तद्रूपा वा । दैत्यानां भण्डासुरादीनां हन्त्री । दक्षो द्विविधः । एकः प्रजापतित्वेन प्रसिद्धः । अन्यो मानुषो राजा तस्यैवावतारविशेषः । उभयोरपि यज्ञं विनाशयितुं शीलमस्याः । ताच्छील्ये णिनिः । शिवकृतेऽपि यज्ञनाशे देव्या निमित्तत्वात्कर्तृत्वव्यपदेशः । तदुक्तं ब्रह्मपुराणवायुपुराणयोः 'अभिव्याहृत्य सप्तर्षीन् दक्षं सोऽभ्यशपत्पुनः । भविता मानुषो राजा चाक्षुषस्य त्वमन्वये । प्राचीनबर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः । दक्ष इत्येव नाम्ना त्वं मारिषायां जनिष्यसि । कन्यायां शाखिनां चैव प्राप्ते वै चाक्षुषान्तरे । अहं तत्रापि ते यज्ञं हन्मि देव्याः प्रियेप्सये'ति । यद्यत्रोपान्त्यस्वरोऽकारः पठ्यते तदा विनाशनशब्दाल्युडन्ताङ्ङीप् । इकारपाठे तु णिन्यन्तात् । एवमन्यत्राप्यूह्यम् ॥ १७१ ॥

इति भास्कररायेण कृते सौभाग्यभास्करे । षष्ठेन शतकेनाभूत्सुषुम्णा सप्तमी कला ॥ ६०० ॥ इति श्रीसौभाग्यभास्कराभिख्ये ललितासहस्रनामभाष्ये षष्ठशतकं नाम सप्तमी कला ॥ ७ ॥

दरमीषद्यथा स्यात्तथा आन्दोलितानि चञ्चलानि दीर्घाणि आकर्णान्तिकं विश्रान्तान्यक्षीणि यस्याः । यद्वा दरं भयमान्दोलितमस्थिरीकृतं नाशितं यैस्तादृशानि दीर्घाक्षीणि यस्याः । कटाक्षपातमात्रेण भयनाश इति यावत् । दरहासेनेषत्स्मितेनोज्ज्वलच्छोभमानं मुखं यस्याः । गुरुरेव मूर्तिः शरीरं यस्याः । अतएव सुन्दरीतापनीये श्रूयते 'यथा घटश्च कलशः कुम्भश्चैकार्थवाचकाः । तथा मन्त्रो देवता च गुरुश्चैकार्थवाचकाः' इति । गुरुपदनिरुक्तिरपि शक्तिरहस्ये 'गुकारस्त्वन्धकारः स्याद्रुकारस्तन्

देवेशी दण्डनीतिस्था दहराकाशरूपिणी।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता॥ १७२॥

शिवर्तक' इति। अन्यत्रापि 'गुकारः सदिति प्रोक्तो रुकारो ज्ञानवाचकः। ब्रह्मज्ञानैकरूपत्वाद्गुरित्यभिधीयत' इति। 'तामिच्छाविग्रहां देवीं गुरुरूपां विभावये'दिति नित्याहृदयेऽपि। गुणानां निधिः शेवधिः। 'कर्मण्यधिकरणे चे'ति किः। सत्त्वादिगुणानां सत्त्वादिजातिभिन्नित्वेऽपि व्यक्त्यानन्त्यमिति सांख्यसिद्धान्तात्। अतएव सांख्यप्रवचनसूत्रं 'लघुत्वादिधर्मैरन्योन्यं साधर्म्यं वैधर्म्यं च गुणाना'मित्युपपद्यते। सत्त्वादयश्च द्रव्यत्वेऽपि पुरुषोपकरणत्वाद्गुणा इत्युच्यन्ते। ईदृशानां गुणानां निधिर्वा। यद्वा गुणा व्यूहरूपा निधिसंख्या यस्याः। नवव्यूहात्मकत्वरूपगुणवतीति यावत्। यदाहुः 'नवव्यूहात्मको देवः परानन्दः परात्मक' इति। 'कालव्यूहः कुलव्यूहो नामव्यूहस्तथैवच। ज्ञानव्यूहस्तथा चित्तव्यूहः स्यात्तदनन्तरम्। नादव्यूहस्तथा बिन्दुव्यूहः स्यात्तदनन्तरम्। कलव्यूहस्तथा जीवव्यूहः स्यादिति ते नवे'ति च। एतल्लक्षणानि च सौन्दर्यलहर्यां 'तवाज्ञाचक्रस्थ'मिति श्लोकव्याख्यानावसरे लेशेन प्रपञ्चितानि। यद्वा गुणो रज्जुः साचेह नौकाबन्धनी वटीरिकानाम्नी लक्षणया गृह्यते। सा नितरां धीयतेऽस्यामिति गुणनिधिः। एवं हि मात्स्यकालीपुराणयोः कथा स्मर्यते 'प्रलयकाले मनुना भगवदाज्ञानुसारेण सर्वाणि बीजानि ऋषींश्च नौकायां निवेश्य मत्स्यावतारस्य भगवतः शृङ्गे सा नौका रज्ज्वा बद्धा। सा रज्जुरम्बयाधिष्ठिता सती दार्ढ्यमापेदे' इति। तदुक्तं 'नवयोजनदीर्घां तु यामत्रयसुविस्तृताम्। कुरुष्व चर्मणा तूर्णं बृहतीं तु वटीरिकाम्॥ जगद्धात्री महामाया लोकमाता जगन्मयी। दृढयिष्यति तां रज्जुं न त्रुट्यति यथा तथे'ति मनुं प्रति विष्णोर्वचनेन। तत्रैव स्थलान्तरे 'योगनिद्रा जगद्धात्री समासीद्वटीरिका'मिति। गवां धेनूनां माता सुरभिरूपा। संभवन्तोऽन्येऽपि गोपदस्यार्था वागादयो ग्राह्याः। तथाच विश्वः 'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः। अञ्जनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मते'ति अनेकार्थध्वनिमञ्जरी च 'बाणे वाचि पशौ भूमौ दिशि रश्मौ जलेऽक्षिणि। स्वर्गे मातरि वज्रेऽग्नौ मुखे सत्ये च गोध्वनि'रिति। गुहस्य स्कन्दस्य जन्मभूरुत्पत्तिस्थानम्। यद्वा 'गुहू संवरण' इति धातोरविद्यासंवृता गुहा जीवाः तेषां जन्मस्थानम्। 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती'त्यादिश्रुतेः। याज्ञवल्क्यस्मृतिरपि 'निःसरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः। सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति ही'ति॥ १७२॥ देवानां ब्रह्मविष्ण्वादीनामीशी ईश्वरी। दण्डनीतावर्थशास्त्रे तिष्ठतीति तथा। नीतिशास्त्रोक्तज्ञापि देव्येवेति यावत्। तदुक्तं देवीपुराणे 'नयानयगतांल्लोकानविकल्पे नियोजनात्। दण्डनाद्दमनाद्वापि दण्डनीतिरिति स्मृते'ति। दहरमल्पमाकाशं हृदयकुहरवर्ति तदेव रूपमस्याः। 'दहर उत्तरेभ्य' इत्युत्तरमीमांसाधिकरणे

कलात्मिका कलानाथा काव्यालापविमोदिनी ।
सचामररमावाणीसव्यदक्षिणसेविता ॥ १७४ ॥

'अथ यदस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्य'मिति श्रुतौ दहराकाशस्यैव परब्रह्मत्वनिरूपणात् । **प्रतिपत्तिथिर्मुख्या** आद्या यस्मिन् राका पूर्णिमातिथिरन्ते यस्मिंस्तस्मिंस्तिथिमण्डले **पञ्चदशतिथिसमूहे पूजिता** । तिथिभेदेन पूजाभेदस्य तन्त्रेषु कथनात्तादृशप्रकारविशेषैरर्चितेत्यर्थः । यद्वा प्रतिपद्राकाशब्दौ कामेश्वरीचित्रापरौ । तिथिशब्दो नित्यापरः । तेन नित्यामण्डलेन पूजिता त्रिकोणरेखात्रयरूपेणावृता । अथवा प्रतिपन्मुख्या राकान्ताश्च तिथयो यासां देवतानां तासां मण्डलेन समूहेन पूजिता । ताश्च वराहपुराणे 'कथमेषः समुत्पत्तिरश्विनोर्वा महामुने । गौर्या गणपतेर्वापि नागानां वा गुहस्य च ॥ आदित्यस्य च मातॄणां दुर्गाया वा दिशां तथा । धनदस्य च विष्णोर्वा धर्मस्य परमेष्ठिनः ॥ शंभोर्वापि पितॄणां वा तथा चन्द्रमसो मुने । शरीरे देवताश्चैताः कथं मूर्तित्वमागताः ॥ किंच तासां मुने भोज्यं काश्च संज्ञास्तिथिश्च का' इति प्रश्ने षोडशभिरध्यायैः प्रतिपदातिथिदेवतात्वेन क्रमेणाग्न्यादीनामुत्पत्तय उक्ताः । अत्र परमेष्ठिशब्दो विशेषणमात्रम् । अतएवोक्तं कादिमतेऽपि 'वह्निर्दस्रावुमा विघ्नो भुजंगः षण्मुखो रविः । मातरश्च तथा दुर्गा दिशो धनदकेशवौ । यमो हरः शशी चेति तिथीशाः परिकीर्तिता' इति । तत्र त्वमावास्या पञ्चदशस्थाने गणिता, पूर्णिमा तु षोडशस्थाने, अत्र तु राकैव पञ्चदशीति विशेषः । प्रकृते त्वविशेषाद्वाराहोक्ताः षोडशापि देवता गृह्यन्ते ॥ १७३ ॥ अत्र कलाशब्देन वह्नेर्दशकलाः सूर्यस्य द्वादशकलाश्चन्द्रस्य षोडशकलाश्चतुःषष्टिसंख्याकत्वादिना प्रसिद्धाः । अन्याश्च कला गृह्यन्ते । 'उत्पत्तिर्जागरो बोधो व्यावृत्तिर्मनसः सदा । कलाचतुष्टयं जाग्रदवस्थायां व्यवस्थितम् । जाग्रत्सर्वगुणैः प्रोक्ता केवलं शक्तिरूपिणी'ति । तथा 'मरणं विस्मृतिर्मूर्च्छा निद्रा च तमसा वृता । सुषुप्तेषु कला ज्ञेयास्ताः सर्वाः श्रीकलात्मिकाः' । तथा 'अभिलाषो भ्रमश्चिन्ता विषयेषु पुनः स्मृतिः । कलाचतुष्टयं देवी स्वप्नावस्था विधीयते । शिवरूपाः शक्तिरूपास्ताः कलास्त्रिपुरात्मिकाः' । तथा 'वैराग्यं च मुमुक्षुत्वं समाधिर्विमलं मनः । सदसद्वस्तुनिर्धारस्तुर्यावस्थाः कला इमाः' । दूतीयागप्रकरणे षोडश कामकला उक्ताः । अन्तरदूतीप्रकरणे श्रीविद्यायाः षोडशकला उक्ताः । एवं बिन्दुर्धचन्द्रोधिन्यादीनां पार्थक्येन काश्चन कलाः स्वच्छन्दभैरवादावुक्तास्तादृशनिखिलकलास्वरूपेत्यर्थः । एतासां कलानां नाथा स्वामिनी च । चन्द्रमण्डलस्य श्रीचक्रस्वरूपत्वाच्चन्द्ररूपेत्यर्थो वा । काव्यानां वाल्मीक्यादिमहाकविकृतप्रबन्धविशेषाणामष्टादशलक्षणलक्षितानां रूपकभेदाभिन्नानामालापेन विशिष्य मोदत इति तथा । चामराभ्यां सहिते सचामरे तादृशीभ्यां रमावाणीभ्यां लक्ष्मीसरस्वतीभ्यां सव्ये दक्षिणे क्रमेण सेविता वीजिता ॥ १७४ ॥ सर्वजगतामुत्पादकत्वादादि-

आदिशक्तिरमेयात्मा परमा पावनाकृतिः।
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा ॥ १७५ ॥

कारणभूता च सा शक्तिश्च । मातुमशक्या अमेया । न विद्यते मेयं यस्या इति वा । यदपेक्षयाऽतिरिक्तं मेयं नास्तीत्यर्थः । तदुक्तं लिङ्गपुराणे 'स्वर्गपातालभूलोकान्तब्रह्माण्डावरणाष्टके । मेयं सर्वमुमारूपं माता देवो महेश्वर' इति । आत्मशब्देन जीवः परमशब्दोत्तरं चात्मानुषङ्गात्परमात्मा चेति नामद्वयेन कथ्यते । उक्तंच लैङ्गे 'विष्णुलिङ्गा यथा तावदमी च बहुधा स्मृताः । जीवाः सर्वे तथा शर्वाः परमात्मा च स स्मृत' इति । शिवपुराणेऽपि 'आत्मा तस्याष्टमी मूर्तिः शिवस्य परमा तनुः । व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मक'मिति । अस्मिन्पक्षे आत्मने नमः परमायात्मने नम इति नामद्वयप्रयोगः । 'नमो भवाय च रुद्राय च नम' इत्यादिमन्त्राणामप्युभयतोनमस्कारत्वपक्षे सकृत्पठितस्यापि नमःशब्दस्य रुद्रशब्दस्य सर्वशब्दोभयशेषत्वेन पुनरावृत्तिवदात्मशब्दस्यावृत्तिः । यद्वा । आत्मशब्देन ब्रह्मैव । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सततो भावस्तस्मादात्मेति कीर्त्यत' इति वचनात् आत्मशब्देन शरीरमेवोच्यते । तथाच वासिष्ठलैङ्गे 'गौरीरूपाणि सर्वाणि शरीराणि शरीरिणाम् । शरीरिणस्तथा सर्वे शंकरांशा व्यवस्थिता' इति । एवं 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिष्वि'ति विश्वप्रकाशोक्तान्यर्थान्तराण्यपि योज्यानि । 'या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिते'त्यादिवचनात् । परं ब्रह्म माति परिच्छिनत्तीति परमा । परस्य शिवस्य मा लक्ष्मीर्वा । यद्वा परब्रह्मणो रूपचतुष्कमस्ति तस्मात्परमोत्कृष्टा । तदुक्तं विष्णुपुराणे 'परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विजाः । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम् ॥ प्रधानपुरुषव्यक्तकालानां परमं हि यत् । पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम् ॥ प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः । रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतव' इति । पावनी पावयित्री आकृतिः शरीरं चरित्रं वा ज्ञानं वा यस्याः । तथाच याज्ञवल्क्यस्मृतिः 'भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम् । क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मते'ति । अनेका अनन्ताः कोटयो ये ब्रह्माण्डास्तेषां जननी जनयित्री । यद्वा अनेककोटयो ब्रह्माण्डा येषां ते तथा । अभिमन्यमानत्वादिरूपः संबन्धः षष्ठ्यर्थः । तेषां विराडादीनां जननी । विकारषोडशान्तर्वर्तिपञ्चीकृतस्थूलभूतकार्यो हि ब्रह्माण्डः । तदभिमानी विराडुच्यते । ब्रह्माण्डान्तर्वर्तिसमष्टिलिङ्गशरीराभिमानी स्वराट् । तदुभयकारणाव्याकृताभिमानी सम्राट् । तदुक्तं 'प्राधान्येन विराडात्मा ब्रह्माण्डमभिमन्यते । स्वराट् स्वरूपमुभयं सम्राडित्यब्रवीच्छ्रुति'रिति । दिव्यो रमणीयो विग्रहो देहो यस्याः । दिव्यन्तरिक्षे भवो दिव्यो विग्रहो रणो यस्या वा । 'तत्रापि सा निराधारा युयुधे तेन चण्डिके'ति मार्कण्डेयपुराणवचनात् । विस्तारः प्रविभागो वा विग्रहपदार्थः । 'विग्रहः समरे देहे विस्तारप्रविभागयो'रिति

क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ १७६ ॥

मेदिनी ॥ १७५ ॥ कामं बीजं करोतीति वा कामबीजस्वरूपेति वा क्लींकारस्य शिवकामस्य स्त्रीति वा क्लींकारी । निखिलधर्मराहित्येनैकाकित्वात्केवला । 'तद्विमुक्तस्तु केवली'ति शिवसूत्रप्रसिद्धज्ञानविशेषो वा केवली । कात्स्न्यं निर्णीतार्थश्च केवलम् । मत्वर्थीयेऽचि तद्वती तदभिन्ना वा । 'केवलं ज्ञानमेदे स्यात्केवलश्चैककृत्स्नयोः । निर्णीते केवलं प्रोक्तं केवलः कुहने क्वचि'दिति विश्वः । यद्वा पूर्वोक्तकामबीजे केवलत्वं ककारलकारात्मकव्यञ्जनराहित्यं । तेन केवलतुर्यस्वरूपा कामकलेत्यर्थः । 'यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्था'मिति श्रुतेः । ईकारमात्रश्रवणं तु लकारकरराहित्येन श्रवणं अतस्तद्वान् । सुकृतस्य सत्कर्मणः पन्थानमुत्तमलोकान्नायाति किंतु निर्गुणज्ञानस्यैव लोकं प्राप्नोति । कामबीजमात्रेण त्रिवर्गः कामकलामात्रेण तु मोक्ष इति पर्यवसितोऽर्थः । तमेवाह नामद्वयेन । गुहां प्रविष्टा गुह्या । अतिरहस्यार्था इति यावत् । केवलस्य भावो धर्मिमात्रावशेषः कैवल्यं पञ्चमी मुक्तिस्तदेव पदं ददाति । अथवा कैवल्यं च पदानि च स्थानानि च दातुं शीलमस्याः । कैवल्यशब्देन योगशास्त्रान्तिमसूत्रेण कैवल्यं स्वरूपं 'प्रतिष्ठा चितिशक्ते'रित्येतेन प्रतिपादितस्वरूपो मोक्ष उच्यते । 'चितिशक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेणावस्थानं कैवल्यमुच्यत' इति भोजराजवृत्तौ । पदशब्देन सालोक्यादिमुक्तिचतुष्टयं तासां स्थानविशेषरूपत्वात् । अत्रेदं बोध्यम् । प्रतीकाद्युपासनया सालोक्यम् । अन्तरेण प्रतीकं स्वात्मनः पृथक्त्वेनैश्वर्यविशेषविशिष्टतया देवताया उपासकस्य च रूपतः साम्यं सारूप्यम् । इयमेव सार्ष्टितेत्युच्यते । समानर्द्धितेत्यर्थः । सगुणं देवतारूपमहंग्रहेणोपास्यदेवतातादात्म्यं प्राप्नोति । तदिदं सायुज्यमूर्ध्वरेतसां स्वाश्रमे युक्तधर्मानुष्ठानवतां सामीप्यम् । 'एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतामाप्नोती'ति तैत्तिरीयश्रुतिरुक्तमुक्तित्रये प्रमाणम् । चतुर्थ्या तु मुण्डकश्रुतिः । 'तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः । सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मे'ति । सूर्यद्वारेणेत्यस्य सूर्योपलक्षितेनार्चिरादिमार्गेण गत्वा यत्र सत्यलोके स पुरुषो ब्रह्म वर्तते तत्र यान्तीत्यर्थात् । एताः कर्मफलभूता अनित्याः सातिशया मुक्तयः । अतएव स्थानवाचिना पदपदेनेह निर्दिष्टाः । या तु ज्ञानफलं निरतिशयानन्दलक्षणं कैवल्याख्या मुक्तिस्तस्यां तु तैत्तिरीयश्रुतिरेव प्रमाणम् । 'य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यꣳसलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोती'ति । अत्र केवलकर्मणां चन्द्रलोकप्राप्तिः । य एवंविद्वानिति विद्वच्छब्दाभिहितप्रतीकाद्युपासनात्रयवतो देवानां महिमानमित्यनेन सालोक्यादित्रयम् ।

ब्राह्मणो विद्वानित्यनेन ब्रह्मज्ञानवांस्तु एतौ कर्मोपासनप्राप्यौ सूर्यचन्द्रयोर्महिमानौ सातिशयत्वादिदोषवन्तौ बुद्ध्वा अभिजयत्यभितः पराकरोति । तस्मादधिकं निरतिशयं ब्रह्मणो महिमानमाप्नोतीत्यर्थः । तदिदमुपबृंहितं शक्तिरहस्ये 'आत्मबुद्ध्या प्रतीकेन मातृबुद्ध्याप्यहंधिया । कर्मणापि भजन्मर्त्यः कैवल्यपदमश्नुते' इति । तिसृभ्यो मूर्तिभ्यः पुरातनत्वात्त्रिपुरा । तदुक्तं 'मूर्तित्रयस्यापि पुरातनत्वात्तदम्बिकायात्रिपुरेति नामे'ति । गौडपादीयसूत्रमपि 'तत्त्वत्रयेण भिदे'ति । एकमेव ब्रह्म तत्त्वत्रयेण भिद्यतेत्यर्थः । तद्ब्राप्ये तु तत्त्वपदं गुणमूर्तिबीजजगत्पीठखण्डादिपरत्वेन बहुधा व्याख्यातमिति गुणादिभ्यः पुरेत्यर्थः । त्रिपुरार्णवे तु 'नाडीत्रयं तु त्रिपुरा सुषुम्णा पिङ्गला इडा । मनो बुद्धिस्तथा चित्तं पुरत्रयमुदाहृतम् ॥ तत्र तत्र वसत्येषा तस्मात्तु त्रिपुरा मते'त्युक्तम् । कालिकापुराणेऽपि 'त्रिकोणं मण्डलं चास्या' इत्यादि प्रस्तुत्य 'सर्वं त्रयं त्रयं यस्मात्तस्मात्तु त्रिपुरा मते'ति । 'देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्रास्त्रैलोक्यं त्रिपुरी त्रिपुष्करमथ त्रिब्रह्म वर्णास्त्रयः । यत्किंचिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः' इति । लघुस्तवे पूर्वचतुःशल्यां चतुर्थपटले 'त्रिपुरा परमा शक्ति'रित्यारभ्य 'त्रिपुरा ख्यातिमागते'त्यन्तेन ग्रन्थेनान्यान्यप्येतन्नामनिर्वचनान्युक्तानि तानि तु तट्टीकायामेवास्माभिर्व्याख्यास्यन्त इति तत्रैव द्रष्टव्यानि । त्रिभिर्जगद्भिर्वन्द्या । त्रयो जगद्वन्द्या यस्या वा । त्रैवार्षिककन्यारूपत्वात्त्रिमूर्तित्वम्, 'त्रिमूर्तिस्तु त्रिवर्षा स्या'दिति कन्याप्रकरणे धौम्यवचनात् । रक्तशुक्लमिश्रात्मकवर्णमूर्तित्रयरूपा वा । तत्तन्मन्त्राणामुद्धारस्तत्स्वरूपादिकं तन्त्रेषु व्यक्तम् । यद्वा ब्रह्मादिमूर्तित्रयं वामादित्रयं इच्छादिमूर्तित्रयं चास्या एवेति त्रिमूर्तित्वम् । तदुक्तं वराहपुराणे 'एवमुक्त्वा स्वयं ब्रह्मा वीक्षांचक्रे पिनाकिनम् । नारायणं च मनसा सस्मार परमेश्वरः ॥ ततो नारायणो देवो द्वाभ्यां मध्ये व्यवस्थितः । एकीभूय ततस्ते तु ब्रह्मविष्णुमहेश्वराः ॥ परस्परं सूक्ष्मदृष्ट्या वीक्षांचक्रुर्मुदान्विताः । ततस्तेषां त्रिधा दृष्टिर्भूता वै समजायत ॥ तस्यां दृष्ट्यां समुत्पन्ना कुमारी दिव्यरूपिणी'त्यादिना तां वर्णयित्वा 'अथ तां वीक्ष्य कन्यां तु ब्रह्मविष्णुमहेश्वराः । ऊचुः का त्वमसि ब्रूहि किंवा कार्यं शुचिस्मिते' इति प्रश्ने 'त्रिवर्णा च कुमारी सा कृष्णा शुक्ला च पीतिका । उवाच भगवद्दृष्टेर्येन जातास्मि सत्तमाः ॥ किं मां न वेत्थ सुश्रोणीं स्वशक्तिं परमेश्वरी'मित्युत्तरिते 'ततो ब्रह्मादयस्तस्यै त्रयस्तुष्टा वरं ददुः । नाम्नासि त्रिकला देवि पाहि विश्वं च सर्वदा ॥ अपराण्यपि नामानि भविष्यन्ति तवानघे । गुणोत्थानि महाभागे सर्वसिद्धिकराणि चे'त्याद्युक्त्वोक्तम् 'अन्यच्च कारणं देवि यद्वक्ष्यामि शृणुष्व तत् । सितरक्तकृष्णवर्णैस्त्रिवर्णासि वरानने ॥ मूर्तित्रयं त्रिभिर्वर्णैः कुरु देवि स्वविग्रहे । एवमुक्ता तदा देवैरकरोत्त्रिविधां तनुम् ॥ सितां रक्तां तथा कृष्णां त्रिमूर्तित्वं जगाम हे'त्याद्युक्त्वा ब्राह्मीवैष्णवीरौद्रीणां श्वेतमन्दरनीलपर्वतेषु तपश्चर्यादिकमुक्तम् । अन्यत्रापि 'एषा त्रिमूर्तिरुद्दिष्टा नयसिद्धान्तगामिनी । एषा श्वेता परा शक्तिः सात्त्विकी ब्रह्मसंस्थितिः ॥ एषैव रक्ता रजसि वैष्णवी परिकीर्तिता । एषैव कृष्णा तमसि रौद्री देवी प्रकीर्तिता ॥ परमात्मा यथा देव एक एव

त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥ १७७ ॥

त्रिधा स्थितः। प्रयोजनवशाच्छक्तिरेकैव त्रिविधा भवे'दिति। गौडपादीयं सूत्रमपि 'शांभवीविद्या श्यामा' इति। देवीभागवतेऽपि 'शांभवी शुक्लरूपा च श्रीविद्या रक्तरूपिका। श्यामला श्यामरूपा स्यादित्येता गुणशक्तय' इति। त्रिदशानां देवानां तिसृणां वा दशानामवस्थानां त्रियुक्तदशानां त्रयोदशानां विश्वेषां देवानां वा त्रिगुणितदशानां त्रिंशता लक्षणया त्रयस्त्रिंशद्गणानां चेश्वरी स्वामिनी ॥ १७६ ॥ त्रयाणामक्षराणां वाक्कामशक्तिबीजात्मकानां समाहारः। उक्तंच वामकेश्वरतन्त्रे 'वागीश्वरी ज्ञानशक्तिर्वाग्भवे मोक्षरूपिणी। कामराजे क्रियाशक्तिः कामेशी कामरूपिणी ॥ शक्तिबीजे पराशक्तिरिच्छैव शिवरूपिणी। एवं देवी त्र्यक्षरी तु महात्रिपुरसुन्दरी'ति। शुद्धविद्या कुमारीमन्त्ररूपा वा। तथाच गौडपादीये 'त्र्यक्षरी शुद्धविद्या कुमारी चे'ति। हृदयरूपा सत्यरूपा वा 'तदेतत्त्र्यक्षरं हृदय'मिति, 'तदेतत्त्र्यक्षरं सत्य'मिति च बृहदारण्यकात्। आईपञ्चवितयुगाक्षरमासाक्षरनिस्याक्षरसमाहारो वा ॥

अथ परिभाषायां पञ्चत्रिंशन्नामानि विभजते। **मन्दिरचरतां विभवः शैवो मार्गो महान् हितोऽनुगुणः। गौणीलीलार्द्रीभावार्धविभेदा भवेदेव** ॥ २४ ॥ स्पष्टार्थः ॥ २४ ॥

दिवि भवा दिव्या देवादयश्चेतनाचेतनात्मकपदार्थसमूहाः तेषां गन्धैः संबन्धैराढ्या परिपूर्णा। नतु राजादिरिव भौमैः पदार्थैः परिवृतेति यावत्। दिव्यगन्धो हरिचन्दनादिपरिमलो वा तेनाढ्या। 'गन्धद्वारां दुराधर्षा'मिति श्रुतेः। अथवा श्रोत्राकाशयोः संबन्धे 'संयमाद्दिव्य'मिति योगसूत्रे श्रवणेन्द्रियाकाशयोः संबन्धेन कृतसंयमस्य योगिनो दिव्यं श्रोत्रं भवति तेन दिव्यशब्दश्रवणं भवतीत्युक्तम्। तुल्यन्यायेन तत्सर्वेन्द्रियाणामुपलक्षणम्। तेन दिव्यगन्धा आढ्याः संपन्ना यया यत्प्रसादात्सेत्यर्थः। सिन्दूरस्य रक्तचूर्णस्य गोरोचनाया वा तिलकेन चित्रकेणाञ्चिता युक्ता। तिलकालकपरो वा तिलकशब्दः। तत्पक्षे सिन्दूरतिलकाभ्यामिति विग्रहः। सिन्दूरं रोचनारक्तचूर्णधातकिकासु चे'ति रभसः। 'तिलकं चित्रके प्राहुर्ललामे तिलकालके' इति विश्वः। नागैः स्त्रीभिश्च परिवृतेति वा। 'सिन्दूरतिलके नागे सिन्दूरतिलका स्त्रिया'मिति विश्वः। 'सिन्दूरतिलको हस्ती सिन्दुरतिलकाङ्गने'ति हेमचन्द्रः। गजगामिनी वा, स्त्रीभिः पूजितेति वा। 'अञ्चु गतिपूजनयो'रिति धातुपाठात्। तथाच विष्णुभागवते 'दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः' इति नन्दव्रजकुमारिका उपक्रम्य 'कात्यायनि महामाये महायोगिन्यधीश्वरि। नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ॥ इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः कुमारिका' इत्यादि। रुक्मिण्या अपि उद्वाहप्रकरणे कृष्णागमनविलम्बोत्तरं वचनम् 'दुर्भगाया हि मे धाता नानुकूलो महेश्वरः। देवी च विमुखा गौरी रुद्राणी गिरिजा सती' इत्याद्युक्त्वा 'कन्या चान्तःपुरात्प्रागाद्भटैर्गुप्ताऽम्बिकालयम्। पद्भ्यां

विनिर्ययौ द्रष्टुं भवानीपादपल्लव'मित्यादिना तदर्चनान्मनोरथसिद्ध्यादिकं वर्णितम् । उकारः शिववाचकस्तस्य मा लक्ष्मीः । उं परशिवं माति परिच्छिनत्तीति वा । अतसीकुसुमसंकाशत्वादभेदोपचारादुमा वा । हरिद्रावर्णवत्त्वादप्येवं वा । कीर्तिकान्तिस्वरूपत्वाद्वा । 'या देवी सर्वभूतेषु कान्तिरूपेणे'त्यादिवचनात् । 'उमातसीहैमवतीहरिद्राकीर्तिकान्तिष्वि'ति विश्वः । उ इत्यामन्त्रणे । मेति निषेधे । बाल्ये तपस्यन्ती भगवती मात्रागच्छ निषिद्धेत्युमा वा । तदुक्तं कालिकापुराणे 'यतो निरस्ता तपसे वनं गन्तुं तु मेनया । उमेति तेन सोमेति नाम प्राप तदा सती'ति । ब्रह्मपुराणे 'अपर्णा तु निराहारा तां गाता प्रत्यभाषत । उमा इति निषेधन्ती उमेत्येव तदाभवत् ॥ सा तथोक्ता तया मात्रा देवी दुश्चरचारिणी । तेनैव नाम्ना लोकेषु विख्याता सुरपूजिते'ति । पद्मपुराणे पुष्करखण्डे 'ततोऽन्तरिक्षाद्दिव्या वागत्रवीद्भुवनत्रये । उमेति तु त्वया मेने यदुक्तं तनयां प्रति । उमेति नाम तेनास्या भुवनेषु भविष्यती'ति । उः उत्तमा च सा मा चित्तवृत्तिश्चेति वा । तदुक्तं सूतसंहितायाम् 'परानुभूतिं भवपाशनाशिनीं सदाशिवस्याप्यतिशोभनाढ्याम् । उमाभिधामुत्तमचित्तवृत्तिं नमामि नानाविधलोकवैभवा'मिति । अथवा प्रणवघटकैरकारोकारमकारैर्विष्णुशिवब्रह्मवाचकैर्घटितत्वान्त्रिमूर्त्यात्मिकेत्यादयः प्रणवार्था इह योज्याः । अतएवास्य पदस्य देवीप्रणव इति संज्ञेति रहस्यविदः । उक्तंच लैङ्गे भगवतीं प्रति परशिवेनैव 'अकारोकारमकारा मदीये प्रणवे स्थिताः । उकारं च मकारं च अकारं च क्रमेरितम् । त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तम'मिति । महावासिष्ठेऽपि 'ओंकारसारशक्तित्वादुमेति परिकीर्तिते'ति । तत्रैव 'सुप्तानामथ बुद्धीनाममात्रोच्चारणाद्धृदि । नित्यं त्रैलोक्यभूतानामुमेतीन्दुकलोच्यते' इति । सर्वप्राणिनां स्वापे बोधे वा हृद्यनाहतनादात्मना अकारादिमात्रात्रयशून्यस्य प्रणवनादभागस्य शब्दब्रह्मात्मकस्य नित्यमुच्चारणाद्धृदम्बुजच्छिद्राकाशदहराकाशशिवस्य शिरसीन्दुकला बिन्दुरूपेण स्थितेति तट्टीकायाम् । वायवीयसंहितायामपि 'ओंकाराक्षरं ब्रह्मे'त्युपक्रम्य तदवयवानुक्त्वा 'अर्धमात्रात्मको नादः श्रूयते लिङ्गमूर्धनी'त्युक्तम् । हंसोपनिषद्यपि हृदयाब्जदलभेदेन हंसावस्थाने मतिभेदानुक्त्वा 'लिङ्गे सुषुप्तिः पद्मस्थाने तुरीया हंसस्य लिङ्गमूर्धस्थाना देवी लये सति तुर्यातीतावस्थे'त्युक्तम् । यद्वा 'इच्छाशक्तिरुमा कुमारी'ति शिवसूत्रे योगिनामिच्छाया उमेति संज्ञोक्ता तद्रूपा वा । उक्तंच भगवता कृष्णदासेन 'परमैरवतामुक्तां ग्रसमानस्य शाश्वतीम् । तस्यैव योगिनो येच्छाशक्तिस्तां निगदन्त्युमा'मिति । इयंच विनायकपीठाधिष्ठात्री । 'उमादेवी विनायके' ति पाद्मात् । 'उमा सिन्धुवने नाम्ने'त्यपि पाद्म एव स्मर्यते । षड्वार्षिककन्यारूपा वा । 'उमा षड्वार्षिकी मते'ति कन्याप्रकरणे धौम्यवचनात् । शैलेन्द्रस्य पर्वतराजस्य हिमवतस्तनया पुत्री । 'जाता शैलेन्द्रगेहे सा शैलराजसुता तत' इति देवीपुराणे निर्वचनम् । गौरवर्णत्वाद्गौरी । 'गौरी गौराङ्गदेहत्वा'दिति महावासिष्ठात् । 'षिद्गौरादिभ्यश्चे'ति ङीप् । 'वरुणस्य प्रिया गौरी'ति पाद्मे । 'नदीभेदेऽपि गौरी स्याद्दशाब्दायां च योषिती'ति कोशे च । तेन तत्तत्स्वरूपेति

विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥ १७८ ॥
सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी ।

वा । देवीपुराणे तु 'योगाग्निना तु या दग्धा पुनर्जाता हिमालयात् । शङ्खकुन्देन्दु-वर्णा चेत्यतो गौरीति सा स्मृते'त्युक्तम् । इयंच कान्यकुब्जपीठाधिष्ठात्री । 'कान्यकुब्जे तथा गौरी'ति पाद्मात् । गन्धर्वैर्विश्वावसुप्रभृतिभिः सेविता । गन्धर्वैर-श्चैर्वा सेविताऽश्वारूढाख्या देवी वा । दिव्यगानमेव वा गन्धर्वः ॥ १७७ ॥ विश्वं प्रपञ्चजातं गर्भे यस्याः । स्वर्णं हिरण्यं गर्भे यस्याः । स्वर्णस्य गर्भभवा वा । तदुक्तं वायुपुराणे 'हिरण्यमस्या गर्भोऽभूद्धिरण्यस्यापि गर्भजः । यस्माद्धिरण्यगर्भः स पुराणेऽस्मिन्निरुच्यत' इति । यद्वा अर्णानां वर्णानां मातृकाणां गर्भः शोभनो यया सा । मातृकाप्रतिपाद्येति यावत् । 'बह्वर्थगर्भितः शब्द' इति प्रयोगात् । स्वर्णाः शोभनार्णा मन्त्रा गर्भे यस्या इति वा । अवरदेति चतुरक्षरं नाम । अवरान्नार्या-नसुरान् यति खण्डयतीति तथा । अवन्तीत्यवाः कान्तिमन्तो रदा दन्ता यस्या वा । कान्त्यर्थकादवतेः पचाद्यच् । वाचामधीश्वरी स्वामिनी । ध्यानेन विभावनेन गम्या ज्ञेया । 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा'मिति श्रुतेः । अभावप्रतियोगित्वं परिच्छेद्यत्वं तदभावादपरिच्छेद्या । देशतः परिच्छेदो ह्यत्यन्ताभाव एव । कालतस्तु ध्वंसप्रागभावौ । वस्तुतस्त्वन्योन्याभाव इति स्थितेः । ज्ञानं कैवल्यप्रदत्वेनाभिमतं ददातीति ज्ञानदा । तथाचोक्तं तलवकारो-पनिषदि 'तस्मिन्नाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ब्रह्मेति होवाचे'त्यादि । स्कान्देऽपि 'ईदृशी परमा विद्या शांकरी भवनाशिनी । प्रसादादेव जन्तूनां शक्तेरेव हि जायत' इति । सूतसंहितायामपि 'विद्या-रूपा या शिवा वेदवेद्या सत्यानन्दानन्तसंवित्स्वरूपा । तस्या वाचः सर्वलोकैकमा-तुर्भक्त्यैव स्यादम्बिकायाः प्रसादा'दिति । ज्ञानं ददाति, यति खण्डयतीति वा । 'ज्ञानं बन्ध' इति तु शिवसूत्रे प्रथमोन्मेषे सूत्रमेकं तत्र त्वकारस्य प्रश्लेषोऽप्यस्ती-त्युक्तम् । 'चैतन्यमात्मेति पूर्वसूत्रेण संहितापाठे तथा संभवात् । तृतीयोन्मेषेऽपि तादृशं सूत्रमपरं तत्र तु न प्रश्लेषः संभाव्यते । आत्मा चित्त'मिति पूर्वसूत्रात् । तच्च व्याख्यातं वार्तिके 'अन्तःसुखादिसंवेद्यव्यवसायादिवृत्तिमत् । बहिस्तद्योग्य-नीलादिदेहादिविषयोन्मुखम् ॥ भेदाभासात्मकं चास्य ज्ञानं बन्धोऽनुरूपिणः । तत्प्राशितत्वादेवासावणुः संरसति ध्रुव'मिति । तदिदं संवित्त्वापादकं ज्ञानं नाशय-तीत्यर्थः । अतएव द्वितीयोन्मेषे सूत्रान्तरं 'ज्ञानमन्त्र'मिति । वार्तिकं च 'ज्ञानं बन्ध इति प्रोक्तं यत्प्राक्तत्परयोगिनः । अनात्मन्यात्मताज्ञप्तिरत्रं ग्रस्यत इत्यत' इति । ज्ञानमेव विग्रहः शरीरं यस्याः, सर्वस्य जगतो ज्ञानात्मकत्वात् । तदुक्तं विष्णुपुराणे द्वितीयेंशे 'ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते । ज्ञानात्मकमिदं विश्वं न ज्ञाना-द्विद्यते परम् । विद्याविद्येति मैत्रेय ज्ञानमेवोपधारये'ति । ज्ञानस्य विग्रहो विस्तारो यस्याः सकाशादिति वा ॥ १७८ ॥ सर्वैर्वेदान्तैरुपनिषत्समूहैः सम्यग्वेद्या । उक्तंच

लोपामुद्रार्चिता लीलाकृप्तब्रह्माण्डमण्डला ॥ १७९ ॥
अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्दयुगंधरा ॥ १८० ॥

वाराहे 'एषा त्रिशक्तिरुद्दिष्टा त्रयसिद्धान्तगामिनी । एषा ज्ञानात्मिका शक्तिः सर्ववेदान्तगामिनी'ति । सत्यमानन्दश्च स्वरूपं यस्याः । अत्र सत्येति भिन्नं पदमाधिक्यामेयामेयात्मेत्येकं पदं कर्तुं शक्यते । 'सच्च त्यच्चाभव'दिति श्रुतेः सत्या । प्राणान्नादित्यरूपा वा । 'सदिति प्राणस्तीत्यन्नमयमित्यसावादित्य' इति श्रुतेः । सति येति विकर्षेण व्यक्षरत्वेप्युच्चारणं मेलनेन व्यक्षरस्यैवेति ज्ञेयम् । इदं च 'इयादिपूरणं' इति छन्दःसूत्रव्याख्यानावसरे छन्दोभास्करे प्रपञ्चितमस्माभिः । सन्तु साधुरिति वा सत्या । सत्यभामा स्वरूपेति वा । आनन्दः स्वरूपमस्या इत्यानन्दरूपिणी । अतएवोत्तरमीमांसायां 'आनन्दादयः प्रधानस्ये'ति तार्तीयीकाधिकरणे आनन्दादिधर्माणां स्वरूपत्वादेव विद्यान्तरेष्वपसंहारः साधितः । लोपामुद्रयागस्त्यपत्न्या कर्त्यार्चितोपासिता । तदुक्तं ब्रह्माण्डपुराणे 'पत्न्यस्य लोपामुद्राख्या मामुपास्तेऽतिभक्तित' इति । त्रिपुरासिद्धान्तेऽपि 'अगस्त्यपत्न्या लोपाख्यमुद्रायाः परमेश्वरी । प्रसन्नत्वादियं देवी लोपामुद्रेति गीयत' इति । अतएव लोपामुद्रा चासावर्चिता चेत्यपि सुवचम् । लोपामुद्राख्यविद्यया करणेन वा पूजिता । 'विद्यातृतीयखण्डेन कुर्यात्सर्वोपचारका'निति कादिमतात् । लीलामात्रेणानायासेन कृप्तानि ब्रह्माण्डमण्डलानि यस्याः । तदुक्तमस्माभिर्देवीस्तवे 'विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः । जगदम्ब तव त्वयं क्रमः क्षणमुद्दालकपुष्पभङ्गिके'ति । उद्दालकेत्यादिनवाक्षरं क्रीडाविशेषस्य नाम । शक्तिसूत्रमपि 'स्वेच्छया स्वभित्तौ विश्वमुन्मीलयती'ति ॥ १७९ ॥ दृश्यविलक्षणत्वादृदृश्या । चक्षुरादीन्द्रियायोग्या वा । 'न दृष्टेर्द्रष्टारं पश्ये'दिति श्रुतेः । उक्तंच देवीभागवते तृतीयस्कन्धे । 'निर्गुणस्य मुने रूपं न भवेद्दृष्टिगोचर'मिति प्रकम्य 'निर्गुणा दुर्गमा शक्तिर्निर्गुणश्च परः पुमा'नित्यन्तम् । दृश्यस्य व्यावहारिकस्य पारमार्थिकभाववत्त्वाद्दृश्यरहिता । निर्विषया संविद्वा । विशेषेण जानातीति विज्ञात्री । 'विज्ञातारमरे केन विजानीया'दिति श्रुतेः । वेद्यस्य पदार्थान्तरस्यानवशेषेण सर्वज्ञत्वाद्वेद्यवर्जिता । वेद्यस्य पारमार्थिकाभाववती वा । योग एकत्वभावना तद्वत्त्वात्तत्प्रदत्वात्तद्योग्यत्वाच्च योगिनी योगदा योग्या च । 'योगाद्यच्चे'ति यत्प्रत्ययः । तदुक्तं विष्णुपुराणे 'ज्ञानेन्द्रियाणि सर्वाणि निगृह्य मनसा सह । एकत्वभावनायोगः क्षेत्रज्ञपरमात्मनो'रिति । 'तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञित'मिति गीतासु । 'योगश्चित्तवृत्तिनिरोध' इति पातञ्जलसूत्रं च । सच मन्त्रो लयो हठो राजेति चतुर्विधः । राजयोगोऽपि सांख्यतारकामनस्कभेदात्त्रिविधः । तत्तल्लक्षणानि तु विस्तरभयान्नोच्यन्ते । यद्वा मङ्गलादिसंकटान्ता अष्टौ योगिन्यः षट्त्रिंशद्वर्षैः पुनःपुनः परिवर्तमाना ज्योतिःशास्त्रे, डाकिन्यादयश्च सप्त मन्त्रशास्त्रे-

प्रसिद्धास्तद्रूपा। अथवा योगो विषयसंगो भोग इति यावत्। तेन भोक्तृभोगप्रद-भोग्यत्रितयरूपेति नामत्रितयार्थः। तदुक्तं श्वेताश्वतरोपनिषदि 'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैत'दिति। अत्रेदं बोध्यम्—माया प्रधानं स्वतन्त्रमिति सांख्याः। शिवस्य सा शक्तिरेवेति वेदान्तिनः। शक्तिरित्यनेन परतन्त्रतोच्यतं इति विवरणाचार्याः। सा त्रिगुणा गुणाश्च। परस्पराभिभावकाः। 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत। रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे'ति गीतोक्तेः। तेन सा त्रिविधा पर्यवस्यति। रजस्तमसोरत्यन्ताभिभवाद्विशुद्धसत्त्वात्मकैका। ईषदुद्भूतरजस्तमोभ्यां मलिनसत्त्वा द्वितीया। अत्यन्ताभिभूतरजःसत्त्वाभ्यांमसप्राया केवलतमोमयी तृतीयेति। तास्वाद्यावच्छिन्ना चिदीश्वरनाम्नी भोगप्रदा योगदेत्युच्यते। द्वितीयावच्छिन्ना जीवनाम्नी भोक्त्री योगिनी। तृतीयावच्छिन्ना जडवस्तुनाम्नी भोग्या योग्येत्युच्यत इति विवेकः। योगः शिवशक्तिसामरस्यमेवानन्दो यस्याः। निद्राया आनन्दप्रधानत्वायोगनिद्रेति वार्थः। साच देव्येवेयम्। तथाच हरिवंशे 'याप्यानन्दघना योगनिद्रेति जगति स्थिते'त्युपक्रम्य 'देवेष्वपि दधारैनां नान्यो नारायणादृते। सखी सदाशिवस्यैषा माया विष्णोः शरीरजा॥ सैषा नारायणमुखे दृश्या कमललोचन। लोकानल्पेन कालेन भजते भृशमोहिनी'ति। योगानन्दाख्यो नृसिंहस्तद्रूपा वा। मोहिनीमुख्येत्येकपदं स्वीकृत्येह अयोगानन्देति नामद्वयं सुवचम्। योगः सङ्गो न विद्यते यस्याः। 'असङ्गो नहि सज्जत' इति श्रुतेः। अयःपर्वतरूपा वा। अभेद्येति तात्पर्यार्थः। अयेन शुभावहविधिना उं परशिवं गच्छतीति वा। नन्दाऽलकनन्दात्मकगङ्गारूपा वा। प्रतिपत्षष्ठ्येकादशीरूपा वा। 'नन्दा भगवती नाम या भविष्यति नन्दजे'ति मार्कण्डेयपुराणोक्तमूर्तिविशेषरूपा वा। सरस्वत्या एव स्थानविशेषयोगादानन्देति संज्ञा वा। 'नन्दा हिमवतः पृष्ठे' इति पाद्मात्। पुष्करप्रान्तस्थनदीविशेषरूपा वा। तदप्युक्तं पाद्मएव पुष्करमाहात्म्ये 'पुण्या पुण्यजलोपेता नदीयं ब्रह्मणः सुता। नन्दानाम्नीति विपुला प्रवृत्ता दक्षिणामुखी॥ अगच्छन्नपि यस्तस्या नाम गृह्णाति मानवः। स जीवन्सुखमाप्नोति मृतो भवति खेचर' इति। नामनिरुक्तिर्वैराहपुराणे 'यथागतं तु ते जग्मुर्देवीं स्थाप्य हिमे गिरौ। संस्थाप्यानन्दिता यस्मात्तस्मान्नन्दा तु साभव'दिति। देवीपुराणे तु 'नन्दते सुरलोकेषु नन्दने वसतेऽथवा। हिमाचले महापुण्ये नन्दादेवी ततः स्मृते'ति। तत्स्वरूपमपि वाराहे 'गायत्र्यष्टभुजा या तु चैत्रासुरमयोधयत्। सैव नन्दाभवद्देवी देवकार्यचिकीर्षया॥ स्वायंभुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ। महिषाख्योऽसुरः पश्चात्स वै चैत्रासुरोऽभवत्॥ नन्दया निहतो विन्ध्ये महाबलपराक्रमः। ज्ञानशक्तिस्तु सा देवी महिषोऽज्ञानमूर्तिमान्॥ अज्ञानं ज्ञाननाश्यं तु भवत्येव न संशय' इति। 'युगं हस्ते चतुष्केऽपि रथसीराङ्गयोर्युगः। युगं कृतादौ युगले वृद्धिनामांपधेऽपि चे'ति विश्वप्रकाशोक्त्या रथसीरङ्गधारिणामश्वर्षभाणां रथसीरनिर्वाहकत्वदर्शनादिह सकलजगन्निर्वाहकत्वमात्रतात्पर्येण युगंधरे-

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥ १८१ ॥

त्युच्यते । शिवशक्तियुगलस्य कृतादेर्वा धारणायुगंधरा 'संज्ञायां भृतृवृजिधारिसहितपिदम' इति खच् । 'अरुर्द्विषदजन्तस्ये'ति मुम् ॥ १८० ॥ इच्छाज्ञानयत्नरूपगुणत्रयं स्वरूपमस्याः । उक्तंच संकेतपद्धतौ 'इच्छा शिरःप्रदेशश्च ज्ञाना च तदधोगता । क्रियापदगता ह्यस्या एवं शक्तित्रयं वपु'रिति । वामकेश्वरतन्त्रेऽपि 'त्रिपुरा त्रिविधा देवी ब्रह्मविष्वीशरूपिणी । ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्त्यात्मिका प्रिये' ति । अत्र ज्ञानेच्छायत्नानां पूर्वपूर्वस्योत्तरोत्तरंप्रति कारणत्वस्य कृत्स्नस्य क्रमेण शक्तित्रयस्य निर्देशाभावेऽपि करोतेर्यत्ने शक्तत्वादेव क्रियाशब्दो यत्नपरः । उक्तंच लैङ्गे 'धृतिरेषा मदादिष्टा ज्ञानशक्तिः कृतिर्मता । इच्छारूपा तथा ज्ञाना द्वे विद्ये च न संशय' इति । चलनात्मकक्रियापरैव वा । सा च पञ्चविधेत्युक्तं यज्ञवैभवखण्डे 'स्पन्दश्चैव परिस्पन्दः प्रक्रमः परिशीलनः । प्रचार इति विद्वद्भिः कथिताः पञ्च ताः क्रियाः' । आङ्प्रश्लेषप्रयुक्तो दीङः । सर्वासां जगतीनां धारा परम्परा । जन्यजनकयोरभेदादिति । मालिनीविजयतन्त्रे 'या सा शक्तिर्जगद्धातुः कथिता ब्रह्मणः परा । इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥ एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् । ज्ञापयन्ती झडित्यन्तर्ज्ञानशक्तिर्निगद्यते ॥ एवंभूतमिदं वस्तु भवत्विति यदा पुनः । ज्ञात्वा तदेव तद्वस्तु कुर्वन्त्यत्र क्रियोच्यत' इति । वासिष्ठरामायणे 'शिवं ब्रह्म विदुः शान्तमवाच्यं वाग्विदामपि । स्पन्दशक्तिस्वदिच्छेयं दृश्याभासं तनोति सा ॥ साकारस्य नरस्येच्छा यथा वै कल्पनापुर'मिति । 'दृश्याभासानुभूतानां करणात्सोच्यते क्रिये'ति च । दृश्याभासेष्वनुभूतानामुत्पत्त्यासिविकृतिसंस्कृतिलक्षणचतुर्विधफलानां कारणादिति तु तत्तट्टीकायां व्याख्यातम् । सर्वमाधारो यस्या इति वा । सर्वेष्वन्तर्यामितया स्थितेति यावत् । सर्वेषामाधाररूपेति वा । तदुक्तं मार्कण्डेयपुराणे 'येऽर्था नित्या ये विनश्यन्ति चान्ये येऽर्थाः स्थूला ये च सूक्ष्माच्च सूक्ष्माः । यच्चामूर्तं यच्च मूर्तं समस्तं यद्यद्भूतेष्वेकमेकं च किंचित् । येऽर्था भूमौ येऽन्तरिक्षेऽन्यतो वा तेषां देवि त्वत्त एवोपलब्धि'रिति । नचास्मिन्पक्षे स्त्रीलिङ्गानुपपत्तिः । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति सूत्रात् । 'आधारोऽधिकरण'मिति सूत्रानुसारेणाधारपदस्य पुंल्लिङ्गत्वनिश्चयादिति वाच्यम् । निर्गुणब्रह्मणि कथनीये प्रत्युत तस्यैव युक्तत्वात् । तथाहि । सत्त्वादिगुणत्रयस्योपचयः पुंस्त्वम् । अपचयः स्त्रीत्वम् । साम्यं नपुंसकत्वम् । लिङ्गयोनितदुभयाभावरूपाणां तेषामचेतनेष्वन्यातेः । सर्वस्यापि जगत स्त्रिगुणात्मकतया देवीभागवतादौ प्रतिपादितत्वेन तेषां सर्वत्र संभवात् । उपचयादेः सावधिकत्वेन प्रतिपादितार्थं किंचिदपेक्ष्योपचयादयः सन्त्येवेति लिङ्गत्रयस्यापि केवलान्वयित्वाद्यवस्थया विवक्षानुसारेण प्रयोगः । सर्वमेतदभिप्रेत्योक्तं महाभाष्ये 'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्तत' इति । 'संस्त्यानं स्त्यायतेर्दद्र स्त्री सूतेः

प्रसिद्धास्तद्रूपा। अथवा योगो विषयसंगो भोग इति यावत्। तेन भोक्तृभोगप्रद-भोग्यत्रितयरूपेति नामत्रितयार्थः। तदुक्तं श्वेताश्वतरोपनिषदि 'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैत'दिति। अत्रेदं बोध्यम्—माया प्रधानं स्वतन्त्रमिति सांख्याः। शिवस्य सा शक्तिरेवेति वेदान्तिनः। शक्तिरित्यनेन परतन्त्रतोच्यत इति विवरणाचार्याः। सा त्रिगुणा गुणाश्च। परस्पराभिभावकाः। 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत। रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे'ति गीतोक्तेः। तेन सा त्रिविधा पर्यवस्यति। रजस्तमसोरत्यन्ताभिभवाद्विशुद्धसत्त्वात्मकैका। ईषदुद्भूतरजस्तमोभ्यां मलिनसत्त्वा द्वितीया। अत्यन्ताभिभूतरजःसत्त्वाभ्यांमसत्प्राया केवलतमोमयी तृतीयेति। तास्वाद्यावच्छिन्ना चिदीश्वरनाम्नी भोगप्रदा योगदेत्युच्यते। द्वितीयावच्छिन्ना जीवनाम्नी भोक्त्री योगिनी। तृतीयावच्छिन्ना जडवस्तुनाम्नी भोग्या योग्येत्युच्यत इति विवेकः। योगः शिवशक्तिसामरस्यमेवानन्दो यस्याः। निद्राया आनन्दप्रधानत्वाद्योगनिद्रेति वार्थः। साच देव्येवेयम्। तथाच हरिवंशे 'याप्यानन्दघना योगनिद्रेति जगति स्थिते'त्युपक्रम्य 'देवेष्वपि दधारैनां नान्यो नारायणादृते। सखी सदाशिवस्यैषा माया विष्णोः शरीरजा॥ सैषा नारायणमुखे दृश्या कमललोचन। लोकानल्पेन कालेन भजते मृशमोहिनी'ति। योगानन्दाख्यो नृसिंहस्तद्रूपा वा। मोहिनीमुख्येत्येकपदं स्वीकृत्येह अयोगानन्देति नामद्वयं सुवचम्। योगः सङ्गो न विद्यते यस्याः। 'असङ्गो नहि सज्जत' इति श्रुतेः। अयःपर्वतरूपा वा। अभेद्येति तात्पर्यार्थः। अयेन शुभावहविधिना उं परशिवं गच्छतीति वा। नन्दाऽलकनन्दात्मकगङ्गारूपा वा। प्रतिपत्पञ्चैकादशीरूपा वा। 'नन्दा भगवती नाम या भविष्यति नन्दजे'ति मार्कण्डेयपुराणोक्तमूर्तिविशेषरूपा वा। सरस्वत्या एव स्थानविशेषयोगादानन्देति संज्ञा वा। 'नन्दा हिमवतः पृष्ठे' इति पाद्मात्। पुष्करप्रान्तस्थनदीविशेषरूपा वा। तदप्युक्तं पाद्मएव पुष्करमाहात्म्ये 'पुण्या पुण्यजलोपेता नदीयं ब्रह्मणः सुता। नन्दानाम्नीति विपुला प्रवृत्ता दक्षिणामुखी॥ अगच्छन्नपि यस्तस्या नाम गृह्णाति मानवः। स जीवन्सुखमाप्नोति मृतो भवति खेचर' इति। नामनिरुक्तिर्वैराहपुराणे 'यथागतं तु ते जग्मुर्देवीं स्थाप्य हिमे गिरौ। संस्थाप्यानन्दिता यस्मात्तस्मान्नन्दा तु साभव'दिति। देवीपुराणे तु 'नन्दते सुरलोकेषु नन्दने वसतेऽथवा। हिमाचले महापुण्ये नन्दादेवी ततः स्मृते'ति। तत्स्वरूपमपि वाराहे 'गायत्र्यष्टभुजा या तु चैत्रासुरमयोधयत्। सैव नन्दाभवेद्देवी देवकार्यचिकीर्षया॥ स्वायंभुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ। महिषाख्योऽसुरः पश्चात्स वै चैत्रासुरोऽभवत्॥ नन्दया निहतो विन्ध्ये महाबलपराक्रमः। ज्ञानशक्तिस्तु सा देवी महिषोऽज्ञानमूर्तिमान्॥ अज्ञानं ज्ञाननाश्यं तु भवत्येव न संशय' इति। 'युगं हस्ते चतुष्केऽपि रथसीराङ्गयोर्युगः। युगं कृतादौ युगले वृद्धिनामोपवेऽपि चे'ति विश्वप्रकाशोक्त्या रथसीराङ्गधारिणामश्वर्षभाणां रथसीरनिर्वाहकत्वदर्शनादिह सकलजगन्निर्वाहकत्वमात्रतात्पर्येण युगंधरे-

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥ १८१ ॥

त्युच्यते । शिवशक्तियुगलस्य कृतादेर्वा धारणाद्युगंधरा 'संज्ञायां भृतृवृजिधारिसहितपिदम' इति खच् । 'अरर्विषदजन्तस्ये'ति मुग् ॥ १८० ॥ इच्छाज्ञानक्रियागुणत्रयं स्वरूपमस्याः । उक्तंच संकेतपद्धतौ 'इच्छा शिरःप्रदेशश्च ज्ञाना च तदधोगता । क्रियापदगता ह्यस्या एवं शक्तित्रयं वपु'रिति । वामकेश्वरतन्त्रेऽपि 'त्रिपुरा त्रिविधा देवी ब्रह्मविष्णवीशरूपिणी । ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्त्यात्मिका प्रिये' ति । अत्र ज्ञानेच्छायत्नानां पूर्वपूर्वस्योत्तरोत्तरंप्रति कारणत्वस्य कृप्तस्य क्रमेण शक्तित्रयस्य निर्देशाभावेऽपि करोतेर्यत्ने शक्तत्वादेव क्रियाशब्दो यत्नपरः । उक्तंच लैङ्गे 'धृतिरेषा मदादिष्टा ज्ञानशक्तिः कृतिर्मता । इच्छारूपा तथा ज्ञाना द्वे विद्ये च न संशय' इति । चलनात्मकक्रियापरैव वा । सा च पञ्चविधेत्युक्तं यज्ञवैभवखण्डे 'स्पन्दश्चैव परिस्पन्दः प्रक्रमः परिशीलनः । प्रचार इति विद्वद्भिः कथिताः पञ्च ताः क्रियाः' । आङ्प्रत्ययप्रयुक्तो धीः । सर्वासां जगतीनां धारा परम्परा । जन्यजनकयोरभेदादिति । मालिनीविजयतन्त्रे 'या सा शक्तिर्जगद्धातुः कथिता ब्रह्मणः परा । इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥ एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् । ज्ञापयन्ती झडित्यन्तर्ज्ञानशक्तिर्निगद्यते ॥ एवंभूतमिदं वस्तु भवत्विति यदा पुनः । ज्ञात्वा तदेव तद्वस्तु कुर्वन्त्यत्र क्रियोच्यत' इति । वासिष्ठरामायणे 'शिवं ब्रह्म विदुः शान्तमवाच्यं वाग्विदामपि । स्पन्दशक्तिस्तदिच्छेयं दृश्याभासं तनोति सा ॥ साकारस्य नरस्येच्छा यथा वै कल्पनापुर'मिति । 'दृश्याभासानुभूतानां करणात्सोच्यते क्रिये'ति च । दृश्याभासेष्वनुभूतानामुत्पत्त्यासिविकृतिसंस्कृतिलक्षणचतुर्विधफलानां कारणादिति तु तत्तट्टीकायां व्याख्यातम् । सर्वमाधारो यस्या इति वा । सर्वेष्वन्तर्यामितया स्थितेति यावत् । सर्वेषामाधाररूपेति वा । तदुक्तं मार्कण्डेयपुराणे 'येऽर्था नित्या ये विनश्यन्ति चान्ये येऽर्थाः स्थूला ये च सूक्ष्माच्च सूक्ष्माः । यच्चामूर्तं यच्च मूर्तं समस्तं यद्भूतेष्वेकमेकं च किंचित् । येऽर्था भूमौ येऽन्तरिक्षेऽन्यतो वा तेषां देवि त्वत्त एवोपलब्धि'रिति । नचास्मिन्पक्षे स्त्रीलिङ्गानुपपत्तिः । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति सूत्रात् । 'आधारोऽधिकरण'मिति सूत्रानुसारेणाधारपदस्य पुंल्लिङ्गत्वनिश्चयादिति वाच्यम् । निर्गुणब्रह्मणि कथनीये प्रत्युत तस्यैव युक्तत्वात् । तथाहि । सत्त्वादिगुणत्रयस्योपचयः पुंस्त्वम् । अपचयः स्त्रीत्वम् । साम्यं नपुंसकत्वम् । लिङ्गयोनितदुभयाभावरूपाणां तेषामचेतनेष्वव्याप्तेः । सर्वस्यापि जगत्त्रिगुणात्मकतया देवीभागवतादौ प्रतिपादितत्वेन तेषां सर्वत्र संभवात् । उपचयादेः सावधिकत्वेन प्रतिपादितार्थं किंचिदपेक्ष्योपचयादयः सन्त्येवेति लिङ्गत्रयस्यापि केवलान्वयित्वाद्यवस्थया विवक्षानुसारेण प्रयोगः । सर्वमेतदभिप्रेत्योक्तं महाभाष्ये 'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्तत' इति । 'संस्त्यानं स्त्यायतेर्ड्र स्त्री सूतेः

अष्टमूर्तिरजा जैत्री लोकयात्राविधायिनी ।

स प्रसवः पुमान् । उभयोरन्तरं यच्च तदभावे नपुंसक'मिति च 'लिङ्गमशिष्य'मिति च । संबन्धमनुवर्तिष्यते कोऽसावनुमानो नामेति प्रयोगश्च । 'बन्धुनि बहुव्रीहा'-वितिं सौत्रप्रयोगश्च । एवंसत्यव्यवस्था माप्रसाङ्क्षीदिति लिङ्गानुशासनप्रवृत्तिर्नियमादृष्टमात्रप्रयोजनिका । चेतनेषु तूभयविधलिङ्गसमुच्चयविवक्षयैव 'अजाद्यतष्टाबि'त्यादयः । तेन पश्वेकत्वविशिष्टमपि विवक्षितमिति साधयतस्तथा च लिङ्गमित्यधिकरणस्य विरोधः । ततश्च त्रिगुणातीतायां चिच्छक्तौ सर्वजगन्मातरि त्रिपुरसुन्दर्यां द्विविधस्यापि स्त्रीलिङ्गस्य सगुणचेतनान्तरमपेक्ष्यासंकुचितवृत्तिकत्वेन निरर्गलत्वमभिप्रेत्य वाग्देवताभिः स्त्रीलिङ्गमेव प्रयुज्यते नियमादृष्टानुसरणाय तु तत्र तत्र लिङ्गानुशासनानुगुण्यमस्माभिः प्रदर्श्यते न पुनरपशब्दत्वनिरासायेति दिक् । शोभना प्रतिष्ठा जगतोऽधिष्ठानं, सुप्रतिष्ठाख्यविंशत्यक्षरच्छन्दोविशेषरूपा वा । सद्ब्रह्म, असत्सद्भिन्नं जगत् । अनिर्वचनीयस्य जगतः सदसद्विलक्षणत्वेऽपि सद्विलक्षणत्वमात्रेणासत्पदेन ग्रहणम् । 'असद्वा इदमग्र आसीत्कथमसतः सज्जायेते'त्यादिश्रुतिष्वन्यतरवैलक्षण्येनैव प्रयोगदर्शनात् । तयोः रूपे धारयतीति तथा । अथवा सद्व्यावहारिकं, सत्यं पारमार्थिकं वा, अस्तुच्छं ते एव रूपे विषयौ धारयति भासयति । सदसद्विषयकज्ञानद्वयस्वरूपेत्यर्थः । सन्मात्रविषयकचरमवृत्तिवदसन्मात्रविषयिकाया अपि वृत्तेर्विकल्पाख्यायाः सत्त्वात् । तथाच पातञ्जलसूत्रम् 'शब्दमात्रानुपाती वस्तुशून्यो विकल्प' इति । गौतमसूत्रमपि 'बुद्धिसिद्धं तदस'दिति । यद्वा । भावाभावपरौ सदसच्छब्दौ । तौ च योग्यतया सत्यत्वाऽबाध्यत्वादिरूपौ ग्राह्यौ । सत्यत्वादेर्धर्मिणोऽपृथक्त्वात् । अबाध्यत्वादेरभावरूपधर्मस्याधिकरणस्वरूपत्वात् । भावाभावमात्रस्याधिष्ठानमिति वा । तदुक्तं स्कान्दे यज्ञवैभवखण्डे 'यद्यदस्तितया भाति यद्यन्नास्तितयापि च । तत्तत्सर्वं महादेवमायया परिकल्पित'मिति ॥ १८१ ॥ मत्स्यपुराणे 'लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः । एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति' इति मन्त्रलिङ्गगम्या अष्टौ मूर्तयो यस्याः । यद्वा योगशास्त्रे 'गुणभेदादात्ममूर्तिरष्टधा परिकीर्तिता । जीवात्मा चान्तरात्मा च परमात्मा च निर्मलः ॥ शुद्धात्मा ज्ञानरूपात्मा महात्मा सप्तमः स्मृतः । अष्टमस्तेषु भूतात्मेत्यष्टात्मानः प्रकीर्तिता' इति । पञ्चमहाभूतानि सूर्याचन्द्रमसौ जीवात्मखगर्दीक्षितानामन्यतम एक इत्यष्टसंख्या मूर्तयो यस्याः । 'भूतानि पुष्पवन्तौ खरिति देव्यष्टमूर्तय' इति शक्तिरहस्यात् । विष्णुपुराणेऽपि प्रथमेंऽशे 'सूर्यो जलं मही वह्निर्वायुराकाश एव च । दीक्षितो ब्राह्मणः सोम इत्यष्टौ मूर्तयो मताः ॥ पत्न्यः सुवर्चला चोमा सुकेशी चापरा शिवा । स्वाहा दितिस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥ शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः । स्कन्दः स्वर्गोऽथ संतानो बुधश्चानुक्रमात्सुता' इति । लैङ्गे तूक्तम् 'अष्टौ प्रकृतयो देव्या मूर्तयः परिकीर्तिताः । तथा विकृतयस्तस्या देहा वह्निविभूतय' इति । 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।

एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥ १८२ ॥
अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी ।

अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधे'ति भगवता गीता मूर्तयो यस्या इति वा। कुलाष्टकस्वरूपेत्यर्थो वा। तच्च समयाचारस्मृतौ 'गणिका शौण्डिकी चैव कैवर्ती रजकी तथा। तन्त्रकारी चर्मकारी मातङ्गी पुंश्चली तथे'ति। अथवा 'खल्पाङ्गी दीर्घकेशी या साऽनङ्गकुसुमा मते'त्यादिना रुद्रयामले अष्टानां लक्षणान्युक्तानि। लक्ष्याणि तु तृतीयावरणे प्रसिद्धानि तदष्टकरूपा। ब्राह्म्यादिवशिन्यादिस्वरूपेति वा 'अजामेकां लोहितशुक्लकृष्णा'मित्यादिश्रुतिप्रसिद्धाया अविद्यारूपाया अजाया जेत्री। ज्ञानरूपत्वादज्ञाननाशिकेति यावत्। लोकानां चतुर्दशसंख्यानां यात्रां प्रलयं संरक्षणं वा विधातुं शीलमस्याः। एकाकिनी द्वितीयराहित्यात्। 'एकादाकिनिच्चा-सहाय' इत्याकिनिच्प्रत्ययः। 'सोऽबिभेत्तस्मादेकाकी बिभेति सहायमीक्षांचक्रे यन्मदन्य-न्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाये'ति बृहदारण्यकश्रुतेः। देवी-पुराणे 'एकैव लोकान् ग्रसति एकैव स्थापयत्यपि। एकैव सृजते विश्वं तस्मादे-काकिनी मते'ति ॥

अथ परिभाषायां चतुस्त्रिंशन्नामानि विभजते। **भूगीर्णाबलखेदालस्वारम्भा-विभोर्वेदेद्भावम्। हस्ती द्विर्वैकं वा भजते वाभूलमन्दमृगान् ॥ २५ ॥** एकमित्यस्य द्वादशाक्षरमेकं नामेत्यर्थः ॥ २५ ॥

'यत्र नान्यत्पश्यति नान्यच्छृणोती'त्यादिना 'यो वै भूमा तत्सुख'मित्यन्तेन श्रुतौ प्रतिपादितो भूमा ब्रह्मैवेति भूमाधिकरणे निर्णीतरूपत्वाद्भूमरूपा। यद्वा 'बहो-र्लोपो भू च बहो'रिति निष्पन्नो बह्वर्थको भूमशब्दः। ततश्च एकाकिन्यपि बहुरूपे-त्यर्थः। तदुक्तं देवीपुराणे 'एकाप्युपाधितो भूमा शिवा सर्वत्र विश्रुता ॥ यथानुर-ज्यते वर्णैर्विचित्रैः स्फटिको मणिः। तथा गुणवशादेवी भूमानामेति वर्ण्यते ॥ एको भूत्वा यथा मेघः पृथक्त्वेन च तिष्ठति। वर्णतो रूपतश्चैव तथा गुणवशादुमा ॥ नभसः पतितं तोयं यथा नानारसं भवेत्। भूमे रसविशेषेण तथा गुणवशादुमा ॥ यथा द्रव्यविशेषेण वायुरेकः पृथग्भवेत्। दुर्गन्धो वा सुगन्धो वा तथा गुणवशा-दुमा ॥ यथा वा गार्हपत्योऽग्निरन्यसंज्ञान्तरं व्रजेत्। दक्षिणाहवनीयादि ब्रह्मादिषु तथैव सा ॥ एकत्वेन च भूम्ना च प्रोक्ता देवी निदर्शनैः। तस्माद्भक्तिः परा कार्या सर्वगत्वप्रसिद्धय' इति। कूर्मपुराणेऽपि 'एका कामेश्वरी शक्तिरनेकोपाधियोगतः। परावरेण रूपेण क्रीडते तस्य सन्निधा'विति। 'यत्र नान्यत्पश्यति' इत्यादिना 'यदल्पं तन्मर्त्य'मित्यन्तेन श्रुतौ द्वैतदर्शनस्यानित्यविषयकताप्रतिपादनेन तस्य हेय-त्वान्निर्गतं द्वैतं यस्याः सा निर्द्वैता। न पुनर्द्वैतं पूर्वं स्थितं पश्चान्निर्गतं। मूलत एव तु नास्तीत्याह—**द्वैतवर्जितेति**। भेदस्यात्त्विकत्वेन सार्वकालिकात्तदभावादिति भावः ॥ १८२ ॥ अन्नं जनेभ्यो ददाति। वसु धनं रत्नं च ददाति। तथाच

बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥ १८३ ॥
भाषारूपा बृहत्सेना भावाभावविवर्जिता ।

बृहदारण्यके 'स वा एष महानज आत्मान्नादो वसुदानो विन्दते वसु य एवं वेदे'ति । अत्रान्नमासमन्ताद्दातीत्येवमेव व्याख्यातं सांप्रदायिकैः । वृद्धा जरठा । 'त्वं जीर्णा दण्डेन वञ्चसी'ति श्रुतेः । वञ्चसि गच्छसीत्यर्थः । सर्वज्येष्ठत्वाज्जगद्रूपेणाभिवृद्धत्वाद्वा वृद्धा । वर्धयति जगदिति वा णिजन्तात्कर्तरि क्तः । ब्रह्मणा चैतन्येन सह आत्मनां जीवानामैक्यमेव स्वं निजं रूपमस्याः । यद्वा ब्रह्मात्मनोः शिवजीवयोरैक्यमेव स्वं सर्वस्वं प्रतिपाद्यं यस्य स हंसमन्त्रो रूपमस्या इति । तदुक्तं स्कान्दे यज्ञवैभवखण्डे 'अथवा जीवमन्त्रोऽयं जीवात्मप्रतिपादकः । अहंशब्दस्य रूढत्वाल्लोके जीवात्मवस्तुनि ॥ शक्तिमन्त्रः सकाराख्यः परमेश्वरवाचकः । प्रकृतार्थे प्रसिद्धत्वात्प्रसिद्धः परमेश्वरः ॥ महदाद्यणुपर्यन्तं जगत्सर्वं चराचरम् । जायते वर्तते चैव लीयते परमेश्वरे ॥ संसारित्वेन भातोऽहं स एव परमेश्वरः । सोऽहमेव न संदेहः स्वानुभूतिप्रमाणत' इति । एतेन त्रिशत्यां हंसमन्त्रार्थरूपिणीति नाम व्याख्यातम् । महतो महीयस्त्वाद्बृहती । षट्त्रिंशदक्षरच्छन्दोविशेषरूपा वा । नच 'गायत्री छन्दसामसी'ति कौर्मवचनविरोधः । उभयात्मत्वाङ्गीकारे तदभावात् । अत एव 'बृहत्साम तथा साम्ना'मिति भगवतो वासुदेवस्य विश्वरूपवर्णने गीतावचनस्य भगवत्या विश्वरूपवर्णनार्थेन 'ज्येष्ठं साम च सामस्वि'ति कौर्मवचनेन न विरोधः । तलवकारिणां शाखायाम् 'उदुत्यं,' 'चित्रमि'त्यनयोर्ऋचोर्गीयमानं साम ज्येष्ठसामे'त्युज्वलायां हरदत्तोक्तेः । बृहत्साम तु 'सत्त्वं नश्चित्रे'त्यस्यामृचि गीयमानं प्रसिद्धमेव । बृहज्ज्येष्ठशब्दयोः पर्यायत्वसंभवाच्च । तेन ज्येष्ठसामरूपेति वा, बृहत्सामरूपेति वा व्याख्या । 'ब्राह्मणी फञ्जिका स्पृक्का द्विजपत्नीषु विश्रुते'ति विश्वकोशादौषधिविशेषरूपा द्विजस्त्रीमात्ररूपा वा संविद्विशेषरूपा वा । उक्तं सदाचारस्मृतौ 'ब्राह्मणी श्वेतपुष्पाढ्या संवित्सा देवतात्मिके'ति । अथवा शिवस्य ब्राह्मणत्वजातिमत्त्वाद्ब्राह्मणी । तथाच छान्दोग्ये श्रूयते 'पुण्डरीकाक्षोऽसि दन्ताज्रि'रिति शिवं प्रकृत्य 'त्वं व देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युप त्वा धावामी'ति पराशरादित्यकौर्मवासिष्ठलैङ्गेषु स्मर्यते 'ब्राह्मणो भगवान्साम्बो ब्राह्मणानां हि दैवतम् । विशेषाद्ब्राह्मणो रुद्रमीशानं शरणं व्रजे'दिति । विष्णुभागवतेऽपि 'न मे गर्भमिमं ब्रह्म'न्नित्यादिना शिवकोपाद्विभ्यत्यादित्या तस्य ब्राह्मणत्वं व्यक्तीकृतमिति तु शिवतत्त्वविवेके द्रष्टव्यम् । अविद्यातिरिक्तजडजातिसद्भावे मानाभाव इत्यत आह ब्राह्मी । 'ब्राह्मो जाता'विति निपातनात्साधुः । वागात्मिका वा । ब्रह्मैवानन्दो यस्याः सगुणायाः । मत्वर्थीयाच्प्रत्ययेन ब्रह्मानन्दवती वा । बलिनोऽविद्यानिरासासमर्थाः कामादिशत्रुजेतारः प्रिया दयापात्रं यस्याः । बलिनामको राजा प्रियो यस्य वामनस्य तदभिन्ना वा । पूजोपहाराः प्रिया यस्या वा ॥ १८३ ॥ संस्कृतप्राकृतादिभाषा रूपं यस्याः । भाषाभिर्निरूप्यत इति वा । तदुक्तं 'संस्कृतेनैव केप्याहुः केचिन्म्लेच्छादिभाषया । साधारण्येन केऽपि त्वां प्राकृतेनैव केचने'ति । बृहती अपारा सेना चतु-

सुखाराध्या शुभकरी शोभना सुलभागतिः ॥ १८४ ॥

रङ्गबलं यस्याः । बृहत्सेनाख्यराजविशेषरूपा वा । भावा द्रव्यगुणादयोऽभावाः प्राग-भावादयस्तैरुभयैरपि विवर्जिता । ननूभयेषामभावस्याप्यभावत्वेन तद्वत्त्वे कथमभाव-विवर्जितत्वम् । किंच प्रागभावप्रध्वंसात्यन्ताभावादयोऽपि द्रव्यगुणादिप्रतियोगिका एव वक्तव्याः प्रकारान्तरायोगात् । ततश्च द्रव्याभावाभावे द्रव्यत्वं द्रव्याभावे च द्रव्या-भावत्वमेवापद्यत इति कथं भावाभावविवर्जितत्वमिति चेत् । न । व्यासपादैरेव परिहृतत्वात् । तदुक्तं स्कान्दे यज्ञवैभवखण्डे 'अधिष्ठानावशेषो हि नाशः कल्पितव-स्तुनः । भावस्यैव ह्यभावत्त्वं नाशो भावस्य भावता ॥ भावाभावस्वरूपाभ्यामन्य एव हि कल्पितः । अधिष्ठानस्य नाशो न सत्यत्वादेव सर्वदे'ति । अधिष्ठानसमसत्ताकपदा-र्थप्रतियोगिकाभावस्य तदभावस्य चाधिष्ठानाद्वैदेन तत्र वृत्तिता । अधिष्ठानविषमस-त्ताकस्याभावस्त्वधिष्ठानस्वरूप एव न भिन्नः । अधिष्ठानं तु सत्यत्वादेव न नश्यतीति समुदायार्थः । सुखेनोपवासादिरूपकायक्लेशं ध्येयस्वरूपनियमनिर्बन्धादिकं चान्तरे-णाप्याराध्या । तथाच कामें हिमवन्तंप्रति भगवत्या वचनम् 'अशक्तो यदि मां ध्यातुमैश्वरं रूपमव्यय'मित्यादिनोत्तरोत्तरं सुलभप्रकारोपदेशः । नचैतावता पा-पमाशङ्कनीयमित्याहुः । शुभकरि शुभं पुण्यमेव करोति मोक्षादिपुरुषार्थरूपत्वाच्छो-भना सुखोपास्यत्वात्सुलभा च गतिः प्राप्तव्यं स्थानम् । गम्यत इति गतिः फलम् । ज्ञानमुपायो वा 'गतिर्मार्गे दशायां च ज्ञाने यात्राभ्युपाययो'रिति विश्वः । 'एषैव सर्वभूतानां गतीनामुत्तमा गति'रिति कौर्मात् । शोभनायै सुलभायै गत्यै नम इति चतुर्थीत्रयेण प्रयोगः । अत्र शोभनागतिः सुलभागतिरिति गतिपदानुषङ्गेण नाम-द्वयं सुवचनम् । तावतैव पौनरुक्त्यपरिहारसंभवात् । अत्र हि शोभनेति पदत्रयं पठ्यते । सुमुखी नलिनी सुभ्रूः शोभनेति यथास्थितमेकं नाम । सुवासिन्यर्चनप्रीताशो-भनेत्यत्र चतुरक्षरमशोभनेति द्वितीयम् । प्रकृते चाकारप्रश्लेषायोगात्पार्थक्यायोगा-च्चोत्तरपदेनैकवाक्यतां कल्पयित्वा पौनरुक्त्यमुद्भियत इति स्थितिः । मतिरमतिरि-त्यादिरीत्या पदच्छेदेऽप्येषैवोपपत्तिर्मूलम् । भगवत्पादैर्विष्णुसहस्रनामभाष्ये ईदृशीभि-रेवोपपत्तिभिः पदच्छेदस्य निर्णीतत्वात् । यथा निधिरव्यय इत्यत्र पदद्वयस्यैकनामत्व-मव्ययः पुरुषः साक्षीत्यनेन पौनरुक्त्यपरिहाराय । एवं स्थविरोध्रुवः शाश्वतःस्थाणुः सर्वविद्भानुर्वाचस्पतिरुदारधीरित्यादिषु । एवं जननोजनजन्मादिर्भीम इत्यनेन पुन-रुक्तिपरिजिहीर्षयाऽतुलः शरभोभीम इत्यत्राभीम इत्यकारप्रश्लेषः कृतः । एवमिष्टो विशिष्ट इत्यादौ । ततश्च छलाक्षरसूत्राणामपीदृशोपपत्तिमूलकत्वेन तदुक्तरीत्यैव पदच्छेदे नातीवादरः कर्तव्यः । अनेनैव न्यायेन सामवेदिभिर्वेदमर्यादयापि पठ्यमान ऊहग्रन्थो न्यायमूलकत्वात्पौरुषेय एवेति न्यायविरोधे तस्याप्रामाण्यमिच्छन्ति जैमि-नीयाः । प्रकृते तूभयथापि पौनरुक्त्यपरिहारसंभवे 'प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृति'रिति पकारादिनामप्रायपाठे नेत्यस्य भिन्नपदत्वस्वीकारे संदर्भशुद्ध्या-

राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥ १८५ ॥
राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी ।
साम्राज्यदायिनी सत्यसंधा सागरमेखला ॥ १८६ ॥
दीक्षिता दैत्यशमनी सर्वलोकवशंकरी ।

मस्यात्तत्र प्रचण्डाज्ञेत्यस्यैकपदत्वलिप्सया प्रकृते गतिपदानुषङ्गेणापि नामद्वयं स्वीकर्तुमुचितमिति दिक् । सर्वथैकमेव नामेति यद्याग्रहस्तदैकमेव पदमिति सुवचम् । शोभना चासावसुलभा चेति विग्रहे सुदुर्लभेत्यर्थः । सुदुर्लभा आगतिः पुनरावृत्तिर्यया । जन्मच्छेत्रीति यावत् । 'यस्य नो पश्चिमं जन्म यदि वा शंकरः स्वयम् । तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी'ति ब्रह्माण्डपुराणात् । यद्वा । असुलभा गतिर्दुर्लभं जन्म मानुषादि तच्छोभनं ययेत्यर्थः । उक्तंच देवीभागवते 'यैर्न श्रुतं भागवतं पुराणं नाराधिता यैः प्रकृतिः पुराणी । हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणा'मिति । विष्णुभागवते त्वत्रैव 'नाराधितो यैः पुरुषः पुराणः' इति द्वितीयचरणः पठ्यत इति भेदः । शोभनाऽसुरनायिकेत्यत्र शोभनानामसुराणां प्रह्लादादीनामित्यर्थं निर्वर्ण्य प्रकृते नामत्रयमपि सुवचम् ॥ १८४ ॥ राज्ञां देवराजादीनां ये राजानो ब्रह्मविष्णुरुद्रास्तेषामपीश्वरी । राजराजस्य कुबेरस्येश्वरी वा । राज्यं स्वाराज्यवैकुण्ठकैलासाधिपत्यादिकं दातुं शीलमस्याः । पूर्वोक्तानि राज्यानि वल्लभानि प्रियाणि यस्याः । राज्यशब्देन तत्पतयो राजानो वा कथ्यन्ते । अतएव श्रीनगरे तेषां वासः स्मर्यते । यदाह दुर्वासाः 'मध्यक्षोण्याममुयोर्महेन्द्रनीलात्मकानि च सरांसि । शातोदरीसहायान्भूपालानपि पुनःपुनः प्रणुमः' इति । अमुयोरित्यस्य त्रयोदशचतुर्दशप्राकारयोरित्यर्थः । राजन्ती शोभमाना कृपा यस्याः । राज्ञां नृपाणामिन्द्रादीनां च पीठेषु सिंहासनेषु निवेशिता निजा आश्रिता यया ॥ १८५ ॥ राज्याभिमानिनी लक्ष्मी राज्यलक्ष्मीः । यस्या मन्त्रस्तन्त्रराजे प्रसिद्धः । कोशस्य भाण्डागारस्य दिव्यस्य अन्नमयादेर्वा नाथा स्वामिनी । चत्वारि हस्त्यश्वरथपादातरूपाण्यङ्गानि येषां तेषां बलानामीश्वरी । अङ्गान्येव बलं येषां तेऽङ्गबला व्यूहाः । चतुरवयवका ये व्यूहास्तेषामीशित्री वा । अङ्गबलेश्वरशब्द एव वा व्यूहवाची । तेन द्विगुत्वान्ङीप् । चतुर्थव्यूहात्मेत्यर्थः । ते च वासुदेवाद्या वैष्णवेषु पुराणेष्विव शैवशाक्तेष्वपि पुराणेषु प्रसिद्धास्त इहोदाहार्याः । 'शरीरपुरुषः छन्दःपुरुषो वेदपुरुषो महापुरुष' इति बह्वृचोपनिषदुक्ता वा । राजसूयेन यष्टा मण्डलेश्वरो वा राजाधिराजो वा सम्राट् तस्य भावः साम्राज्यं तद्दत्ते । 'येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडि'त्यग्निपुराणीयकोशात् । सत्ये अनुल्लङ्घ्ये संधे प्रतिज्ञामर्यादे यस्याः । सागराः समुद्रा एव मेखला काञ्ची यस्या भूमेः सा ॥ १८६ ॥ धियं ज्ञानं क्षिणोति

सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी ॥ १८७ ॥
देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।

क्षापयतीति दीक्षा । 'अथातो दीक्षा कस्य क्षिद्धेतोर्दीक्षित इत्याचक्षत' इत्यारभ्य 'तं वा एतं धीक्षितं सन्तं दीक्षित इत्याचक्षत' इत्यन्तादाथर्वणब्राह्मणात् । 'शिष्येभ्यो मन्त्रदानेन पापं क्षपयतीति वा । दीयते कृपया शिष्ये क्षीयते पापसंचयः । तेन दीक्षेति कथिते'ति परानन्दतन्त्रात् । सा अस्य संजातेति दीक्षितस्तदभिन्ना । दैत्यानां भण्डादीनां शमनी नाशिका । सर्वान् लोकान्स्ववशे कुरुते । वशगिति मान्तमव्ययम् । सर्वेषां चतुर्णामर्थानां पुरुषार्थानां दात्री । तृच्नन्तयोगे 'न लोके'ति षष्ठ्या एव निषेधात्कृद्योगलक्षणषष्ठ्याः 'तृजकाभ्या'मिति समासनिषेधेऽपि शेषषष्ठ्या समासः । उक्तं च देवीपुराणे 'धर्मादींश्चिन्तितानर्थान्सर्वलोकेषु यच्छति । अतो देवी समाख्याता सर्वैः सर्वार्थसाधनी'ति । सवितुर्जगत्प्रसूतेः परशिवस्येयं सावित्री । 'प्रजानां च प्रसवनात्सवितेति निगद्यत' इति विष्णुधर्मोत्तरात् । 'सवितृप्रकाशकरणात्सावित्रीत्यभिधा भवेत् । जगतः प्रसवित्रीति हेतुनानेन वापिचे'ति भारद्वाजस्मृतेश्च । 'सावित्री प्रसवस्थिते'रिति वासिष्ठरामायणाच्च । देवीपुराणे तु 'त्रिदशैरर्चिता देवी वेदयोगेषु पूजिता । भावशुद्धस्वरूपा च सावित्री तेन सा स्मृते'त्युक्तम् । देवीभागवते तु 'स्रवणं स्यन्दनार्थं च धातुरेष निपात्यते । स्रवणे तेजसोत्पत्तिः सावित्री तेन कथ्यत' इत्युक्तम् । इयं च पुष्करतीर्थाधिष्ठात्री देवता । तदुक्तं पद्मपुराणे 'सावित्री पुष्करे नाम्ना तीर्थानां प्रवरे शुभ' इति ॥

अथ परिभाषायां षट्त्रिंशन्नामानि विभजते ॥ **देहगुणाद्भवलेशाद्धिस्ते रूपं दिवाभूरि । वारिगणेभाविगुणास्त्रिपदलताभावजववादाः ॥ २७ ॥**

सत्त्वं चित्त्वमानन्दश्च रूपं स्वरूपमत एव विद्यान्तरेष्वपसंहार्यमस्या इति सच्चिदानन्दरूपिणी ॥ १८७ ॥

इति भास्कररायेण कृते सौभाग्यभास्करे । सप्तमेन शतेनाभूदष्टमी भोगदा कला ॥ ७०० ॥ इति भास्कररायेत्यादि ललितासहस्रनामभाष्ये सप्तमशतकं नामाष्टमी कला ॥ ८ ॥

देशकालाभ्यामपरिच्छिन्ना तत्कृतपरिच्छेदाभाववती । उक्तं च योगसूत्रे 'स पूर्वेषामपि गुरुः कालेनानवच्छेदा'दिति । स ईश्वरः पूर्वेषां ब्रह्मादीनामपि गुरुः पिता । कालेनानवच्छिन्नत्वादित्यर्थः । इह नास्तीति प्रतीतिविषयोऽत्यन्ताभावो देशतः परिच्छेदः । पूर्वं नासीदग्रे न भविष्यतीति प्रतीतिविषयौ प्रागभावप्रध्वंसौ कालतः परिच्छेदः । अधुना नास्तीति त्वत्यन्ताभाव एव । देशे वृत्तौ कालस्य काले वृत्तौ देशस्य चावच्छेदकत्वनियमादिदानीं गोष्ठे गौर्न मन्दुरायामिति प्रतीतेरिहाधुनेत्यनयोरेकस्याधिकरणत्वेनान्यस्यावच्छेदकत्वेनोल्लेखाय प्रयोग इति ग्रन्थान्तरेषु विस्तरः । ईदृशपरिच्छेदाभावो नाम तत्प्रतियोगित्वाभावः, प्रतियोगित्वसंबन्धेन तयोरभावो वा । तद्वतीत्यर्थः । तदुक्तं सौरसंहितायां 'पुमानाकाशवद्व्यापी स्वातिरिक्तं मृषा यतः । देशतः कालतश्चापि ह्यनन्तो वस्तुतः स्मृत' इति । अनन्तशब्दश्च परि-

सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥ १८८ ॥

च्छेदाभाववानित्यर्थः । नन्वत्र वस्तुतः परिच्छेदाभावोऽपि स्मर्यते । अस्ति हि अयमयं नेति प्रतीतिविषयोऽन्योन्याभावो नाम वस्तुतः परिच्छेदः, तत्प्रतियोगित्वाभावः किमिति नोक्त इति चेत्, तस्य वादिविप्रतिपत्तिविषयत्वेन बहुभिर्नामभिः समर्थयिष्यमाणत्वेन पृथङ्निर्देक्ष्यमाणत्वादिति गृहाण । तदेवाह सर्वगा । सर्वं वस्तुमात्रं गच्छत्यभेदेन प्राप्नोतीति सर्वगा । 'अन्तात्यन्ताध्वे'त्यादिना डः । तदुक्तं वराहपुराणे त्रिमूर्तिषु सृष्टिनामिकां श्वेतपर्वते तपश्चरन्तीं प्रति ब्रह्मणा वरं ब्रियतामित्युक्ते देव्या वचनम् 'भगवन्नेकदेशेऽहं नोत्सहे स्थातुमञ्जसा । अतोऽर्थं त्वां वरं याचे सर्वगत्वमभीप्सती ॥ एवमुक्तस्तदा ब्रह्मा सृष्ट्यै देव्यै प्रजापतिः । उवाच सर्वरूपे त्वं सर्वगासि भविष्यसी'ति । अत्र सर्वगत्वविवरणरूपस्य सर्वरूपे इति संबोधनस्य सर्वाभिन्ने इत्यर्थकत्वात्परिकराङ्कुरालंकारः । सर्वाभिन्नत्वं च सिद्धमेवेत्यसीत्युक्तम् । अत एव साध्यत्वद्योतकस्य भविष्यसीत्यस्य 'सर्वक्षेत्रेषु तव सगुणमूर्तयो भविष्यन्तीत्येतत्परत्वम् । अतः सर्वक्षेत्रेषु विद्यमानेत्यप्यर्थः । सर्वान्तर्यामिणीति वा । ईदृशार्थत्रयमप्यभिप्रेत्योक्तं देवीपुराणे 'देव्या वा एष सिद्धान्तः परमार्थो महामते । एषा वेदाश्च यज्ञाश्च स्वर्गश्चैव न संशयः ॥ देव्या व्याप्तमिदं सर्वं जगत्स्थावरजंगमम् । ईड्यते पूज्यते देवी अन्नपानात्मिका च सा ॥ सर्वत्र शांकरी देवी तनुभिर्नामभिश्च सा । वृक्षेषूर्व्यां तथा वायौ व्योम्यप्स्वग्नौ च सर्वगा ॥ एवंविधा ह्यसौ देवी सदा पूज्या विधानतः । ईदृशीं वेत्ति यस्त्वेनां स तस्यामेव लीयते' इति । ननु नित्यत्वानित्यत्वजडत्वचित्त्वादिविरुद्धधर्मसमावेशात्कथमन्योन्याभावप्रतियोगित्वस्य ब्रह्मण्यभाव इत्यत आह । सर्वमोहिनी सर्वान्प्राकृतजनान् भेदभाने सत्यत्वं मन्यमानान् मोहयति अद्वैतविषयकज्ञानविधुरान्कुरुते इति तथा । ब्रह्मणो जगतश्च भेदभानस्य मोहमात्रत्वाद्वस्तुतोऽपरिच्छेद्यत्वे न कापि क्षतिरिति भावः । उक्तं च कूर्मपुराणे शिवेन 'इयं सा परमा शक्तिर्मन्मयी ब्रह्मरूपिणी । माया मम प्रियानन्ता ययेदं मोहितं जगत् ॥ अनयैतज्जगत्सर्वं सदेवासुरमानुषम् । मोहयामि द्विजश्रेष्ठाः सृजामि विसृजामि चे'ति । अत्रैव हिमवन्तंप्रति देवीवचनम् 'यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन्विविधानि तु । श्रुतिस्मृतिविरुद्धानि द्वैतवादरतानि च ॥ कापालं भैरवं चैव शाकलं गौतमं मतम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥ ये कुशास्त्राभियोगेन मोहयन्तीव मानवान् । मया सृष्टानि शास्त्राणि मोहायैषां भवान्तर' इति । सूतसंहितायामपि 'प्रसादहीनाः पापिष्ठा मोहिता मायया जनाः । नैव जानन्ति देवेशं जन्मनाशादिपीडिता' इति । सर्वं त्रैलोक्यं मोहयतीति वा । त्रैलोक्यमोहनचक्रविद्योभयरूपेति यावत् । ननु घटपटयोर्भेदभानस्यापि तुल्यन्यायेन मोहमात्रत्वात्तयोरप्यभेद एवास्त्वत आह—सरस्वती ज्ञानाभिमानिनी देवता । ज्ञानसमुद्ररूपेत्यर्थः । विषयानवच्छिन्नज्ञानरूपेति यावत् । घटादिजडपदार्थनिर्णये मोहस्यायोगेऽपि 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव' इति वच-

नेन ज्ञानरूपा द्वैतविषये ज्ञानावरणस्यावश्यकत्वात्तन्निर्णये सर्वानर्थनिरासकपरमपुरुषार्थरूपे पापिनां भवत्प्रसादविधुराणां मोह आवश्यक इति भावः । यद्वा कन्याः प्रकम्य 'द्विवर्षा तु सरस्वती'ति धौम्यवचनात्तादृशकन्यारूपेत्यप्यर्थः । भरद्वाजस्मृतावपि 'या वसेत्प्राणिजिह्वासु सदा वागुपवर्तनात् । सरस्वतीति नाम्नेयं समाख्याता महर्षिभि'रिति । 'सरणात्सर्वदृष्टीनां कथितैषा सरस्वती'ति वासिष्ठरामायणे च । ननु नायं दिङ्मोहादितुल्यो मोहः, विरुद्धधर्मसमावेशादियुक्तिसहस्रैर्भेदस्यानुमीयमानत्वादित्यत आह—**शास्त्रमयीति** । प्रधानार्थोऽयं मयट् । 'सर्वं खल्विदं ब्रह्मे'त्यादिशास्त्रप्रधाना ॥ अयं भावः—शास्त्रमेवेह प्राधान्येन गमकं नत्वनुमानादि । तस्य शास्त्रतो दुर्बलत्वात् । अत एव 'शास्त्रयोनित्वा'दिति ब्रह्मसूत्रम् । वेदैकवेद्यत्वबोधकश्रुतयश्च 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादयः । ततश्च सर्वस्य वस्तुजातस्य ब्रह्मभेदे शास्त्रेण बोधिते मन्त्रे तृतीयकूटेनाप्यनूदिते तद्विरोधादनुमितेरेव भ्रमत्वं कल्प्यम् । वेदान्तानामैदंपर्येण ब्रह्मैकनिर्णयाय प्रवृत्तेः । अत एव तादृशज्योतिःशास्त्रविरोधाच्चन्द्रप्रादेशिकत्वविषयकस्य सार्वजनीनप्रत्यक्षस्यापि भ्रमत्वं कल्पत इति शास्त्रात्मकस्ववयवशालिविग्रहत्वाच्छास्त्रविकारेत्यप्यर्थः । तदुक्तं ब्रह्माण्डे 'निःश्वासमारुतैर्वेदानृचं साम यजुस्तथा । आथर्वणमहामन्त्रानभिमानेन चासृजत् ॥ काव्यनाट्यादिलंकारानसृजन्मधुरोक्तिभिः । सरस्वती च जिह्वायाः ससर्ज सकलप्रसूः ॥ चुलुकेन चकोराक्षी वेदाङ्गानि ससर्ज षट् । मीमांसां न्यायशास्त्रं च पुराणं धर्मसंहिताम् । कण्ठोर्ध्वरेखातन्त्रेण ससर्ज सकलम्बिका ॥ आयुर्वेदं धनुर्वेदं कण्ठमध्यस्थरेखया । चतुःषष्टिं च विद्यानां कण्ठकूपभुवासृजत् ॥ तन्त्राणि निखिलान्नेभ्यो दोर्मूलान्मदनागम'मित्यादि । ननु भेदभानं न केवलं लौकिकं चन्द्रप्रादेशिकत्वज्ञानवत्, किंतु शास्त्रीयमेवेति शङ्कते । गुहाम्बा गुहायां स्थिताम्बा । छायारूपेति यावत् । मध्यमपदलोपी समासः । 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' इति श्रुतौ गुहाप्रविष्टत्वेन वर्णितयोश्छायातपयोः परस्परविलक्षणतया द्विवचनबलाच्च भेदसिद्धिरिति भावः । यद्वा गुहस्य स्कन्दस्याम्बा माता । तस्यास्तारकासुरवधादिकार्यार्थं देवैः प्रार्थनं ततः शिवशक्त्योः समागमस्तत्र विघ्नाचरणं तेन कोपशापादि ततोऽग्निगङ्गाशरस्तम्बादियोगेन स्कन्दोत्पत्तिरित्यादिकथायाः शास्त्रैकगम्याया एव भेदसाधकत्वाद्द्वैतश्रुतीनामेवोपचरितार्थता वक्तव्या । 'यजमानः प्रस्तर' इति श्रुतेरिव प्रत्यक्षविरोधादिति भावः । सत्यमयं व्यवहारः सर्वोऽपि व्यावहारिकसत्यत्वावलम्बनः अद्वैतं तु पारमार्थिकं सत्यत्वमालम्बत इत्याशयेन समाधत्ते—**गुह्यरूपिणीति** । गुहायां स्थितं गुह्यं परमरहस्यं व्यावहारिकद्वयातीतं ज्ञानमेव रूपमस्याः । उक्तं च सूतसंहितायाम् 'गुरुमूर्तिधरां गुह्यां गुह्यविज्ञानरूपिणीम् । गुह्यभक्तजनप्रीतां गुहायां निहितां नुम' इति । तथाचैकस्यैव ब्रह्मणो द्वे रूपे अवलम्ब्य द्विविधमपि शास्त्रमुप-

सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता।
संप्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी ॥ १८९ ॥

पद्यत इति भावः। गुह्योपनिषदेव रूपमस्या इति वा। तदुक्तं कौर्मे विभूतियोगवर्णनावसरे 'सर्वोपनिषदां देवि गुह्योपनिषदुच्यसे' इति ॥ १८८ ॥ ननु तर्हि शास्त्रद्वयप्रामाण्यात् भेदाभेदप्रसक्तिरिति नाद्वैतं सिध्येदित्यत आह—**सर्वोपाधीति**। सर्वैः स्कन्दजनकत्वच्छायातपत्वादिभिरुपाधिभिः सखण्डैरखण्डैश्च धर्मैर्विशिष्य निःशेषेण मुक्ता त्यक्ता धर्मसंबन्धशून्या। ततश्च धर्माणां स्वसंबन्धाभाववति भासमानः संबन्धः शुक्तौ रजतताद्तात्म्यमिव मिथ्यैवेति शास्त्रस्य सत्यवेदकत्वरूपप्रामाण्यनिर्वाहाय सर्वेषां वेदान्तानामद्वैते पारमार्थिके परब्रह्मणि साक्षात्परम्परया वा तात्पर्यस्य वक्तव्यत्वाद्भेदप्रतिपादकशास्त्रस्य पञ्चषाङ्गुलप्रासावेदकोपरागशास्त्रस्येव व्यावहारिकदृष्ट्यैव प्रवृत्तिरिति न भेदाभेदयोः समकक्षतेति भावः। तार्किकप्रसिद्धोपाधिशून्या तादृश्यसद्धेतुगम्येति वा। नन्वेवंसति त्रिपुरसुन्दर्याः शक्तिरूपत्वात्तस्याश्च पराहन्ताधर्मरूपत्वाविशेषेण मिथ्यात्वप्रसङ्ग इत्यत आह—**सदेति**। शिव एव पतिरिति व्रतं नियमः सदा सार्वकालिको यस्याः। शिवस्य पत्नीत्वं शिववदेव सदातनं कालत्रयाबाध्यमिति यावत्। इतरे तु पदार्थाः कल्पितास्तेषु धर्मत्वमपि दृश्यत्वाविशेषात्कल्पितमेव। शक्तौ तु धर्मत्वमात्रं कल्पितं नतु शक्तिरपि कल्पिता। अत एव सा ब्रह्मकोटिरिति भावः। सदाशिवस्य पतिव्रतेति वा। ननु कथमेतदवगम्यते पराहन्तातिरिक्ता एव धर्माः कल्पिता इति। प्रत्युत विनिगमनाविरहेण सर्वेषामेव धर्माणां मिथ्यात्वमेव वा स्यादित्यत आह। सम्यक् शिष्येभ्यः प्रदीयत इति संप्रदायः। तत्रेश्वरी समर्था समर्थनक्षमा। न्यायैः संप्रदायेन चैतदवगम्यत इत्यर्थः। यथाहि निर्धर्मके ब्रह्मणि वियदादयो धर्माः कल्पिताः वियदाद्यवच्छिन्नेऽपि चैतन्ये पुनःशब्दविषयत्वद्रव्यत्वधर्मत्वादयस्तदवच्छिन्नचैतन्येष्वपि पुनर्धर्मत्वादयः कल्पितास्तथा धर्मत्वस्यापि धर्मित्वस्येव दृश्यस्य निर्धर्मकेऽपि ब्रह्मणि सुकल्पत्वादेकस्यैव धर्मधर्मिभावे न्यायेनैव सिद्धे तत्र शिव एव धर्मी शक्तिरेव धर्म इति तु संप्रदायादवगन्तव्यमिति भावः। ब्रह्मैव शक्त्यप्रपञ्चप्रतियोगित्वेन शक्तिरित्युच्यत इति सांप्रदायिकाः। संप्रदायसंज्ञको मन्त्रार्थोऽपि योगिनीहृदये दत्तात्रेयसंहितायां च प्रसिद्धः। स च कादिविद्यायामेव स्वरस इति तु वरिवस्यारहस्य एवोपपादितमस्माभिः। तदीश्वरीत्यर्थो वा। युक्तं चैतदित्याह। साधु उचितम्। दाहकत्वादिशक्तेर्वह्निधर्मताया एव लोके दर्शनात्पराहन्ताशक्तेर्धर्मत्वमेव वक्तुमुचितमिति भावः। नपुंसकमिदं नाम। तेन साधुनेनम इति प्रयोगः। तेन साध्वी **सद्गतिदायिनीत्यनेन** न पौनरुक्त्यम्। तस्य धर्मस्य द्वे रूपे इत्याह। ईं तुर्यस्वरूपमेकाक्षरं कामकलासंज्ञकमिदं नाम। विष्णुपरात्प्रथमस्वररूपादकारात् अस्य भगिनी ई इति विग्रहे पुंयोगलक्षणे ङीपि 'यस्येतिचे'त्यकारलोपेऽवशिष्टात्प्रत्ययमात्रा-

---

१ सत्यत्वमेव वा. २ तेन 'साध्वी शरच्चन्द्रनिभानना' (श्लो० ९४) इत्यनेन न पौनरुक्त्यं इत्यावश्यकमिति भातीति केचित् ॥

"कुलोत्तीर्णा भगाराध्या माया म

त्परतः प्राप्तस्य सुपो हल्ङ्यादिना लोपे रूपसिद्धिः । यैनम इति प्रयोगः भार्याभर्तृभाव एव पुंयोगः । पितृपुत्रीभावस्यापि पुंयोगपदेन स्वीकृतत्वात् । 'सुभद्रा वसुदेवी स्या'दिति, 'नारायणीसहचराय नमः शिवाये'त्यत्र नारायणस्य भगिनीत्वेव व्याख्यानाच्च । एवं शक्रदुहितरि जयन्तस्य भगिनीति व्युत्पत्त्येव जयन्तीति प्रसिद्धेश्च । एकस्मिन्धर्मिणि स्थितयोर्द्वयोर्धर्मयोः सोदरताया एव युक्तत्वात् । विष्णुसंबन्धिभगिनीत्वविशिष्टेत्यक्षरार्थः । विष्णुरूपा तद्भगिनीरूपा चेति यावत् । एकमेव ब्रह्म धर्मो धर्मीति रूपद्वयं प्रापत् । तत्र धर्मः पुनः पुमान्स्त्रीति द्विधाभवत् । तत्र स्त्री परशिवमहिषीत्वं प्रापत् । पुमान् विष्णुः सकलजगदुपादानताम् । एतत्त्रयमपि मिलित्वैकमखण्डं ब्रह्मेति शैवमतप्रक्रिया कूर्मपुराणाद्यनुयायिनी रत्नत्रयपरीक्षायां दीक्षितैर्विस्तरेण निरूपिताऽनुसंधेया । अस्याश्च कामकलायाः स्वरूपं 'शून्याकाराद्विसर्गान्ताद्विन्दुप्रस्यन्दसंविद' इत्यादिना, वामकेश्वरतन्त्रे 'ईकाराद्विश्वकर्त्रीयं माया तुर्यात्मिका प्रिया' इत्यादिना, ज्ञानार्णवे 'ईकारः स मनुर्ज्ञेयो रक्तवर्णः प्रतापवा'नित्यादिना वायुपुराणे च, कामकलाविलासादौ च प्रपञ्चितम् । सौन्दर्यलहर्यां 'मुखं बिन्दुं कृत्वे'ति श्लोके स्पष्टकल्पमुक्तं भगवत्पादैः । तत्स्वरूपनिष्कर्षस्तु तन्मुखादेवानुसंधेयो रहस्यतमत्वादित्याह । गुरवः परमशिवादिस्वस्वगुरुपर्यन्तास्तेषां मण्डलं परम्परा सैव रूपं निरूपणमस्याः । अविच्छिन्नगुरुपरम्पर्यक्रमागतमिदं रहस्यं न तु पुस्तके लिख्यत इति भावः । अतएवोक्तं योगिनीहृदये 'कर्णात्कर्णोपदेशेन संप्राप्तमवनीतल' इति ॥ १८९ ॥ रहस्यत्वमेव चतुर्भिराह । कुलमिन्द्रियसमूहमुत्तीर्णा अतिक्रान्ता । तैरगम्यत्वात् । भगे सवितृमण्डले आराध्योपास्या । सवितृमण्डलस्य रहस्योपास्त्यधिकरणत्वात् । भगेन एकारेण वाराध्या 'यदेकादशमाधारं बीजं कोणत्रयात्मक'मिति वचनात् । प्रसिद्धतरस्याप्यप्रकटीकरणानुकूला शक्तिर्माया । देवीपुराणे तु 'विचित्रकार्यकरणा अचिन्तिततफलप्रदा । स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्तिते'त्युक्तम् । इदमेव च विस्तरेणोक्तं वराहपुराणे पृथिवीं प्रति विष्णुवाक्यम् 'पर्जन्यो वर्षते तत्र जलपूरश्च जायते । दिशो निर्जलतां यान्ति सैषा माया मम प्रिये ॥ सोमोऽपक्षीयते पक्षे पक्षे चापि विवर्धते । अमायां दृश्यते नैव मायेयं मम सुन्दरि ॥' इत्यारभ्य 'मम मायाबलं ह्येतद्येन तिष्ठाम्यहं जले । प्रजापतिं च रुद्रं च सृजामि च हरामि चे'त्यन्तैः सप्तत्रिंशता श्लोकैर्विचित्रकार्यकर्तृत्वं स्वावच्छेदिकाया मायाया एवेति प्रतिपादितम् । तादृशकार्यमेव च मायापदशक्यतावच्छेदकम् । भक्तितन्त्रे तु 'तच्छक्तिर्माया जडसामान्या'दिति सूत्रे भगवतः शक्तिरेव मायेत्युक्तम् । मधु मद्यं पुष्परसः क्षौद्रं वा पूजनादिसमये तद्वती । 'महत्यै वा एतद्देवतायै रूपं यन्मधि'ति श्रुतेः । यद्वा 'आदित्यो वै देवमधि'ति श्रुतौ विहितमधुमत्याख्यविद्याविशेषरूपा । अथवा योगशास्त्रे चतुर्विधयोगिन उक्ता-

गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥ १९० ॥
स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी ।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥ १९१ ॥
चित्कलानन्दकलिका प्रेमरूपा प्रियंकरी ।

स्तेषु चतुर्थी गतिकान्त्यभाव इत्युच्यते । सच पूर्वेभ्य उत्तमस्तस्यापि सप्त भूमिका अतिक्रमणीयाः सन्ति । तासु चरमा भूमिका मधुमतीत्युच्यते तद्रूपेत्यर्थः । तादृशभूमिकायामुत्पन्नस्यैव ज्ञानस्य तारकत्वात्संसारतारिकेति यावत् । तदिदं 'तारकं सर्वविषयं सर्वथा विषयक्रमं चेति विवेकजं ज्ञान'मिति योगसूत्रभाष्यादिषु स्पष्टम् । नदीविशेषरूपा वा । ईदृशरहस्यरूपापि पृथ्वीवदतिप्रकटेत्याह । मही मह्याख्यनदीविशेषरूपा वा । देवीपुराणे तु 'महद्व्याप्य स्थिता सर्वं महीति प्रकृतिर्मते'त्युक्तम् । गणस्य प्रमथादेर्गजाननस्य वाम्बा । गुह्यकैर्देवविशेषैरज्ञातरहस्यस्थले वा आराध्या । कोमलानि सुकुमाराण्यङ्गानि यस्याः । गुरुः प्रियो यस्याः । गुरुपदव्यभिन्ना वा । जगद्गुरोः शिवस्य पत्नी वा ॥ १९० ॥ कारकपारतन्त्र्यमन्तरेणैव सर्वकर्तृत्वात्स्वतन्त्रा, स्वतन्त्राख्यनित्यातन्त्ररूपा वा, स्वान्यात्मीयानि तन्त्राणि यस्या वा, शैववैष्णवगाणपतादितन्त्रेष्वप्यस्या एव विभूतीनां प्रतिपादनादात्मीयत्वमिति भावः । स्व आत्मीयः स्वाधीनः परशिवस्तत्तन्त्रा तदधीना वा । परस्पराधीनेत्यर्थः । तदुक्तं कालिकापुराणे कामरूपक्षेत्रमाहात्म्ये 'नित्यं वसति तत्रापि पार्वत्या सह नर्मभिः । मध्ये देवीगृहं तत्र तदधीनस्तु शंकरः ॥ ईशान्यां नाटके शैले शंकरस्य सदाश्रयम् । नित्यं वसति तत्रेशस्तदधीना तु पार्वती'ति । सर्वाणि चतुःषष्टिसंख्याकानि तन्त्राणीष्टे समर्थयति । शिवस्य दक्षिणाभिमुखी मूर्तिर्ब्रह्मनारायणादेरध्यापकत्वेन प्रसिद्धा । यस्या मन्त्रस्तन्त्रेषु प्रसिद्धः सैव रूपमस्याः । सनकसनन्दनादिभिः सम्यगाराध्योपास्या । अत एव तेषां गुरुपरम्परायां गणना । तदुक्तं ब्रह्माण्डे 'त्वमेवानादिरखिला कार्यकारणरूपिणी । त्वामेव हि विचिन्वन्ति योगिनः सनकादय' इति । शिवविषयकं ज्ञानं प्रकर्षेण दत्ते । तदुक्तं वासिष्ठमहारामायणे 'स्पन्देन लभ्यते वायुर्वह्निरौष्ण्येन लभ्यते । चिन्मात्रममलं शान्तं शिव इत्युदितं तु यत् । यत्स्पन्दमयशक्त्यैव लक्ष्यते नान्यथा किले'ति । शिवो ज्ञानप्रदायी यस्या वा । अत एव वराहपुराणे त्रिमूर्तिं प्रकृत्य 'एतास्तिस्रोऽपि सिध्यन्ति यो रुद्रं वेत्ति तत्त्वत' इति ॥ १९१ ॥ चिदेव कला सच्चिदानन्दात्मनो ब्रह्मण एकदेश इव यस्यां सा । यद्वा अन्तःकरणोपाधिकं चैतन्यं निरुपाधिकायाश्चित एकदेश इति । 'ममैवांशो जीवलोके जीवभूतः सनातन' इति स्मृतेः । पद्मपुराणेऽपि देवीमूर्तिगणनाप्रकरणे 'चित्तेषु चित्कला नाम शक्तिः सर्वशरीरिणा'मिति । एवमेवानन्द एव कलैकदेश इव यस्याः । 'शेषाद्विभाषे'ति कप्रत्ययः । जीवदवदानन्दैकदेशरूपा वा । स्वार्थे कः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः । आनन्दमयः

नामपारायणप्रीता नन्दिविद्या नटेश्वरी ॥ १९२ ॥
मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।

कोरको वा । 'कलिका कोरकः पुमा'निति कोशः । प्रेम स्नेहो भक्तिरेव स्वरूपं यस्याः । आयुर्घृतमितिवद्रूपाभिव्यक्तिजनकेऽपि रूपपदप्रयोगः । प्रियं करोतीति प्रियंकरी । अआइईत्यारभ्य क्षक्षा इत्यन्तानि भगवत्या नामानि । अकार एकः ककारादयः पञ्चत्रिंशच्चेत्येवं षट्त्रिंशदक्षराणि षट्त्रिंशद्वर्परूपाणि तेष्वेकैकस्य षोडशभिः स्वरैर्योगे क्रमेण तावन्तो मासाः । तेन षट्सप्तत्युत्तराणि पञ्चशतानि वर्णानि भवन्ति । एतानि प्रथमाक्षराणि । एष्वेकैकं प्रथमं कृत्वा द्वितीयवर्णस्थाने षट्त्रिंशत् क्रमेण निक्षिपेत् । अन्ते च आई इति पल्लवं योजयेत् । ततश्च विंशतिसहस्राणि सप्तशतानि षट्त्रिंशच्च नामानि भवन्ति । तदुक्तं 'आईपल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः कादिक्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च तैः सर्वरैः । नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगोप्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परेभ्यो नम' इति । देवीभागवतेऽपि तृतीयस्कन्धे 'अकारादिक्षकारान्तैः स्वरैर्वर्णैस्तु योजितैः । असंख्येयानि नामानि भवन्ति रघुनन्दने'ति । तेषां च पारायणं पञ्चधोक्तं कादिमते 'दिनतो वारतः पक्षान्मासात्षट्त्रिंशता दिनै'रित्यादिना । तदिदं नामपारायणाख्यं कर्म । सहस्रनामपाठेऽपि च तथा । योगरूढ्या पूर्वस्येव यौगिकवृत्त्या परस्याप्युपस्थितेः । ताभ्यां प्रीता । 'मामर्चयतु वा मा वा विद्यां जपतु वा न वा । कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदे'ति वचनात् । नन्दिनो नन्दिकेश्वरस्य विद्या तदुपासितविद्या । नटेश्वरस्य चिदम्बरनटस्येयं तदनुकारिणी । यदाहुरभियुक्ताः 'जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः । भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापीसंभूताम्भोजशोभां विदधदभिनवोद्दण्डपादो भवान्या' इति ॥ १९२ ॥ मिथ्यारूपस्य जगतोऽधिष्ठानं भानाधिकरणं रजतस्येव शुक्तिः । 'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः' । 'नेह नानास्ति किंचने'त्यादिश्रुतेः । 'सर्वं खल्विदमेवाहं नान्यदस्ति सनातन'मिति देवीभागवतात् । 'यत्र त्रिसर्गो मृषे'ति विष्णुभागवताच्च । गुणत्रयापचयविवक्षया स्त्रीलिङ्गम् । यद्वा अधिष्ठाशब्द एवाधिष्ठानपरः । ततश्च जगदधिष्ठारूपं ब्रह्मैव अनः प्राणो यस्या इति विग्रहः । यद्वा अधिष्ठानशब्दो मत्वर्थीयाच्प्रत्ययेनाधेयपरः । तेन मिथ्याजगदधिष्ठानमधिष्ठितं यस्यां इति विग्रहः । वस्तुतस्तु जगतो ब्रह्मपरिणामकत्वं स्वीकुर्वतां तान्त्रिकाणां मते जगतः सत्यत्वमेव मृद्घटयोरिव ब्रह्मजगतोरत्यन्ताभेदेन ब्रह्मणः सत्यत्वेन जगतोऽपि सत्यत्वावश्यंभावात् भेदमात्रस्य मिथ्यात्वस्वीकारेणाद्वैतश्रुतीनामखिलानां निर्वाहः । भेदस्य मिथ्यात्वादेव भेदघटिताधाराधेयभावसंबन्धोऽपि मिथ्यैव । तावन्मात्रेणैवाविरोधे सर्वस्य जगतो मिथ्यात्वकल्पनं तु वेदान्तिनामनर्थकमेवेति शांभवानन्दकल्पलतायां विस्तरः । ततश्च मिथ्या-

लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥ १९३ ॥
भवदावसुधावृष्टिः पापारण्यदवानला ।
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा ॥ १९४ ॥

भूतं जगतोऽधिष्ठानं भेदघटितसंबन्धेनावस्थितिर्यस्यामिति विग्रहात्स्त्रीलिङ्गतोपपत्तिः ॥

अथ परिभाषामण्डले त्रिचत्वारिंशन्नामानि विभजते ॥ **गौः शैवे विरते चतुरङ्घ्रितनुर्द्विश्चतुर्बलं नेतुः । द्विर्मे गङ्गामाता रजश्चतुर्भावजलमदाङ्घ्रावैः ॥ २७ ॥** अत्र नकाराभ्यां दशाक्षरे नामनी ॥ २७ ॥

मोक्षं ददातीति मुक्तिदा । तथाच श्रीकूर्मपुराणे 'तस्माद्विमुक्तिमन्विच्छन्पार्वतीं परमेश्वरीम् । आश्रयेत्सर्वभूतानामात्मभूतां शिवामिमं'का'मिति । शिवपुराणेऽपि 'नामानि ये महेशस्य गृणन्त्यज्ञानतोऽपि वा । तेषामपि शिवो मुक्तिं ददाति किमतः पर'मिति । ब्रह्माण्डपुराणेऽपि 'येऽर्चयन्ति परां शक्तिं विधिनाऽविधिनापि वा । न ते संसारिणो नूनं मुक्ता एव न संशय' इति । मुक्तिरेव रूपमस्याः । अविद्यानिवृत्तेर्ध्वंसरूपत्वे पञ्चमप्रकाररूपत्वे वा परमपुरुषार्थत्वानापत्त्या तदुपलक्षितस्वात्मानन्दस्यैव मोक्षताया वक्तव्यत्वात् । उक्तंच सौरसंहितायां चतुर्दशेऽध्याये 'अथ मुक्तेः स्वरूपं ते प्रवक्ष्यामि समासतः । यज्ज्ञानेन परा मुक्तिः सिद्ध्यत्यखिलदेहिना'मित्युपक्रम्य, ज्ञानस्य तत्र कारकहेतुतां 'ज्ञानं न कारकं विद्वद्बोधकं खलु केवल'मित्यादिना निरस्य, 'कार्यद्रव्यतया नैव स्थिता भवितुमर्हती'त्यादिना मुक्तेर्द्रव्यगुणकर्मसामान्यायात्मतामपि निरस्य, 'अतः साक्षात्परा मुक्तिः स्वात्मभूतैव केवल'मित्यादिना सिद्धान्तं संसाध्य, 'तस्मादात्मस्वरूपैव परा मुक्तिरविद्यया । तिरोभूता विशुद्धस्य विद्यया व्यज्यतेऽनघे'त्युपसंहारात् । लास्यं नर्तनं प्रियं यस्याः । लयश्चित्तावस्थाविशेषः । 'दशध्यानसमो लय' इति वचनात् । तालैर्नृत्यगीतयोः समकालपरिच्छेदो वा लयस्तस्य करी कर्त्री । लज्जा 'या देवी सर्वभूतेषु लज्जारूपेण संस्थिते'ति स्मरणात् । ह्रल्लेखा बीजस्वरूपा वा । रम्भोर्वश्यादिभिरप्सरोभिर्वन्दिता ॥ १९३ ॥ भवः संसार एव दावो वनवह्निस्तस्य शामकत्वात्सुधावृष्टिः पीयूषवर्षमिव । भवः संसार एव दावोऽरण्यम् । 'दवदावौ वनारण्यवह्नी' इत्यमरः । तस्य पुङ्खानुपुङ्खतयोज्जीवनात्पीयूषवृष्टिरेवेति वा । भवं परशिवं दत्ते वसु रत्नं धनं च धत्ते एतादृशी वृष्टिरिति त्रिपदं नाम वा । भोगमोक्षप्रदेति यावत् । उक्तंच रुद्रयामले मङ्गलराजस्तवे 'यत्रास्ति भोगो न तु तत्र मोक्षो यत्रास्ति मोक्षो ननु तत्र भोगः । श्रीसुन्दरीसाधकपुंगवानां भोगश्च मोक्षश्च करस्थ एवे'ति । पापान्येवारण्यानि दुःखजनकत्वात्तेषां दवानल इव नाशकत्वात् । पापारण्यानां दवानलो यस्या नाम सेति वा । तदुक्तं बृहन्नारदीये 'गङ्गायाः परमं नाम पापारण्यदवानलः । भवव्याधिहरी गङ्गा तस्मात्सेव्या प्रयत्नत' इति । यद्वा पापारण्यानां ये दवाः दावाग्नयो नाशनोपायभूता उपास्त्यादयस्तेषां अनान् प्राणान् लाति आदत्ते

भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना ।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका ॥ १९५ ॥
महेश्वरी महाकाली महाग्रासा महाशना ।

ताज्जीवयतीति यावत् । पापापहानि कर्माणि प्रथयतीत्यर्थः । तदुक्तं ब्रह्माण्डे 'कृतस्याखिलपापस्य ज्ञानतोऽज्ञानतोऽपि वा । प्रायश्चित्तं परं प्रोक्तं पराशक्तेः पदस्मृति'रिति । तत्रैवाध्यायान्तरे 'इदं च शृणु देवेन्द्र रहस्यं परमं महत् । सर्वेषामेव पापानां यौगपद्येन नाशनम् ॥ भक्तिश्रद्धासमायुक्तः स्नात्वान्तर्जलसंस्थितः । अष्टोत्तरसहस्रं तु जपेत्पञ्चदशाक्षरीम् ॥ आराध्य परमां शक्तिं मुच्यते सर्वकिल्बिषै'रित्यादि । दौर्भाग्यमेव तूलं कार्पासस्तस्य वातूल इव वात्येव दूरं निरासिकेति यावत् । 'वातूलः पुंसि वात्याया'मित्यमरः । यद्वा दौर्भाग्यं तूलं येषां ते दौर्भाग्यतूलाः दौर्भाग्यस्य तूलस्येव निरासका धर्मविशेषाः । अत एव ते धर्मा एव वातूले गौण्यावृत्त्या तेन दौर्भाग्यतूलः वातूला यस्याः सकाशात्सेति विग्रहः । दौर्भाग्यनिरासकानि कर्माणि यस्याः सकाशादुद्भवन्ति, यस्याः संबन्धीनि वा सेति यावत् । जरैव ध्वान्तमन्धकारस्तस्य नाशकत्वाद्रवेः प्रभेव ॥ १९४ ॥ भाग्यलक्षणस्याब्धेरुल्लासकत्वाच्चन्द्रिका कौमुदीव । भक्तानां चित्तान्येव केकिनो मयूरास्तेषामुल्लासकत्वाद्घनाघना मेघस्वरूपा । यद्वा घनपदेनैव मेघा उच्यन्ते । देवीकृतानि चरित्राण्येव भक्तचित्तकेकिघनरूपाणीति गौण्या तेन पदेन चरित्राणि कथ्यन्ते । भक्तचित्तकेकिघनैरासमन्ताद्घना निरन्तरेत्यर्थः । रोगा एव पर्वताः स्थूलत्वात्तेषां दम्भोलिर्वज्र इव 'भिषक्तमं त्वा भिषजां शृणोमि' इति श्रुतेः पुंलिङ्ग एवायं शब्दः । तेन रोगपर्वतदम्भोलयेनम इत्येव प्रयोगो न पाक्षिको दम्भोल्यैनम इति । यद्वा 'शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयो'रित्यग्निपुराणे दम्भोलिपदस्य शम्बपदेनेवाशनिपदेनापि साहचर्यात्स्त्रीलिङ्गतापि सुवचा । 'कां विधिं समुपस्कृत्ये'ति मोक्षधर्मीयप्रयोगनिर्वाहाय तट्टीकाकाराणां 'भाग्यं स्त्री नियतिर्विधि'रित्यत्र नियतिपदसाहचर्यमात्रवशेन पुंलिङ्गत्वेन प्रसिद्धस्यापि विधिपदस्य स्त्रीलिङ्गतेति व्याख्यानदर्शनात् । एतत्पक्षे पाक्षिको दम्भोल्यैनम इति प्रयोगः संगच्छते । पूर्वमशक्तिसिद्धितुष्टिभेदभिन्ना अष्टाविंशतिर्वधा उक्ताः ते मृत्युदारुपदेनोच्यन्ते । दारुपदस्योक्तपरिभाषायामष्टाविंशतिसंख्यापरत्वात् । श्लेषेण काष्ठान्यपि कथ्यन्ते । तेषां छेदकत्वात्कुठारेव स्वार्थे कः । 'द्वयोः कुठार' इति कोशः । 'मृत्युर्यस्योपसेचन'मिति श्रुतेः । अष्टसु नामसु रूपकालंकारः ॥ १९५ ॥ महती च सेश्वरी च माहेश्वरीति पूर्वं व्याख्यातं नाम । अनयोर्हस्वदीर्घादिमत्त्वाभ्यां न पौनरुक्त्यम् । महती च सा काली च । कालयतीति काली । कालने महत्त्वं तु मृत्योरपि कालनात् । तथाच कालिदासः 'एतदम्ब सदिदं तु नेति नः शङ्कया हृदि विकल्पलक्षणः । यो यमः स खलु काल्यते त्वया भूतसंयमनकेलिकोविद' इति । उज्जयिनीपीठाधीशमहाकालस्य स्त्रीति वा । महानपरि-

अपर्णा चण्डिका चण्डमुण्डासुरनिषूदनी ॥ १९६ ॥
क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।

मितो ग्रासः कवलो यस्याः । 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदन' इति श्रुतेः । महच्चराचरकर्मकत्वादशनं यस्याः । अत्र तृतीयो वर्णस्तालव्यपूर्वं तदन्त्यतृतीयकं नाम व्याख्यातमिति न पौनरुक्त्यम् । अपगतमृणं यस्याः साऽपर्णा । तदुक्तम्- स्माभिर्देवीस्तवे 'ऋणमिष्टमदत्त्वैव त्वन्नाम जपतो मम । शिवे कथमपर्णेति रूढिर्भोरायते न ते' इति । पर्ण पतनमिति नैरुक्त्यात्पतनरहितेति वा । पर्णमप्यदनीयत्वेन न विद्यते यस्यास्तपस्यन्त्या इति वा । तदुक्तं कालिकापुराणे 'आहारे त्यक्तपर्णाभूद्यस्माद्धिमवतः सुता । तेन देवैरपर्णेति कथिता पृथिवीतले' इति । ब्रह्मपुराणेऽपि 'अपर्णा तु निराहारा तां माता प्रत्यभाषते'त्यत्र प्रथमचरणेनेयमेव व्युत्पत्तिर्ध्वनिता । 'चडि कोपे' । अभक्तेषु कोपनत्वाच्चण्डिका । देवीभागवते 'चण्डिका सप्तवर्षा स्या'दिति कन्याविशेषस्य नामोक्तम् । चण्डश्च मुण्डश्च तावसुरौ निषूदयतीति तथा । तेन चामुण्डाख्यं नामास्या एवेति सूचितम् । उक्तं च मार्कण्डेयपुराणे 'यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता । चामुण्डेति ततो लोके ख्याता देवी भविष्यसी'ति । वराहपुराणे तु 'देवी च त्रिशिखेनाजौ तं रुरुं समताडयत् । तया तु ताडिते तस्य दैत्यस्य शुभलोचने ॥ चर्ममुण्डे उभे सम्यक् पृथग्भूते बभूवतुः । रुरोस्तु दानवेन्द्रस्य चर्ममुण्डेक्षणाद्यतः ॥ अपहृत्याचरद्देवी चामुण्डा तेन साभवदि'त्युक्तम् । 'कर्ममोटी तु चामुण्डा चर्ममुण्डा च चर्चिके'ति कोशाच्चर्ममुण्डेत्यपि देवीविशेषस्य नाम दृश्यते । तेन वाराहे 'चर्ममुण्डेति साभव'दित्येव पाठः स्यादित्यनुमीयत इत्यन्यदेतत् । चण्डानि प्रचण्डानि अत्यन्तकोपनचिह्नभूतनेत्रशोणिमादिवन्ति वा मुण्डानि येषामसुराणां तान्निषूदनीति वा । हन्यमानानां तादृशमुण्डवत्त्वविशेषणस्वारस्येन तादृशमुण्डमालाधरेति कालिकारूपध्वनिः ॥ १९६ ॥ क्षराण्यनियतसंख्यान्यक्षराणि वर्णा आत्मा स्वरूपं यस्याः । एकानेकाक्षराकृतिरित्यर्थः । उक्तं च वराहपुराणे 'एकाक्षरेति विख्याता सर्वाक्षरमयी शुभा । सैव विश्वेश्वरी देवी सैव क्राप्यमिताक्षरे'ति । यद्वा 'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' तदुभयमात्मा स्वरूपं यस्याः । 'सदसत्क्षरमक्षर'मिति महाभारते । विष्णुभागवतेऽपि 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यानि ये विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत' इति । सर्वेषां लोकानामीशी ईश्वरी । विश्वं धारयतीति तथा । त्रयाणां धर्मार्थकामानां वर्गः समूहः । 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकै'रित्यमरः । तस्य दात्री वितरणपरा । पञ्चवत्सरा कन्या सुभगेत्युच्यते । कन्याप्रकरणे 'सुभगा पञ्चवर्षा स्या'दिति धौम्यवचनात् । तदभिन्ना । यद्वा श्रीकाममाहात्म्यवीर्ययत्नकीर्त्यादयो

त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥ १९७ ॥
स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १९८ ॥

भगपदवाच्याः शोभना यस्यां सा । 'भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु । यशो-वीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिष्वि'ति विश्वः । शोभनो भगः सूर्यो यया वा । सौर-कार्येषु सर्वेषु तदन्तस्थिताया अस्याः शक्तेरेव निमित्तत्वात् । तदुक्तं विष्णुपुराणे द्वितीयेंशे 'सर्वा शक्तिः परा विष्णोर्ऋग्यजुःसामसंज्ञिता । तया त्रयी तपत्येष जगत-श्च हिनस्ति या ॥ मासि मासि रविर्यत्र तत्र तत्र हि सा परा । त्रयीमयी विष्णु-शक्तिरवस्थानं करोति वै ॥ ऋचस्तपन्ति पूर्वाह्णे मध्याह्ने तु यजूंषि वै । वृहद्रथ-न्तरादीनि सामान्यहःक्षये रवौ ॥ मूर्तिरेषा त्रयी विष्णोर्ऋग्यजुःसामसंज्ञिता । विष्णुशक्तिरवस्थानं सदादित्ये करोति या ॥ न केवलं रवौ शक्तिर्वैष्णवी सा त्रयीमयी । ब्रह्माथ पुरुषो रुद्रस्त्रयमेतत्त्रयीमयम् ॥ नोदेता नास्तमेता च कदा-चिच्छक्तिरूपधृक् । विष्णुर्विष्णोः पृथक् तस्य गणः सप्तमयोऽप्ययम् ॥ स्तम्भस्थद-र्पणस्येव योऽयमासन्नतां गतः । छायादर्शनसंयोगं स तं प्राप्नोत्यथात्मनः ॥ एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज । मासानुमासं भास्वन्तमध्यास्ते तत्र संस्थित'मिति । देवा ऋषयो गन्धर्वा अप्सरसो यक्षाः सर्पा राक्षसाश्चेति सप्तमयो गणः प्रतिमासं भिद्यमानस्य सूर्यस्योपकरणभूतत्वाद्भिद्यते । शक्तिस्तु प्रधानत्वान्न भिद्यत इति समुदायार्थः । यद्वा लोकत्रयान्तर्गतं सौभाग्यं चरगतमचरगतं वा अस्या एव रूपमिति सुभगा । अचरगतं तु पद्मपुराणे 'इक्षवस्तरुराजं च निष्पावा जीरधा-न्यके । विकारवच्च गोक्षीरं कुसुम्भं कुसुमं तथा । लवणं चेति सौभाग्याष्टकं स्थावर-मुच्यत' इति । चरास्तु सुवासिन्यः प्रसिद्धा एव । पाद्म एवोक्तं 'त्रिविष्टपसौभाग्यमयीं भुक्तिमुक्तिप्रदामुमाम् । आराध्य सुभगां भक्त्या नारीं वा किं न विन्दती'ति । अत्र पूर्वं विशेषणद्वयं सुभगापदस्य निरुक्तिमपि ध्वनयति । त्रीण्यम्बकानि नेत्राणि यस्याः । तदुक्तं देवीपुराणे निर्वचनाध्याये 'सोमसूर्यानलास्त्रीणि यन्नेत्राण्यम्बकानि सा'। तेन देवी त्र्यम्बकेति मुनिभिः परिकीर्तिते'ति । 'प्रत्ययस्थात्कात्पूर्वस्ये'त्युपान्त्य-इकारो न भवति आपः सुपः परत्वात् । त्रयाणां ब्रह्मविष्णुरुद्राणामम्बिका माता वा 'अभाषितपुंस्काच्चे'तीत्वाभावः । अतएवाह त्रिगुणात्मिका सत्त्वरजस्तमोरूपगुण-त्रयसाम्यविग्रहा ॥ १९७ ॥ 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिला-षोपनीतं यत्तत्सुखं स्वःपदास्पद'मिति श्रुतिप्रसिद्धं क्षयिष्णु सुखं वर्गः । नित्यं तु सुखम-पवर्गः । तदुभयं दत्ते । शुद्धा अविद्यकमालिन्यशून्या । जपापुष्पनिभा ओण्ड्रपुष्पेण तुल्या आकृतिः स्वरूपं यस्याः । 'आकृतिः कथिता रूपे सामान्यवपुषोरपी'ति विश्वः । अत्राकारप्रश्लेषेणाऽजपेति पृथक् पदं स्वीकृत्य धराधरसुतेत्येकं पदमित्यपि सुपचम् । तत्र अजपामन्त्रविशेषरूपा । तन्निर्वचनं च दक्षिणामूर्तिसंहितायां 'विना जपेन

दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥ १९९ ॥

देवेशि जपो भवति मन्त्रिणः । अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी'ति । 'पुष्पं विकास आर्तवे । धनदस्य विमाने च कुसुमे नेत्ररुज्यपी'ति हैमकोशः । तत्तुल्याकृतिर्यस्या इत्यर्थः । 'ओजोऽष्टमो धातु'रिति वेदभाष्ये । इन्द्रियसामर्थ्यमित्यन्ये । 'ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः । ओजो बले च दीप्तौ चे'ति तु विश्वः । तान्यस्यां सन्तीत्योजोवती । धरतीति धरा । पचाद्यच् । द्युतेः कान्तेर्धरा । 'यज्ञो वै विष्णु'रिति श्रुतेः तदभिन्ना देवी यज्ञरूपा । यज्ञा एव वा रूपमस्याः । तदुक्तं हरिवंशपद्मपुराणयोरीश्वरं प्रकम्य 'वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निर्जिह्वो धर्मरोमा ब्रह्मशीर्षो महातपाः ॥ अहोरात्रेक्षणो दिव्यो वेदान्तश्रुतिभूषणः । स्रुवतुण्डश्चाज्यनासः सामघोषस्वनो महान् ॥ धर्मसत्यमयः श्रीमान्क्रमविक्रमसत्क्रियः । प्रायश्चित्तनखो धीरः पशुजानुर्महाभुजः ॥ औद्गात्रान्त्रो होमलिङ्गः फलबीजमहौषधिः । वाय्वन्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः ॥ वेदीस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरर्चितः ॥ दक्षिणाहृदयो योगी महामन्त्रमयो महान् । उपाकर्मोष्टचिबुकः प्रवर्ग्यावर्तभूषणः ॥ नानाच्छन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वै मेरुशृङ्ग इवोच्छ्रित' इति । यद्वा 'इन्द्रियद्वारसंगृह्यैर्गन्धाद्यैरात्मदेवताम् । स्वभावेन समाराध्य ज्ञातुः सोऽयं महामख' इति मुख्यान्नायरहस्योक्तयज्ञाभिन्ना । प्रियाणि व्रतान्यविशेषात्सर्वदेवताविषयकाणि यस्याः । तदुक्तं भविष्योत्तरपुराणे 'देवं देवीं च वोद्दिश्य यत्करोति व्रतं नरः । तत्सर्वं शिवयोस्तुष्ट्यै जगज्जननशीलयोः । न भेदस्तत्र मन्तव्यः शिवशक्तिमयं जग'दिति । प्रियव्रताख्यराजस्वरूपा वा ॥ १९८ ॥ चपलेन्द्रियाणां दुःखेनाराधितुं अशक्या । अशक्येत्येव पर्यवसानम् । तदुक्तं 'तरलकरणानामसुलभे'ति । दुःखरूप आधर्षः स्वायत्तीकरणं यस्याः । श्वेतरक्तवर्णं पाटलीनामकं कुसुमं प्रियं यस्याः । उक्तंच पाद्मे 'श्रीवृक्षे शंकरो देवः पाटलायां तु पार्वती'ति । परममहत्परिमाणत्वात् । महती 'महान्कस्मान्मानेनान्याञ्जहातीति शाकपूणिर्महनीयो भवतीतिवे'ति तु यास्कनिरुक्तिः । नारदमुनेर्वीणाविशेषोऽपि महती तत्स्वरूपा वा । मेरुरेव निलयो यस्याः । तन्त्रराजेऽष्टाविंशे पटले 'अथ षोडशनित्यानां लोकात्मत्वं वदामि ते' इत्युपक्रम्य ससागरद्वीपां भुवं वर्णयित्वोक्तं 'मध्यस्थमेरौ ललिता सदैवास्ते महाद्युतिः । तस्यामितो जलाब्ध्यन्तः शेषास्ताः स्युश्चतुर्दश । तद्बहिः परमे व्योम्नि त्वन्ते चित्रा तु संस्थिते'त्यादिना बहवो विशेषा उक्तास्ते गुरुमुखादेवावगन्तव्याः । यद्वा । चक्रराजस्य त्रयः प्रस्ताराः भूमिकैलासमेरुभेदात् । तत्र वशिन्याद्यष्टकेन सह भेदभावना भूप्रस्तारः । मातृकाक्षरैश्चैतत्कैलासप्रस्तारः । षोडशभिर्नित्याभिश्चैन्मेरुप्रस्तारः । मेरुर्नि-

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ २०० ॥

ऐक्यतादात्म्यभावनैव निलयो यस्या इत्यर्थः । भावनाप्रकारश्च सनत्कुमारसनन्दनवसिष्ठसंहितासु तिसृषु त्रिविधः क्रमेण प्रतिपादितः ॥ अथवा 'भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णध्वमादनौ । अर्धचन्द्रश्च विन्दुश्च नवार्णो मेरुरुच्यत' इति । ज्ञानार्णवे उद्धृतो नवाक्षरो मन्त्रो मेरुपदवाच्यः स एव निलयः सर्वमन्त्रोद्भवस्थानं यस्याः । तदप्युक्तं 'महात्रिपुरसुन्दर्या मन्त्रा मेरुसमुद्भवा' इत्यादि । मन्दारो दैवतरुः श्वेतार्को वा तस्य कुसुमं प्रियं यस्याः ॥ १९९ ॥ 'अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः । पराक्रमं परो भुङ्क्ते स्वात्मानमशिवापहे'मित्यादिनोक्तलक्षणा वीरास्तैराराध्या । विराजो लक्षणं पूर्वमुक्तं तद्रूपा ॥

अथ परिभाषायामष्टचत्वारिंशन्नामानि विभजते ॥ **गुणभावे गीर्णे द्विश्चतुर्हृदां विभुगुणे भवाङ्गमखे ॥ वरगुणचतुर्विभाजां खलमदभावान्तरङ्गखिलविभवाः ॥ २८ ॥ स्पष्टम् ॥ २८ ॥**

विगतं रजः पापं यस्याः । विरजसे नम इति प्रयोगः । उत्कलदेशस्थविरजाख्यक्षेत्राधिष्ठात्रीयम् । तदुक्तं ब्रह्माण्डपुराणे 'विरजे विरजा माता ब्रह्मणा संप्रतिष्ठिता । यस्याः संदर्शनान्मर्त्यः पुनात्यासप्तमं कुल'मिति । ज्योतिरुदकं लोकाश्च रजःपदेनोच्यन्त इति तु नैरुक्ताः । विश्वतः सर्वावच्छेदेन मुखं यस्याः । 'विश्वतश्चक्षुरुत विश्वतोमुख' इति श्रुतेः । यत्रैवोपासकैर्ध्येयत्वेन रूपं कल्प्यते तत्रैवाविर्भवतीत्याशयेन 'सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुख'मित्यादिवचनानि पारमार्थिकरूपाभिप्रायेण 'अपाणिपादो जवनो ग्रहीते'त्यादीनीत्यविरोधः । प्रतिकूलमञ्चतीति प्रत्यक् तादृशं रूपं यस्याः । इन्द्रियाणां विषयोन्मुखत्वं बहिर्मुखत्वं पराङ्मुखत्वं चेत्युच्यते । तत्परित्यागेनान्तरात्मोन्मुखत्वमन्तर्मुखत्वं प्रत्यङ्मुखत्वं चोच्यते । अतएव श्रूयते 'पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्' इति । प्रत्यगवलोक्यमानस्वरूपेति यावत् । पर उत्कृष्टश्चासावाकाशश्च पराकाशः । निर्गुणत्वात्क्लीलिङ्गं पराकाशा इति । परब्रह्मेत्यर्थः । 'आकाश इति होवाचाकाशो ह्येवैभ्यो ज्यायानाकाशः परायण'मिति छान्दोग्ये आकाशपदेन परब्रह्मैवोच्यते न भूताकाश इति 'आकाशस्तल्लिङ्गा'दिति ब्रह्मसूत्रे निर्णयात् । कौर्मेऽपि 'यस्य सा परमा देवी शक्तिराकाशसंस्थिते'ति । 'इत्थं हि सा जगतो योनिरेका सर्वात्मिका सर्वनियामिका च । माहेश्वरी शक्तिरनादिसिद्धा व्योमाभिधाना दिवि राजतीवे'ति च । अथवा 'परमे व्योमन् प्रतिष्ठिते'त्यादिश्रुतिसिद्धं व्योम ब्रह्माण्डपिण्डाण्डभेदेन द्विविधमपि पराकाशो ब्रह्माभिव्यक्तिस्थानं तद्रूपा । उक्तं च चिद्गगनचन्द्रिकायाम् 'हृत्क्रियात्मशिरभानुमध्यगः खे चरत्यनलदृष्टिधाम यः । यत्तदूर्ध्वशिखरं परं नभस्तत्र दर्शय शिवं त्वमम्बिके' इति । स्वच्छन्दसंग्रहेऽपि 'द्वादशान्तं ललाटोर्ध्वं कपालोर्ध्वावसानकम् । द्व्यङ्गुलोर्ध्वं शिरोदेशात्परं व्योम प्रकीर्तित'मिति । यद्वा सप्तभ्यः समुद्रेभ्यः

मार्तण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥ २०१ ॥

परतर आकाशः पराकाशः तत्र ललिता षोडशे वर्षेऽवस्थितासती तद्रूपेत्युपचर्यते । तदुक्तं कादिमते 'कृतादिवर्षादारभ्य प्रतिवर्षमिति स्थिताः । द्वितीयादिषु वर्षेषु क्रमात्ताः परिवृत्तिभिः । षोडशेऽब्दे परे व्योम्नि ललिता सलिलाम्बुधौ । चित्रा च भवतीत्यं हि भजन्ते परिवर्तन'मिति । मेरुपर्वतः सप्तद्वीपाः सप्तसमुद्राः पराकाशश्चेति षोडशसु स्थानेषु कृतयुगस्य प्रथमवर्षे ललिता कामेश्वरी भगमालिनीत्यादिक्रमेण चित्रान्ताः षोडश नित्यास्तिष्ठन्ति । द्वितीये तु वर्षे ललिता जम्बुद्वीपेऽवतरति । कामेश्वरी तु क्षाराम्बुधिं प्रयाति । तत्रत्या भगमालिनी तु ततोऽप्युत्तरं स्थानमाक्रमते । एवंरीत्या पराकाशे ज्वालामालिनी मेरौ चित्रा तिष्ठति । तृतीये वर्षे क्षाराम्बुधौ ललितेत्यादिक्रमेणोत्तरोत्तरस्थानाक्रमणेन जम्बुद्वीपे चित्रा तिष्ठतीत्याद्यूह्यमिति तदर्थः । यद्वा पराकशब्दः कृच्छ्रविशेषवाचकः संस्तपोमात्रोपलक्षकः तस्य आशा दिक् । तपोगम्यो मार्ग इति यावत् । अथवा पराकमश्नाति । पराकादिजन्यफलभोक्त्रीत्यर्थः । परे उत्कृष्टे अके पापदुःखे अश्नाति नाशयतीति वा । 'अकं पापे च दुःखे चे'ति विश्वः । उपमार्थकप्रतीकाशप्रतिस्पर्धिपराकाशशब्दादनुपमेति वार्थः । प्राणान्पञ्चवृत्तिकानेकादशेन्द्रियाणि वा आदत्ते । प्राणान्यति खण्डयतीति वा । 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे'ति कौषीतकिब्राह्मणे प्राणपदस्य ब्रह्मपरतेति निर्णीतं प्राणाधिकरणे । तेन प्राणरूपिणीत्यस्य ब्रह्मरूपेत्यर्थः । 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'ति श्रुतेश्च । 'प्रा पूरण' इति धातोर्निष्ठातकारस्य 'संयोगादेरातोधातोर्यण्वत' इति सूत्रेण नकारे पूर्ण ब्रह्मेत्येवार्थः । 'पूर्णमदः पूर्णमिद'मित्यादिश्रुतेः । उक्तंच मनुस्मृतौ 'एनमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इन्द्रमन्ये परं प्राणमपरे च महेश्वरी'मिति । अथवा नित्यातन्त्रे तावत् 'अथ षोडशनित्यानां कालेन प्राणतोच्यत' इत्यादिना श्वासाख्यं कालमारभ्यैव दिनमासादिकृप्तिरुक्ता । 'सार्धद्वात्रिंशतिः श्वासाः क्रमाद्वादशराशय' इत्यादिना च राशिचन्द्रसूर्यादिकल्पना च श्वासमय्येवेत्यादिरूपा विलक्षणा प्रक्रिया दर्शिता । तद्रीत्या च ललितायाः प्राणात्मत्वमेव स्फुटीभवतीति तद्रूपेत्यर्थः ॥ २०० ॥

श्रीपुरे द्वात्रिंशत्त्रयोविंशयोः प्राकारयोर्मध्यभूम्यामस्ति मार्तण्डभैरवो देवो देव्युपासकः । तथाचोक्तं तद्वर्णनावसरे दुर्वासदेशिकेन्द्रेण 'चक्षुष्मतीप्रकाशनशक्तिच्छायासमारचितकेलिम् । माणिक्यमुकुटरम्यं मन्ये मार्तण्डभैरवं हृदय' इति । मणिमल्लाख्यदैत्यहननायाश्वारूढः शिवो भुवमागतो मल्लारिपदवाच्यो मार्तण्डभैरवपदेनापि व्यवहियत इति महाराष्ट्रेषु तन्त्रचिन्तामणिनामके तन्त्रे च प्रसिद्धम् । तत्कृतदेव्याराधनापि मल्लारिमाहात्म्य एव प्रसिद्धा । यद्वा मार्तण्डः सूर्यः । 'मृतेऽण्डे येन संजातो मार्तण्डस्तेन भास्कर' इति स्कान्दात् । शकन्ध्वादित्वात्पररूपम् । 'तत्र जात' इति तद्धितः । भैरवो वटुकादिरनेकविधः । तत्र सूर्याराध्यत्वं

पद्मपुराणे 'देव्या रत्नमयीं मूर्तिं भक्त्या नित्यं दिवाकरः। पूजयित्वाप्तवान्दिव्यं सूर्यत्वं शुभमुत्तम'मिति भैरवाराध्यत्वं तु कालिकापुराणे बहुशः प्रतिपादितम्। भीरूणां समूहो वा भैरवम्। 'दुर्गे स्मृता हरसि भीतिमशेषजन्तो'रिति देवीस्तुतिप्रकरणे मार्कण्डेयपुराणात्। सर्वेषामेकशेषे तैरराध्या। अथवा 'उद्यमो भैरव' इति शिवसूत्रे प्रतिपादित उद्योगो भैरव इत्युच्यते। स एव मोहान्धकारनाशकत्वान्मार्तण्डः। तदुक्तम्। 'मोहजयादनन्ताभोगात्सहजं विद्याजय' इति सूत्रे वार्तिककारैः 'मोहस्तमो निजाख्यातिस्तज्जयात्तत्परागवात्। उद्यमार्कोत्थितोऽनन्तः संस्कारप्रशमावधिः। आभोगो यस्य विस्तार इदंशादृशितात्मनः। भवेत्सहजविद्याया ज्ञयो लाभोऽस्य योगिन' इति। मार्तण्डतुल्येन भैरवेणोद्योगविशेषेणाराध्या लभ्येत्यर्थः। मन्त्रिणी श्यामलाम्बा। राज्योपयोगिविचारवाचकमन्त्रशब्दादिनिप्रत्यये नान्तत्वात् ङीप्। तस्यां न्यस्ता निक्षिप्ता राज्यधूः राज्यभारो यया। तदुक्तं ब्रह्माण्डपुराणे राज्यशामलां प्रक्रम्य 'ललितापरमेशान्या राज्यचर्चा तु यावती। शक्तीनामपि या चर्चा सर्वा तस्यां वशंवदे'ति। अथवा मन्त्रोपासका मन्त्रिणः। मननत्राणधर्मवत्त्वान्निर्मलचित्तमेव वा मन्त्रस्तद्वन्तो मन्त्रिणः। तान्नयति भगवत्यैक्यं प्रापयतीति मन्त्रिणी प्रयत्नविशेषः। तस्मिन्मन्त्रिण्यां न्यस्ता निवेशिता राज्यस्य स्वसाम्राज्यरूपस्यैक्यरहस्यस्य धूस्तज्जनकतावच्छेदको धर्मो यया। उपासकानां योगिनां च प्रत्नविशेषेणैक्यतापिरपि देव्यधीनेति फलितार्थः। तदिदमुक्तं 'चित्तं मन्त्रः'। 'प्रयत्नः साधकः'। 'विद्याशरीरस्फुरत्ता मन्त्ररहस्यं' इति त्रिभिः शिवसूत्रैः। उक्तंच भगवता कृष्णदासेन 'चेत्यतेऽनेन परमं स्वात्मतत्त्वं विमृश्यते। इति चित्तं स्फुरत्तात्मप्रासादादिविमर्शनम्॥ तदेव मन्यते गुप्तमभेदेनान्तरैश्वरम्। स्वस्वरूपमनेनेति मन्त्रस्तेनास्य देशिकैः॥ पूर्णाहन्तानुसंध्यात्मस्फूर्जन्मननधर्मतः। संसारक्षयकृत्त्राणधर्मतो रविरुच्यते॥ तन्मन्त्रदेवतामर्शप्राप्ततत्सामरस्यभूः। आराधकस्य चित्तं च मन्त्रस्तद्धर्मयोगतः॥ अस्य चोक्तस्य मन्त्रस्य मननत्राणधर्मिणः। उक्तमन्त्रानुसंधानावष्टम्भोयत्त्रणात्मकः॥ प्रयत्नोऽन्तःस्वसंरम्भः स एव खलु साधकः। यतो मन्त्रयितुर्मन्त्रो देवतैक्यसमप्रभः॥ इदृक्साधक्युक्तेन योगिना प्रथमोदितम्। पूर्णाहन्तानुसंध्यात्म वीर्यं मन्त्रस्य लभ्यते॥ विद्येति परमाद्वैतसंप्रवेदनरूपिणी। शरीरं यस्य भगवान् शब्दराशिः स उच्यते॥ तस्य सम्यक्समस्ताध्वपूर्णाहन्तास्वरूपिणी। स्फुरत्ता सैव मन्त्राणां मननत्राणधर्मिणाम्॥ गुप्तार्थता जनानां तु रहस्यमिति कथ्यते' इति। क्षेमराजवृत्तावितोऽपि विस्तरो द्रष्टव्यः। सर्वाशापरिपूरकचक्राधीश्वर्यास्त्रिपुरेशीति नाम। तदभेदादियमम्बापि तथोच्यते। जयन्ती भण्डासुरादिजयिनी सेना शक्तिसमूहो यस्याः। जयत्सेनाख्यराजविशेषस्वरूपा वा। निर्गतं त्रैगुण्यं गुणत्रयवत्त्वं यस्याः। परशब्दोऽपरशब्दः परापरशब्दो वा यस्य वाचकस्तत्स्वरूपत्वात्परापरा। परोऽन्यः अपरस्तद्भिन्नत्वात्स्वीयः। यद्वा पर उत्कृष्टः। अपरो निकृष्टः। 'ब्रह्मदासा ब्रह्मदाशा ब्रह्मेमे कितवा उते'ति श्रुतिः।

परो वैरी। अपरो मित्रम्। 'न मे द्वेष्योऽस्ति न प्रिय' इति स्मृतिः। परो दूरस्थः। अपरोऽन्तिकस्थः। 'दूरस्थं चान्तिके च त'दिति स्मृतिः। 'परः स्यादुत्तमानात्मवैरिदूरेषु केवले' इति विश्वः। परमपरं चेति द्विविधं सामान्यं परापराख्यं तृतीयं च। ब्रह्म द्विविधं केवलशबलभेदात्क्रमेण परमपरमुच्यते। 'एतद्वै सत्यकाम परं चापरं चे'ति श्रुतेः। 'द्वे ब्रह्मणी वेदितव्ये परं चापरमेव चे'ति स्मृतेश्च। परं ब्रह्म परं विशेषणं शक्तिः। अपरं पूर्वं विशेष्यं शिवः। 'सामरस्यसंबन्धेन शक्तिविशिष्टः शिव एव हि परं ब्रह्म। 'युजे वां ब्रह्म पूर्व्यं नमोभि' रिति श्रुतौ युवयोर्मध्ये पूर्वं विशेष्यभूतं ब्रह्म नमोभिर्युनज्मीत्युक्त्या शिवस्य नमःशेषिणः पूर्व्यमिति निर्देशात् स्वार्थे यत्। 'एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः' इति श्रुतावपूर्व्या पूर्वस्माद्भिन्ना परेति देव्या निर्देशात्। सृष्ट्यादावीक्षणात्मकोपःकालायमानशक्तिरिह स्तूयमानत्वादित्यादिः शिवानन्दलहर्यां विस्तरः। व्योमापि परमपरं चेति द्विविधम्। 'विद्या द्विविधा परा चैवापराचे'ति मुण्डकोपनिषदुक्ता। लिङ्गपुराणेऽपि 'द्वे ब्रह्मणी वेदितव्ये परा चैवापरा तथा। अपरा तत्र ऋग्वेदो यजुर्वेदो द्विजोत्तमाः॥ सामवेदस्तथाथर्ववेदः सर्वार्थसाधकः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च॥ ज्योतिषं चापरा विद्या पराक्षरमिति स्थितम्। तदद्दश्यं तदग्राह्यमगोत्रं तदवर्णक'मित्यादि। 'असंवृतं तदात्मैव परा विद्या नचान्यथे'त्यन्तम्। परोऽपरश्चेति प्रणवो द्विविधः। तदुक्तं स्कान्दे यज्ञवैभवखण्डे 'परापरविभागेन प्रणवो द्विविधो मतः। परः परतरं ब्रह्म प्रज्ञानन्दादिलक्षणम्॥ प्रकर्षेण नवं यस्मात्परं ब्रह्म स्वभावतः। अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः॥ प्रकर्षेण नवत्वस्य हेतुत्वात्प्रणवः स्मृतः। परमप्रणवप्राप्तिहेतुत्वात्प्रणवोऽथवे'ति। परोऽपरश्चेति द्विविधो वेदार्थः। तदुक्तं तत्रैव 'परापरविभागेन वेदार्थो द्विविधः स्मृतः। वेदार्थस्तु परः साक्षात्परात्परतरं परम्। अपरो धर्मसंज्ञः स्यात्तत्परप्राप्तिसाधन'मिति। योगशास्त्रे परमपरं परापरं चेति त्रिविधं ज्ञानमुक्तम्—'ज्ञानं तत्त्रिविधं ज्ञेयं परापरविभेदतः। तत्राद्यं परमं ज्ञानं पशुपाशात्मदर्शनम्॥ द्वितीयं परमं ज्ञानं केवलं पाशदर्शनम्। यथा दृष्ट्यन्तरं रात्रौ नरमार्जारनेत्रयोः॥ तथा विलक्षणं ज्ञानं परापरमुदीरित'मिति। परा अपरा परापरा चेति पूजा त्रिविधा। तदुक्तं नित्याहृदये 'तव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थिता। परा चाप्यपरा गौरी तृतीया च परापरा॥ प्रथमा द्वैतभावस्था सर्वप्रचरगोचरा। द्वितीया चक्रपूजा च सदा निष्पाद्यते मया॥ एवं ज्ञानमयी देवी तृतीया स्वप्रथामयी'ति॥ परापरा चेति वाक् द्विविधा। अपरा तु पश्यन्त्यादिभेदात्त्रिविधा। परापरा चेति अवस्था द्विविधा। तत्र परा तुर्या। अपरा तु जाग्रदादिभेदात्त्रिविधा। तदुक्तं विज्ञानभैरवभट्टारकैः 'यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये। तत्र तत्र परावस्था व्यापकत्वात्प्रतिध्यती'ति। परोऽपरश्चेति द्विविधो होमः। तत्रापरः स्थूलसूक्ष्मभेदात्पुनर्द्विविधः। तदिदमुक्तं स्वतन्त्रतन्त्रे प्रसिद्धं स्थूलहोमं मूलाधाराभ्यधिकरणकं प्राणाग्निहोत्रसमानधर्माणां सूक्ष्महोमं च प्रतिपाद्य तदन्ते 'वाच्यार्थानामशेषेण वेद्यवेत्तृविदात्मनाम्। स्थितिः परो भवेद्धोमः सर्वभेदविलाप-

सत्यज्ञानानन्दरूपा सामरस्यपरायणा।
कपर्दिनी कलामाला कामधुक्कामरूपिणी॥ २०२ ॥

नात्। स्वात्मरूपमहावह्निज्वालारूपेषु सर्वदा ॥ निरुद्धेन्धनरूपेषु परमार्थात्मनि स्थिरे। निर्व्युत्थानविलापस्तु परहोमः समीरित' इति। मन्त्रपारायणान्तर्गतमन्त्र-विशेषः परापरेत्युच्यते। देव्यपि त्रिविधा परा अपरा परापरा चेति। तदुक्तं वराह-पुराणे त्रिमूर्तिं प्रकृत्य 'तत्र सृष्टिः परा प्रोक्ता श्वेतवर्णस्वरूपिणी। या वैष्णवी विशालाक्षी रक्तवर्णस्वरूपिणी ॥ अपरा सा समाख्याता रौद्री चैव परापरा। एता-स्तिस्रोऽपि सिध्यन्ति यो रुद्रं वेत्ति तत्त्वत' इति। अत्र परापरपदयोर्विभजनेन सप्तदशार्थमेलनेन तु पञ्चेति द्वाविंशतिः। अन्येऽपि यथालाभं योजनीयाः ॥ २०१ ॥ सत्यं ज्ञानं आनन्दश्च रूपं यस्याः। 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः। सती सद्विद्या तद्विषये अज्ञा अनभिज्ञा ये तेषामनानन्दमानन्द-भिन्नं दुःखमेव रूपयति ददातीति। 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते' इति बृहदारण्यके ईशावास्ये च श्रवणात्। अविद्यामिति पदकाराणां पदपाठः। 'विद्यान्योपासनामेवं निन्दत्यारण्यकश्रुति'रिति ब्रह्माण्डपुराणे उपबृंहणं च। यद्वा। सत्या विद्यादेव्या अज्ञानं येषां ते सत्यज्ञानाः तेषामानन्दाख्यान् लोकान् रूपय-तीति आरण्यक एवोक्तश्रुतेः परतस्तथा श्रवणात्। 'आनन्दा नाम ते लोका अन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः' इति। समो-न्यूनानधिको रसो ययोस्तयोः शिवशक्त्योर्भावः सामरस्यमेव परमयनं स्थानं यस्याः। उक्तं चाभियुक्तैः 'परस्परतपःसंपत्फलायितपरस्परौ। प्रपञ्चमातापितरौ प्राच्यौ जायापती स्तुम' इति। 'भोक्तृभोग्यकरणोर्मिसंक्षये सामरस्यरसदोहिनी शिवे'त्यादि-कालिदासोक्तिश्च। 'समप्रधानौ समसत्त्वौ समौ तयो'रिति श्रुतिश्च। अमरैः सहितस्य सामरस्य लोकस्य परायणमाश्रयो वा। रस्यन्ते गीयन्त इति रस्यानि सामानि च तानि रस्यानि च तानि परायणान्यभीष्टानि यस्या वा। बहुलग्रहणान्न विशेषणस्य पूर्वनिपातः। 'परायणमभीष्टं स्यात्तत्पराश्रययोरपी'ति विश्वः। कपर्द इत्यधिकृत्य 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायन' इति सूतसंहिताटीकाकारैर्लिखितात्स्मरणा-द्बाहुल्यप्रशंसादिमती। वराटकमालाभूषिता वा। मैरालावतारस्य शिवस्याङ्गना महालसानाम्नी वराटकालंकारैव 'पर्व पूर्ता'वितिधातोर्भावे क्विपि राल्लोपे च पर-शब्दः पूर्तिवाची। अन्तर्भावितण्यर्थात्कर्तरि वा क्विपि पूरवाची। कस्य गङ्गाजलस्य पूरं प्रवाहं दापयति शोधयतीति कपर्दः। 'दैप् शोधन' इति धातोः सुप्युपपदे 'आतो धातोः' 'सुपि स्थ' इति योगविभागात्कः। गङ्गाया अपि पाविका यज्जटे-त्यर्थः। 'कपर्दः खण्डपरशोर्जटाजूटे वराटके' इति विश्वः। 'आर्भव्या शशिखण्डम-ण्डितजटाजूट्या'मिति लघुस्तवोक्तरूपवती वा। कपर्दिनामकस्य शिवस्य पत्नी वा। देवीपुराणेऽष्टषष्टिशिवक्षेत्रगणनावसरे 'छगलाण्डे कपर्दिन'मिति स्मरणात्। कल्पनां

कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ २०२ ॥

चतुःषष्ट्यादिरूपाणां माला परम्परा । कलां लावण्यं मां शोभां च लातीति वा । कामान् दोग्धीति कामधुक् । मनोरथान्पूरयतीत्यर्थः । कामधेनुस्वरूपा वा । 'सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैत्वि'ति श्रुतेः । कामः परशिव एव रूपमस्याः । 'सोऽकामयत बहुस्यां प्रजायेय' इति श्रुतिसिद्धजगत्सिसृक्षावानीश्वरः कामेश्वरः तमधिकृत्य काव्या अधीयते 'य एवायं काममयः पुरुषः स एव दैव-शाकल्यस्तस्य का देवतेति स्त्रिय इति होवाचे'ति । कामं यथेच्छं वा रूपाण्यस्याः ॥ २०२ ॥ कलानां नानाविधतया पूर्वं वर्णितानां निधिः 'आत्मैवास्य षोडशी कले'ति बृहदारण्यकोक्तेरात्मनां जीवानां निधिर्वा । चन्द्रमण्डलरूपा वा । 'योनि-वर्गः कलाशरीर'मिति शिवसूत्रे कलाशब्दः कर्मपरत्वेन तद्भाष्ये व्याख्यातः । तेन कर्माणि निर्धास्यन्तेऽस्यामिति वा । अधिकरणे किः । 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत' इति स्मृतेः । कवेः कर्म काव्यम् । तच्च नाटकशाटकभाणडिमप्रह-सनादिभेदादनेकविधमग्निपुराणादौ प्रदर्शितं तादृशकलाप्यम्बाया एव रूपम् । उक्तंच विष्णुपुराणे 'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च । शब्दमूर्तिधरस्यै-तद्वपुर्विष्णोर्महात्मन' इति । काव्योत्पादकप्रतिभैव वा काव्यकला । ध्यानविशेषेण काव्यनिर्माणसामर्थ्यप्रदत्वस्य तन्त्रेषु बहुशो वर्णनात् । काव्यस्य शुक्रस्य मृतसंजी-वन्याख्यकलारूपा वा । रसान् शृङ्गारादिभेदेन दशविधान् जानातीति रसज्ञा । रसनेन्द्रियस्वरूपा वा । रसस्य ब्रह्ममृतस्य शेवधिर्निधिः । 'रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवती'ति श्रुतेः । ब्रह्माण्डेऽपि 'रस एव परं ब्रह्म रस एव परा गतिः । रसो हि कान्तिदः पुंसां रसो रेत इति स्मृतः ॥ रसो वै रससंलब्ध्या ह्यानन्दी भगवत्यपि । वेदप्रामाण्यसंसिद्ध्या रसः प्राणतया स्थितः ॥ को ह्येवान्याच्च कः प्राण्यादित्यपि श्रुतिभाषितः । प्राणात्मको रसः प्रोक्तः प्राणदः कुम्भसंभवे'ति । 'निधिः शेवधि'रिति यास्कः । 'निधिर्ना शेवधि'रिति कोशात्पुंलिङ्गौ निधिशेवधि-शब्दौ । तेन कलानिधये नमः । रसशेवधये नम इत्येव प्रयोगो न पाक्षिको निध्यै नमः शेवध्यै नम इति । कलानां रसानां च निधिः शेवधिर्यस्या इति विग्रहे तु सोऽपि संभाव्यते ॥

इति श्रीभासुरानन्दकृते सौभाग्यभास्करे । शतकेनाष्टमेनाभूद्वि-ख्याख्या नवमी कला ॥ ८०० ॥

इति श्रीललितासहस्रनामभाष्येऽष्टमशतकं नाम नवमीकला ॥ ९ ॥

षट्त्रिंशत्तत्त्वविग्रहशीलत्वात्पुष्टा । बहुभिर्गुणैर्ब्रह्मरसेन ब्राह्मणैर्वा पुष्टा । 'ब्राह्मणैः पोषितं ब्रह्मे'ति स्मृतेः । 'ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्म'दिति श्रुतेश्च । सर्वेषामादि-भूतत्वात्पुरातना । ङीषभावश्छान्दसः । पुरातना गुणा अस्यां सन्तीत्यर्थे मत्वर्थीया-च्छ्रत्ययान्ताद्वा टाप् । अतएव सर्वेषां पूज्या पूजयितुं योग्या, प्रतीक्ष्या वा । पुष्कं पोषणं राल्यादत्तेऽसौ पुष्करा । पुष्करारव्यतीर्थरूपा वा । रलयोरभेदाद्व्याप्तेति वा ।

परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी ॥ २०४ ॥

पुष्कराणीव कमलानीवेक्षणानि नयनानि यस्याः । 'पुष्करं पङ्कजे व्योम्नि पयःकरिकराग्रयोः । ओषधीद्वीपविहगतीर्थरागोरगान्तरे । पुष्करं सूर्यवक्त्रे च काण्डे खड्गफलेपि चे'ति विश्वः । एवं पुष्करारुयो योगोऽपि पाद्मे प्रसिद्धः 'विशाखास्थो यदा भानुः कृत्तिकासु च चन्द्रमाः । स योगः पुष्करो नाम पुष्करेष्वतिदुर्लभः' इति पुष्करशब्दः पृथिवीपरोऽपि । तदुक्तं पद्मपुराण एव 'या पद्मकर्णिका देवास्तां पृथ्वीं परिचक्षते । ये पद्मे सारगुरवस्तान्दिव्यान्पर्वतानिह ॥ यानि पर्णानि पद्मस्य म्लेच्छदेशास्तु तेऽभवन् । यान्यधोभागपत्राणि ते सर्पाणां सुरद्विषाम् ॥ एवं नारायणस्यार्थे मही पुष्करसंभवा । प्रादुर्भावोच्छ्रयस्तस्मान्नाम्ना पुष्करसंज्ञिते'ति । तेन यथासंभवं मह्यादिविषये क्षण उत्सवो निर्व्यापारस्थितिर्वा यस्या इति वार्थः । 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण' इत्यमरः । सप्तम्या अलुक् । पुष्करशब्दो न्यग्रोधवृक्षपरोऽपि दृश्यते । पुष्करद्वीपपदस्य तद्वृत्त्वेन मत्स्यपुराणे निर्वचनदर्शनात् । 'न्यग्रोधः पुष्करद्वीपे पुष्करस्तेन स स्मृत' इति । विष्णुपुराणेऽपि 'न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तम'मिति । 'स प्रजापतिरेकः पुष्करपर्णे समभवदि'ति श्रुतिरपि । न्यग्रोधपर्णशायित्वाद्विष्णुरत्र लक्षणया गृह्यते । तत्रेक्षणं कृपानिरीक्षणं यस्या इति वा । तदुक्तं देवीभागवते 'वटपत्रशयानाय विष्णवे बालरूपिणे । श्लोकार्धेन तदा प्रोक्तं भगवत्याखिलार्थद'मिति । अम्भस्स्वीक्षणं यस्या इति वा । 'तानि वा एतानि चत्वार्यम्भांसि देवा मनुष्याः पितरो सुरा' इति श्रुतेः ॥ २०३ ॥ परमुत्कृष्टं ब्रह्मात्मकं ज्योतिः । 'तदेवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत'मिति बृहदारण्यकात् । 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्नि'रिति श्रुत्या 'येन सूर्यस्तपति तेजसेद्ध' इति श्रुत्या च परत्वम् । 'परं ज्योतिरुपसंपद्ये'ति श्रुतिरपि । 'मनो ज्योतिर्जुषतां' 'वाचैवायं ज्योतिषास्ते' इत्यादिप्रयोगात्प्रकाशमात्रं ज्योतिरुच्यते तेभ्यात्मज्योतिः परमिति भावः । दक्षिणामूर्तिसंहितायां पञ्चमपटलोक्तोऽष्टाक्षरमन्त्रोऽपि परंज्योतिरुच्यते । परं धाम उत्कृष्टं तेजः । 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं ममे'ति गीतासु धामशब्दस्यावस्थापरतया तदतिक्रान्तं यत्परं धाम । उक्तं चाचार्यैः 'त्रिषु धामसु यद्भोग्यं भोक्ता यश्च प्रकीर्तितः । वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यत' इति । यज्ञवैभवखण्डेऽपि 'जाग्रत्स्वप्नसुषुप्त्याख्यं वेदधामत्रयं तु यः । स एवात्मा न तद्दृश्यं दृश्यं तस्मिन्प्रकल्पितम् ॥ त्रिधामसाक्षिणं सत्यज्ञानानन्दादिलक्षणम् । त्वमहंशब्दलक्ष्यार्थं परं धाम समाश्रये' इति । धामशब्दः पदपरो वा । परं पदमित्यर्थः 'तद्विष्णोः परमं पद'मिति श्रुतेः । कूर्मपुराणेऽपि 'दीपा माहेश्वरी गौरी मम शक्तिर्निरञ्जना । शान्ता सत्या सदानन्दा परं पदमिति श्रुति'रपि । परस्मैज्योतिषे नमः,

मूर्तामूर्ता नित्यतृप्ता मुनिमानसहंसिका।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिणी सती ॥ २०५ ॥

परस्मैधात्वे ननु इति प्रयोगः । परमिति मान्तमव्ययमित्याहुः । परमा च साध्वी च 'वोतो गुणवचना'दिति विविधैर्वैकल्पिकत्वात् ङीषभावः । 'अणोरणीया'नितिश्रुतिः । दुर्ज्ञेयेत्यर्थः । तार्किककल्पिताः पीलवोऽप्यस्या एव रूपमिति वा । परम उत्कृष्टोऽणुर्मन्त्रो वा । परादुत्कृष्टाद्ब्रह्मविष्णुरुद्रादपि परा श्रेष्ठतरा । यद्वा ब्रह्मायुःपरिमाणं परमित्युच्यते तस्मात्परा तादृशसंख्यापरिच्छेदरहिता । तत्र परंधामत्वं परमाणुत्वं च हेतुः । तथैव च दर्शितं कालीपुराणे 'तस्य ब्रह्मस्वरूपस्य दिवारात्रं च यद्भवेत् । तत्परं नाम तस्यार्धं परार्धमभिधीयते । स ईश्वरस्य दिवसस्तावती रात्रिरुच्यते ॥ स्थूलात्स्थूलतमः सूक्ष्माद्यस्तु सूक्ष्मतमो मतः । न तस्यास्ति दिवारात्रिव्यवहारो न वत्सर' इति । पाशो हस्ते वामाधःकरे यस्याः । 'प्रहरणार्थेभ्यः परेनिष्ठासप्तम्या'विति पूर्वनिपातापवादः । पाशान् हस्तयते हस्तेन निरस्यतीति वा । पाशानां हन्त्री नाशिका । उक्तंच हरिवंशे 'नागपाशेन बद्धस्य तस्योपहृतचेतसः । त्रोटयित्वा करैर्नागपञ्जरं वज्रसंनिभम् ॥ बद्धं बाणपुरे वीरमनिरुद्धमभाषत । सान्त्वयन्ती च सा देवी प्रसादाभिमुखी तदे'त्यादि । परेषां स्वोपासकद्विषां राज्ञां मन्त्रान्प्रभुमन्त्रोत्साहाख्यशक्तित्रयान्तर्गतान् शक्तिविशेषणान्विशेषाद्धिनत्ति । यद्वा परैरभिचाराद्यर्थं प्रयुक्तो मनुः परमन्त्रः शत्रुप्रयुक्तोऽस्त्रमन्त्रो वा । उक्तंच हरिवंशे प्रद्युम्नं प्रतीन्द्रसंदेशे 'तदस्त्रप्रतिघाताय देवीं स्मर्तुमिहार्हसी'ति । यद्वा पर उत्कृष्टो मन्त्रः पञ्चदशीरूपस्तं विभेदयति 'मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च मन्मथः । अगस्तिरग्निः सूर्यश्च नन्दी स्कन्दः शिवस्तथा । क्रोधभट्टारको देव्या द्वादशामी उपासका' इति तन्त्रोक्तरीत्या द्वादशविधं करोति । अथवा परा उत्कृष्टा ये मन्तारो मननकर्तारस्तेषामवीन् पापानि भेदयति नाशयति । 'अविशब्देन पापानि कथ्यन्ते श्रुतिषु द्विजैः । तैर्मुक्तं न मया त्यक्तमविमुक्तमतः स्मृत'मिति लिङ्गपुराणेऽविपदस्य पापपरत्वकथनात् ॥ २०४ ॥ रूपवद्वस्तु मूर्तं वाय्वाकाशादिकममूर्तं तत्तद्रूपेति नामद्वयार्थः । यद्वा पञ्चीकृतानि महाभूतानि मूर्तानि अपञ्चीकृतानि तु भूतसूक्ष्माण्यमूर्तानि । 'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चे'ति श्रुतौ द्वेधापि व्याख्यानदर्शनात् । प्रपञ्चब्रह्मणो वा मूर्तामूर्ते 'द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च । क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते । अक्षरं ब्रह्म कूटस्थं क्षरं सर्वमिदं जग'दिति विष्णुपुराणदर्शनात् । चलनात्मकक्रियावत्त्वं मूर्तत्वमिति तार्किककल्पनाया निर्मूलत्वेनाश्रद्धेयत्वात् । अनिरेरेवोपचारैस्तृप्तेति पञ्चाक्षरं नाम भक्तिमात्रप्रियत्वात् । अथवा अनिति श्वसतीति जीवोऽनितिपदार्थः । 'इकृस्तिपौ धातुनिर्देशे' इत्यनेन शब्दनिर्देशे श्तिपो विधानेऽपि प्रकृते धात्वर्थपरोऽयमनितिः । 'यजतिषु येयजामहं करोती'ति श्रुतौ 'इतिकर्तव्यताविधेर्यजतेः पूर्ववत्व'मिति जैमिनिसूत्रे 'ईक्षतेर्नाशब्द'मिति व्याससूत्रेऽर्थपरस्यापि प्रयो-

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।

गस्य दर्शनात् । ततश्च जीवैरतृप्तेत्यर्थः । 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदन' इति श्रुत्या सर्वभक्षकत्वात् । यद्वा इति एवंप्रकारेण अतृप्ता न, तृप्ता न भवतीति न । द्वौ नञौ प्रकृतमर्थं गमयतः । ईदृशः प्रकारो नास्ति येन तृप्ता न स्यात् । अपितु सर्वैरपि प्रकारैस्तृप्तैव । 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मन' इति वचनेन भक्तिमात्रेण यत्किंचिदपि दत्तं तृप्तिकार्येवेति कथनात् । मुनीनां मानसं मन एव क्षेषात् मानसाख्यं सरस्तत्र हंसीव । स्वार्थे कः । यद्वा मुनीनां माने बहुमानविषये राहसिकेव पादकटकयुक्तेव । तेषां मानेन संतोषात् नृत्यतीवेति तात्पर्यार्थः । 'हंसकः पादकटक' इति कोशः । सत्यं ब्रह्मैव व्रतं भक्ष्यमुपचारात्तत्प्रियं यस्याः । 'पयोव्रतं ब्राह्मणस्ये'ति श्रुतौ व्रतपदस्य भक्ष्ये प्रयोगदर्शनात्, सत्यमेव व्रतं यस्या वा सत्योक्तिमात्रपरिपालनरूपव्रतेन लभ्येति यावत् । सत्यानि शीघ्रफलदानि व्रतानि यस्या वा । कृष्णप्राप्त्यर्थं गोपीभिः कृतानां कात्यायनीव्रतानां शीघ्रमेव फलवत्तायां विष्णुभागवते वर्णनात् । 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम'ेति भगवदुक्तं व्रतममोघं यस्या इति वा । अथवा 'शरीरवृत्तिर्व्रत'मिति शिवसूत्रे शरीरधारणमपि व्रतमेवेत्युक्तम् । 'शिवभक्तिसुधापूर्णे शरीरे वृत्तिरस्य या । व्रतमेतदनुष्ठेयं न तुच्छं तच्च धारण'मिति वार्तिकात् तादृशं व्रतं सत्यमावश्यकं यया यद्भक्त्या सा । अतएव शरीरधारणं प्रार्थितं भगवता भट्टोत्पलेन 'अन्तरुल्लसितस्वच्छशक्तिपीयूषपोषितम् । भवत्पूजोपभोगाय शरीरमिदमस्तु मे' इति । अथवा सत्यव्रतो नाम ब्राह्मणः सूकरभयात् ऐऐ इत्युच्चार्य तावतैव तपसा महाकविर्देवीभक्तो जातस्तदभेदात्सत्यव्रता । तदुक्तं देवीभागवते तृतीयस्कन्धे 'अनक्षरो महामूर्खो नाम्ना सत्यव्रतो द्विजः ॥ श्रुत्वाऽक्षरं कोलमुखात्समुच्चार्य स्वयं ततः । विन्दुहीनं प्रसङ्गेन जातोऽसौ विबुधोत्तमः ॥ ऐकारोच्चारणादेव तुष्टा भगवती तदा । चकार कविराजं तं दयार्द्रा परमेश्वरी'त्यादि । सत्यं कालत्रयाबाध्यं रूपं यस्याः । रूपपदान्मत्वर्थेऽचि सत्यं रूपवयेति वा । सत्यसंरक्षिकेति यावत् । तथाच बह्वृचाः पठन्ति 'सच्चासच्च वचसी पस्पृधाते । तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत्' इति । उमया सहितः सोम इत्यर्थः । सर्वेषामन्तःकरणनियामक इति । 'एष त आत्मान्तर्याम्यमृत' इत्यन्तर्यामिब्राह्मणात् । 'एषोऽन्तर्याम्येष योनिः सर्वस्ये'ति माण्डूक्यश्रुतेश्च । सर्वा च सान्तर्यामिणी चेति वा सर्वस्वरूपा सर्वेषामन्तश्च प्रविष्टेत्यर्थः । 'तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभव'दिति श्रुतेः । स्मृतिश्च 'सर्वस्य सर्वदा ज्ञानात्सर्वस्य प्रभवाप्ययौ । सतोऽसतश्च कुरुते तेन सर्वेति कथ्यत' इति । पातिव्रत्यात्सद्रूपत्वाच्च सती । दाक्षायण्या इदं नाम । तदुक्तं ब्रह्मपुराणे हैमवतीं प्रकृत्य 'सा तु देवी सती पूर्वमासीत्पश्चादुमाभवत् । सहव्रता भवस्यैव नैतया मुच्यते भव' इति ॥ २०५ ॥ ब्रह्मरूपा अणी पुच्छं अणीमाण्डव्य इति संज्ञायाः शूल-

यच्चिह्नितत्वमात्रेण माण्डव्यमुनौ प्रवृत्तेः । 'अणिरक्षाग्रकीले स्यादणिः पुच्छेऽग्निसी-मयो'रिति शाश्वतः । आनन्दमयकोशस्यपुच्छब्रह्मरूपेत्यर्थः । 'ब्रह्मण आणीस्थ' इति श्रुतिश्च । ब्रह्माणमानयति जीवयतीति वा । 'ब्रह्माणी ब्रह्मजननाद्ब्रह्मणो जीवनेन वे'ति देवीपुराणात् । ब्रह्माणशब्दः पितामहपरस्तस्य स्त्री वा । ब्रह्म यन्मुक्तप्राप्यं तत् स्वात्मभिन्नं ज्ञानम् । तदुक्तं विष्णुपुराणे 'प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञित'मिति । सर्वप्रपञ्चस्योत्पादकत्वाज्जननी । अत्र वकारादिनामप्रायपाठस्वारस्यानुरोधादुक्तदेवीपुराणैकवाक्यत्वलिप्सया ब्रह्माणीपदनिर्वचनपरत्वेन ब्रह्मजननीत्येकं पदं स्वीकर्तुं युक्तम् । एतत्पक्षे सर्वान्तर्यामिणीत्यत्र सर्वेति भिन्नं पदमास्थेयम् । नचान्तर्यामिणीत्यस्य सकारादिनामप्रायपाठस्य संदर्भविरोधापत्तिः । अन्तर्यामिपदमात्रेणाविशेषात्सर्वान्तर्यामित्वेन सिद्धे एकपदपक्षे सर्वपदवैयर्थ्यापत्त्या प्रायपाठविरोधेनापि तत्सार्थक्यवर्णनस्योचितत्वात् । 'विश्वमाता जगद्धात्री विशालाक्षी विरागिणी'त्यादिदर्शनेन तत्प्रायमध्ये तदाद्येव नाम छेत्तव्यमिति नियमस्यानित्यत्वाच्च । प्रपञ्चजनयितृत्वादेवाह—**बहुरूपेति** । बहूनि रूपाणि यस्याः । तदुक्तं देवीपुराणे 'अरूपापरभावत्वाद्बहुरूपा क्रियात्मिके'ति । परब्रह्मभावनारूपाया अपि भण्डासुरहननादिबहुविधक्रियाकारित्वात्तत्तद्रूपत्त्वेन बहुरूपत्वमपीति पक्षेऽर्थः । तथाच गौडपादानां सूत्रं 'भण्डासुरहननार्थमेकैवानेके'ति देवीपुराण एव प्रघट्टकान्तरे 'बहूनि यस्या रूपाणि स्थिराणि च चराणि च । देवमानुषतिर्यञ्चि बहुरूपा ततः शिवे'ति । सूतसंहितायां तु 'एकधा च द्विधा चैव तथा षोडशधा स्थिता । द्वात्रिंशद्भेदभिन्ना वा या तां वन्दे परात्परा'मिति । द्विधा स्वरव्यञ्जनरूपा । अकारादिस्वरभेदात्षोडशधा । ककारादिभेदेन द्वात्रिंशद्विधा । ळळयोरभेदात् हकारस्य सर्वमूलत्वेन व्युष्टौ गणनाभावाच्चेति तद्व्याख्यातारः । प्रत्यासत्त्या त्रयस्त्रिंशत्परमेतत्सहस्रनामारम्भकवर्णनपरं वा द्वात्रिंशत्पदमित्यपि सुवचम् । भागवतेऽपि 'लक्ष्मीवागादिरूपेण नर्तकीव विभाति ये'ति । वामनपुराणेऽपि 'विश्वं बहुविधं ज्ञेयं सा च सर्वत्र वर्तते । तस्मात्सा बहुरूपत्वाद्बहुरूपा शिवा मते'ति । 'असंख्याताः सहस्राणि ये रुद्रा अधिभूम्या'मिति श्रुतिप्रसिद्धानां रुद्राणां पत्नीत्वेनापि बहुरूपा । तदुक्तं वाराहपुराणे 'या रौद्री तामसी शक्तिः सा चामुण्डा प्रकीर्तिता । नवकोट्यस्तु चामुण्डाभेदभिन्ना व्यवस्थिताः ॥ या सा तु राजसी शक्तिः पालनी चैव वैष्णवी । अष्टादश तथा कोट्यस्तस्या भेदाः प्रकीर्तिताः ॥ या ब्रह्मशक्तिः सत्त्वस्था अनन्तास्ताः प्रकीर्तिताः । एतासां सर्वभेदेषु पृथगेकैकशो धरे ॥ सर्वासां भगवान्रुद्रः सर्वगत्वात्पतिर्भवेत् । यावन्त्यस्ता महाशक्त्यस्तावद्रूपाणि शंकरः ॥ कृतवांस्ताश्च भजते पतिरूपेण सर्वदा । यश्चाराधयते तास्तु तस्य रुद्रः प्रसीदति ॥ सिध्यन्ति तास्तदा देव्यो मन्त्रिणो

प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ २०६ ॥

नात्र संशय' इति । सर्वमेतदभिप्रेत्योक्तं नारसिंहोपपुराणे 'उमैव बहुरूपेण पत्नीत्वेन व्यवस्थिते'ति । त्रिपुरासिद्धान्तेऽपि 'लोपामुद्रा च सौभाग्या महाविद्या च षोडशी । दाराः परशिवस्यैते कथितास्तु वरानने ॥ श्यामला शुद्धविद्या च हयारूढा परा प्रिया । दाराः सदाशिवस्यैते ज्ञातव्याः परमेश्वरि ॥ महार्था द्वादशार्था च वाराही बगलामुखी । तुरीया भवनेशी च श्रीपरा शांभवी शिवे ॥ दारा रुद्रस्य तस्यैव शृणु सत्यं न संशयः । श्रीतिरस्करणी लक्ष्मीर्मिश्रा कामकला प्रिये ॥ विष्णोर्दारा इति ख्याता अन्नपूर्णा शिवस्य च । वाग्वादिनी च बाला च पठ्यौ ते ब्रह्मणः शिवे ॥ नव दूत्यो हसन्ती च नव सिद्धाश्च देवताः । इमा अन्याश्च रूपाणि बहूनि तव सुन्दरी'ति । एवं बहुरूपानामनिरुक्तिरपि प्रत्युपपुराणं प्रतिमहापुराणं प्रतितन्त्रं च बहुरूपैवोपलभ्यते । विस्तरभयात्तु न लिख्यते । बुधैर्ज्ञानिभिरर्चिता पूजिता । 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभे'ति गीतावचनात् । प्रकर्षेण वियदादिप्रपञ्चं प्रजा वा सूत इति प्रसवित्री । तदुक्तं विष्णुधर्मोत्तरे 'प्रजानां च प्रसवनात्सवितेति निगद्यत' इति । भगवतीपुराणेऽपि 'ब्रह्माद्याः स्थावरान्ताश्च यस्या एव समुद्भताः । महदादिविशेषान्तं जगद्यस्याः समुद्भतम् । तामेव सकलार्थानां प्रसवित्रीं परां नुम' इति ॥

अथ परिभाषामण्डले एकोनपञ्चाशन्नामानि विभजते ॥ **गुरुर्गीर्णे विभज-चतुर्गुणदंगोमृदुचतुर्मतांशार्धम् । द्विर्गुणगुणितां लिखितां चतुःख-चरता दहेद्रुचिं रोषात् ॥ २९ ॥** अत्र तृतीयचतुःशब्दोऽष्टाक्षरनामसंख्यापरः । इतरौ चतुरक्षरसंख्यापरौ ॥ २९ ॥

प्रकृष्टाश्चण्डाः कोपना यस्या दूताः सा । 'चडि कोपे' । अतएव 'भीषास्माद्वातः पवत' इति श्रुतिः । 'न यस्य कोपोऽणुरपि प्रजास्तस्य न बिभ्यति । सतां नीतिं कथं रक्षेत्प्रजा यस्य न बिभ्यती'ति कामन्दकश्च । भयप्रदत्वलिङ्गादेव हि 'महद्भयं वज्रमुद्यत'मिति श्रुतौ वज्रपदं ब्रह्मपरमित्युक्तं कम्पनाधिकरणे । प्रकृष्टा प्रीतिविषयत्वेन चण्डा शङ्खपुष्पी यस्या इति वा । प्रतापशीलेति वा । 'चण्डा धनहरी शङ्खपुष्पी चण्डोऽतिकोपने । प्रचण्डो दुर्वहे श्वेतकरवीरे प्रतापिनी'ति विश्वः । आज्ञा वेदे प्रवर्तनानिवर्तनापरपर्यायभगवदिच्छारूपा अतएव लैङ्गे शिववचनम् । 'नेच्छन्ति प्रकृतिज्ञोवो विकृतिर्वा विचारतः । पुरा ममाज्ञा मद्वक्त्रात्समुत्पन्ना सनातनी । पञ्चवक्त्रा महाभागा जगतामभयप्रदे'ति । शिवपुराणेऽपि 'रुद्राज्ञैषा स्थिता देवी ह्यनया मुक्तिरम्बये'ति । ज्ञेत्येकाक्षरमपि सुवचनम् । गुणभोक्तृपुरुषस्वरूपेत्यर्थः । 'कथयन्ति ज्ञशब्देन पुरुषं गुणभोगिन'मिति लैङ्गात् । 'ज्ञो विरिञ्चौ बुधे सौम्ये' इति कोशाद्बुधविधिस्वरूपा वा । 'ज्ञः कालकालो गुणी सर्वविद्य' इति श्रुतिरपि । सर्वजगतोऽधिष्ठानत्वात्प्रतितिष्ठत्यस्यां विश्वमिति प्रतिष्ठा । 'विश्वस्य जगतः प्रतिष्ठे'ति श्रुतेः । उक्तंच ब्रह्मगीतायां 'प्रतिष्ठा सर्ववस्तूनां प्रज्ञैषा परमेश्वरी'ति । षोडशाक्षरं छन्दोऽपि प्रतिष्ठा । जलतत्त्वनिष्ठकलाविशेषोऽपि प्रतिष्ठा । तल्लक्षणं च शैवागमे 'शिवरागानुरक्तात्मा स्थाप्यते पौरुषे यया । सा प्रतिष्ठा कला ज्ञेये'ति । 'प्रतिष्ठा स्थानगात्रके ।

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी ।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥ २०७ ॥

गौरवे यागनिष्पत्तिचतुरक्षरपद्ययो'रिति विश्वः । अत्र पद्यशब्दः पादपरो व्याख्येय इति निर्णीतं छन्दोभास्करेऽस्माभिः । प्रकटा सर्वैरनुभूयमाना आकृतिः रूपं यस्याः । तदुक्तं सूतसंहितायाम् 'तमहंप्रत्ययव्याजात्सर्वे जानन्ति जन्तवः । तथापि शिवरूपेण न विजानन्ति माययें'ति । प्रकटाख्या योगिन्यः प्रथमावरणगतास्तद्रूपा वा । अप्रकटेति वा छेदः । रहस्यरूपेत्यर्थः । अप्सु प्रकटेति वा । 'अपामेका महिमानं बिभर्ति' । 'आपो वा इदं सर्वं'मित्यादिश्रुतेः ॥ २०६ ॥ प्राणानामिन्द्रियाणामधिष्ठातृत्वादीश्वरी । 'ज्योतिराद्यधिष्ठानं तु तदामनना'दित्यधिकरणे तदधिष्ठातृदेवतासद्भावस्य स्थापितत्वात् । प्राणस्य पञ्चवृत्तिकस्याधिपतिर्वा । 'प्राणस्य प्राण' इति श्रुतेः । प्रकृष्टोऽणः शब्दो वेदरूपस्तदीश्वरी तत्प्रतिपाद्यदेवता । 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतेः । प्राणानां दात्री सर्वजगज्जीवयित्री एकादशेन्द्रियाणां दात्री वा । 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'ति श्रुतौ प्राणा इतिपदस्येन्द्रियपरत्वेन तथा व्याख्यानदर्शनात् । 'सप्तगतेर्विशेषितत्वाच्चे'ति द्वैतीयीकाधिकरणे तथा निर्णयाच्च । पञ्चाशच्छब्दोऽयं प्रकृते लक्षणयैकपञ्चाशत्परः । सांनिध्यरूपशक्यसंबन्धात् । अतएव 'नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमा'दिति शारदातिलकश्लोके पञ्चाशत्पदमेकपञ्चाशत्परतयैव व्याख्यातं हर्षदीक्षितैः । प्रायेण दशविंशत्यादिदशकशब्दानां शतसहस्रादिशब्दानां चैकद्वित्रिन्यूनाधिकभावे बहुत्वमात्रविवक्षया च लोके प्रयोगः प्रचुरं दृश्यते । अथवा सहस्रे शतमितिन्यायेनावयुत्यानुवादो नवावतारे दशावतारा इति जगत्पतावयोध्याधिपतिरिति च व्यवहारस्य कंचनावान्तरोपाधिमादाय दर्शनात् । किंबहुना द्वात्रिंशच्छब्दोऽपि पञ्चत्रिंशद्व्यञ्जनेषु सूतसंहितायां प्रयुक्तः पूर्वं दर्शितः । तदिह पञ्चाशत एव मातृकाणामन्तर्मातृकान्यासे विनियोगाल्लळयोरभेदाद्वा क्षकारस्य पार्थक्याभावाद्वाऽक्षमालायां तस्य मेरावेव निवेशनेन मणीनां पञ्चाशत्त्वाद्वा पञ्चाशन्मातृकेति व्यवहारेऽप्येकपञ्चाशत्परतैव तस्य वक्तव्या । अतएव बहिर्मातृकान्यासप्रकरणेऽपि 'पञ्चाशल्लिपिभिर्विभक्तमुखदोर्यन्मध्यवक्षस्थलं 'पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्ष' इत्यादयः कवीनां प्रयोगाः । एकपञ्चाशतो न्यासमुक्त्वा तदन्ते 'पञ्चाशद्वर्णरूपेयं कंदर्पशशिभूषणे'त्यादयो ज्ञानार्णवादितन्त्रप्रयोगाश्चोपपद्यन्ते । मातृकासमानयोगक्षेमत्वादेव 'श्रीकण्ठाद्याश्च पञ्चाशत्पञ्चाशत्केशवादय' इत्यादयोऽपि तन्त्रसारसंग्रहादौ प्रयोगा एकपञ्चाशत्परा एव । तेन कामरूपादिच्छायाछत्रान्तैकपञ्चाशत्पीठानि रूपमस्या इत्यर्थः । अतएव षोढान्यासान्तर्गते पीठन्यासे एकपञ्चाशत्पीठानां न्यासः । उक्तं च ब्रह्माण्डपुराणे स्पष्टतरम् 'ततः पीठानि पञ्चाशदेकं चक्रमतो न्यसे'दित्यारभ्य 'लिपिक्रमसमायुक्तान् लिपिस्थानेषु विन्यसे'दि-

न्तम्। योगिनीहृदयेऽपि 'पीठानि विन्यसेद्देवि मातृकास्थानके प्रिये' इत्यारभ्य 'एते पीठाः समुद्दिष्टा मातृकारूपकास्थिता' इत्यनेन मातृकास्थानोक्तयैकपञ्चाशत्त्वमेव प्रकटीकृतम्। तद्व्याख्यायामप्यकारादिक्षकारान्तानामेकैकं वर्णमेकैकस्यादावुक्त्वा 'तत्तत्स्थानेषु पीठानां न्यासं कुर्या'दित्युक्तम्। एतेनेदशनामस्कारस्यात्पीठन्यासेऽपि क्षकारस्थानपरित्यागेन पञ्चाशत एवेति सुन्दरीनहोदयकाराणां लेखः साहसमात्रत्वान्नादर्तव्यः। नह्यस्य नाम्नो विधिरूपत्वं, येन पीठन्यास एकस्य पीठस्य परिसंख्या स्यात्। नच ज्ञानार्णवे 'पञ्चाशत्पीठसंचयात्। पञ्चाशत्पीठविन्यासं मातृकावत्स्थले न्यसे'दित्युपक्रमोपसंहाराभ्यां तथा निर्णय इति वाच्यम्। पञ्चाशत्पदस्यैकपञ्चाशत्परताया उक्तत्वात्। अन्यथा तत्रैवैकपञ्चाशतो गणनानुपपत्तिः। अतएव 'कालेश्वरं महापीठं प्रणवं च जयन्तिके'ति पाठस्य काल्पनिकत्वमुक्त्वा 'महापीठं जयन्तिके'ति पाठस्यैव प्रामाणिकत्वोक्तिरपि साहसमेव। 'ॐकारं च जयन्तिके'ति योगिनीहृदयेन संवादात्प्रणवपाठस्यैव प्रमाणत्वात्। वस्तुतस्तु 'शैलो मेरुस्ततो गिरि'रिति ब्रह्माण्डपुराणे गिरिपदस्य मेरुतः पार्थक्येन गणनमास्थेयम्। पीठानि पञ्चाशदेकं चे'ति स्पष्टोपक्रमस्य प्रकारान्तरेणानुपपत्तेः ततःपदेन व्यवधानाच्च। ततश्च 'जलेशं मलयं शैलं मेरुं गिरिवरं तथे'ति योगिनीहृदये 'मलयं च महापीठं श्रीशैलो मेरुको गिरि'रिति ज्ञानार्णवेऽपि तत्संवादाद्भिन्नपदस्कारस्यान्मेरुपर्वत इत्यनुक्तिस्कारस्याच्च तथैवास्थेयम्। आस्थितं च तथैव सुभगार्चारत्नसुभगार्चा-पारिजातादिपद्धतिषु। प्रसिद्धं च प्राच्येषु गिरिनाथाख्यं पीठम्। एतेन ज्ञानार्णव एकैकपञ्चाशद्गणेशन्यासान्ते 'एतांस्तु विन्यसेद्देवि मातृकान्यासवत्प्रिये' इतिवत्, कामरतिन्यासान्ते 'मातृकार्णैर्न्यसेद्देवि मातृकावत्सदानघे' इतिवच्च पीठन्यासान्तेपि 'मातृकावत्सदा न्यसे'दित्युक्तैरेकरूप्यं संगच्छते। बहिर्मातृकान्यासे विशिष्यैकपञ्चाशतामुक्तत्वेन तत्साम्येनात्रापि तथैव सिद्धेः, तत्रान्तरैकवाक्यतायाः संभवन्त्यास्त्यागायोगाच्चेति। प्रकृते एकपञ्चाशत्पदमपेक्षितमेवेति यद्यग्रहस्तदा रूपपदमेकसंख्यापरत्वेन व्याख्यायताम्। 'रूपे शून्य'मिति पिङ्गलसूत्रे हलायुधादीनां तथा व्याख्यानदर्शनादिति दिक्॥ शृङ्खला कर्मादिनिर्बन्धः निगडवद्बन्धकत्वात्। अतएवोक्तमभियुक्तैः 'पातकप्रचयवन्मम तावत्पुण्यपुञ्जमपि नाथ लुनीहि। काञ्चनी भवतु लोहमयी वा शृङ्खला यदि पदोर्न विशेष' इति। विगता शृङ्खला यस्याः विधिनिषेधानामविद्यावद्विषयत्वात्। नग्नेति वा। अलंपुरादिपीठेषु तादृशदेवीमूर्तिदर्शनात् 'स्वयोनिदर्शनान्मुह्यत्पशुवर्गमनुस्मरे'दिति तिरस्करिणीध्यानदर्शनाच्च, जवनिकाया जवनिकान्तरानापेक्षत्वेन तादृशध्यानस्य युक्तत्वाच्च। 'शृङ्खला स्यात्कटीवस्त्रबन्धेऽपि निगडेऽपि चे'ति विश्वः। विविक्तो विजनदेशः स एव च पवित्रोऽपि। 'सर्वत्र मेध्या वसुधा यत्र लोको न दृश्यत' इति हारीतस्मृतेः। 'विविक्तौ पूतविजना'वित्यमरकोशात् सजनोऽपि पवित्रः अपवित्रोऽपि विजनो देशश्चेति द्वावपि विविक्तौ। इह तु पवित्रत्वे सति विजनता विवक्षिता। तादृशस्थले

मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥ २०८ ॥

तिष्ठति। अपवित्रजनसंमर्दे वाध्ये यत्प्रादुर्भावाभावानुभवात्। आत्मानात्मविवेकशीलेषु तिष्ठतीति वा। वीरा उपासकधुरंधरा, रणे अभिमुखे हता वा। तेषां माता जननी हितकर्तृत्वात्। 'वीरं मद्यस्य भाजने' इति विश्वकोशात्पानपात्रं तन्मातीति वा। अथवा वीराख्यो गणेश्वरोऽम्बया पुत्रत्वेन स्वीकृत इति वीरमाता। तथाच पद्मपुराणे वीरकं प्रकृत्य शिववाक्यम् 'स एष वीरको देवि सदा मे हृदयप्रियः। नानाश्चर्यगुरुद्वारि गणेश्वरगणार्चित' इत्यादितत्प्रशंसाश्रवणोत्तरं 'देव्युवाच। ईदृशस्य सुतस्यास्ति ममोत्कण्ठा पुरान्तक। कदाहमीदृशं पुत्रं द्रक्ष्याम्यानन्ददायकम् ॥ शिव उवाच। एष एव सुतस्तेऽस्तु नयनानन्दहेतुकः। त्वया पुत्रः कृतार्थः स्याद्वीरकोऽपि सुमध्यमे ॥ सूत उवाच। इत्युक्त्वा प्रेषयामास विजयां हर्षणोत्सुका। वीरकानयनायाशु दुहिता भूभृतः सखी'त्यादि। वियत आकाशस्य प्रसूर्जनिका। 'आत्मन आकाशः संभूत' इति श्रुतेः ॥ २०७ ॥ मुक्तिं ददातीति मुकुन्दा। पृषोदरादिः। विष्णुरूपत्वाद्वा। तदुक्तं तन्त्रराजे गोपालमन्त्रभेदारम्भे 'कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा। स्ववंशवादनारम्भादकरोद्विवशं जगत् ॥ ततः स गोपीसंज्ञाभिरावृतोऽभूत्स्वशक्तिभिः। तदा तेन विनोदाय स्वं षोढाऽकल्पयद्वपु'रित्यादि। रत्नविशेषादिरूपा वा। 'मुकुन्दः पुण्डरीकाक्षे रत्नभेदेऽपि पारदे' इति विश्वः। मुक्तीनां पञ्चविधमोक्षाणां निलय आकरो यस्याम्। बालाबगलादिशक्तीनां मूलभूतो यो राजराजेश्वरीविग्रहः स एव रूपमस्याः। तथाच गौडपादीयानि दश सूत्राणि 'सैव विद्ये'त्यारभ्य 'स्वरामूर्ध्वाकारेणे'त्यन्तानि—एकस्या एव विद्यायाः शाम्भवी—विद्या-श्यामाभेदेन त्रैविध्यं प्रतिपाद्य ताश्चैकैकस्या अनेकशक्तिजनकत्वं विशिष्य प्रतिपादयन्ति। भावाज्ञानातीति भावज्ञा। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः। 'भावो योनिवुधार्थेषु कृपालीलाविभूतिष्वि'त्यमरशेषः। 'तस्य भावस्त्वतला'विति सूत्रे धर्मोऽपि भावः। 'भावप्रधानमाख्यात'मिति स्मृतौ भावनापि भावः। 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते'। 'अस्ति जायते वर्धते' इत्यादयो यास्कपरिगणिता विकारा अपि षड्भावाः। भवो भक्तिर्भजनीयोऽस्य भावः। तार्किकसंमताः षट्पदार्था अपि भावः। भवः संसारः स एव भावः। तत्संबन्धिनः सांसारिका अपि भावाः। भवः शिवस्तस्येमे शैवा अपि भावाः। भवो भक्तिर्भजनीयोऽस्य भावः। 'भक्ति'रिति पाणिनिसूत्रेणाण्वा। भा कान्तिस्तां वान्ति गच्छन्ति सूर्योदयेऽपि भावाः। भक्तिरपि भावः। योगिनीहृदये कथिते मन्त्रार्थषट्के प्राथमिकोऽर्थोऽपि भावः। भवः संसार एव रोगस्तं हन्ति 'नान्यं पश्यामि भैषज्यमन्तरेण वृषध्वज'मिति रामायणात्। 'व्याधीनां भेषजं यद्वत्प्रतिपक्षस्वभावतः। तद्वत्संसाररोगाणां प्रतिपक्षः शिवाधव' इति शिवपुराणाच्च। भवचक्रं संसारमण्डलं प्रवर्तयति, भवचक्रवत्प्रवर्तयतीति वा। तदुक्तं मनुस्मृतौ 'एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः। जन्मवृद्धिक्षयै-

छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी ।

निंत्यं संसारयति चक्रव'दिति । विष्णुभागवतेऽपि 'त्वमेव सर्वजगतामीश्वरो बन्धमोक्षयोः । तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं हर'मिति । भवचक्रमनाहतचक्रं वा तत्र शिवस्यावस्थानात् । ननु कोणपत्रसमुच्चयस्यैव चक्रपदवाच्यत्वमिति तान्त्रिकसिद्धान्तादनाहते कोणाभावात्कथं चक्रपदेन तदुपस्थितिः । अतएव 'अनाहताब्जनिलये'त्येव प्रयोगः । केवलपत्रसमुदाये पद्मत्वं केवलकोणसमुदाये यन्त्रत्वमिति सिद्धान्तादितिचेन्न । कोणत्वाभिप्रायेण मूलाधारादिष्वपि चक्रव्यवहार इति वदद्भिर्विद्यारत्नभाष्यकारैरेवमेव समाहितत्वात् । पत्रेषु कोणत्वारोपाद्वोणव्यवहार इति तदाशय इति केचित् । तन्न । कोणत्वविवक्षायां यन्त्रत्वविवक्षाभावेन यन्त्रव्यवहारस्यैवापत्तेः । अतस्तत्कर्णिकोपरि त्रिकोणस्य सत्त्वादित्येव भाष्याशयं युक्तमुत्पश्यामः । बिन्दुचक्राष्टदलषोडशदलवृत्तत्रयभूगृहत्रयाणि श्रीचक्रान्तर्गतानि वा भवचक्राणि । भवस्य शिवस्य चक्रं मनः प्रवर्तयतीति वा । 'चक्रं हि मन एवे'ति विष्णुपुराणे 'चलत्स्वरूपमत्यन्तं जवेनान्तरितानिलम् । चक्रस्वरूपं च मनो धत्ते विष्णुः करे स्थित'मिति ॥ २०८ ॥ छन्दःशब्दो वेदपरो गायत्र्यादिपरः पैङ्गलतन्त्रपरो वा । 'छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयो'रिति विश्वः । परो वादी । सारशब्दो न केवलं पुंलिङ्गः । 'संसारे किं सारं' 'सा दशा वै तान्तवी'त्यादिप्रयोगात् । 'सारो बले मज्जनि च स्थिरांशे न्याय्ये च नीरे च धने च सारम् । वेदेऽन्यवत्सारमुदाहरन्ती'ति च विश्वः । अत्र स्थिरांशशब्दो निष्कृष्टांशपरः अनिष्कृष्टस्यास्थिरत्वात् । ततश्च वेदे उपनिषद्भागेऽस्याः स्वरूपनिष्कर्षः । छन्दःसु सारो निष्कर्षो यस्या इति विग्रहः । गायत्र्यादिछन्दःसु निष्कृष्टं रूपं गायत्रीमन्त्रस्तस्यापि निष्कर्षः पञ्चदशी । तदिदमुक्तं वरिवस्यारहस्येऽस्माभिः 'तज्ज्ञानार्थमुपाया विद्या लोके चतुर्दश प्रोक्ताः । तेष्वपि च सारभूता वेदास्तत्रापि गायत्री ॥ तस्या रूपद्वितयं तत्रैकं यत्प्रपठ्यते स्पष्टम् । वेदेषु चतुर्ष्वपि परमत्यन्तं गोपनीयतरम् ॥ कामो योनिः कमलेत्येवं संकेतितैः शब्दैः । व्यवहरति न तु प्रकटं यां विद्यां वेदपुरुषोऽपि' इति । आथर्वणेऽपि त्रैपुरसूक्ते षोडशर्चे 'कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमाता च विद्ये'त्यस्यामृचि कादिविद्याया उद्धारः । पैङ्गलतन्त्रे हि 'द्विकौ ग्लौं । मिश्रौ च' इति सूत्रद्वयेन महाप्रस्तारःप्रतिपादितः सचानवधिकस्यापि शब्दजालस्य निःशेषेण ज्ञानोपायः । सच छन्दोभास्कर एवास्माभिः प्रकटीकृतश्छन्दःशास्त्रे । बलं माहात्म्यं यस्य वैखर्याः सरस्वत्या इत्यर्थः । यद्वा 'यत्र यत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत् । तत्र तत्र परानन्दस्वरूपं संप्रकाशत' इति विज्ञानभैरवभट्टारकोक्तरीत्योपासकधौरेयस्य यत्रेच्छा स एव धर्मः । यत्र नेच्छा स नैवाधर्मः

उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥ २०९ ॥
जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी ।

उक्तं च शाकुन्तले 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय' इति । समयाचारस्मृत्युक्तो निर्बन्धोऽपि प्रौढोल्लासावधिक एव 'प्रौढान्तं समयाचारा' इति कल्पसूत्रात् । सर्वमेतदभिप्रेत्य कौलोपनिषदि श्रूयते 'धर्मोऽधर्मः अधर्मो धर्म' इति । योगिनीहृदयेऽपि 'पिबन्नुत्स्यन्दमन्खादन्स्वैराचारपरः स्वयम् । अहन्तेदन्तयोरैक्यं भावयन्विहरेत्सुख'मित्युक्तरीत्येदृशमनःसमाधिमतामिच्छाविषयोऽर्थो नियमेन धर्म एव भवतीत्येतदभिप्रायः । स्मृतिष्वपि 'श्रुतिः स्मृतिः सदाचार आत्मनस्तुष्टिरेव चे'ति धर्मप्रमाणेषु मनःप्रवृत्तेर्गणनमीदृशसमाहितमनःपरमेव । अन्यथातिप्रसङ्गात् । ईदृशं स्वैराचरणं सारं न्याय्यं यस्या इत्यर्थः । अभिलाष इच्छा सारो निष्कृष्टरूपं यस्या इति वा । देव्या इच्छाशक्तिस्वरूपत्वात् । सारपदस्य श्रेष्ठपदत्वे तु विशेष्यनिघ्नत्वान्नास्त्येव स्त्रीलिङ्गत्वानुपपत्तिः । एवमुत्तरनामद्वयेऽपि 'शास्त्रयोनित्वा'दिति सौत्राद्ब्रीहिशास्त्रं यवशास्त्रमित्यादि तान्त्रिकाच्च व्यवहाराच्छास्त्रशब्दो वेदपरस्तदनुसारिमीमांसादिपरो वा । तदुक्तं भामत्याम् 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयत' इति । मन्त्रशब्दोऽपि 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यादिव्यवहाराद्वेदपरस्तान्त्रिकमनुपरस्तत्प्रतिपादकचतुःषष्टितन्त्रपरो वा । तलं करतलादि तद्वत्कृशं समं चोदरं नतु न्युब्जं भेर्यादिवदुच्छूनं यस्याः । अकारप्रश्लेषेणातलाख्यो लोक एवोदरं यस्या विराड्रूपाया इत्यप्यर्थः सुवचः । उदारा महत्तरा कीर्तिर्यस्याः । उत्कृष्टा आसमन्ताद्व्याप्ता च अरा शीघ्रसाध्या च कीर्तिर्यदुपासनयेति वा । 'लघु क्षिप्रमरं द्रुत'मित्यग्निपुराणीयकोशः । ऋकारो देवमातृवाचकः । आ अरौ अरः इति रूपाणि । उः अपत्यानि अरा देवातानुत्क्रान्ता कीर्तिर्ययेति वा । आरं मङ्गल्मुत्क्रान्ता वा । यत्कीर्तनं मङ्गलादिदुष्टग्रहदोषनिरासकमिति यावत् । आदित्यमण्डलान्तर्गतं सगुणं चैतन्यमुत्पदवाच्यम् । 'य एषोऽन्तरादित्ये हिरण्मयः पुरुष' इत्यधिकृत्य 'तस्योदिति नामे'ति श्रुतेः । तस्मिन्नारा आयुधविशेषो यस्या ईदृशी कीर्तिर्यस्या इति वा । 'आरा चर्मप्रसेविके'तिकोशात् । उत् पुरुषस्य दुःखप्रदा यत्कीर्तिरिति यावत् । तत्कीर्तिर्जेत्री कीर्तिर्यदुपासनया भवतीति तात्पर्यम् । आसमन्ताद्व्याप्तोऽरः सुधाह्रदस्तद्वदुत्कृष्टा कीर्तिर्यस्या इति वा । सगुणब्रह्मोपासकानां प्राप्ये परब्रह्मनगरे अपराजिताख्ये 'अश्वत्थश्चेति द्वौ सुधाह्रदावर्णवतुल्यौ वर्तेते' इति श्रुतिषु प्रसिद्धम् । 'अनावृत्तिः शब्दा'दिति सूत्रे श्रीमदाचार्यभगवत्पादैरप्युक्तं 'दाम बन्धनरज्जुः परिच्छेत्री तदुत्कान्तमुद्दामेयत्तानवच्छिन्नं वैभवं यस्याः । वर्णाश्चतुःषष्टिसंख्याका रूपमस्याः । तदुक्तं पाणिनिशिक्षायाम् 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवे'ति ॥ २०९ ॥ जन्मादित्रितयेन तप्तेभ्यो जनेभ्यो विश्रान्तिभिर्दुःखा-

सर्वोपनिषदुद्घुष्टा शान्त्यतीता कलात्मिका ॥ २१० ॥
गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पनारहिता काष्ठाऽकान्ताकान्तार्धविग्रहा ॥ २११ ॥

पहारिभिर्व्यक्तं स्वात्मसुखं दत्ते । सर्वास्वितरेयादिपूपनिषत्सु रहस्यभूतासु श्रुतिशिरोभूतवाक्यान्तिपूत्कर्षेण घुष्टा प्रतिपाद्या । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती'त्यत्रोपनिषत्पदस्य रहस्यपरत्वेन व्याख्यानदर्शनात् । तस्य निरुक्तिरप्याचार्यैर्दर्शिता 'उपनीयेममात्मानं ब्रह्मापास्तद्वयं सतः । निहन्त्यविद्यां तज्जां च तस्मादुपनिषन्मते'ति । अत्रोत्कर्षे ऐकरूप्यम् । उच्चैस्त्वस्य धातुनैव लाभात् । 'उच्चैर्घुष्टं तु घोषणे'ति कोशात् । ऐकरूप्यं च प्रतिवेदान्तं विहितानां सगुणब्रह्मोपास्तीनां भेदाभावः । तदिदं 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषा'दित्यधिकरणे स्पष्टम् । आकाशनिष्ठा कला शान्त्यतीतेत्युच्यते । तत्स्वरूपं च शैवागमे 'शान्त्यतीतकलाद्वैतनिर्वाणानन्दबोधदे'ति । तदात्मिका तदभिन्ना ॥ २१० ॥ आनन्द्याद्गम्भीरा । महाहृदस्वरूपेत्यर्थः । तथाच शिवसूत्रम् 'महाहृदानुसंधानान्मन्त्रवीर्यानुभव' इति । 'महाहृद इति प्रोक्ता शक्तिर्भगवती परा । अनुसंधानमित्युक्तं तत्तादात्म्यविमर्शनम् । मन्त्रवीर्यमिति प्रोक्तं पूर्णाहन्ताविमर्शनम् । तदीयोऽनुभवस्तस्य स्फुरणं स्वात्मनः स्फुट'मिति । अन्यत्रापि 'परा भट्टारिका संविदिच्छाशक्तिपुरःसरम् । स्थूलप्रमेयपर्यन्तं वमन्ती विश्वमान्तरम् ॥ प्रमात्रन्तर्बहीरूपा हृषीकविषयात्मनाम् । प्रवर्तकत्वस्वच्छत्वगम्भीरत्वादिधर्मतः ॥ महाहृदो जगद्व्यापी देशकालाद्यगोचर' इति । 'गं' इति गणपतिबीजम् । तेन गणपतिरेवोच्यते । तस्य भिर्यं राज्यादत्ते निरस्यतीत्यर्थो वा । गगनस्य दहराकाशस्य भूताकाशस्य पराकाशस्य वान्तर्मध्ये तिष्ठतीति । 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येक' इति श्रुतेः । गगनस्यान्ते नाशकालेऽपि तिष्ठति वा । गगनं आकारः, अन्तस्था यरलवा इति पञ्चभूतबीजोद्धारः । गर्वो विश्वनिर्माणविषयिणी पराहन्ता, सास्याः संजाता । तारकादित्वादितच् । गानं तता-नद्ध-सुषिर-घनचतुष्टयसमुच्चयात्मकं, वादित्रादिकं वा, शारीरं गान्धर्वं वा, साम वा तयोर्लोलुपा सतृष्णा । कल्पना वासनामय्यो दृश्यवीचयस्वामी रहिता । तासां कल्पितत्वादेव । यद्वा कल्पेऽपि नाराणां हिता । 'संवर्तः प्रलयः कल्प' इति कोशः । 'नृ नय' इति धातोः । 'नयतीति नरः प्रोक्तः परमात्मा सनातन' इति स्मृत्या च नरस्येमे नारा जीवाः । सकलनाशकारिणि प्रलयकालेऽपि जीवानां स्वोदरे वासनारूपतया स्थापने हितकर्त्री किमुत सृष्टिस्थितिकाल इति यावत् । उक्तं चाष्टावक्रगीतायां 'मय्यनन्ते चिदम्भोधावाश्चर्यं जीववीचयः । उद्यन्ति घ्नन्ति खेलन्ति प्रविशन्ति स्वभावत' इति । अष्टादशनिमेषात्मकः कालः काष्ठा । दारुहरिद्रापि काष्ठा । सा हि स्कन्धनागिनालपरिणामरूपत्वाच्छिवशक्त्योरभिन्नेवेति मेरालतन्त्रे कथा । 'काष्ठा दारुहरिद्रायां कालमानप्रभे-

कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता ।
कनत्कनकताटङ्का लीलाविग्रहधारिणी ॥ २१२ ॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी ।

दयो'रिति रभसः । तदुभयरूपा । वेदान्तवाक्यार्थतत्त्वनिष्कर्षोऽपि काष्ठा । तदुक्तं सूतसंहितायां 'प्रतीतमप्रतीतं वा सदसच्च परः शिवः । इति वेदान्तवाक्यानां निष्ठा काष्ठेति कथ्यते' इति । 'सा काष्ठा सा परा गति'रिति श्रुतिश्च । यद्वा गगनात्मकस्य भीमनामकस्य परशिवस्य पत्नी स्वर्गमाता देवी दिक्स्वरूपत्वात्काष्ठेत्युच्यते । तथाच लैङ्गे 'चराचराणां भूतानां सर्वेषामवकाशदः । व्योमात्मा भगवान्देवो भीम इत्युच्यते बुधैः ॥ महामहिम्नो देवस्य भीमस्य परमात्मनः । दशस्वरूपादिक्पत्नी सुतः स्वर्गश्च सूरिभि'रिति । वायुपुराणेऽपि 'नाम्ना षष्ठस्य या भीमा तनुराकाश उच्यते । दिशः पत्न्यः स्मृतास्तस्य स्वर्गस्तस्य सुतः स्मृत' इति । क्रान्त्वा तिष्ठतीति काष्ठेति नैरुक्ताः । 'अत्यतिष्ठद्दशाङ्गुल'मिति श्रुतिः । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग'दिति स्मृतिश्च । अकान्तेति व्यक्षरं नाम । 'अकं पापे च दुःखे च' तयोरन्तो नाशो यया सा । विग्रहस्य शरीरस्यार्धमर्धविग्रहः । 'अर्धं नपुंसक'मिति समासः । कान्तः परशिव एवार्धविग्रहो यस्याः । कान्तस्यार्धं कान्तार्धं कान्तार्धं विग्रहो यस्या इति वा । नचैतत्पक्षेऽर्धकान्त इति रूपापत्तिः । अत्रस्यार्धपदस्य नियतलिङ्गत्वस्वीकारात् नियतनपुंसकलिङ्गकस्यैव पूर्वनिपातविधानात्कः पुनः पुंलिङ्ग इत्यादिप्रश्नोत्तरपरे महाभाष्ये पुंलिङ्गवदस्या नियतलिङ्गपरत्वेन कैयटीये व्याख्यानात् । तथाच भगवान्पिङ्गलनागः प्रायुङ्क्त 'खरा अर्धं चार्धार्धं'इति । वस्तुतस्तु अर्धविग्रहा इत्यत्र कर्मधारय एव समासः । षष्ठीतत्पुरुषे तु विग्रहार्धमित्येवापद्येत । अतएव परवल्लिङ्गसूत्रे महाभाष्ये 'अर्धं नपुंसक'मिति सूत्रं प्रत्याख्यातमित्यन्यदेतत् । तेन कान्तार्धमिति समासेऽपि समप्रविभागवचनत्वमेवार्धशब्दस्य द्रष्टव्यम् । ककारस्यान्तः कान्तः खकारस्तेन द्यौर्लक्ष्यते । अर्धशब्दो भागमात्रपरः । तेन द्यौः शरीरैकदेशो यस्या इत्यर्थ इति वा । 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी'ति मन्त्रवर्णात् ॥ २११ ॥ कार्याणि महत्त्वादीनि कारणं मूलप्रकृतिः तैर्विनिर्मुक्ता । चैतन्ये तेषां परमार्थतोऽभावात् 'न तस्य कार्यं करणं च विद्यत' इति श्रुतेः । कामस्य कामेश्वरस्य केलीनां क्रीडाविलासानां तरङ्गाः परम्पराः संजाता अस्याः । कनती दीप्यमाने कनकस्य सुवर्णमये ताटङ्के कर्णाभरणविशेषौ यस्याः । लीलयानायासेन विग्रहानवतारविशेषान्धारयति पद्मराजस्य महिषी लीलादेवी तद्विग्रहधारिणी वा । सा च योगवासिष्ठे प्रसिद्धा 'आसीदस्मिन्महीपालकुले पद्मो विकासवान् । पद्मोनामे'त्युपक्रम्य 'तस्यासीत्सुभगा भार्या लीला नाम पतिव्रते'ति ॥ २१२ ॥ जन्मराहित्यादजा । 'अजामेका'मिति श्रुतेः, 'न जातो न जनिष्यत' इति श्रुतेश्च । महाभारतेऽपि 'नहि जातो न जायेऽहं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः

अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥ २१३ ॥
त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।

स्मृत' इति जननं हि मृत्युसमव्याप्तम् । 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चे'ति वचनात् । तदिह जननाभावरूपव्यापकविरुद्धोपलब्ध्या प्राप्तमर्थमाह । क्षयेण मरणेन विनिर्मुक्ता । क्षये गृह एव विशिष्य निर्मुक्ता ययेति वा । मुमुक्षुभिर्विषयभिया गृहत्यागः क्रियते । सुन्दर्युपासकैस्तु गृहएव मोक्षः प्राप्यत इति तात्पर्यम् । तदिदमुक्तमस्माभिः शिवस्तुतौ 'यदि परमिच्छसि धाम त्यज मा नाम स्वकं धाम । परपदनियमनदाम स्मर हृदि कामद्विषो नामे'ति । दुर्वासाप्याह । सङ्गं मोमोक्षतीति मुग्धा सौन्दर्यवती । अकारप्रश्लेषेण न सन्ति मूढा यस्या इत्यपि सुवचम् । 'मुग्धः सुन्दरमूढयो'रिति विश्वः । क्षिप्रं स्वल्पदिनैरेव प्रसीदतीति तथा । अतएवोक्तं सौरपुराणे 'क्रमेण लभ्यतेऽन्येषां मुक्तिराराधनाद्विजाः । आराधनादुमेशस्य तस्मिञ्जन्मनि मुच्यत' इति । इदं तु तीव्रतरभक्तिमत्पुरुषधौरेयपरम् । अन्येषां तु शिवपुराणे स्मर्यते 'अल्पभावेऽपि यो मर्त्यः सोऽपि जन्मत्रयात्परम् । न योनियन्त्रपीडायै भविष्यति न संशय' इति । तदिमां व्यवस्थामभिप्रेत्योक्तं तन्त्रराजे 'अन्यथा संप्रदायेन जपहोमार्चनादिकम् । कृतं जन्मान्तरे सम्यक्संप्रदायाय कल्पत' इति । अन्तः स्वात्मप्रवणं सुखं चित्तवृत्तिर्येषां तैः सम्यगाराध्या । बहिर्विषयैकप्रवणं सुखं येषां तेषां सुष्ठु दुर्लभा । 'तरलकरणानामसुलभे'त्यानन्दलहर्याम् ॥ २१३ ॥ 'ऋग्यजुःसामरूपेण सर्गादौ संप्रवर्तत' इति । पद्मपुराणेऽपि 'आन्वीक्षिकी त्रयी देवि दण्डनीतिश्च कथ्यस' इति । देवीपुराणेऽपि 'ऋग्यजुःसामभागेन साङ्गवेदगता यतः । त्रयीति पठ्यते लोके दृष्टादृष्टप्रसाधनी'ति । नित्यातन्त्रे तु 'अकारादिः सामवेदो ऋग्वेदश्च तदादिकः । यजुर्वेद इकारादिस्तेषां संयोगतः शुचिः ॥ तन्निष्पत्तिं शृणु प्राज्ञे प्रोक्ताः पूर्वाधरक्रमात् । विलिख्य योजयेत्पूर्वं शब्दशास्त्रानुसारतः ॥ गुणसंध्या ऋग्यजुषं ततस्तेनापरं तथा । वृद्धिसंध्यां समायुंज्यादित्युत्पन्नं शुचेर्वपुः ॥ तेन त्रयीमयी विद्या कार्यकारणयोगत' इत्युक्तम् । अत्र शुचिशब्देन वाग्भवं बीजमुच्यते । तेन तद्रूपेत्यर्थो वा । 'त्रिवर्गो धर्मकामार्थै'रिति कोशः तस्य निलयः स्थानं यस्याम् । त्रिषु भूतादिकालेष्वकारोकारमकारेषु वा स्था स्थितिर्यस्याः । त्रिषु लोकादिष्वभेदेन तिष्ठतीति वा त्रिस्था । तदुक्तं मार्कण्डेयपुराणे 'त्रयो लोकास्त्रयो देवास्त्रैविद्यं पावकत्रयम् । त्रीणि ज्योतींषि वर्णाश्च त्रयो धर्मादयस्तथा ॥ त्रयो गुणास्त्रयः शब्दास्त्रयो दोषास्तथाश्रमाः । त्रयः कालास्तथावस्थाः पितरोऽहर्निशादयः ॥ मात्रात्रयं च ते रूपं त्रिस्थे देवि सरस्वती'ति । अन्तर्दशारचक्राभिमानिनी देवता त्रिपुरमालिनी ॥

निरामया निरालम्बा स्वात्मारामा सुधाश्रुतिः ॥ २१४ ॥
संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥ २१५ ॥

अथ परिभाषामण्डलेऽष्टत्रिंशन्नामानि विभजते ॥ **चतुरर्धभवो देवो वदन्विभेदं विभागमार्गेण । गौणतरङ्गमतिः खलु शंभोर्वादं चरन्नयंघिः ॥ ३० ॥** स्पष्टम् ॥ ३० ॥

निर्गता आमया रोगा यया । सर्वालम्बनस्यालम्बान्तरायोगान्निरालम्बा । तथात्वेऽनवस्थापत्तेः । साच मूलक्षयकरीत्यस्या अनालम्बत्वमेव साधयति । स्वात्मन्येवारामः क्रीडनं यस्याः । स्वात्मानमेव द्वेधा विभज्यान्योन्यं क्रीडमानेति यावत् । तथाच माध्यन्दिना अधीयते 'स वै न रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स ह्येतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधा पातयत्ततः पतिश्च पत्नी चाभवता'मिति । स्वात्मैवारामः कृत्रिमवनरूपं विचित्रं जगद्यस्या इति वा । जगन्निर्माणसंहारकालयोः स्वात्ममात्रावशेषात् । तथाच वायुपुराणे 'एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः । भूत्वा यस्माच्च बहुधा भवत्येकः पुनस्तु स' इति । स्वमात्मीयं जगच्च आत्मा ब्रह्म च अनयोरारामः क्रीडनं विहरणं वृत्तित्वं यस्या इति वा । तदुक्तं मार्कण्डेयपुराणे 'त्वमक्षरं परं देवि यच्च सर्वं प्रतिष्ठितम् । अक्षरं ब्रह्म परमं जगच्चैतत्क्षरात्मकम् ॥ दारुण्यवस्थितो वह्निर्भौमाश्च परमाणवः । तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषत' इति । सुधायाः सहस्रारकर्णिकाचन्द्रगतायाः स्रुतिः स्रवणं यया कुण्डलिन्या सा । सुधायाः स्रुतिरेव वा । डाकिन्यादिमण्डलान्याप्याययन्ती सा क्रियैव भगवतीत्यर्थः । यद्वा प्रसिद्धचन्द्रमण्डलाद्वह्निरव्यादितृप्तिजनिका पीयूषवृष्टिरेषैवेति 'दशभिः पञ्चभिश्चैव सुधामृतपरिस्रवैः । कृष्णपक्षे सदा पीत्वा जायन्ते पीवराः सुराः । तत्सर्वं शांभवी माये'ति वायुपुराणात् । ज्ञानार्णवे शक्तिबीजसाधने 'स्रवत्पीयूषधाराभिर्वर्धन्तीं विषहारिणी'मिति यच्चानमुक्तं तादृशरूपवतीति वा ॥ २१४ ॥ संसारलक्षणे कर्दमे निःशेषेण मग्नानां जनानां सम्यगुद्धरणे पण्डिता कुशला । अतएवोक्तं कौर्मे 'ये मनागपि शर्वाणीं स्मरन्ति शरणार्थिनः । दुस्तरापारसंसारसागरे न पतन्ति ते' इति । यज्ञाः प्रिया यस्याः । 'यज्ञो वै विष्णु'रिति श्रुतेस्तत्प्रियेति वा । यज्ञस्य कर्ता यजमानात्मको दीक्षितमूर्तिः परमशिवस्तस्य पत्नी दीक्षाख्या । सन्तानस्य माता । तदुक्तं लैङ्गे 'यजमानात्मको देवो महादेवो बुधैः प्रभुः । उग्र इत्युच्यते सद्भिरीशानश्चेति चापरैः ॥ उग्राह्वयस्य देवस्य यजमानात्मनः प्रभोः । दीक्षा पत्नी बुधैरुक्ता संतानाख्यस्तदात्मज' इति । वायुपुराणेऽपि 'उग्रा तनुः सप्तमी या दीक्षितैर्ब्राह्मणैः सह । दीक्षा पत्नी स्मृता तस्य संतानः पुत्र उच्यते' इति । अष्टसु शिवमूर्तिषु चरमा यजमानमूर्तीरिति क्वचिद्वर्ण्यते क्वचिदात्मेति तदुभयमप्याह । यजमानश्च स्वश्च यजमानस्वौ दीक्षितात्मानौ तौ रूपे अस्या इति । अल्पाच्तरस्य पूर्वनिपातो न नित्यः 'एतत्तदो'रित्या-

धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥ २१६ ॥

दिनिर्देशात् । उक्तं च लैङ्गे 'पञ्चभूतानि चन्द्रार्कावात्मेति मुनिपुंगवाः । मूर्तिरष्टौ शिवस्याहुर्देवदेवस्य धीमतः । आत्मा तस्याष्टमी मूर्तिर्यजमानाह्वया परे'ति ॥ २१५ ॥ तत्तद्देशेषु शिष्टपरम्परायाता वेदाविरुद्धा क्रिया धर्मपदवाच्याः । तथाच संवर्त-स्मृतिः 'यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः । आम्नायैरविरुद्धश्च स धर्मः परिकीर्तित' इति । तेषामासमन्तात्सर्वदेशेषु धारा निरर्गलप्रवाहः । धर्म आधारो यस्या वा, धर्मे तिष्ठतीत्युपचारात् । 'धर्मे सर्वं प्रतिष्ठित'मिति श्रुतेः । धर्म आधारो यया वा । धर्मस्य सर्वाधारत्वं यत्कृतमिति यावत् । धनस्याध्यक्षा स्वामिनी । उपास्योपासकयोरभेदात् । कुबेररूपा वा । धनानि धान्यानि च विशेष्य वर्धयति वेदशास्त्रादिविद्यावन्तो ब्राह्मणा विप्राः । तदुक्तं ब्रह्मवैवर्ते 'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते' इति । ते प्रिया अभीष्टा यस्याः । 'अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनु'रिति भगवद्वचनेन विप्रेषु कैमुतिकन्यायेन प्रीतिसिद्धेः । उक्तवचनादेव तादृशा विप्राः रूपं स्वरूपं यस्याः । अतएव श्रूयते 'यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ती'ति । पराशरस्मृतिरपि 'ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतम् । येषां वाक्योदकेनैव शुध्यन्ति मलिना जना' इति । अथवा विप्रान्रूपयति पूर्वरूपवतः करोत्याप्याययतीति वा । यस्या मन्त्रजपादिना ब्राह्मणानामाप्यायनं भवतीति यावत् । तदुक्तमापस्तम्बस्मृतौ 'अपमानात्तपोवृद्धिः सन्मानात्तपसः क्षयः । अर्चितः पूजितो विप्रो दुग्धा गौरिव सीदति । आप्यायते यथाहस्सु तृणैरमृतसंभवैः । एवं जपैश्च होमैश्च पुनराप्यायते द्विज' इति । विश्वेषां ब्रह्माण्डानां भ्रमणं सृष्टिस्थितिनाशरूपं यातायातं कारयति । 'स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये परिमुह्यमानाः । देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्र'मिति श्रुतेः । देवनिष्ठो महिमा शक्तिरेव भ्रामिकेत्यर्थः । 'भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायये'ति स्मृतिश्च । विश्वशब्दो विष्णुपरो वा 'विश्वं विष्णुर्वषट्कार' इत्युक्तेः । तस्य भ्रमणकारिणी । स्मर्यते तावत्कालिकापुराणेऽयमितिहासः—विष्णुरेकदा व्योममार्गेण गरुडारूढो गच्छन्नधः कामरूपदेशे नीलाचलवासिनीं कामाख्यां देवीं प्रत्यासन्नामप्यनादृत्य तामप्रणम्यैव गतः । ततस्तत्कोपवशात्समुद्रमध्ये पतितःसंस्तत्रैव भ्रमन्नासीत् । ततः कियता कालेन गवेषयन्ती लक्ष्मीर्नारदमुखादिमं वृत्तान्तमाकर्ण्य तपसा कामाख्यां प्रसाद्य विष्णुं सावधानीकृत्य भ्रमणादमोचयत् । ततः सोऽपि तमाराध्यः वैकुण्ठलोकम-

---

१ 'देशे देशे य आचार' इति पाठः.

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥ २१७ ॥

व्यवात्सीदिति ॥ २१६ ॥ विश्वं चराचरं ग्रसतीति विश्वग्रासा । चराचरसंहर्त्रीत्यर्थः । तथाच काठके श्रूयते 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स' इति । अत्र मृत्योरुपसेचनत्वोक्त्या तत्संहार्यचराचरप्रतीतेरित्याशयेन ब्रह्मसूत्रं 'अत्ता चराचरग्रहणा'दिति । विद्रुमाः प्रवालास्तद्वदारक्ता विद्रुमाभा । वित् ज्ञानमेव द्रुमः पुङ्खानुपुङ्खप्रसृतत्वसाम्यात्तेन तुल्येति वा । विष्णोरियं वैष्णवी । तथाच देवीपुराणे 'शङ्खचक्रगदा धत्ते विष्णुमाता तथारिहा । विष्णुरूपाथवा देवी वैष्णवी तेन गीयते'इति । अत्र चतस्रो व्युत्पत्तयः सूचिताः । तथारिहेत्यस्य विष्णुरिव दैत्यान्हन्तीत्यर्थः । विष्णुरूपेत्यस्य तदभिन्नेत्यर्थः । तेन न प्रथमव्युत्पत्त्या गतार्थता । तदेवाह । विष्णुरेव रूपमस्याः । तदुक्तं ललितोपाख्याने ब्रह्माण्डपुराण एव 'ममैव पौरुषं रूपं गोपिकाजनमोहन'मिति देवीवचनात् । तत्रैव वीरभद्रंप्रति विष्णुवचनम् 'आद्या शक्तिर्महेशस्य चतुर्धा भिन्नविग्रहा । भोगे भवानीरूपा सा दुर्गारूपा च संगरे । कोपे च कालिकारूपा पुंरूपा च मदात्मिके'ति । कूर्मपुराणेऽपि हिमवत्कृतदेवीस्तवे 'सहस्रमूर्धानमनन्तशक्तिं सहस्रबाहुं पुरुषं पुराणम् । शयानमब्धौ ललिते तवैव नारायणाख्यं प्रणतोऽस्मि रूप'मिति । कौर्म एव मङ्कणकंप्रति शिवेन विश्वरूपे दर्शिते 'किमेतद्भगवद्रूपं सुघोरं विश्वतोमुखम् । का च सा भगवत्पार्श्वे राजमाना व्यवस्थिते'ति मत्पृष्टेन शिवेन स्वस्वरूपप्रभावं निर्वर्ण्योक्तम् 'मम सा परमा माया प्रकृतिस्त्रिगुणात्मिका । प्रोच्यते मुनिभिः शक्तिर्जगद्योनिः सनातनी ॥ स एव मायया विश्वं व्यामोहयति विश्ववित् । नारायणः परोऽव्यक्तो मायारूप इति श्रुति'रिति । सनत्कुमारसंहितायां प्रभाकराख्यस्य राज्ञो विष्णुभक्तिं तन्महिष्याः पद्मिन्याख्यायाश्च पार्वतीभक्तिं वर्णयित्वोक्तम् 'एवं देव्यात्मना स्वेन रूपेण च जनार्दनः । दंपत्योरेककायत्वादेक एव द्विधार्चित'इति । बृहत्पाराशरस्मृतावपि 'दुर्गां कात्यायनीं चैव यजन्वाग्देवतामपि । चेतसा सुप्रसन्नेन विष्णुलोकमवाप्नुया'दिति । पद्मपुराणेऽपि 'चण्डिकां स्नपयेद्यस्तु ऐक्षवेण रसेन च । सौपर्णेन स यानेन विष्णुना सह मोदत' इति । आदित्यपुराणशिवपुराणयोरपि 'या तस्य पार्श्वगा बाला सा पार्वत्यंशजो हरि'रिति । वामनपुराणेऽपि 'पौर्णमास्यां तु यो माघे पूजयेद्विधिवच्छिवाम् । सोऽश्वमेधमवाप्नोति विष्णुलोके महीयत' इति । न विद्यते योनिः कारणं यस्याः साऽयोनिः । योनिशब्दः स्थानवचनो वा 'योनिष्ट इन्द्र निषदे अकारी'ति श्रुतेः । हे इन्द्र, तव निषदे उपवेशनाय मया स्थानं कृतमित्यर्थात्, तेन स्थानरहिता अपरिच्छिन्नेत्यर्थः । अस्य विष्णोर्योनिर्जनिका मातेति वा । निलीयते जगदस्यामिति निलया योनिश्चासौ निलया च । योनिशब्दः प्रकृतिपरः । 'कर्तारमीशं पुरुषं ब्रह्मयोनि'मिति श्रुतौ प्रयोगात् । कर्तारं क्रियाशक्तिमन्तमीशं नियन्तारं पुरुषं प्रत्यक्षं ब्रह्म पूर्णं योनिं ध्यानेनापश्यन्निति व्याख्यानात् । 'योनिश्च हि गीयत' इति ब्रह्मसूत्रं च । यद्वा 'यो योनिं योनिमधि-

वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।

तिष्ठत्येक' इति श्रुतौ मायापरत्वेनापि योनिपरस्य व्याख्यानदर्शनात् योनिर्मायैव निलयः परिच्छेदिका यस्या इति । योनीनां जगत्कारणानां ब्रह्मादीनां नितरां लयो यस्यामिति वा । योनिरक्षचक्रमेव निलयो यस्या बिन्दुरूपाया देव्या इति वा । अतएवाथर्वणे शौनकशाखायां श्रूयते 'तस्मिन्हिरण्मये कोशे त्र्यक्षरे त्रिप्रतिष्ठिते । तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदु'रिति । अस्या ऋचः पूर्वं 'अष्टाचक्रा नवद्वारा देवानां पूरयोध्या । तस्यां हिरण्मयः कोशः स्वर्गोऽपि ज्योतिषा वृत' इति श्रुतम् । अनयोर्ऋचोरर्थः-देवानामप्ययोध्या असाध्या दुर्लभा पूः नगरी श्रीचक्रमित्यर्थः । 'चक्रं पुरं च सदनमगारं च गुहा स्त्रिया'मिति शंकरारण्यधृतविश्वाख्यकोशात् । ईश्वरावासरूपायोध्यानगरी तु मर्त्यानामयोध्या । इयं तु देवानामपीत्यर्थः । सा कीदृशी । अष्टाचक्रा अष्टौ चक्राणि अष्टारं द्वे दशारे मन्वस्रं अष्टदलषोडशदले पद्मे भ्रमित्रयं भूगृहत्रयं चेति यस्यां सा । नवसंख्यानि द्वाराणि योनिद्वारवत्रिकोणानि यस्यां सा । 'पञ्चशक्तिचतुर्वह्निसंयोगाच्चक्रसंभव' इति नित्याहृदये । 'स्वाभिमुखाग्रत्रिकोणं शक्तिः, पराङ्मुखाग्रत्रिकोणं वह्नि'रिति मन्त्रशास्त्रीया परिभाषा । तस्यामयोध्यायां हिरण्मयस्तेजोमयः कोशो निधानं त्रिकोणरूपं स एव स्वर्गः सुखरूपत्वात् । तैत्तिरीयाणां स्वर्गो लोक इति पाठस्तस्याप्ययमेवार्थः । तस्मिन्हिरण्मय इत्यादिसप्तम्यन्तं पञ्चकं समानाधिकरणं स्पष्टार्थम् । त्रिकोणे यदस्ति बिन्दुरूपं चक्रं तस्मिन् यक्षं पूज्यं तत्प्रसिद्धं ब्रह्मविद आत्मनीव विदुः । अणुत्वाभेदेनेव बिन्दुभेदेनापि ब्रह्म मन्यन्त इत्यर्थः । कूटयति छलयत्यात्मानमानन्दादिकं मायामृत्य संसारे पातयतीति कूटमज्ञानं तदध्यक्षतया तत्र तिष्ठति । 'कूटस्थमचलं ध्रुव'मिति स्मृतेः । कूटस्याज्ञानस्य स्था स्थितिर्यस्यां वा । कूटो गिरिशृङ्गं तद्वन्निष्क्रियतया तिष्ठतीति वा । अयस्कारैः प्रहाराधिकरणत्वेन भूमौ निखातो लोहविशेषः कूटस्तद्वन्निर्विकारा वा । कूटानां विश्वसमूहानां स्थितिर्यस्यां वा । वाग्भवादिकूटत्रये तिष्ठतीति वा । कूटं पुरद्वारं स्त्रीचक्रान्तर्गतत्रिकोणं तत्र तिष्ठतीति वा । 'कूटं यन्त्रेऽनृते राशौ निश्चले लोहमुद्गरे । मायादिशृङ्गयोस्तुच्छे सीरावयवदम्भयोः । पुरद्वारे च शंसन्ती'ति विश्वः । कुलं कौलमार्गो वाह्यपूजा वंश आचारो वा तद्रूपिणी ॥ २१७ ॥ वीराणां गोष्ठी सभा संल्लापो वा प्रिया यस्याः । स्वयमपि वीर्यवत्त्वाद्वीरा । 'पतिपुत्रवती वीरे'ति तु नाममालायाम् । निर्गतानि कर्माणि यस्मात्स निष्कर्मा तस्य भावो नैष्कर्म्यं तद्वती नैष्कर्म्या । अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः । स्वार्थे वा ष्यञ् । कर्मलेपाभाववतीत्यर्थः । 'लिप्यते न स पापेने'ति स्मृतेः 'न पुण्यपापे ममे'ति श्रुतेश्च । योगसूत्रमपि 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति ॥

इति भास्कररायेण कृते सौभाग्यभास्करे । नवमेन शतेनाभूद्दशमी बोधिनी कला ॥ ९०० ॥ इति श्रीमल्ललितासहस्रनामभाष्ये नवमशतकं नाम दशमी कला ॥ १० ॥

विज्ञानकलना कल्या विदग्धा बैन्दवासनी ॥ २१८ ॥
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी ।
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी ॥ २१९ ॥

नादः प्रणवशिरस्थितस्तद्रूपा । तदुक्तमभियुक्तैः 'आनन्दलक्षणमनाहतनाम्नि देशे नादात्मना परिणतं तव रूपमीशे । प्रत्यङ्मुखेन मनसा परिचीयमान शंसन्ति नेत्रसलिलैः पुलकैश्च धन्या' इति । नादे रूपमस्या वा । तदुक्तं स्वच्छन्दतन्त्रे 'रोधिन्याख्यं यदुक्तं ते नादस्तस्योर्ध्वसंस्थित' इत्यादिना 'तस्योत्सङ्गतामूर्ध्वगामिनी परमां शिवाम् । ध्याये'दित्यन्तेन । विज्ञानस्य ब्रह्मसाक्षात्कारस्य कलना स्वात्मसाक्षात्कारः 'चतुर्दशानां विद्यानां धारणं हि यथार्थतः । विज्ञानमिति तद्विद्या'दिति कौर्मोक्तं वा विज्ञानम् । कलासु साधुः कल्या । यद्वा कलयितुमर्हा कल्या उषःकालरूपा वा । कादम्बर्यादिरूपा वा । 'कल्यं सर्गे प्रभाते च कल्यो नीरोगदक्षयोः । कल्या कल्याणवाची स्यात्कादम्बर्यामपि स्मृते'ति विश्वः । विदग्धा चातुर्यशीला । भ्रुवोरुपरिभागे वृत्तसंनिवेशो बैन्दवं तदासनं यस्याः । उक्तंच स्वच्छन्दतन्त्रे हाकिनीमण्डलादूर्ध्वं बिन्दुरूपं तु वर्तुल'मित्यादिना तत्र पद्मं शिवं च वर्णयित्वा तस्य 'वामभागे समासीना शान्त्यतीता मनोन्मनी'त्यादिना बिन्दुसंबन्धिचक्रं सर्वानन्दमयाख्यमेवासनं यस्या वा । बिन्दूनां समूहो बैन्दवं तदेवासनं तदभिधेयार्थानामाधारोऽभिधायको यस्या इति वा । तथाच ज्ञानार्णवतन्त्रे 'बिन्दुव्यूहं प्रवक्ष्यामि बीजरूपं वरानने । हकारं बिन्दुरूपेण ब्रह्माणं विद्धि पार्वति ॥ सकारं बिन्दुसर्गाभ्यां हरिश्चाहं सुरेश्वरि । अविनाभावसंबन्धौ लोके हरिहाविति' इत्यादिना वामादीनामिच्छादीनां भूरादीनां जाग्रदादीनां च त्रयं त्रयं बिन्दुरूपमेवोक्त्वोपसंहृतम् 'एवं बिन्दुत्रयैर्योगात्त्रिपुरानामरूपिणी'ति । यद्वा अकारप्रश्लेषेणाप्सु यदैन्दवबिन्दुसमूहस्तस्मिञ्जीवकदम्बे आस्ते बिम्बरूपत्वादभेदेन स्वयमेकैव बहुषु प्रतिबिम्बेषु तिष्ठति । 'एकधा बहुधा चैव दृश्यते जलचन्द्रव'दिति श्रुतेः ॥ २१८ ॥ तत्त्वानि प्रलयपर्यन्तस्थायिवस्तूनि षट्त्रिंशत्संख्यान्येव । घटादीनां तत्त्वपदवाच्यत्वाभावात् । उक्तं चाभियुक्तैः 'आप्रलयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् । तत्तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमत' इति । तेभ्योऽधिका तन्नाशेऽप्यवस्थानात् । तत्त्वमयी तत्त्वप्रचुरा । यद्वा तत्त्वं शिवतत्त्वं तदधिका चिन्मयी चेति नामद्वयार्थः । संप्रज्ञातासंप्रज्ञातसमाधिद्वयरूपेति यावत् । तदुक्तं ज्ञानार्णवे 'स्वयंप्रज्ञातसंज्ञस्तु शिवाधिक्येन जायते । असंप्रज्ञातनामा तु शिवतत्त्वेन वै भवेत्' इति । तल्लक्षणे अपि तत्रैव 'स्वयंप्रज्ञातभेदस्तु तीव्रतीव्रतरो भवेत् । असंप्रज्ञातभेदस्तु मन्दमन्दतरस्तथा ॥ हास्यरोदनरोमाञ्चकम्पस्वेदादिलक्षणः । तीव्रतीव्रतरो देवि समाधिरुपलक्षितः ॥ निमेषवर्जिते नेत्रे वपुस्तल्लक्षणं स्थितम् । मन्दमन्दतरो देवि समाधिरुपलक्षित' इति । इदं च द्वयं तेजोविशेषे मनोधारणेन भवति । तच्च तेजः स्वनाथमुखादवगन्तव्यम् ।

सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी ।

अथवा आत्मतत्त्वं विद्यातत्त्वं शिवतत्त्वं चेति त्रिविधतत्त्वमयी । तत्समष्टिरूपसर्वतत्त्वरूपत्वात्त्रिविधतत्त्वाधिका चेत्यर्थः । चतुर्विधतत्त्वस्वरूपमुक्तं वृद्धैः 'मायान्तमात्मतत्त्वं विद्यातत्त्वं सदाशिवान्तं स्यात् । शक्तिशिवौ शिवतत्त्वं तुरीयतत्त्वं समष्टिरेतेषा'मिति । सत्तत्त्वं चित्तत्त्वं आनन्दतत्त्वं चेति त्रयाणां स्वरूपम् । सच्चिदानन्दाद्ब्रह्मणो जातेषु शिवादिक्षित्यन्तेषु शिवशक्त्योरानन्दांशोऽनावृतः, सदाशिवेश्वरशुद्धविद्यानां चिदंशोऽनावृतः, मायादिक्षित्यन्तानां तु संदंशमात्रमनावृतं, सच्चिदानन्दानामुत्तरोत्तरावरणाभावस्य पूर्वपूर्वावरणाभावव्याप्यत्वनियमाच्छिवतत्त्वे त्रयमप्यनावृतम्, विद्यातत्त्वे सच्चिदंशावनावृतौ, आनन्दांशे त्वल्पमावरणं, आत्मतत्त्वे तु चिदानन्दांशौ सम्यगावृतौ तिष्ठतः । आत्मशब्दोऽप्यात्मलाभ इत्यादिप्रयोगेऽस्तित्वमात्रपरत्वेन प्रसिद्धः, विद्याशब्दो ज्ञानरूपचित्परः, शिवशब्दो मोक्षरूपानन्दे प्रसिद्ध इति । तेन शब्दत्रयेणैव सच्चिदानन्दांशवत्त्वलाभ इति तत्त्वत्रयरहस्यम् । यद्वा षडध्वात्मकपरमात्मशरीरे षदत्रिंशदात्मकतत्त्वाध्वनोऽप्यवयववत्त्वात्तत्त्वमयी । तदुक्तं कामिके 'पृथिव्यादीनि षदत्रिंशत्तत्त्वान्यागमवेदिभिः । उक्तान्यमुष्य तत्त्वाध्वा शुक्रमज्जास्थिरूपधृ'गिति । महावाक्यस्थयोस्तत्पदत्वंपदयोरर्थौ शिवजीवौ स्वरूपमस्याः । सामगानं प्रियं यस्याः । सामगाश्छन्दोगाः अनवत्प्राणवत्प्रिया यस्या इति वा । 'सोममर्हति यः' इति सूत्रेण यप्रत्यये सोमयागार्हा सोम्या । उमया सहितः सोमोऽवयवोऽस्या इत्यर्थे 'मये चे'ति सूत्रेण वा यत्प्रत्ययः । अथवा 'सोमः कर्पूरचन्द्रयोः' । सोम इवाह्लादिकेत्यर्थे शाखादित्वाद्यप्रत्ययः । 'तत्र साधु'रित्यर्थे यप्रत्ययो वा । सौम्येत्यादिवृद्धिपाठे तु चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । सदाशिवस्य कुटुम्बिनी भार्या श्यामलाशुद्धविद्यारूढादिरूपेत्यर्थः ॥ ११९ ॥ सव्यश्चापसव्यश्च मार्गश्च सव्यापसव्यमार्गास्तेषु स्थिताधिकृता । वितरणपालनाधिकारादिदानक्षमेति यावत् । तेषां त्रयाणां स्था स्थितिर्यस्यामिति वा । सन्ति हि सवितृमण्डलस्योत्तर-दक्षिण-मध्य-भागभेदेन त्रयो मार्गाः । अश्विन्यादिभिस्त्रिभिस्त्रिभिर्नक्षत्रैरेकैका वीथी । तादृशीभिस्तिसृभिस्तिसृभिर्वीथीभिरेकैको मार्गः । तदेतद्विस्तरेणोक्तं वायुपुराणे 'अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता । रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥ पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता । एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥ तथा द्वे चापि फल्गुन्यौ मघा चैवार्षती मता । हस्तश्चित्रा तथा स्वाती गोवीथीत्यभिशब्दिता ॥ ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥ मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता । श्रवणं च धनिष्ठा च मार्गा शतभिषस्तथा ॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता । एतास्तु वीथयस्तिस्रो दक्षिणो

मार्ग उच्यत' इति। याम्या भरणी। आदित्या अदितिदेवत्या पुनर्वसुः। मार्गी मृगवीथी। स्पष्टमन्यत्। अत्र सव्यादयस्त्रयोऽपि शब्दाः प्रत्येकं मार्गत्रयस्यापि वाचकाः संभवन्ति। तथाहि 'वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिण'मिति कोशात्प्रकृते सव्यशब्देन नागवीथीगजवीथ्यैरावतवीथ्यात्मक उत्तरो मार्गो विवक्ष्यते। अपसव्यशब्देन त्वजवीथीमृगवीथीवैश्वानरवीथ्यात्मको दक्षिणो मार्गः। मार्गशब्देन सामान्यवाचिनैव पारिशेष्यादार्षतवीथीगोवीथीजारद्भववीथ्यात्मको मध्यमो मार्ग उच्यते। यद्वा उत्तरमार्गो मृगशीर्षसंबन्धित्वेन मृगस्यायं मार्ग इति व्युत्पत्त्या मार्गपदेनोच्यते। मध्यमस्तु सव्यपदेन दक्षिणमार्गात्सव्यस्थानीयत्वात्। अपसव्यस्तु यथास्थित एव। यद्वा 'सव्यं दक्षिणवामयो'रिति कोशाद्दक्षिणमध्यमार्गावेव सव्यापसव्यपदेनोच्येते। उत्तरस्तु मार्गपदेनेति त्रयाणां मार्गाणां वामसंस्थक्रमेण निर्देशः संपद्यते। अथवा दक्षिणमार्ग एव मृगवीथीसंबन्धित्वादुक्तव्युत्पत्त्या मार्गपदेनोच्यताम्। मध्यमस्तु सव्यपदेन मार्गाद्वामत्वात् उत्तरमार्गापेक्षया दक्षिणत्वाद्वा। अतएव तद्विरुद्धत्वादुत्तरो मार्गोऽपसव्यः। मध्यम एव वामसव्यपदेन उत्तरमार्गापेक्षया दक्षिणस्थानीयत्वात्सव्यपदेन तूत्तर एवेति दक्षिणसंस्थक्रमेणापि निर्देशः संपद्यत इत्येका व्याख्या॥ **एवंवा**॥ सव्यो देवयानोऽर्चिरादिमार्गो निवृत्तिपरैः प्राप्यः। अपसव्यः पितृयाणो धूम्रादिमार्गः प्रवृत्तिपरैः प्राप्यः। मार्गस्थशब्दो मार्गेषु स्था स्थितिर्यस्मादिति व्युत्पत्त्या ध्रुवावस्थितिशालिविष्णुलोकपरः। आदित्यादिग्रहाणां स्वस्वमार्गे स्थापनस्य ध्रुवाधीनत्वात्। ईदृशमार्गत्रयरूपेत्यर्थः। एतद्विस्तरस्तु विष्णुपुराणे द्वितीयेंऽशे 'उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम्। पितृयाणः स वै पन्था वैश्वानरपथाद्बहिः॥ तत्रासते महात्मान ऋषयो ह्यग्निहोत्रिणः। भूतारम्भकृतं ब्रह्म शंसन्ते ऋत्विगुद्यताः॥ प्रारभन्ते तु ये लोकांस्तेषां पन्थास्तु दक्षिणः। चलितं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे॥ संतप्ततपसा चैव मर्यादाभिः श्रुतेन च। जायमानाश्च पूर्वे च पश्चिमानां गृहेषु वै॥ पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेष्विह। एवमावर्तमानास्ते तिष्ठन्ति नियतव्रताः॥ सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारक'मिति। लोकालोकपर्वतस्योत्तरशृङ्गमगस्त्यस्थानम्। तदुक्तं मत्स्यपुराणे 'लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम्। तस्योत्तरमगस्त्यस्य शृङ्गं देवर्षिपूजित'मिति। अजवीथ्याः मूलादिनक्षत्रस्य वैश्वानरपथाच्चरमनक्षत्रत्रयात् भूतारम्भकृतं ब्रह्मप्रवृत्तिमार्गबोधकं कर्मकाण्डात्मकं वेदभागम्। जायमाना इति मता अपि स्वकुले एव पुनःपुनर्जायमाना इति समुदायार्थः। तथा तत्रैव 'नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणम्। उत्तरः सवितुः पन्था देवयानस्तु स स्मृतः॥ तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः। संततिं ये जुगुप्सन्ति तस्मान्मृत्युजितश्च ते॥ अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम्। उदक्पन्थानमर्यम्णः स्थिताश्चाभूतसंप्लवम्॥ ते संप्रयोगाल्लोभस्य मैथुनस्य च वर्जनात्। इच्छाद्वेषाप्रवृत्त्या च भूतारम्भविवर्जनात्॥ पुनश्चाकामसंयोगादिच्छादेर्दोषदर्शनात्। इत्येवं कारणैः शुद्धास्तेऽमृतत्वं हि भेजिरे॥

आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते । त्रैलोक्यस्थितिकालोऽयमपुनर्मार उच्यत' इति । नागवीथ्युत्तरं अश्विन्यादित्रयोत्तरम् । भूतारम्भविवर्जनात् प्रवृत्तिमार्गपरित्यागात् । तृतीयमार्गेण सह फलैक्यं माप्रसाङ्गीदत आह—आभूतसंप्लवमिति । तथा तत्रैव 'ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः । एतद्विष्णुपदं दिव्यं तृतीयं व्योम्नि भासुरम् ॥ निर्धूतदोषपङ्कानां यतीनां संयतात्मनाम् । स्थानं तत्परमं विप्र पुण्यपापपरिक्षये ॥ अपुण्यपुण्योपरमे क्षीणाशेषार्तिहेतवः । यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम् ॥ दिवीव चक्षुराततं योगिनां तन्मयात्मनाम् । विवेकज्ञानदृष्टं च तद्विष्णोः परमं पद'मित्यादि । इत्यपरा व्याख्या ॥ एवंवा ॥ उपासनाक्रमे हि द्वौ मार्गौ दृश्येते । वाममार्गो दक्षिणमार्गश्चेति । तत्र वाममार्गो नाम स्वस्ववर्णाश्रमविहितानि यावन्ति कर्माणि, श्रौतान्यग्निहोत्रादीनि, स्मार्तान्यष्टकादीनि, तान्त्रिकाणि मन्त्रसिद्ध्यादीनि, तेषु सर्वेषु या या देवताः प्रधानभूता अङ्गभूता वा तत्तत्स्थाने स्वोपास्यामेव देवतां सर्वत्र भावयेत् । तत्तद्देवतावाचकपदोत्तरं विशेष्यत्वेन स्वदेवतावाचकपदं सर्वमन्त्रेषु निक्षिपेदित्याकारकः । ईदृशे मार्गे देवर्षिपितृणामृणशोधनाभावजन्यं पातकम् । दक्षिणमार्गे तु श्रौतादितत्तत्कर्माङ्गदेवतास्थाने स्वोपास्यदेवतैव भावनीयेति न निर्बन्धः अपितु तत्तद्देवताविषयकतन्त्रेषु यानि कर्माणि विहितानि तदङ्गत्वेनैवेति सर्वकर्मणामुपरोधाभावादस्मिन्मार्गे तादृशं पातकं नास्तीति झडिति मोक्षः । वाममार्गे तु विलम्बितः । ऋणशोधनाभावेन कंचित्कालं प्रतिबन्धात् । नचैवं सति अनुष्ठानतोऽपि कठिने मोक्षांशेऽपि विलम्बिते साधने कथं शिष्टानां वाममार्गे प्रवृत्तिरिति वाच्यम् । ऐहिकानामुच्चावचफलनामिहैव जन्मनि भोगलिप्सया मोक्षे स्वल्पविलम्बस्य सोढव्यत्वात् । भुक्तिमुक्तिप्रदत्वेन त्रैषयिकशिष्टानां प्रवृत्तिसंभवात् । ऐहिकभोगविरक्तशिष्टानां तु मोक्षे विलम्बस्यासोढव्यत्वाद्दक्षिण एव मार्गे प्रवृत्तिरिति विवेकः । तदिदं सविस्तरं निरूपितं कालिकापुराणे 'सर्वत्र देवीमन्त्रेषु वैदिकेष्वपि भैरवीम् । त्रिपुरां चिन्तयेन्नित्यं वेदमन्त्रेषु च क्रमात् ॥ देवनामसु सर्वेषु भैरवीति पदं सदा । कुर्याद्विशेषणं नित्यं नोच्चार्यं निर्विशेषणम् ॥ आपः पुनन्तु पृथिवीमुक्त्वा त्रिपुरभैरवीम् । कुर्यादाचमनं विप्रो द्रुपदायां तथा चरेत् ॥ इदंविष्णुर्भैरवस्तु विचक्रम इतीरितम् । मृदालम्बनकृत्येषु मन्त्रमेतं नियोजयेत् ॥ गायत्रीं त्रिपुरायां तु भैरवीमुच्चरञ्छिवाम् । मार्तण्डभैरवायेति सूर्यायार्घ्यं निवेदयेत् ॥ उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं तु शेषे भैरवमीरयेत् ॥ तर्पणादौ प्रयुञ्जीत तृप्यतां ब्रह्म भैरवम् । आवाहने च स्वपितॄन्भैरवानिति तर्पयेत् ॥ तृप्यतां भैरवि मातः पितर्भैरव तृप्यताम् । आदौ च त्रिपुरां पूर्वं तर्पणेऽपि प्रयोजयेत् ॥ ज्योतिष्टोमाश्वमेधादौ यत्र यत्र प्रपूजयेत् । तत्र भैरवरूपेण देवीमपि च भैरवीम् ॥ एवं तु वाम्यभावेन यजेत्त्रिपुरभैरवीम् । एषा वामेन मार्गेण पूज्या दक्षिणतां विना ॥ ऋषीन्देवान्पितॄंश्चैव मनुष्यान्भूतसंचयान् । यो यजेत्पञ्चभिर्यज्ञैर्ऋणानां परिशोधनैः ॥ विधिवत्स्नानदानाभ्यां सर्वं यद्विधिपूजनम् । क्रियते सरहस्यं तु तद्दाक्षिण्यमिहोच्यते ॥ सर्वत्र पितृदेवादौ यस्मा-

द्भवति दक्षिणः। देवी च दक्षिणा यस्मात्तस्माद्दक्षिण उच्यते ॥ या देवी पूज्यमाना तु देवादीनामशेषतः। यज्ञभागान्स्वयं भुङ्क्ते सा वामा तु प्रकीर्तिता ॥ पूजकोऽपि भवेद्वामस्तन्मार्गे सततं रतः। पञ्च यज्ञान्न वा कुर्यान्न कुर्याद्वामपूजने ॥ अन्यस्य पूजाभागं हि यतो गृह्णाति वामिका। यः पूजयेद्वाम्यभावैर्न तस्य ऋणशोधनम् ॥ पितृदेवनरादीनां जायते तु कदाचन। सर्वत्र त्रिपुरायोगस्तेन मार्गेण गच्छतः ॥ यदा जायेत प्राज्ञस्य तदा मोक्षमवाप्नुयात्। चिरेण लभते मोक्षं वामेन त्रैपुरो नरः ॥ ऋणशोधनजैः पापैराक्रान्तत्वेन भैरवः। इहलोके सुखैश्वर्ययुक्तः सर्वत्र वल्लभः ॥ मदनोपमकान्तेन शरीरेण विराजितः। सराष्ट्रकं च राजानं वशीकृत्य समन्ततः ॥ मोहयन्वनिताः सर्वाः कुर्वंश्च मदविह्वलाः। सिंहान्व्याघ्रांस्तरक्षूंश्च भूतप्रेतपिशाचकान्। वशीकुर्वन्विचरति वायुवेगो ह्यवारितः ॥ बालां वा त्रिपुरां देवीं मध्यां वाप्यथ भैरवीम्। यो यजेत्परया भक्त्या पञ्चबाणोपमः कृती ॥ कामेश्वरीं तु कामाख्यं पूजयेत्तु यथेच्छया। दाक्षिण्यादथवा वाम्यात्सर्वथा सिद्धिमाप्नुयात् ॥ महामायां शारदां च शैलपुत्रीं तथैव च। यथातथाप्रकारेण दाक्षिण्येनैव पूजयेत् ॥ यो दाक्षिण्यं विना भावं महामायामिहार्चति। स पापः सर्वलोकेभ्यश्च्युतो भवति रोगधृक् ॥ अन्यास्तु शिवदूत्याद्या या देव्यः पूर्वमीरिताः। ता दाक्षिण्याद्वामतो वा पूजनीयास्तु साधकैः ॥ किंतु यः पूजको वामः सोऽन्याशापरिलोपकः। सर्वाशापूरको यस्माद्दक्षिणस्तत उत्तम' इति। इति वेतालभैरवौ प्रति शिववचनम्। एतत्पक्षे सव्यापसव्यौ च तौ मार्गौ चेति कर्मधारयः। तयोः स्थिता। मार्गद्वयेनाप्युपास्येत्यर्थः। वाममार्गेणैवोपास्यानां त्रिपुरभैरव्यादिदेवतानां दक्षिणमार्गेणैवोपास्यानां शारदादिदेवतानामुभयथापि विकल्पेनोपास्यानां शिवदूत्यादिदेवतानां च परमार्थदृष्ट्या त्रिपुरसुन्दर्यभेद इति यावत्। इत्यन्या व्याख्या ॥ ॥ किमत्र 'सव्यापसव्यसौषुम्णेष्वि'ति शिवसूत्रे प्रयोगादिडापिङ्गले सव्यापसव्ये अर्थात्सौषुम्ण्या एव मार्गपदेन परिशेषादुच्यत इत्यप्यन्या व्याख्या ॥ ॥ अत्र द्वितीयव्याख्यानेऽपि मार्गपदेनैव पारिशेष्याल्लक्षणया ध्रुवमार्गोपादाने सति त्रित्रिपदकद्वन्द्वसमासरूपसव्यापसव्यमार्गपदत्रयं द्विपदकद्वन्द्वगर्भकर्मधारयरूपं चैकपदमिति चतुर्णां पदानां पुनर्द्वन्द्वापवादैकशेषेण व्याख्याचतुष्टयसमुच्चयोऽवगन्तव्यः ॥ 'अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूक'मित्यादिश्रुत्युक्तरीत्या ये मार्गद्वयभ्रष्टाः कष्टामापदं प्राप्तास्तेषामप्यापदमनायासनामस्मरणादिसाधनमात्रेण दयया निवारयतीत्याह—**सर्वापदिति**। सर्वा आपदो विशिष्य नितरां वारयति। तथाच कूर्मपुराणे देवीवाक्यम् 'ये तु सङ्गान्परित्यज्य मामेकं शरणं गताः। उपासते सदा भक्त्या योगमैश्वरमाश्रिताः ॥ सर्वभूतदयावन्तः शान्ता दान्ता विमत्सराः। अमानिनो बुद्धिमन्तस्तापसाः संयतव्रताः ॥ मच्चित्ता मद्गतप्राणा मज्ज्ञानकथने रताः। संन्यासिन्यो गृहस्थाश्च वनस्था ब्रह्मचारिणः ॥ ये चोक्तैर्लक्षणैर्हीना अपि मन्नामजापकाः। तेषां नित्याभियुक्तानामापदां पर्वतानपि। नाशयामि तरां ज्ञानदीपेन नचिरादिहे'ति। हरिवंशेऽपि देवीं प्रति विष्णुवाक्यम् 'तृणां

स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥ २२० ॥

बन्धं वधं रोधं पुत्रनाशं धनक्षय'मित्यादिना यत्परम्परामुपन्यस्य 'आपत्सु निखिलासु त्वं रक्षस्येव न संशय' इत्यन्तम् । वाराहेऽपि ब्रह्मादिकृतदेवीस्तोत्रान्ते 'शरणं त्वां प्रपद्यन्ते ये देवि परमेश्वरि । न तेषामापदः काश्चिज्जायन्ते क्वापि संकट' इत्यादि । अभियुक्ता अप्याहुः 'आपदि किं करणीयं स्मरणीयं चरणयुगलमम्बायाः । तत्स्मरणं किं कुरुते ब्रह्मादीनपि च किंकरीकुरुते' इति ॥

अथ परिभाषायां सप्तत्रिंशन्नामानि विभजते ॥ **खेचरता द्विर्भवदा देहे चैका भवेद्देवी । भगणे चतुर्गुणा भूर्भवभालशतेन गोमेदा ॥ २१ ॥**

अत्रोत्तरार्ध इव पूर्वार्धे नकारस्याकथनादेकपदोपादानाच्च दशसंख्याधिक्ये सिद्धे तत्र प्रथमोपस्थितत्वादेकादशाक्षरं नामेति सिद्ध्यति ॥ २१ ॥

दुःखकृतचाञ्चल्याभावात्स्वस्था स्वस्मिन्नेव स्थिता वा । 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति होवाचे'ति श्रुतेः । स्वरित्यव्ययं स्वर्गवाचि । तत्र तिष्ठत्यध्यक्षतयेति वा । शोभना अस्था स्थित्यभावो गतिर्यया सा वा । प्रभावादेवोपाधिसंपर्कमन्तरेणैव मधुरा सर्वाभिलषणीया । 'मधुरं रसवत्स्वादुप्रियेषु मधुरोऽन्यवत् । मधुरा शतपुष्पायां मधूलीनगरीभिदो'रिति विश्वः । अतएव स्व आत्मीयो भावोऽवस्थानं यस्यां सा च सा मधुरापुरी चेति वा । मीनाक्षीनिवासशालिहालास्यक्षेत्रनिवासेति यावत् । यद्वा स्वस्यात्मनो भायां प्रतिभायां येऽवमाः प्रथमगणनीयाः । आत्मज्ञोत्तमा इति यावत् । तेषां धुरेव धुरा । धूरिति हलन्ताद्धायुरिमनेन टाप् । रथस्य धूर्यथा सर्वोत्तममङ्गं तद्वदियमात्मज्ञानवतां निर्वाहिकेत्यर्थः । नचावमपदस्य निकृष्टपरत्वमेवेति भ्रमितव्यम् । अवमोत्तमपदयोः प्रथमचरमपरत्वेन प्रयोगदर्शनात् । 'अग्निरग्रे प्रथमो देवतानां संयातानामुत्तमो विष्णुरासी'दित्यामावैष्णवेष्टियाज्यानुवाक्यामन्त्रस्य सर्वदेवताप्रथमचरमभूतयोरग्निविष्णोर्ग्रहणे प्रत्याहारन्यायेन मध्यस्थानामखिलदेवतानां ग्रहणं दीक्षणीयेष्टौ सिद्ध्यतीति प्रतिपादनपरस्य व्याख्यारूपे 'अग्निर्वै देवानामवमो विष्णुः परम' इति बह्वृचब्राह्मणे प्रथमपदस्यावमपदेन व्याख्यानदर्शनेन तयोः पर्यायत्वसिद्धेः । स्वभावात्प्रज्ञानं ये वमन्ति सृजन्ति साधयन्ति तेषु धूरुत्तमेति वा । 'न निर्धारणे' इति षष्ठीसमासनिषेधस्य न विरोधः । पुरुषोत्तम इत्यत्रेव सप्तमीसमासस्वीकारात् । शोभना अभावाः स्वभावाः । अभावेषु शोभनत्वविशेषणात्तत्प्रतियोगिनां भावानामशोभनत्वमुक्तं भवति । तेन रागद्वेषवैषम्यनैर्घृण्यादिप्रायोगिकैरभावैर्मधुरेति वा । स्वेषु आत्मीयेषु भक्तेषु भावेन अवस्थानेन मधुरा वा । स्वेषां भावेन भक्त्या मधु सत्फलं रातीति वा । 'चरन्वै मधु विन्दती'ति श्रुतौ तथैव मधुपदस्य व्याख्यानदर्शनात् । एवमभिप्रायावतारयोरपि भावपदार्था यथासंभवं योजनीयाः । धीरा पण्डिता । धैर्यवती वा । धियः मद्वैतबुद्धिं राति ददातीति वा । 'ईश्वरानुग्रहादेव पुंसामद्वैतवासने'ति स्मृतेः धीप्रदा

---

१ क्षेत्ररूपेति यावदिति पाठः. । २ आप. चैव हलन्तानामिति.

चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया ।
सदोदिता सदातुष्टा तरुणादित्यपाटला ॥ २२१ ॥
दक्षिणादक्षिणाराध्या दरस्मेरमुखाम्बुजा ।

इरा दशमीतिथिर्यस्यां वा । धीरैः पण्डितैः समर्चिता । 'तं धीरासः कवय उन्नयन्ती'ति श्रुतेः । अतएव कल्याणचरणैः स्वीयं धैर्यं प्रकटीकृतम् । 'पातय वा पाताले स्थापय वा निखिललोकराज्ञ्ये । मातस्तव पदयुगुलं नाहं मुञ्चामि नैव मुञ्चामी'ति । धीसंज्ञं ज्ञानाभिन्नं रसमानन्दमुद्दिश्यार्चिता वा ॥ २२० ॥ चैतन्यं चिद्रूपं 'आत्मचैतन्यमात्मे'ति शिवसूत्रात् तदेवार्घ्यं पूजायोग्यं जलादि तेन सम्यगाराध्या । निराधाराख्यायाः पूजायाश्चिदभेदभावनारूपत्वात् 'ज्ञानमर्घ्य'मिति भावनोपनिषच्छ्रुतेः । उक्तंच स्कान्दे 'स्वानुभूत्या स्वयं साक्षात्स्वात्मभूतां महेश्वरीम् । पूजयेदादरेणैव पूजा सा पुरुषार्थदे'ति । अथवा चैतन्यस्यात्मनोऽर्घ्येण ज्ञानेन स्वानुभूत्येत्यर्थः । 'अर्घ्यः पूजाविधौ मूल्येऽप्यर्घ्यो विद्याद्रुमूलयो'रिति विश्वः । अर्घे साधुरित्यर्घे यत्प्रत्ययः । चातुर्वर्ण्यादेराकृतिगणत्वाद्वा स्वार्थे ष्यञ् । आर्घ्यइत्येव च्छेदः । चैतन्यवाचकोऽर्घ्यो विद्या स्त्रीदेवत्यो मनुरिति वा । तेन भुवनेश्वरीमन्त्रेण समाराध्या । 'स्त्रीदेवतास्तु विद्याः स्युर्मन्त्राः पुंदेवता मता' इति वचनात् । सूतसंहितायां 'जपित्वा दशसाहस्रं मन्त्रं चैतन्यवाचकम् । महापातकसंघैश्च मुच्यते पातकान्तरै'रिति श्लोके चैतन्यवाचकमन्त्रपदस्य भुवनेश्वरीमन्त्रपरत्वेन व्याख्यातत्वाच्च । अथवा चेतनैव चैतन्यं संविद्रूपो रसः 'चेतना संविदि प्रोक्ता वाच्यवत्प्राणिनि स्मृते'ति विश्वः । स एवार्घ्यः पूजाद्रव्यं विशेषार्घ्यपात्रे परिपूरणेन संस्कारैः पूजायोग्यतामापादित इति यावत् । तेन सम्यक्तर्पणादिनाराध्या । 'संविदासवयोर्मध्ये संविदेव गरीयसी'ति रुद्रयामलात् । तान्त्रिकैः कुण्डगोलोद्भवपदेन व्यवह्रियमाणः पाञ्चमिको रसो वा चैतन्यं प्राणिसंभवत्वात् । चैतन्यं चिदेव कुसुमं महाफलप्रसूतित्वात्, 'जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी'त्यादौ कुसुमत्वेन रूपकस्य कविसंप्रदायसिद्धत्वात्, तत्प्रियं यस्याः । उपलक्षणमेतत्पुष्पाष्टकस्य । 'अहिंसा प्रथमं पुष्पमिन्द्रियाणां च निग्रहः । क्षान्तिः पुष्पं दयापुष्पं ज्ञानपुष्पं परं मतम् । तपःपुष्पं सत्यपुष्पं भावपुष्पमथाष्टम'मित्यभियुक्तोक्तेः संविदादिपक्षद्वयमिहाप्यतिदेष्टव्यम् । तयोश्च कुसुमसद्भावाच्चैतन्यस्य कुसुममित्येव पक्षद्वयेऽपि विग्रहः । सदा नित्यं उदिता उदयवती स्वप्रकाशत्वात् । सत्सु सज्जनेषु आसमन्तादतिशयेनोदिता वा । एवमेव सदातुष्टेत्यस्य द्वावर्थौ । तरुणो मध्याह्नकालिक आदित्यः सूर्यस्तद्वत्पाटला श्वेतरक्ता । नच गौरी श्यामेत्यादिभिर्विरोध उद्भाव्यः । मूर्तिभेदेन ध्यानभेदेन वा व्यवस्योपपत्तेः । श्रूयते च 'तद्यथा महारजनं वासो यथा पाण्डुविकं यथेन्द्रगोप' इति । स्मर्यते च 'शान्ता धवलवर्णाभा मोक्षधर्मप्रकल्पने । स्त्रीवश्ये राजवश्ये च जनवश्ये च पाटला । पीता धनस्य संपत्तौ कृष्णा मारणकर्मणि । बभ्रुर्विद्वेषणे प्रोक्ता शत्रारे पाटलाकृतिः । सर्ववर्णा सर्वलाभे ध्येया ज्योतिर्मयी पर'मिति ॥ २२१ ॥ दक्षिणया दक्षिणैः कुशलैर्वाराध्या । दक्षिणैः पण्डितैरदक्षिणैर्मूर्खैश्चेति वा । दक्षिणमार्गो-

कौलिनीकेवलाऽनर्घ्यकैवल्यफलदायिनी ॥ २२२ ॥

पासकेन वाममार्गोपासकेन चेति वा यद्वा केवलकर्मजिज्ञासवो दक्षिणा इत्युच्यन्ते । 'विद्यया तदारोहन्ति यत्र कामाः परागताः । न तत्र दक्षिणा यन्ति नाविद्वांसस्तत्रस्थिन' इति श्रुतौ तथा व्याख्यानदर्शनात् अदक्षिणा ब्रह्मविदः ताभ्यामाराध्या । 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभे'ति वचनात् । दरगीपथथा तथा स्मेर स्मितवन्मुखाम्बुजं यस्याः । मुखमम्बुजं यस्मिंस्तन्मुखाम्बुजं ग्रीवावृत्तं दरवत् शङ्खवत्स्मेरं शोभमानं मुखाम्बुजं यस्या इति वा । कम्बुकण्ठीति यावत् । दरे भयकालेऽपि स्मेरमेव मुखाम्बुजं यस्या इति वा । कल्पान्तादिनैमित्तिककालेऽप्यन्येषामेव भयेन मुखवैवर्ण्यम् । अम्बायास्तु सर्वदा स्मेरमेव मुखमिति यावत् । दरे भक्तानामादरविषये स्मेरं प्रसन्नमिति वा । अत्रेदं बोध्यम्—एतच्छ्लोकोत्तरार्धे चत्वारि नामानि प्रतीयन्ते । तत्र तृतीयातिरिक्तानि पुनरुक्तानि त्रीणि भवन्ति । 'कुलाङ्गना कुलान्तःस्था कौलिनी कुलयोगिनी । क्लींकारी केवला गुह्या कैवल्यपददायिनी'त्यत्र त्रयाणां विवृतत्वात् । तत्परिजिहीर्षया च छलाक्षरसूत्रकारैः कौलिनीकुलयोगिनीत्यस्यैकपदत्वं स्वीकृत्य प्रकृते च कौलिनीत्येकमवशिष्टमेकमिति नामद्वयमङ्गीकृतम् । यदुक्तं 'लृयूदूख्लृरीडृकिकोटपती । लृयायूटाटृखृरीडृकीकोरीयूफी' इति त्रयोदशाक्षरैः छाया । अष्टाक्षराणि त्रीणि नामानीत्यादिरीत्यैकविंशतिर्नामानि 'सदाशिवकुटुम्बिनी'त्यारभ्य 'मानवती'त्यन्तानि तत्र कथ्यन्ते । तत्र किको इत्यक्षरद्वयेन त्र्यक्षरमेकं त्रयोदशाक्षरमेकमिति द्वे नामनी । कवर्गीयाद्याक्षरके इत्यर्थकेन प्रकृतं नामद्वयं वर्ण्यत इति स्थितिः । अत्र हि छलार्णसूत्राणां दृष्टोपपत्तिमूलकतायाः पूर्वमेवोक्तत्वात्षड्भिर्नामभिर्नामत्रयकरणमपेक्ष्य नामचतुष्टयपरत्वेन पदच्छेदवर्णनस्य युक्ततां मन्वानैर्मूलकारैरस्मद्गुरुचरणैरिह षडक्षरमेकं नामावशिष्टमपरमिति द्वे नामनी स्वीकृत्य 'कौलिनी कुलयोगिनी'त्यत्रापि द्वे नामनी स्वीकृते । पौनरुक्त्यपरिहारस्त्वस्मिन्पक्षेऽपि तुल्य एव । नचैवं नामाधिक्यम् । 'प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृति'रित्यत्र छलाक्षरसूत्रकारैः प्रकटाकृतिरित्यनयोर्नामद्वयस्वीकारेऽपि गुरुचरणैरेकनामत्वस्वीकारेण तदभावादिति । तस्मादिह कौलिनीकेवलेत्येकं नाम । नचैतत्पक्षे समासानुपपत्तिः । समानाधिकरणसमासे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति नियमनात्केवलपदस्य पूर्वनिपातापत्तिः । बहुव्रीहौ तु कौलिनीपदस्य पुंवद्भावापत्तिरिति वाच्यम् । परंज्योतिरित्यादाविव भिन्नपदयोरप्येकनामत्वसंभवात् । कौलधर्मवती केवलाख्यज्ञानवती चेत्यर्थः । ईश्वरज्ञानं केवलपदवाच्यम् । जैनतन्त्रे तथाप्रयोगस्य बहुशो दर्शनात् । सकलधर्मैर्विमुक्ता वा केवला । सुखदुःखविमुक्ता वा । 'तद्विमुक्तस्तु केवली'ति शिवसूत्रे केवलीति संज्ञाया दर्शनात् । 'सुखासुखयोर्बहिर्मनन—'मिति पूर्वसूत्रोपात्तसुखदुःखयोस्तत्पदेन परामर्शात् । प्रकृते च मत्वर्थीयस्येनिप्रत्ययस्याभावेऽपि तादृशस्यात्प्रत्ययस्य सुवचत्वात् । एककृत्वनिर्णाताख्या अपि त्रयोऽर्था इह वर्णनीयाः । तथाच विश्वः 'केवलं ज्ञानभेदे स्यात्केवलश्चैककृत्वयोः ।

स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥ २२३ ॥

निर्णीते केवलं चोक्तं केवलः कुहने क्वचि'दिति । वस्तुतः केवलकौलधर्मवतीत्येवार्थः । विशेषणविशेष्यभावादिना परस्परान्वयएव भिन्नपदयोरेकनामत्वनियमात् । अथवा दत्ताभार्य इत्यत्र दानक्रियानिमित्तस्यापि दत्तापदस्य संज्ञात्वमंगीकृत्य 'संज्ञापूरण्योश्चे'ति पुंवद्भावनिषेध आश्रीयते वैयाकरणैस्तद्वदिहापि कौलिनीपदस्यापि संज्ञात्वात् कौलिन्यः केवला ज्ञानवत्यो ययेति बहुव्रीहिरपि संभवति । कौलिनीभिः केवला निर्णीतेति तृतीयासमासो वा । 'तृतीया तत्कृतार्थेन गुणवचनेने'ति सूत्रे गुणोपसर्जनः । द्रव्यवचनपरत्वेन गुणवचनपदस्य व्याख्यानात् । गुणमुक्तवान् गुणवचनः । 'कृत्यल्युटो बहुल'मिति भूते कर्तरि ल्युडिति निर्णयस्यापि गुणत्वेन तत्कर्मवाचिनः केवलपदस्यापि गुणवचनत्वम् । अनर्घ्यममूल्यमपरिच्छिन्नं यत्कैवल्याख्यं पदं पञ्चममुक्तिरूपं तद्दातुं शीलमस्याः । अनर्घ्येति दीर्घान्तपाठे आसमन्ताद्याप्तं यत्कैवल्यमिति वा । न विद्यते कैवल्यं यस्मात्तदकैवल्यमीदृशं यत्पदमिति वा व्याख्येयम् ॥ २२२ ॥ स्तोत्रं लौकिको गुणानुवादः षड्विधः 'नमस्कारस्तथाशीश्च सिद्धान्तोक्तिः पराक्रमः । विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षण'मित्यभियुक्तोक्तेः 'त्रिजगद्वन्द्या स्वस्तिमती मिथ्याजगदधिष्ठाना । भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी । इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी । साम्राज्यदायिनी' इत्यादिनामरूपः । प्रगीतमन्त्रसाध्यकगुणनिष्ठगुणाभिधानं वैदिकं स्तोत्रं वा प्रियं यस्याः । स्तोत्र्यश्च ता आपश्च स्तोत्रयस्ताः प्रिया यस्या वा । स्तोत्रीशब्दस्य पुंवद्भावः । देवा मनुष्याः पितरोऽसुराश्चाप्पदवाच्याः । 'तानि वा एतानि चत्वार्यम्भांसी'ति श्रुतेः । 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'ति श्रुतावपामेव मनुष्यादिरूपतया परिणतत्वोक्तेश्च । 'आपो वा इदꣳ सर्वं'मित्यादिश्रुतेश्च । स्तुतिरस्यां कर्मतासंबन्धेनास्तीति । स्तुतिमती । स्तुत्या मतिश्च ईश्च यस्या इति वा । यत्स्तुत्या ज्ञानैश्वर्ये लभ्येते सेति यावत् । श्रुतिभिः सम्यक् स्तुतं परिचितं वा वैभवं विभुत्वं यस्याः । 'संस्तवः स्यात्परिचय' इति कोशः । श्रुतिशब्दश्चतुःसंख्यापरो वा । 'युगाब्धयोऽर्धाः श्रुतयश्चतस्र' इति छन्दःसुधाकरात् । तेन चतुर्धा परिचितं वैभवं इति विग्रहः । 'शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष' इति बह्वृचोपनिषदुक्तचतुर्व्यूहस्वरूपेत्यर्थः । कूर्मपुराणेऽपि 'चतस्रः शक्तयो देव्याः स्वरूपत्वे व्यवस्थिताः । अधिष्ठानवशात्तस्याः शृणुध्वं मुनिपुंगवाः ॥ शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः स्मृताः । चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः । अनया परमो देवः स्वात्मानन्दं समश्नुते ॥ चतुर्ष्वपि च देवेषु चतुर्मूर्तिर्महेश्वर' इति । मनोऽस्याः स्वतन्त्रतया तिष्ठति नतु पराधीनवृत्तिकत्वेनेति मनस्विनी । 'अस्मायामेधास्रजो विनिः' । मानश्चित्तसमुन्नतिरादरणं वा प्रियापराधसूचिका चेष्टा वा प्रमाणं वा प्रमितिर्वास्यामस्तीति मानवती । महेशस्य स्त्री महेशी । उक्तंच देवीपुराणे 'महादेवात्स-

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परमोदा मनोमयी ॥ २२४ ॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।

मुत्पन्ना महद्भिर्यत आदृता । महेशस्य वधूर्यस्मान्महेशी तेन सा स्मृते'ति । मङ्गलरूपा आकृतिर्यस्याः ॥ २२३ ॥ विश्वस्य जगतो विष्णोर्वा माता । 'सोमः प्रवते' इत्युपक्रम्य 'जनितोत विष्णो'रिति श्रुतेः । जगद्धत्ते भूरूपेणेति जगद्धात्री । उपमाता वा पालकत्वात् । 'एष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाये'ति काण्वश्रुतेः । देवीपुराणेऽपि 'यस्माद्धारयते लोकान्वृत्तिमेषां ददाति च । डुधाञ्धारणे धातुर्जगद्धात्री मता बुधै'रिति । विशाले विस्तीर्णे अक्षिणी यस्याः । सा वाराणसीपीठाभिमानिनी । 'वाराणस्यां विशालाक्षी'ति पाद्मात् । विशालशब्दो बदरिकाश्रमवाचकोऽपि हिमवद्वृत्तित्वसाधर्म्येण नेपालपीठपरः । तस्य च पीठन्यासप्रकरणे नेत्रस्थाने न्यासो ब्रह्माण्डपुराणादौ विहितः । तेन विशालपीठमेवाक्षिस्थानं यस्या इति वा । विरागो वैराग्यमस्या अस्तीति विरागिणी । सृष्ट्यादिकर्मसु प्रौढत्वात्प्रगल्भा । परमा च सोदारा च महती च । देशतः कालतश्च महत्त्ववतीत्यर्थः । 'उदारो दातृमहतो'रित्यमरः । 'आकाशवत्सर्वगतश्च नित्य'इति श्रुतेः परं प्रकृष्टं मोदमानन्दमासमन्ताद्रातीति वा । परमाण्युदानि जलानि यस्मिन्स परमोदः समुद्रः स च प्रकृते भवसमुद्ररूपः तस्यारा आयुधविशेषो नाशिकेति वा । अकारप्रश्लेषेण अपगता रमा येषां तेऽपरमा दरिद्रास्तेभ्य उदारा ऐश्वर्यप्रदेति वा । पर उत्कृष्ट आमोदः परिमलः कीर्तिरिति यावत् । आ समन्तान्मोदः संतोषो वा यस्याः । शुद्धस्य ब्रह्मणो मनःस्थानीयत्वान्मनोमयी । तदुक्तं महावासिष्ठरामायणे 'स भैरवश्चिदाकाशः शिव इत्यभिधीयते । अनन्यां तस्य तां विद्धि स्पन्दशक्तिर्मनोमयी'ति । मनःप्रधाना वा मनोमयी । 'मनसैवानुद्रष्टव्यम्'इति श्रुत्या स्वज्ञाने जननीये मनस एव प्राधान्यात् ॥ २२४ ॥ व्योमैव केशा यस्या विराड्रूपायाः । व्योमकेशस्य शिवस्य स्त्री वा । व्योमैवाल्पं सद्व्योमकम् । अल्पार्थे कन्प्रत्ययः । तस्येशी ततोऽपि व्यापिका वा । व्योमकरूपस्येशस्य स्त्री दिग्रूपा वा । विमानो व्योमयानं तत्रस्था देवास्तदभेदादम्बिकापि । विशेषेण माने आदरणे स्था स्थितिर्यस्या वा । विशिष्टा मा कान्तिर्यस्य तद्विमं तादृशं अनः शकटं किरिचक्रादिरूपो रथस्तत्र तिष्ठतीति वा । विगतं मानं परिमाणं यस्य तदपरिच्छिन्नं ब्रह्म तन्निष्ठा वा । माने परिमाणे स्था स्थितिः परिमाणावच्छिन्नता विगता यस्या वा । विशिष्य माति निष्कृष्य प्रमां जनयतीति विमानो वेदस्तत्र प्रतिपाद्यतया तिष्ठतीति वा । व्युपसृष्टान्मातेः शानचि विमान इति रूपम् । विशिष्टेषु वेदाविरुद्धेषु मानेषु प्रमाणेषु धर्मब्रह्मरूपेण तिष्ठतीति वा । विशिष्य मानं 'पुराणन्यायमीमांसे'त्यादिना तद्व्यक्तित्वेन रूपेण परिगणनं येषां तेषु चतुर्दशस्वेव विद्याधर्मस्थानेषु तिष्ठतीति वा । तदिदमुक्तं भगवता जैमिनिना 'शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वा'दिति ।

कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ॥ २५४ ॥
पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम् ।

परित्याज्येति द्योतयन्नाह—**विशेषत इति** । यदि च नवम्यादितिथिषु जन्मनक्षत्रं संक्रान्तिः शुक्रवारश्च भवति तदा तत्त्रेण सकृदेव नामसाहस्रपाठ इत्यादिकं न्यायविद्भिरूहनीयम् ॥ २५४ ॥ इयता प्रबन्धेन रहस्यतमत्वं ललिताप्रीतिकरत्वं चेति विशेषणद्वयं विविच्य इतोऽपि विस्तरेण तदेव विशेषणद्वयं विवेचयितुकामस्तयोः प्रथमस्य शरीरघटकेषु फलेषु रोगप्रशमनादेः प्रथमं निर्दिष्टत्वाद्रोगशमनादिचतुष्टयफलकं काम्यं प्रयोगं प्रथममाह द्वाभ्याम्—**पौर्णमास्यामिति** । पौर्णमासीशब्दः शुक्लपक्षस्य चरमरात्रिपरः 'दर्शादृष्टे'त्यनुवाके तादृशरात्रिमानत्वेन परिगणनात् । तेनास्मिन्प्रयोगे रात्रिव्यापिनी तिथिर्ग्राह्येति सिद्ध्यति । 'कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथि'रिति वचनात् । 'यां तिथिं समनुप्राप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानव्रतादिषि'ति वचनस्य 'मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे' इत्यादिविध्यन्तरशेषत्वेन प्रकृते तदनुपयोगात् उभयत्रैकदेशव्याप्तौ परा । वस्तुतस्तु तत्तत्तिथिनित्यामन्त्रजपार्चादौ तान्त्रिकैरुदयकालव्यापिन्येव तिथिर्गृह्यते । वचनमपि लिख्यते 'तिथिरौदयिकी ग्राह्या तिथिनित्यार्चनादिषि'ति । तेन यत्र दिवैव पौर्णमासी समाप्ता तस्यास्तिथेश्चन्द्रादेवत्यत्वात्पौर्णमासीत्वे सिद्धे 'दर्शादृष्टे'त्यनुवाकस्यापि तत्तद्दैवत्यतिथिसंबन्धिरात्रिमात्रोद्देशेन नामविधानपरत्वेन तद्रात्रेरेव पौर्णमासीसंज्ञोपपत्तेः, 'यां तिथि'मिति वचनस्य गौरीव्रतकालविधिप्रतीवेदृशविधिप्रत्यपि शेषतायाः सुवचत्वादौदयिक्येव तिथिरिह ग्राह्या । उदयद्वयव्यापित्वे तु दिनद्वयमपि वैकल्पिकः काल एव । तिथिनित्यार्चने तथैव स्वीकारात् । अतएव यत्रोदये चतुर्दश्यल्पतरा ततः पौर्णमासी प्रवृत्ता सती उदयान्तरात्पूर्वमेव समाप्यते तत्र तद्दिन एव चित्रार्चनवदयं प्रयोगोऽपि कर्तव्य इति दिक् । चन्द्रबिम्बे चन्द्रस्य पूर्णमण्डले । तत्र हि सादाख्यैका कला सदातनी त्रिपुरसुन्दरीरूपा । अन्याः पञ्चदशकला वृद्धिह्रासभागिन्यः । ताश्च कामेश्वर्यादिचित्रान्ततिथिनित्यापञ्चदशकस्वरूपाः । अतस्तासां परिपूर्तौ षोडशनित्याभिस्तत्किरणदेवताभिरणिमादिभिश्च योगाच्चन्द्रमण्डलं प्रत्यक्षश्रीचक्रात्मकं संपद्यते । अनेनैवाशयेन 'चन्द्रमण्डलमध्यगे'त्यादीनि नामानि । अतएव शालग्रामबाणलिङ्गादौ हरिहरयोरत्यन्तानवरतसांनिध्यप्रयुक्तावावाहनाभाववदिहापि त्रिपुरसुन्दर्यास्तथा संनिधानादावाहनं तन्मुद्राश्च न प्रदर्श्याः । ध्यात्वा पूर्वोक्तावयववैशिष्ट्येन सावरणत्वरूपलोकातीतत्वेन च विचिन्त्य । ललिताम्बिकापदेनैव कर्मणो निर्देशात्तस्य चोक्तपाद्मवचनाद्युक्तनिर्वचनानुसारेण तत्रैव पर्यवसानात् । पञ्चसंख्यैरुपचारैः गन्धपुष्पधूपदीपनैवेद्यैः संपूज्य । 'तद्योऽहं सोऽसौ योऽसौ सोऽहं तत्त्वमेव त्वमेव त'दित्यादि श्रुत्युक्तरीत्या परस्परप्रतियोगिकत्वरूप-

पञ्चोपचारैः संपूज्य पठेन्नामसहस्रकम् ॥ २५५ ॥

सम्यक्त्वेन स्वात्मदेवतयोरैक्यं विभाव्यम् । एतदेव ह्युपचारान्प्रति प्रधानम् । 'अश्वमेधसहस्राणि वाजपेयशतानि च । ललितापूजनस्यैते नार्हांशेनापि नो समाः ॥ स दाता स मुनिर्यष्टा स तपस्वी स तीर्थगः । यः सदा पूजयेद्देवीं गन्धपुष्पानुलेपनैः'रिति पद्मपुराणीये विधिवाक्ये पूजायाः फलसंयोगदर्शनात् । उपचाराणां तु फलवदफलन्यायेन तदङ्गत्वम् । अतएव 'गन्धपुष्पानुलेपनै'रिति 'पञ्चोपचारै'रिति च तृतीया । यानि च पाद्म एव 'गन्धानुलेपनं कृत्वा ज्योतिष्टोमफलं लभे'दित्यादीनि तत्तदुपचारेषु फलश्रवणानि तानि तु पर्णतान्यायेनार्थवादः । यानि तु 'चन्दनागरुकर्पूरैः सूक्ष्मपिष्टैः सकुङ्कुमैः । आलिप्य ललितां लोके कल्पकोटीर्वहेन्नर' इत्यादीनि वचनानि तानि गोदोहनवदङ्गाश्रितगुणफलसंबन्धविधानार्थानि । अथवा अन्तर्यागबहिर्यागौ गृहस्थः सर्वदाचरे'दित्यादिना पूजाद्वैविध्यावगमादैक्यभावनमन्तर्याग एव । बाह्यपूजा तु गन्धपुष्पादीनां निवेदनात्मको मानसः संकल्प एव । तेषु गन्धादेः करणत्वादङ्गत्वम् । 'गन्धादीनि निवेदये'दित्यादौ सक्तुन्यायेन विनियोगभङ्गः । यत्रादिषु गन्धादिप्रक्षेपो उपचारपदवाच्या निवेदनानामङ्गम् । तेषां च षोडशादिसंख्यानां समप्रधानानां यथावचनं साहित्येन फलकरणत्वमित्यादि यथायथमूह्यम् । सर्वासां च पूजानां क्रमपूजा प्रकृतिः । काम्यनैमित्तिकादिपूजान्तरेषु तत एव धर्मातिदेशः । इयं त्वपूर्वैव पूजा । कृत्स्नोपकाराणां पञ्चोपचाराणां प्राकृताङ्गानां पुनः श्रवणेन गृहमेधीयन्यायेन चोदकलोपात् । एवूपचारेषु करणमन्त्रास्तु 'श्रीललिताम्बिकायै नम' इत्येवंरूपः । 'विधिशब्दस्य मन्त्रत्व'मित्यधिकरणन्यायेन कल्प्यमाने नियमे वैधपदनियमात् । यद्वा तृतीयकूटमेव करणमन्त्रः 'विद्यातृतीयखण्डेन कुर्यात्सर्वोपचारकानि'ति तन्त्रराजवचनात् । नचास्य प्रकृतिप्रकरणे पाठात्क्रमपूजाङ्गत्वेन चोदकविरहितायामपूर्वपूजायां कथं प्राप्तिरिति वाच्यम् । प्रधानभूतायाः पूजाया अपूर्वत्वेऽपि तदङ्गभूतोपचाराणां प्राकृतोपचारविकृतित्वादितिकर्तव्यताकाङ्क्षायां नामातिदेशस्योपचाराङ्गत्वेन धर्मप्रापकत्वे बाधकाभावात् । कथमन्यथा गृहमेधीयेऽऽप्याज्यभागाङ्गयाज्यानुवाक्यामन्त्राणां प्राप्तिः संगच्छते । अतएवापूर्वेऽप्यवभृथे साङ्गप्रधानार्थस्य प्राकृतहोतृवरणस्याज्यभागाङ्गत्वेन प्राप्तिसंभवात् 'न होतारं वृणीते' इति निषेधो युज्यत इत्युक्तं मिश्रैः । एतेन नैवेद्याङ्गाचमनादिकमपि व्याख्यातम् । संपूज्येति ल्यप्रत्ययेन पूजनकरणकभावनायाः पाठकरणकभावनाङ्गत्वं विधीयते । पठेदित्यनेन तु पाठकरणिका प्रधानभावना 'वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति वाक्ये भावनाविशिष्टभावनानन्तरविधिषत्पूजनकरणभावनारूपाङ्गोत्तरकालिकेन नामसहस्रवता पाठेन रोगनाशादिरूपमिष्टं भावयेदित्यर्थः । अत्रच ध्यात्वेति पदस्य पुनरन्वयात्तत्र्यक्त्वाप्रत्ययस्य 'मुखं व्यादाय स्वपिती'त्यादाविव समानकालिकत्वार्थकतया शत्रन्ते

स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥ २५० ॥
भक्तो यः कीर्तयन्नित्यमिदं नामसहस्रकम् ।
तस्मै श्रीललितादेवी प्रीताभीष्टं प्रयच्छति ॥ २५१ ॥

वृश्चिकभयात्पलायमानस्य क्रुद्धाशीविषमुखे स्वात्मगूहनाय प्रवृत्तिवदुपहसनीयतां निदर्शनालंकारेण ध्वनयन्नाह—**य इति** । अभीप्सति पापहानिमुद्दिश्य प्रायश्चित्तान्तरं कुरुते । निषेवत इत्यस्य वा सेवितुमिच्छतीत्यर्थः । वाक्यार्थयोरैक्यारोपानुगुण्यात् । अथवा प्रायश्चित्तान्तरचिकीर्षायामेव हिमवत्पर्वतसेवनैक्यारोपेण प्रायश्चित्तक्रियायास्तु सदृशी क्रिया नास्त्येवेति तत्कर्तुर्मूर्खतातिशयो ध्वन्यः ॥ २५० ॥ नन्वेवं सति प्रायश्चित्तशास्त्राणामानर्थक्यमित्याशङ्क्य परिहरन्प्रीतिविशेषपरिमाणमुपसंहरति—**भक्त इति** । भक्त उपासकः । नित्यं यावज्जीवम् । इदं पूर्वोक्तवितरिरूपकमविशिष्टत्वेन बुद्धिस्थम् । प्रीता प्रीतिविशेषयुक्ता सती । अभीष्टं उक्तपुण्यराशिजननपापराशिनाशनोभयरूपम् । अत्रेदं बोध्यम्—इदं विशेषाच्छ्रीदेव्या इति प्रीतिविशेषजनककर्मोपक्रमावसरे पाठे चत्वारि विशेषणान्युल्लिखितानि—उपासकैकतूर्कत्वं, संपूर्णस्तोत्रकर्मैकत्वं, यावज्जीवंक्रियमाणत्वं, प्रातःस्नानादिप्रधानचतुष्टयसाहित्यं चेति । तान्येव चास्मिन्नुपसंहारश्लोकेऽपि पुनः परामृष्टानि । उपक्रमोपसंहारयोरैकरूप्यादिमानि विशेषणानि विवक्षितान्येव । अविवक्षायां प्रमाणाभावात् । तत्र प्रथमेन विशेषणेन प्रायश्चित्तशास्त्राणां वैयर्थ्यं निरस्तम् । तेषामनुपासकेषु सावकाशत्वेन तत्परतयैव व्यवस्थोपपत्तेः । द्वितीयेन त्वेकैकनाममात्रपाठेनात्मानं कृतकृत्यंमन्यमाना निरस्ताः । एकैकनामपाठस्य पार्थक्येन प्रयोगस्य निष्प्रमाणत्वेन तस्येदृशमहाफलजनकत्वे मानाभावात् । नच 'नाम्नोऽप्येकस्य कीर्तना'दिति वचनमेव राजसूयान्तर्गतावेष्टेरिव पृथक्प्रयोगे मानाभावात् । नच 'नामैकमपि यः पठेत्', 'नाम्नोऽप्येकस्य कीर्तनात्' इत्यादीनि प्रकरणस्थान्येव वचनानि पृथक्प्रयोगे प्रमाणमिति वाच्यम् । उपक्रमोपसंहाराभ्यामेकवाक्यत्वे सिद्धे तन्मध्यपठितानामीदृशवचनानामवयवद्वारावयविन्येव तात्पर्यस्य जातेष्टिवाक्यमध्यपठिताष्टाकपालादिवाक्यन्यायेन सिद्धेः । यत्रैकस्यापि नाम्न एतावत्फलं किमु वक्तव्यं तत्र संपूर्णस्तोत्रस्य तावत्फलं भवतीति कैमुतिकन्यायेन स्तोत्रप्रशंसोपपत्तेः, अपिशब्दस्वारस्येन तथा प्रतीतेश्च । यद्वा एकस्य नाम्न एतावत्फलमित्युक्तिरेतत्सहस्रगुणितस्य स्तोत्रफलत्वसिद्ध्यर्था नतु पार्थक्येन फलवत्त्वसिद्ध्यर्थापि । उभयत्र तात्पर्ये वाक्यभेदप्रसङ्गात् । अतएव 'एकं वृणीते' इत्यादेः 'त्रीन्वृणीते' इत्येतदुपपादनार्थतायाः श्लोकारात् । एकाक्षरादिषोडशाक्षरान्तनाम्नां तुल्यफलत्वायोगाच्च । तथात्वे इतरवैयर्थ्यादिदोषाणां स्पष्टत्वात् । तृतीयेन तु विशेषणेनानियमेन कतिपयदिवसपर्यन्तपाठादेव तादृशफललिप्सा निरस्ता । 'जन्ममध्ये सकृच्चापि य एवं पठते सुधी'रिति वचनस्याप्येकवाक्यमध्यपठितत्वेनापिशब्दस्वारस्याच्चोक्तरीत्या द्वयी गतिरूह्या । चतुर्थेन विशेषणेनाम्नेयादीनां षण्णां परस्परसा-

अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ॥ २५२ ॥
नित्यं संकीर्तनाशक्तः कीर्तयेत्पुण्यवासरे।
संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने ॥ २५३ ॥
नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे।

हित्याभावे फलानुत्पत्तिवदिहापि तथेति सूचितम्। इयांस्तु विशेषः—आग्नेयादीनां दर्शपूर्णमासवाक्येन सहितानामेकफलसाधनत्वावगमादन्यतमाभावेऽपि फलोत्पत्तिरेव न भवति। इह तु सहस्रनामपाठाभावेऽप्यन्येभ्यः प्रधानेभ्यस्तत्तत्फलान्युत्पत्तुमर्हन्त्येव। नच प्रधानान्तरसाहित्याभावमात्रेण सहस्रनामपाठस्य नैष्फल्यं कथं सुवचमिति वाच्यम्। ईदृशप्रयोगजन्यफलविशेषस्य प्रमाणाभावादनुत्पत्तावपि नामस्मरणजन्यफलान्तराणां वचनान्तरादधिगतानां संभवेन नैष्फल्यायोगादिति दिक् ॥ २५१ ॥ इदानीमुपास्तिशरीरघटकत्वादप्येतदवश्यकमित्याहार्धेन—**अकीर्तयन्निति**। उपासकानामुपास्यदेवताप्रीतिजननमपेक्ष्य पुरुषार्थान्तराभावात्तज्जनककर्मण्यनादरे कथं भक्तता अपितु न कथंचिदपीत्यर्थः। अयं भावः—'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभे'ति स्मृत्युक्तानां चतुर्विधानां भक्तानां मध्ये आर्तानां पापनिवृत्त्यर्थं, जिज्ञासुभक्तानां निष्कामानामपि चित्तशुद्ध्यर्थं अर्थार्थिभक्तानामर्थसिद्ध्यर्थं, ज्ञानिभक्तानां लोकसंग्रहार्थं, कीर्तनस्यावश्यकत्वाद्भजकतावच्छेदकशरीरघटकं नामकीर्तनम्। तदिदं 'महापातकिनां त्वार्ता'विद्याधिकरणेषु भक्तिमीमांसाभाष्ये स्पष्टमिति ॥ २५२ ॥ इदानीमुक्तविशेषणचतुष्टये तृतीयविशेषणाशक्तान्प्रति पक्षान्तरमनुकल्प्याह द्वाभ्याम्—**नित्यमिति**। पुण्यवासरे कपिलाषष्ठ्यर्धोदयादिदिवसे। वक्ष्यमाणसंक्रान्त्यादेरेव वा सामान्येन कीर्तनमिदम्। विषुवे मेषतुलाराश्योः सूर्यप्रवेशदिने। स्वजन्मत्रितये स्वस्य स्वभार्यायाः स्वपुत्रस्य च जन्मनक्षत्रेषु, स्वस्य जन्मकालीनं नक्षत्रं तत्पूर्वपरनक्षत्रे द्वे इत्येवं त्रितये वा, स्वस्य जन्मनक्षत्रमारभ्य गणनायां प्रथमदशमैकोनविंशनक्षत्रत्रयदिवसेषु वा, स्वजन्मदिवसदीक्षादिवसपूर्णाभिषेकदिनत्रये वा, एवं व्याख्यावैचित्र्यस्थले यथासंप्रदायं व्यवस्था। 'तन्त्राणां बहुरूपत्वात्कर्तव्यं गुरुसंमत'मिति वचनात्। अयने कर्कमकरयोः सूर्यप्रवेशदिने। संक्रान्त्यैव सिद्धे विषुवायनयोर्ग्रहणं गोबलीवर्दन्यायेन पुण्यतरत्वद्योतनेनाल्पावश्यकताद्योतनाय वा, तत्तत्संक्रमणेभ्यः पूर्वं कतिपयैर्दिवसैस्तत्तदयनं ज्योतिःशास्त्रे प्रसिद्धं तदेव वेहायनपदेन विवक्षितम् ॥ २५३ ॥ नवम्यां वेति वाकारोऽष्टमीसंग्रहार्थः। सितायामिति नवम्यादिषु तिसृष्वन्वेति। चतुर्दश्यामेव वा शुक्लपक्षीयायामित्यर्थः। अत्र चकाराद्यावज्जीवं प्रत्यहं कीर्तनाशक्तस्यैतेषु दिवसेषु समुच्चित्य कीर्तनम्। अत्राप्यशक्तश्चेदन्यतमं दिवसं परित्यजेदिति द्योतनाय वाकारः। अन्यतमस्य परित्यागपक्षेऽपि पौर्णमासी न

कोटिं सौवर्णभाराणां श्रोत्रियेषु द्विजन्मसु ॥ २४३ ॥
यः कोटिं हयमेधानामाहरेद्गाङ्गरोधसि ।
आचरेत्कूपकोटीर्यो निर्जले मरुभूतले ॥ २४४ ॥
दुर्भिक्षे यः प्रतिदिनं कोटिब्राह्मणभोजनम् ।
श्रद्धया परया कुर्यात्सहस्रपरिवत्सरान् ॥ २४५ ॥
तत्पुण्यं कोटिगुणितं लभेत्पुण्यमनुत्तमम् ।
रहस्यनामसाहस्रे नाम्नोऽप्येकस्य कीर्तनात् ॥ २४६ ॥

यद्यपि बृहस्पतिस्मृतौ 'त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती'त्युक्तं, तथापि तेष्वपि सुवर्णसाध्यत्वात्तद्दानस्यैवाधिक्यमभिप्रेत्याह—**सौवर्णेति** । भारो नाम विंशतिस्तुलाः । तुला नाम पलशतम् । 'तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला' इति कोशात् । श्रोत्रियेषु जन्मसंस्कारविद्याभिः संस्कृतेषु । 'त्रिभिः श्रोत्रिय उच्यत' इति ब्रह्मवैवर्तात् । देशकालपात्रदेयश्रद्धाज्ञानगोपनानां क्रियास्वतिशयाधायकत्वात्प्रतिधर्मं कानिचिदनुक्तान्यपि योजनीयानि । ततश्च कुरुक्षेत्रे रविग्रहणे सत्पात्राय श्रद्धादिभिः सौवर्णभारकोटिदानं कोटिगुणितं चेदेकं पुण्यम् । अस्य सहस्रपरिवत्सरसंबन्धिदिनसंख्यया गुणने तस्य पुनर्जन्मकोटिभिर्गुणनेन जातो **राशिस्तृतीयः** ॥ २४३ ॥ अथेष्टपूर्ते आह—'तरति ब्रह्महत्यां तरति पाप्मानं योऽश्वमेधेन यजते' इति विहितः क्रतुविशेषो हयमेधः । गाङ्गरोधसि गङ्गासंबन्धिनि तीरे । ततश्च गङ्गातीरे श्रोत्रियैर्ऋत्विग्भिः सह साङ्गकोट्यश्वमेधयज्ञजनितपुण्यस्य पूर्ववद्दिनसंख्यया पुनः कोटिसंख्यया च गुणनाज्जातो **राशिश्चतुर्थः** । कूपेति वापीतडागादेरुपलक्षणम् । मरुरिति देशविशेषस्य संज्ञा । तेन न निर्जलपदानर्थक्यम् । तादृशदेशे कूपादिकोटिखननजनितपुण्यस्य पूर्ववद्दिनसंख्यया जन्मकोटिसंख्यया च गुणने जातो **राशिः पञ्चमः** ॥ २४४ ॥ दुर्लभा भिक्षा यस्मिन्स सकलो देशोऽपि दुर्भिक्षः । तत्र कोटिसंख्यानामुत्तमब्राह्मणानामुत्तमषड्रसोपेतभोजनदानेन जातस्य पुण्यस्य दिनसंख्यया पुनः कोटिसंख्यया च गुणनाज्जातो **राशिः षष्ठः** । परिवत्सरानित्यत्यन्तसंयोगे द्वितीया । द्वादशसहस्रवर्षेष्वनवरतमित्यर्थः । संवत्सरपरिवत्सरेदावत्सरेद्वत्सरानुवत्सरशब्दानां प्रभवप्रमाथिखरशोभनराक्षसादिद्वादशद्वादशवर्षविशेषवाचित्वेऽपि प्रकृते सामान्यमात्रोपलक्षकत्वात् ॥ २४५ ॥ तेषां तीर्थस्नानशिवप्रतिष्ठास्वर्णदानेष्टापूर्तब्रह्मभोजनोत्थानां पण्णां पुण्यराशीनां याः कोट्यस्ताभिर्गुणितं पुण्यमुपस्थितत्वात्तमेव पुण्यषट्कमहाराशिं लभेतेत्यर्थः । अयं भावः—षण्णामपि पुण्यराशीनामेकं महाराशिं विभाव्य तं द्विरावृत्तं कृत्वा स्थलद्वये निक्षिप्य तयोर्मध्ये एकं राशिं कोटिसंख्यया गुणयित्वा तज्जन्यया संख्यया परं राशिं गुणयेत् । तत्र गुणस्य राशेरेकसंख्यावच्छिन्नत्वे तस्य गुणनं व्यर्थम् । अतः संख्यान्तरावच्छिन्नत्वस्यावश्यकत्वे सत्युपस्थितत्वात्कोटिरूपैव संख्या गुण्या वाच्या । ततश्च द्वावपि महाराशी प्रातिस्विकं

रहस्यनामसाहस्रे नामैकमपि यः पठेत् ।
तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ॥ २४७ ॥
नित्यकर्माननुष्ठानान्निषिद्धकरणादपि ।
यत्पापं जायते पुंसां तत्सर्वं नश्यति द्रुतम् ॥ २४८ ॥
बहुनात्र किमुक्तेन शृणु त्वं कलशीसुत ।
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने ।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥ २४९ ॥
यस्त्यक्त्वा नामसाहस्रं पापहानिमभीप्सति ।

कोटिकोटिगुणितौ कृत्वा जातौ संख्यापिण्डौ पुनः परस्परं गुणयेदिति सिध्यति । तेन च तं महाराशिं कोटिसंख्यया गुणयित्वा जातं पिण्डं पुनः कोटिसंख्ययैव गुणयेदिति फलति । तं महाराशिं समुद्रसंख्यया गुणयेदिति तु निष्कर्षः । समुद्रो नाम कोटिसंख्यायाः कृतिसंज्ञकः समद्विघातः । कोटिगुणिता कोटिरिति यावत् । तदुक्तं वायुपुराणे–'सहस्रं तु सहस्राणां कोटीनां दशधा पुनः । गुणितं चेत्समुद्रं तं प्राहुः संख्याविदो जना' इति । इदं च पुण्यपदस्य गुणकस्थाने गुणस्थाने चेति द्विःप्रयोगाल्लभ्यते । पुण्यकोट्येति व्यत्यस्तानुक्तिवलात्कोटिभिर्गुणितमिति बहुवचनान्तेन विग्रह इति च लभ्यते । सर्वमिदं फलमुपक्रमानुसारात्स्तोत्रपाठस्यैवेति भ्रमो माप्रसञ्जीत्यत आह—नाम्नोऽप्येकस्येति ॥ २४६ ॥ इदानीं पुण्यराशिजनकत्ववत्पापराशिनाशकत्वमप्येकैकस्य नाम्नः फलमित्याह–अपिशब्द उपपातकादेः कैमुतिकन्यायेन वाचकतया वाच्यतया वा समुच्चायकः ॥ २४७ ॥ तानि च पापानि यद्यपि 'विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छती'ति स्मृतौ निमित्तत्रैविध्यान्त्रिविधानि प्रतिपाद्यन्ते, तथापीन्द्रियनिग्रहतदभावयोर्विहितप्रतिषिद्धत्वाभ्यां तज्जन्यपापानामुक्तविधयोरेवान्तर्भाव इत्यभिप्रेत्य द्वैविध्येनैव गणयति । तत्तद्वर्णाश्रमभेदेन श्रुतिस्मृतितन्त्रेषु विहितान्यकरणे प्रत्यवायफलकानि संध्यावन्दनोपरागस्नानादीनि नित्यकर्माणि । तेनैव नैमित्तिकानामपि संग्रहात् । कलञ्जभक्षणादीनि निषिद्धानि । द्रुतं प्रायश्चित्तान्तरानपेक्षम् ॥ २४८ ॥ एतज्जन्यपुण्यराशेरिवैतन्नाश्यपापराशेरपीयत्ता बुद्धिमद्भिरेवोह्येत्याशयेन शिष्यं पुनरपि सावधानीकुर्वन्नाह सार्धेन—**कलशीति** । कलशीति जातिलक्षणो ङीष् । तन्निवर्त्यं तया शक्त्या नाश्यं अघं पापं नालं न समर्थाः लोकाः जनाः चतुर्दश चतुर्दशभुवनगताः समस्तभुवनगताः समस्ताः प्राणिनः प्रतिक्षणमासुप्तेरामृतेश्च कोटिकोटिजन्मभिरुच्चावचानि पापानि कुर्वन्ति चेद्यावान्पापराशिः स्यात्ततोऽप्यनवधिकोऽधिक एकैकनाम्नो निवर्त्यस्तस्य सहस्रगुणनेन संपूर्णस्तोत्रपाठफलत्वमित्यूह्यमिति भावः ॥ २४९ ॥ यस्तावच्छ्रीविद्योपासक ईदृशं पापनाशनोपायमनादृत्य स्मार्तानि प्रायश्चित्तानि चिकीर्षति तस्यैतदनादरणजन्यः पापराशिस्तैरप्यनपोह्य आपततीति

जपेन्नित्यं प्रयत्नेन ललितोपास्तितत्परः ॥ २३८ ॥
प्रातः स्नात्वा विधानेन संध्याकर्म समाप्य च ।
पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् ॥ २३९ ॥
विद्यां जपेत्सहस्रं वा त्रिशतं शतमेव वा ।
रहस्यनामसाहस्रमिदं पश्चात्पठेन्नरः ॥ २४० ॥
जन्ममध्ये सकृच्चापि य एवं पठते सुधीः ।

प्रदत्वे सत्यल्पायाससाध्यत्वं सहस्रनामनवकेऽस्त्येव, ललिताप्रीतिप्रदत्वमपि गङ्गाश्यामलादिप्रीतिजननद्वारा तत्रास्त्येव, पञ्चमीस्तवराजादिललितैकविषयकस्तोत्रान्तरेषु त्वव्याहतं ललिताप्रीतिकरत्वमित्याशङ्कानपाकुर्वन्क्रमप्राप्तं प्रीतिपदत्वं विवेचयति—**इदमिति**। इतरस्तोत्रपठनजन्यप्रीतिमपेक्ष्यैतज्जन्या प्रीतिर्विशिष्टेत्यर्थः। तेन प्रीतिविशेषजनकत्वे सति रहस्यतमत्वमिहेवेति भावः । एतेनाग्निहोत्रदर्शपूर्णमासज्योतिष्टोमविश्वजिदादिकर्मणामायासतारतम्यसाध्यानामेकजातीयस्वर्गफलकत्वायोगेन स्वर्गेषु तरतमभावकल्पनेति पूर्वतन्त्रसिद्धन्यायादेव देवताप्रीतावपि बहुभिः स्तोत्रैः प्रातिस्विकजनितायां तारतम्यसिद्धेर्विशेषादित्युक्तौ को विशेष इति परास्तम् । इतोऽप्यधिकायाससाध्यकर्मान्तरजनितायां देवताप्रीतावपि तेन न्यायेनेतोऽपि प्रीत्याधिक्यप्राप्तौ तन्माप्रसाङ्क्षीदित्याशयेन विशेषपदोपादानस्य सार्थक्यात् । अतएव च रहस्यतमत्वमप्युपपद्यते । तस्मात्प्रकृष्टेनापि यत्नेन ललितोपासको यावज्जीवमिदं जपेदित्यर्थः ॥ २३८ ॥ जपकाले विधिमाह द्वाभ्याम्—**प्रातरित्यादिभ्याम्** । विधानेन वैदिकतान्त्रिकोभयप्रकारेण । काकाक्षिन्यायेनास्य स्नानसंध्ययोरन्वयः । पूजागृहगमनं द्वारपूजाद्युपलक्षणम् । चक्रराजं श्रीचक्रम् । समर्चयेदिति स्वार्थे णिच् । अशक्तौ प्रयोजककर्तृपरो वा ॥ २३९ ॥ विद्यां पञ्चदशीं षोडशीं वा । नतु स्त्रीदैवत्यमन्त्रसामान्यम् । सहस्रं वेत्यादिष्वष्टोत्तरशतमिति शेषः । त्रिशतं शतत्रयं नतु त्र्युत्तरशतम् । नायं तुल्यबलो विकल्पः किंतु पूर्वासंभवे परोऽनुकल्प इति द्योतयितुमेवकारः । पश्चात् विद्याजपपुष्पाञ्जलिदानयोर्मध्ये । अतएव जप्त्वा पुष्पाञ्जलिं दद्यादिति कथितं तयोः पौर्वापर्यं नाव्यवहितम्, किंतु सहस्रनामपाठेन व्यवहितमेव । वेदवेदिकरणयोरिव श्रुताचमनेन वेदाध्ययनस्नानयोरिव च मीमांसाध्ययनेनेति भावः । अत्र प्रातः स्नात्वेत्यादिः सर्वोऽपि विध्यन्तरप्राप्तानुवादः । सहस्रनामपाठे कालमात्रं तु विधेयम् । अतएव जपपाठयोर्न परस्परमङ्गाङ्गिभावोऽपि । द्वयोरपि प्रातिस्विकविधिभ्यां फलवत्तया सहस्रनामकीर्तनस्यापि विध्यन्तरेणैव फलार्थतयाऽवगतत्वेन 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'त्यादाविव कालार्थस्यैव संयोगस्य निर्णयात् । स्नानादिप्रधानपञ्चकस्य क्रम एव वा वितातिरूपो विधेयः । तेनान्यतमप्रधानाकरणेऽपि 'अनपायो हि कालस्ये'ति न्यायेनाऽवैगुण्यात्फलानुत्पत्तिरपास्ता ॥ २४० ॥ प्रीतिविशेषस्येतरव्यावृत्तस्योक्तं भाव्यत्वं विशेषज्ञानादनवगतप्रायमेवेत्यतो विशेषपदवाच्यं परिमाणमाह **सार्धैरेकादशभिः—जन्ममध्य इत्यादिभिः** । उक्तप्रकारेण जन्ममध्ये सकृत्पठितनामसह-

तस्य पुण्यफलं वक्ष्ये शृणु त्वं कुम्भसंभव ॥ २४१ ॥
गङ्गादिसर्वतीर्थेषु यः स्नायात्कोटिजन्मसु ।
कोटिलिङ्गप्रतिष्ठां तु यः कुर्यादविमुक्तके ॥ २४२ ॥
कुरुक्षेत्रे तु यो दद्यात्कोटिवारं रविग्रहे ।

स्नान्तर्गतस्येकैकस्य नाम्नः कीर्तनादयं वक्ष्यमाणः पुण्यराशिः स पुनः सहस्रगुणितश्चेत्सकृत्स्तोत्रपाठस्य फलम् । यावज्जीवं क्रियमाणस्य स्तोत्रपाठस्य यावत्य आवृत्तयः संभवेयुस्तावद्वारं तत्फलं गुणयित्वा तज्जनिकाया देवताप्रीतेः परिमाणं बुद्धिमद्भिरूहनियमिति समुदायार्थनिष्कर्षः । वक्ष्यमाणार्थस्य दुरूहत्वादेव वक्ष्य इति प्रतिज्ञापूर्वकं शृण्विति शिष्यस्य सावधानतासंपादनम् ॥ २४१ ॥ गङ्गादीत्यादिपदेन पुष्करादेः परिग्रहः 'पुष्करादीनि तीर्थानी'त्यादौ पुष्करस्यैव सर्वतीर्थादित्वेन प्रसिद्धावपि ततोऽप्यादित्वेन गङ्गाया ग्रहणं तस्यास्त्रिलोकगामित्वेन गङ्गापदादुपस्थितौ तत्तल्लोकगततीर्थानामपि सर्वपदेन संग्रहार्थम् । अतएव गङ्गापदं भविष्योत्तरपुराणे तथैव निरूप्यते 'यस्माद्भगीरथो देवि स्वर्गाद्गां त्वामिहानयत् । अतस्त्वं मुनिभिः सर्वैर्गङ्गेति परिकीर्त्यसे' इति । तीर्थान्तरग्रहणे तु भूलोकगतान्येव सर्वतीर्थानि भासेरन् । अत्र प्रतिदिनं श्रद्धया परया सहस्रपरिवत्सरानित्येतत्पदचतुष्टयमुत्तरत्र पञ्चमानं पूर्वत्र सर्वत्रान्वेतव्यम् । कोटिजन्मस्विति तूत्तरत्र सर्वत्रापि । एवं त्रैलोक्यान्तर्गतानां निखिलतीर्थानां मध्ये एकस्मिंस्तीर्थे प्रतिदिनं विधिना परया श्रद्धया स्नानेन सहस्रपरिवत्सरपूर्तिरीदृशमेकं जन्म तादृशकोटिजन्मपर्यन्तमेकतीर्थस्नानजनितं पुण्यम् । तथैव सर्वतीर्थस्नानजनितपुण्यानीत्येषां **राशिरेकः** । 'एकस्मिंस्थापिते लिङ्गे विश्वं संस्थापितं भवे'दित्यादिभिर्वचनैरितरदेवप्रतिष्ठामपेक्ष्य शिवप्रतिष्ठाया आधिक्यं मन्वान आह—**लिङ्गेति** । काश्यां तावत्काशीवाराणस्यविमुक्तमन्तर्गृहं चेति चत्वारि स्थानानि बृहज्जाबालादावाम्नातानि । तेषु पूर्वपूर्वस्योत्तरोत्तरं व्याप्य पञ्चक्रोशवत् उत्तरोत्तरं पुण्यवच्च । तेष्वन्तर्गृहमतीवोत्तमम् । तद्धि परमशिवस्य शरीरमेव । शरीरशरीरिणोश्चाभेदान्नित्यत्वाच्च 'अविशब्देन पापानि कथ्यन्ते द्विजसत्तम । तैर्मुक्तं न मया व्यक्तमविमुक्तमतः स्मृत'मिति लिङ्गपुराणोक्तस्य द्विविधस्यापि निर्वचनस्यान्तर्गृह एव मुख्यतयोपपत्तावपि तव्यापकस्थानविशेषनिरूढलक्षणया प्रयोगबाहुल्यात्पण्डितपामरसाधारण्येनान्तर्गृहस्य मुख्यमविमुक्तत्वमिति ज्ञानाभावादज्ञातं सदविमुक्तमन्तर्गृहमेवेति ज्ञापयन्नाह—**अविमुक्तके इति** । अज्ञातार्थे कप्रत्ययः । अन्तर्गृह इत्यर्थः । अन्तर्गृह इत्यनुक्तिरुक्तनिर्वचनस्मारणेन पुण्यातिशयवत्त्वद्योतनाय । ततश्चान्तर्गृहे सहस्रपरिवत्सरपर्यन्तं प्रतिदिनं परया श्रद्धया कोटिलिङ्गानि यः प्रतिष्ठापयति तदेकजन्मजनितं पुण्यं तस्य कोटिसंख्यागुणनेन जातो **राशिर्द्वितीयः** ॥ २४२ ॥ करुणाकृष्टो देशस्तरन्तुकारन्तुकयोर्मध्यवर्ती कुरुक्षेत्रमित्युच्यते । रविग्रहे सूर्योपरागे । 'सर्वत्र सर्वदा सर्वं गृह्णन्मुच्येत कर्हिचित् । उपरागे कुरुक्षेत्रे गृह्णन्विप्रो न मुच्यते' इत्यादिना महाभारतादौ तत्र प्रतिग्रहीतुः प्रायश्चित्ताभावोक्त्या फलानन्त्यं दाने ।

इत्येवं नामसाहस्रं कथितं ते घटोद्भव ॥ २३४ ॥
रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ।
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ॥ २३५ ॥
सर्वरोगप्रशमनं सर्वसंपत्प्रवर्धनम् ।
सर्वापमृत्युशमनं कालमृत्युनिवारणम् ॥ २३६ ॥

मित्यादिना रोगनिरासादीनि फलानि येन क्रमेण पूर्वं प्रतिपादितानि तेनैव क्रमेणोत्तरत्र तत्तत्फलकाः प्रयोगा वक्ष्यन्त इत्यर्थः । यत्तु पूर्वं 'श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिद'मित्यत्र प्रीतिरेव भाव्यत्वेनोक्ता साच विविधफलजननद्वारत्वेन पूर्वतन्त्रे पूर्वस्येवास्य तन्त्रे देवताप्रीतेरेव द्वारत्वकल्पनसंभवात् । अस्तु वा स्वातन्त्र्येण प्रीतेरपि फलत्वमित्याशयः ॥ २८ ॥ एवं प्रीतिफलकीर्तनोपयोगि नामसहस्रं प्रतिपाद्य तदुपसंहरन्फलानि विवेचयितुकामो भगवान्हयग्रीवाचार्य उत्तरं ग्रन्थसंदर्भमारभते—**इत्येवमित्यादिना** । इतिशब्दः समाप्तिवचनः सन्सहस्रसंख्याया अन्यूनानतिरिक्तां ध्वनयति । एवमुक्तेन प्रकारेण यथावत्प्रतिपादितेन सरस्वतीगङ्गासहस्रनामादौ सहस्रसंख्यापूर्तेरभावादपार्थको गौणो वा सहस्रनामशब्दो नात्र तथेति ध्वनितम् । नाम्नां सहस्रमेव साहस्रम् । राक्षसमानसादिवत्स्वार्थे तद्धितः । घटोद्भवेत्यगस्त्यस्य संबुद्धिः ॥ २३४ ॥ ननु कूर्मपुराणादौ देवीसहस्रनामादिकमप्यन्यूनानतिरिक्तसहस्रसंख्याकमेवेत्यत आह—**रहस्यानामिति** । रहस्यानां न्यासजपादिरूपाणां मध्ये इति निर्धारणे षष्ठी । तेन रहस्यमित्यस्य रहस्यतममित्यर्थः । ननु रहस्यतमान्यपि गङ्गासहस्रनामादीनि स्कान्दादावुपलभ्यन्त एवेत्यत आह—**ललितेति** । तेषां ललितातोऽपकृष्टदेवताप्रीतिकरत्वेन सर्वोत्कृष्टदेवताप्रीतिकरमिदमेवेत्यर्थः । नन्वीदृशमपि किंचित्संभाव्येतेत्यत आह—**अनेनेति** । सदृशं रहस्यतमत्वे सति ललिताप्रीतिकरत्वरूपसाधारणधर्मवत्त्वरूपसादृश्यवत् । स्तोत्रं स्तोत्रान्तरम् । एकस्मिन्नुपमानोपमेयभावाभावात् । न भूतं इतःक्षणात्पूर्वकाले । न भविष्यति इतउत्तरकाले । भविष्यतीति शत्रन्तस्य सप्तमी वा । वर्तमानक्षणस्य तादृशस्तोत्रोत्पत्त्ययोग्यत्वात्कालत्रयासंबन्धात्तादृशमसदेवेति भावः । अस्य विशेषणद्वयस्यान्यत्रासत्त्वप्रतिपादनाय विशेषणविवरणपर उत्तरः सर्वोऽपि ग्रन्थसंदर्भः ॥ २३५ ॥ तत्र रहस्यतमत्वं विवेचयति द्वाभ्याम् । 'प्रयासतारतम्यात्फलतारतम्य'मिति न्यायेन फलभूमसाधने कष्टसाध्यत्वस्य प्रसिद्धतमत्वाद्बहुफलसाधनमप्यल्पायाससाध्यं कर्म रहस्यतमम् । तत्र नामकीर्तने प्रयासेयत्तायाः स्पष्टत्वात्फलभूमानमेव विवृणोति—**सर्वरोगेति** । सर्वे रोगा असाध्ययाप्यादिभेदभिन्नाः । दारिद्र्यस्यापि रोगतुल्यत्वेनोपस्थितत्वात्तदभावनियतसंपद्वृद्धेरपि फलत्वमाह—**सर्वसंपदिति** । अथवा संपदारोग्ययोः परस्परभावव्याप्यत्वादारोग्ये सति दारिद्र्यं स्यादेवेति शङ्कामपाकुर्वन्नारोग्यं संपत्त्या समुच्चिनोति—सर्वसंपदिति । गजतुरगसमृद्ध्यादिभेदाभिन्नानां संपदामित्यर्थः । सर्वे अपमृत्यवः सर्पव्याघ्रादिनिमित्तकाः । अल्पमिदमुच्यत इत्याह—

सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायकम्।
पुत्रप्रदमपुत्राणां पुरुषार्थप्रदायकम्॥ २३७॥
इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायकम्।

कालेति काले आयुःपरिमाणपरिसमाप्तौ। तेनाप्यमृत्यूनामायुर्मध्य एव प्रसक्ति-र्वर्तितैलादिसाचिव्येऽपि चण्डवातादिकृतदीपनाशवदिति सूचितम्॥ २३६॥ सर्वे ज्वरा ऐकाहिकादिसांनिपातिकान्तास्तत आर्तिस्तत्प्रयुक्ता शिरस्तोदादिरूपा पीडा तेषां शमनं नाशकम्। अथवा सर्वेषां ये रोगा इत्यादिरीत्या पदचतुष्टयं व्याख्ये-यम्। तेन जातेष्ट्यादिवत्फलसाधनयोर्वैयधिकरण्यमपि सिद्ध्यति। ततश्चान्यनिष्ठ-फलोद्देशेनान्यस्यापि साधने प्रवृत्तिरिह युक्तेति मन्तव्यम्। रोगैरेव सिद्धे ज्वरार्त्योः पार्थक्येन ग्रहणं गोबलीवर्दन्यायेन। यद्वा वक्ष्यमाणकाम्यप्रयोगानुसारेण पार्थ-क्यम्। तत्र रोगशान्त्यादिचतुरवयवैकफलकप्रयोगकथनोत्तरं तत्तदवयवमात्रफल-कानां प्रयोगाणां वक्ष्यमाणत्वात्। अतएव दीर्घायुष्यपदस्याप्ययमर्थः सिद्ध्यति। दीर्घं पूर्णं यत् आयुषो भाव आयुष्यं दीर्घायुट्वं शतमानत्वं तस्य प्रदायकं तद्वि-घातकग्रहविषादिबाधानिरासकमिति। यद्वा आयुरेवायुष्यं दीर्घशतमानादधिकमा-युष्यं येभ्यस्तेषां गुटिकौषधियोगसिद्ध्यादीनां प्रदायकं तत्प्राप्तिकरापूर्वसंपादकमिति। तेन न कालमृत्युनिवारणेन गतार्थता। अपुत्राणां पुत्रकामवद्धानाम्। सपुत्राणां सिद्धे इच्छाविरहादपुत्रेष्वेव प्रायः पुत्रकामनादर्शनात्तथोक्तम्। अतएवैकपुत्रामृत-प्रजादीनां वन्ध्यास्वेव गणना स्मृतिषु। तेन सपुत्राणामपि पुत्रान्तरेच्छायामत्राधि-कारः। अपुत्राणामपि पुत्रकामाभावे पुत्रकामप्रयोगे नाधिकार इति सिद्ध्यति। तेन च तत्तत्कामनायास्तत्तत्फलप्रयोगाधिकारितावच्छेदकत्वं सूचितम्। नचाने-कफलविषयकसमूहालम्बनात्मककामनावतः सर्वप्रयोगेष्वधिकारात्तेन कः प्रयोगः प्रथमतोऽनुष्ठेय इत्यत्र विनिगमनाविरह इति वाच्यम्। तन्त्रेण सर्वफलप्रदस्यैकस्यैव प्रयोगस्यानुष्ठातुं शक्यत्वात्। नचैवं सति 'तत्र सर्वेऽविशेषा'दिति चातुर्थिकाधि-करणविरोधः। तत्र हि सर्वकामप्रददर्शपूर्णमासज्योतिष्टोमादेः सकृदनुष्ठानेनैकमेव फलं भवतीति सिद्धान्ततत्वादिति वाच्यम्। अल्पप्रदकर्मस्वेव तदधिकरणन्या-यानां व्यवस्थितत्वात्। देवताप्रीतेस्तु लोकविलक्षणत्वात्। अतएवोक्तं 'लोकातीता गुणातीता सर्वातीता शमात्मिके'ति। कर्मस्वपीदृशन्यायस्यार्ष्यन्तरैरङ्गीकाराच्च। यदुक्तं हिरण्यकेशिसूत्रे 'एकप्रयोगे सर्वान्कामान्कामयीत प्रयोगपृथक्त्वे चैकैक'-मिति। वैषयिककामनासामान्याभाववतोऽप्यत्राधिकार इत्याह—पुरुषार्थेति। पुरुषैर्बुद्धिमद्भिरर्थ्यत इति पुरुषार्थो मोक्षः। निष्कामोऽपि मोक्षफलकप्रयोगेऽधि-क्रियत इति भावः। वस्तुतश्चतुर्वर्गप्रदायकमित्येवार्थः। संकोचे मानाभावात्। उक्तंच पद्मपुराणे पुष्करखण्डे आह्निकप्रकरणे 'अतःपरं च देवानामर्चनं कारये-द्बुधः। गणेशं पूजयेद्यस्तु विघ्नस्तस्य न बाधते। आरोग्यार्थेऽर्चयेत्सूर्यं 'धर्ममोक्षाय माधवम्। शिवं धर्मार्थमोक्षाय चतुर्वर्गाय चण्डिका'मिति॥ २३७॥ ननु बहुफल-

साध्वी तत्त्वमयीतिद्वेधा त्रेधा बुधो भिद्यात् ।
हंसवती चानर्घ्येत्यर्धान्तादेकनामैव ॥ ३५ ॥
शक्तिर्निष्ठाधामज्योतिःपरपूर्वैकं द्विपदम् ।
शोभनसुलभा सुगतिस्त्रिपदैकपदानि शेषाणि ॥ ३६ ॥

समासव्यासान्यतररूपेण नाम भेदयेदित्यन्वयः । 'शोभना सुलभागति'रिति पदत्रयस्यैकनामत्वम् । एवं 'कौलिनीकेवला, अजाजेत्री'त्यादौ समासरूपो योगो द्रष्टव्यः । पदद्वयस्याप्येकनामत्वम् 'विश्वेदेवाः अहिर्बुध्न्यः निधिरव्यय' इत्यादौ दृष्टमिति भावः ॥ ३४ ॥ पौनरुक्त्यपरिहारायोपायान्तरमाह । 'शांकरी श्रीकरी साध्वी'त्यनेन पौनरुक्त्यपरिहाराय 'संप्रदायेश्वरी साध्वी'त्यत्र साधु ई इति द्वेधा पदभेदः । 'तत्त्वाधिका तत्त्वमयी'त्यनेन तत्परिहाराय 'तत्त्वासना तत्त्वमयी'त्यत्र तत् त्वं अयीति त्रेधा पदच्छेदः । पौनरुक्त्याभावेऽपि पदभेदभ्रमनिरासायाह—**हंसेति** । आ अर्धान्तात् अर्धसमाप्तिपर्यन्तं हंसवतीमुख्यशक्तिसमन्वितेत्येकं पदम् । 'अनर्घ्या कैवल्यपददायिनी'त्यत्र तु 'क्लींकारी केवला गुह्या कैवल्यपददायिनी'त्यनेन पौनरुक्त्यपरिहारोऽपि फलम् । एतेन छलाक्षरसूत्राणां न्यायमूलकत्वमेवेति प्रबलन्यायेन क्वचित्तदुक्तनियमान्यथात्वेऽपि न दोष इति सूचितम् । अतएव सामवेदिभिर्निदानसूत्रान्तर्गतच्छन्दोविचितिभाष्ये न्यायविरोधे छलाक्षरपाठोऽनादरणीय इत्युक्तं रथन्तरसामप्रकरणे । यत्र तु कान्तापदे अकारयोगे विनिगमनाविरहः, यथा वा 'कैवल्यपददायिनी'त्यत्र पदान्तरयोगे सत्रन्यायतो विकल्पप्रसक्तावपि छलाक्षरसूत्रप्रामाण्यात् 'कल्पनारहिता काष्ठे'त्यत्रेवाऽकान्तेति पदच्छेदः । 'कौलिनी केवले'त्यत्रेवानर्घ्यपदस्योत्तरप्रयोग इति स्वीकर्तुं युक्तम् । अव्यवस्थितशास्त्रार्थायोगादिति द्रष्टव्यम् ॥ ३५ ॥ अनेकपदानि नामानि संगृह्णाति । शक्त्यादिपदचतुष्टयात्पूर्वं तद्विशेषणत्वेन परपदत्वेन पठ्यते । तेन सह द्विद्विपदानि तानि नामानि 'पराशक्तिः परानिष्ठा' 'परंज्योतिः परंधामे'ति । 'कौलिनी केवले'त्यादौ 'अजाजेत्री'तिवत्समाससंभवान्न तत्र पदद्वयावश्यकतेति भावः । 'शोभनासुलभागति'रित्यत्र तु त्रिपदं नाम । शेषाण्येकपदानि समानाधिकरणानेकविभक्तिरहितानीत्यर्थः । तेन 'अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता' । 'मनोवाचामगोचरे'त्यादौ व्यधिकरणविभक्तिद्वयसत्त्वेऽपि तयोर्नामभेदभ्रमानाधायकत्वेन द्विपदेषु तदाधायकानामेव गणनाद्वा न दोषः । 'पराशक्तिरित्यत्र' 'शोभनासुलभागति'रित्यत्र चैकैकं पदमित्येव सुवचमिति तु पूर्वमेवोक्तम् । ननु 'परंज्योति'रिति वाक्ये प्रातिपदिकसंज्ञाभावेन कथं नामत्वम् । नच 'प्रजापतेर्हृदयं' 'पारेगङ्गम्' 'मध्येमहाभारत'मित्यादेरिवैकपदत्वम् । तेषु प्रथमपदान्ते विभक्तिसरूपवर्णमात्रसत्वेन विभक्त्यन्तराभावात् । नच 'परंज्योति'रित्यादौ तथा संभवति । विशेष्योत्तरविभक्त्यन्यथाभावप्रयुक्तान्यथाभावकविभक्तिविशेषणपदकत्वात् । नीलमुत्पलमित्यादौ तथात्वे वाक्यत्वस्यैव स्वीकारात् । अतएव 'अहर्येवुध्नियायस्वाहा'

निधिरात्मा दम्भोलिः शेवधिरिति नाम पुंलिङ्गम् ।
तद्ब्रह्मधाम साधुज्योतिः क्लीबेऽव्ययं स्वधा स्वाहा ॥३७॥
आविंशतितः सार्धान्नानाफलसाधनत्वोक्तिः ।
तस्य क्रमशो विवृतिः षट्चत्वारिंशता श्लोकैः ॥ ३८ ॥

'अहेर्बुध्निय मन्त्रं मे गोपाय' इत्यादौ पदद्वयेऽपि विभक्तिव्यत्यास इति चेन्न । पारिभाषिकप्रातिपदिकसंज्ञाया अभावेऽपि संभूयैकव्यक्तिविशेष्यकबोधजनकपदत्वरूपस्य नामत्वस्यैव सहस्रनामसंख्याघटकत्वेनादोषात् । वस्तुतस्तु ज्योतिःपदस्य प्रातिपदिकत्वात्तमादायैव संख्यापूर्तिः परंतु 'इङ् अध्ययने' इति धातोरधिपूर्वस्यैव प्रयोग इति नियमवत् ज्योतिरादीनामिह सविशेषणकानामेव प्रयोग इत्याम्नानबलान्नियमः कल्प्यते । तथा नियमेऽपि धातुत्वस्येड्मात्र इव नामत्वस्य ज्योतिःपदमात्रे पर्याप्तिः । 'अग्निं पवमानमावह' 'अग्नये पवमानायेद'मित्यादि नैगमिकप्रयोगवदिहापि 'परंज्योतिस्तर्पयामि परस्मैज्योतिषे स्वाहे'त्यादयस्तर्पणहोमादौ प्रयोगनियमाः । परमितितु मान्तमव्ययमिति केचित् । तत्पक्षे तु न मध्ये चतुर्थी । कौलिनीकेवलेति विशेष्यविशेषणभावापन्नपदद्वयपक्षेऽपि केवलेत्यस्य यथान्यासं कौलिन्यैकेवलायै नम इत्यादिप्रयोगो न केवलायै कौलिन्या इत्यादिः । आम्नानवैपरीत्ये मानाभावात् । एतेन विष्णुसहस्रनामसु 'अनादिर्भूर्भुवोलक्ष्मी'रित्यत्र भूर्भुवरित्यस्य भुवोभूरित्यन्वयेन भूमेर्जनक इत्यर्थकैकनामत्वपक्षे भूर्भुवेनम इति वा भुवोभुवेनम इति वा मन्त्रप्रयोगः परास्तः । अनेनैव न्यायेन भुवोभुवेनम इत्यस्यैव युक्तत्वादित्यादिकमूह्यम् ॥३६॥ प्रसङ्गाल्लिङ्गभेदेन नामानि विभज्य दर्शयति । 'गुणनिधिः' 'आत्मा' 'रोगपर्वतदम्भोलिः' 'महालावण्यशेवधि'रिति नामानि पुंलिङ्गानि । तेन गुणनिध्यै इत्यादिः पाक्षिकः प्रयोगो न कार्यः । एवं मन्त्रार्थानुसंधानेऽपि फलभेदः । तदित्यादिपञ्च नामानि नपुंसकानि । शेषाणि स्त्रीलिङ्गानीति शेषः । त्वमिति पदमपि स्त्रीलिङ्गमेव । 'अलिङ्गे युष्मदस्मदी' इत्यस्य लिङ्गकृतवैरूप्याभावमात्रपरत्वात् । 'युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपा' इति वचनान्तरानुगुण्यात् । स्वधास्वाहेत्यनयोरव्ययत्वात्स्वधानम इत्यादिरेव प्रयोगः । 'स्वान्धत्ते इत्यादिरूपेऽर्थे तु' स्वधायै नम इत्यादिरेव प्रयोगः सुवच इत्युक्तम् ॥ ३७ ॥ **इति भास्करारायेण कृते सौभाग्यभास्करे । दशमेन शतेनाभूद्वारिण्येकादशी कला ॥ १००० ॥**

इति श्रीभास्करारायविरचिते ललितासहस्रनामभाष्ये दशमशतकं नामैकादशी कला ॥ ११ ॥

अथ फलश्रुतिश्लोकानामर्थं संगृह्णाति परिभाषाकारः ॥ सार्धषडशीतिश्लोकात्मकस्योत्तरभागस्य मध्ये प्रथमतः सार्धविंशतिभिः श्लोकैः सहस्रनामकीर्तनस्य बहुविधफलसाधनत्वं प्रतिपाद्यते एवं फलभेदेन कीर्तनकरणकभावनाया भेदादितिकर्तव्यताभेद उत्तरत्र षट्चत्वारिंशता श्लोकैः प्रतिपाद्यते । 'सर्वरोगप्रशमन'-

परिभाषाशेषः—

श्रीमणिसधींविविधगुडदरान्देशैश्च पुष्टनादाभ्याम्।

ताश्चोक्ता विरूपाक्षपञ्चाशिकायाम् 'धूमावती तिरोधौ भास्वत्यवभासनेऽघ्वनां शक्तिः। क्षोभे स्पन्दा व्याप्तौ विभ्वी ह्लादा तु पुष्टौ मे॥ धूमावती पृथिव्यां ह्लादाप्सु शुचौ तु भास्वती प्रथते। वायौ स्पन्दा विभ्वी नभसि व्याप्तं जगत्ताभि'रिति। एवमियति प्रबन्धे प्राथमिकेन नामत्रयेण जगतः सृष्टिस्थितिलयकर्तृत्वेन देवतां लक्षयित्वा तिरोधानानुग्रहयोरनन्तविषयत्वाच्चिदग्निकुण्डसंभूतेत्यारभ्यैतावत्पर्यन्तं तयोरेव विषयं प्रपञ्चयेदशपञ्चकृत्यकर्त्रीं देवतामसाधारणेन विशेष्यभूतेन नाम्नां निर्दिशति—**ललिताम्बिकेति**। ललतेऽसौ ललिता ललिता च साम्बिका च ललिताम्बिकेति विग्रहः। उक्तंच पद्मपुराणे 'लोकानतीत्य ललते ललिता तेन सोच्यत' इति। लोक्यन्त इति लोकाः किरणा आवरणदेवतास्तानतिक्रम्य तत्स्थानोपरितनबिन्दुस्थाने ललतेऽतितरां शोभत इति तदर्थः। 'शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी। लालित्यं च तथौदार्यमित्यष्टौ पौरुषा गुणा' इत्यभियुक्तप्रसिद्धं ललितत्वं 'ललितं रतिचेष्टित'मिति कामशास्त्रप्रसिद्धं च। 'सौकुमार्यं तु लालित्य'मिति प्रसिद्धं च तत्सर्वमस्या अस्तीति ललिता। उक्तंच 'ललितेति नाम युक्तं तव किल दिव्या नवावृतयः। धनुरैक्षवमस्त्राण्यपि कुसुमानि तथाखिलं ललित'मिति। 'ललिते सुन्दर'मिति शब्दार्णवः। इदं च प्रयागपीठाधिपतेर्नाम। 'प्रयागे ललितादेवी'ति देवीपीठगणनप्रकरणे पाद्मवचनात्। अत्रान्तेऽप्युच्चार्यः प्रणवः सच पूर्वमेव व्याख्यातः वर्णभेदेन व्यवस्थापि पूर्वमेवोक्ता न विस्मर्तव्या। अनयोश्चाद्यन्तभूतयोर्द्वयोः प्रणवयोः सहस्रनामवाक्यार्थानन्वितार्थकत्वेऽपि न दोषः। तयोर्माङ्गल्यार्थमेवोच्चारणात्। 'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभा'विति वचनात्। 'स्वल्पत्वनोक्तं पूर्वं परस्ताच्च विशीर्यत' इति वचनेन तदुच्चारणे प्रत्यवायश्रवणेन तदुच्चारणस्यादृष्टमात्रौपयिकत्वात् अर्थज्ञानपूर्वकस्यैवोच्चारणस्यादृष्टौपयिकत्वेनार्थवर्णनस्याप्यावश्यकत्वात् नामसाहस्रस्याप्यनेन न्यायेनादृष्टार्थत्वेऽपि परस्परविशेष्यविशेषणभावेनाकाङ्क्षायोग्यता सतिसद्भावे नास्तीति क्रियान्वयवर्णनेन महावाक्यार्थस्यैकस्य वर्णयितुं शक्यत्वेन वैषम्यात् ईदृशवाक्येष्वस्तीति क्रियापदाध्याहारस्यावश्यकत्वात्। तथाच कात्यायनस्मरणम्। 'अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ती'ति। भवन्तीपर इत्यत्र लट्पर इत्यर्थः। अस्तु वा प्रणवयोरपि विशेषणतया महावाक्यार्थान्वयित्वं समस्तव्यस्तभेदेन पौनरुक्त्यनिरासंभवात्। अतएव परिभाषायां गदन्तमिति तकारस्य प्रणवसाहित्येन षट्संख्यापरत्वमिति दिक्॥ अर्धम्॥ [पर्यवसितं नामसहस्रमन्त्रं]

इदानीं परिभाषामण्डले नाम्नां शतकेष्वादिभागान्संगृह्य प्रदर्शयति॥ ॥ श्रीमाता १, मणिपूरान्तरुदिता २, सद्गतिप्रदा ३, ह्रींकारी ४, विविधाकारा ५, गुडान्नप्रीतमानसा ६, दरान्दोलितदीर्घाक्षी ७, देशकालापरिच्छिन्ना ८, पुष्टा ९,

नामसु शतकारम्भा न स्तोभो नापि शब्दपुनरुक्तिः ॥३३॥
मतिवरदाकान्तादावकारयोगेन रक्तवर्णादौ ।
आकारस्य क्वचन तु पदयोर्योगेन भेदयेन्नाम ॥ ३४ ॥

नादरूपिणी १०, एवं दश नामानि प्रथमादिशतकारम्भकाणि । अत्र श्रीमण्यादिशब्दानां श्रीकण्ठार्धशरीरिणी मणिपूराब्जनिलयेत्यादावतिप्रसक्तत्वेऽपि गणनासाचिव्येनैव भ्रमो निरस्तव्यः । गणनोत्तरं हि शतकप्रत्यासन्ननामस्वेव हि संशयो भवति क्वचित् । क्वचित्पदच्छेदसंशयप्रयुक्तो न विप्रकृष्टनामसु । अतएव हीं इति सबिन्दुकग्रहणं ह्रीमतीति तत्समीपवर्तिनामनिरासाय । दरामित्युक्तिः 'दरहासोज्वलन्मुखी'त्यस्य व्यावर्तनायेति ज्ञेयम् । यत्तु केचित् 'श्रीमाता मणिपूरान्तरुदिता सद्गतिप्रदा । हींकारी विविधाकारा गुडान्नप्रीतमानसा । दरान्दोलितदीर्घाक्षी सावित्री रसशेवधिः । विज्ञानकलिका चेति पदान्येतान्यसंशयम् । शतकाद्यानि नामानीत्यवधार्याणि सूरिभि'रिति ललितोपाख्यानस्थं वचनमिति लिखन्ति, तस्य प्रामाणिकत्वेऽप्युपायसंग्रहमात्रतात्पर्यकत्वेनोपायान्तरादूषकत्वेन तन्नेयम् । निरर्थकः शब्दः स्तोभः । सच सहस्रनामान्तरेषु पादपूरणकप्रयोजनको यथोपलभ्यते नात्र तथेत्यर्थः । नापि शब्देति । अर्थतस्तु यद्यपि पुनरुक्तिः 'अम्बा माताथ जननी देवेशी सुरनायिके'त्यादौ दृश्यते तथापि नासौ सहस्रनामसंख्याविघातिका नामशब्दस्य प्रातेपादकमात्रे शक्तेस्तद्भेदमात्रेण पृथक्त्वनिवेशित्वस्वाभाव्यायाः संख्याया अनुपरोधात् ॥ ३३ ॥ ननु शाब्दतोऽपि पुनरुक्तिरुपलभ्यत एवेत्याशङ्क्य परिहरति 'तुष्टिः पुष्टिर्मतिर्धृति'रित्यनेन पौनरुक्त्यपरिहाराय 'स्वाहा स्वधाऽमतिर्मेधे'त्यत्राकारस्य योगेन प्रश्लेषेणामतिरिति पदच्छेदः कर्तव्यः । 'सदसत्क्षरमक्षर'मित्यादौ विष्णुसहस्रनामसु 'मूर्तामूर्ते'ति प्रकृतनामस्वपि तस्य न्यायस्य क्लृप्तत्वात् । नहि संनिकृष्टपदद्वय एव तथा नियम इत्यत्र प्रमाणमस्ति । पौनरुक्त्यपरिहाराकाङ्क्षाया अविशेषादिति भावः । एवं 'वरदा वामनयने'त्यनेन पौनरुक्त्याभावाय 'विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी'त्यत्रावरदेति छेदः । 'कलावती कलालापा कान्ता कादम्बरीप्रिया । कल्पनारहिता काष्ठा ∫कान्ता∫कान्तार्धविग्रहे'त्यनयोरन्यतरस्मिन्कान्तापदेऽकारप्रश्लेषः । आदिपदेन नित्यतृप्तादेः परिग्रहः । 'नित्यतृप्ता भक्तनिधिः' 'मूर्तामूर्ता नित्यतृप्ते'त्यत्र तदावश्यकत्वात् । 'रक्तवर्णा मांसनिष्ठे'त्यनेन पौनरुक्त्यात् 'विशुद्धचक्रनिलयाऽरक्तवर्णा त्रिलोचने'त्यत्राप्यनेन न्यायेनाकारप्रश्लेषे प्राप्तेऽर्थानुगुण्याय दीर्घाकारः प्रश्लेषणीय इत्याह—**रक्तवर्णादावाकारस्येति** । आदिना 'सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका । सुवासिन्यर्चनप्रीताऽशोभना शुद्धमानसे'त्यनयोः शोभना आशोभनेति पदयोः परिग्रहः । ननु तथापि 'सुखाराध्या शुभकरी शोभना सुलभा गति'रित्यत्र तृतीयवारं श्रुतस्य शोभनपदस्य का गतिरित्याशङ्क्याह—**क्वचनेति** । पदयोर्भिन्नत्वेन वर्णयितुं शक्ययोरपि व्यायोगेन

अनघाऽद्भुतचारित्रा वाञ्छितार्थप्रदायिनी ॥ २३१ ॥
अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी ।
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका ॥ २३२ ॥

यस्यां सा त्रिगुणा । सत्त्वरजस्तमसामाश्रयत्वेन सांख्यसंमता प्रकृतिरिति यावत् । तदुक्तं वायुपुराणे 'योगेश्वरी शरीराणि करोति विकरोति च । नानाकृतिक्रियारूपनामवृत्तिः स्वलीलया । त्रिधा यद्वर्तते लोके तस्मात्सा त्रिगुणोच्यते' इति । विष्णुपुराणेऽपि 'सर्वभूतेषु सर्वात्मन्या शक्तिरपरा तव । गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वरी'ति । देवीपुराणे तु त्रिविक्रमत्रिपथगात्रिगुणापदानां पर्यायता ध्वनिता । तदुक्तम् 'पदैस्त्रिभिर्वलिर्बद्धः स्वर्गादित्रिपथान्नता । उत्पत्तिस्थितिनाशैश्च सत्त्वाद्यैस्त्रिगुणोच्यते' इति । अम्बा ईदृशस्य गुणत्रयस्यापि माता कारणभूता । यत्तन्त्रेषु मन्त्रजीव इत्युच्यते । तथाच तन्त्रराजे 'तेजसां शक्तिमूर्तीनां प्रपञ्चस्यापि कारणम् । गुणत्रयमसीषां च यत्कारणमुदाहृतम् ॥ तत्स्वरूपानुसंधानसिद्धिः सम्यक्त्वमीरितम् । तन्मन्त्रवीर्यमुद्दिष्टं मन्त्राणां जीव ईरितः' इति । अविशेषात्सकलजगदम्बा वा । त्रिकोणं योनिचक्रं गच्छतीति त्रिकोणगा । अंहो दुःखव्यसनान्यघानि न सन्ति यस्यां साऽनघा । अद्भुतान्याश्चर्यकराणि चारित्राणि यस्याः । अद्भुतेषु भूकम्पादिपूत्पातेषु निमित्तेषु चरन्तीत्यद्भुतचारीणि दुष्टफलानि तेभ्यस्त्रायते वा । वाञ्छितार्थान्प्रदातुं शीलमस्याः ॥ २३१ ॥ पुनःपुनः 'आमुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तये' ति विहितेन ब्रह्मात्मैक्यानुसंधानावृत्त्यतिशयेन ज्ञाता । तथाच व्याससूत्रं कपिलसूत्रं च 'आवृत्तिरसकृदुपदेशा'दिति । उक्तंच ब्रह्माण्डे 'ध्यानैकदृश्या ज्ञानाग्नी विद्यात्मा हृदयास्पदा । आत्मैक्याद्व्यक्तिमायाति चिरानुष्ठानगौरवा'दिति । अध्वानः षट्-पदाध्वा भुवनाध्वा वर्णाध्वा तत्त्वाध्वा कलाध्वा मन्त्राध्वा चेति । तेषु त्रयो विमर्शाशास्त्रयः प्रकाशांशाः । तदुक्तं विरूपाक्षपञ्चाशिकायाम् 'अविमर्शस्येकार्णः पदमन्त्रार्णात्मकस्त्रिधा भवति । पुरतत्त्वकलात्मार्थो धर्मिण इत्थं प्रकारस्ये'ति । तेच ज्ञानार्णवे 'अस्मिंश्चक्रे षडध्वानो वर्तन्ते वीरवन्दिते'त्यारभ्य 'एवं षडध्वविमलं श्रीचक्रं परिचिन्तये'दित्यन्तेन सलक्षणमुक्ताः । दक्षिणामूर्तिसंहितायामपि 'षडध्वरूपमधुना शृणु योगेशि सांप्रत'मित्यादिना 'एवं षडध्वभरितं श्रीचक्रं परिचिन्तये'दित्यन्तेनोक्तास्तानतीतं रूपमस्याः । शैववैष्णवादयः षडुपासनामार्गास्तानतीतं तेषामेतत्प्राप्तिसाधनत्वात्तादृशं रूपमस्या इति वा । उक्तंच कुलार्णवे 'शैववैष्णवदौर्गार्कगाणपत्येन्दुसंभवैः । मन्त्रैर्विशुद्धचित्तस्य कुलज्ञानं प्रकाशते' इति । इन्दुसंभवं जैनदर्शनम् । जन्मान्तरे षड्विधोपासकस्य मिहजन्मनि सुन्दर्युपास्तिलाभ इति तदर्थः । अव्याजा अनौपधिकी करुणा सैव मूर्तिः स्वरूपं यस्याः । 'जयति करुणा काचिदरुणे'त्यभियुक्तोक्तेरदृश्यअतएवाह—**अज्ञानेति** । अज्ञानमेव ध्वान्तमन्धकारस्तस्य दीपिकेव नाशकत्वेधा. 'तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ९.

आबालगोपविदिता सर्वानुल्लङ्घ्यशासना ।
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ॥ २३३ ॥
श्रीशिवाशिवशक्त्यैक्यरूपिणी ललिताम्बिका ।

भगवद्वचनात् ॥ २३२ ॥ बालान्ब्रह्मादिकान्गोपयतीति बालगोपः, बालश्चासौ गोपश्च बालगोपः । बालगोपश्च बालगोपश्च बालगोपौ तावभिव्याप्य आबालगोपं तादृशेन विदितं ज्ञानं यस्याः सा । अत्रैको बालगोपशब्दः सदाशिवपरः कृष्णावतारपरो वा । अन्यः पामरोपलक्षणम् । हरिहारादिपामरान्ता यां जानन्तीत्यर्थः । उक्तंच स्कान्दे 'तमहंप्रत्ययव्याजात्सर्वे जानन्ति जन्तव' इति । नन्वेवं सति 'अतिपरिचयादवज्ञे'ति न्यायात्सर्वेषामनादरणीया स्यादत आह—**सर्वेति** । सर्वैर्ब्रह्मविष्ण्वादिभिरप्युल्लङ्घितुमतिवर्तितुमयोग्यमशक्यं शासनं यस्याः । तदुक्तमाचार्यभगवत्पादैः 'जगत्सूते धाता हरिरवति रुद्रः क्षपयति तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति । सदा पूर्णः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयो'रिति । श्रीचक्रराजं बिन्दुत्रिकोणादिरूपं निलयो वासस्थानं यस्याः । तदुक्तं 'श्रीचक्रं शिवयोर्वपु'रिति । शरीरे यथा जीवस्यावस्थानं तथा श्रीचक्रे शिवयोरिति तदर्थः । त्रिपुरस्य परशिवस्य सुन्दरी भार्या । श्रीमती च सा त्रिपुरसुन्दरी चेति तथा । अत्र त्रीणि पुराणि ब्रह्मविष्णुशिवशरीराणि यस्मिन्सः त्रिपुरः परशिवः । तदुक्तं कालिकापुराणे 'प्रधानेच्छावशाच्छंभोः शरीरमभवत्त्रिधा । तत्रोर्ध्वभागः संजातः पञ्चवक्त्रश्चतुर्भुजः ॥ पद्मकेसरगौराङ्गः कायो ब्राह्मो महेश्वरे । तन्मध्यभागो नीलाङ्ग एकवक्त्रश्चतुर्भुजः ॥ शङ्खचक्रगदापद्मपाणिः कायः स वैष्णवः । अभवत्तदधोभागे पञ्चवक्त्रश्चतुर्भुजः ॥ स्फटिकाभ्रमयः शुक्लः स कायश्चान्द्रशेखरः । एवं त्रिभिः पुरैर्योगात्त्रिपुरः परमः शिव' इति ॥ २३३ ॥ (श्रीशिवेत्यादिरर्धश्लोक एवायम्) । श्रीयुक्ता शिवा श्रीशिवा । शिवशक्त्योरैक्यं सामरस्यमेव रूपमस्याः । उक्तंच वायुसंहितायाम् 'शिवेच्छया परा शक्तिः शिवतत्त्वैकतां गता । ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिवे'ति । अत्र सामरस्यं समरसता परमं साम्यमत्यन्ताभेद एव । तथाचोक्तं सौरसंहितायाम् 'ब्रह्मणोऽभिन्नशक्तिस्तु ब्रह्मैव खलु नापरा । तथा सति वृथा प्रोक्तं शक्तिरित्यविवेकिभिः । शक्तिशक्तिमतोर्विद्वन्भेदाभेदस्तु दुर्घट' इति । वासिष्ठरामायणेऽपि 'यथैकं पवनस्पन्दमेकमौष्ण्यानलौ यथा । चिन्मात्रं स्पन्दशक्तिश्च तथैवैकात्म सर्वदे'ति । शिवचक्राणां शक्तिचक्राणां चैक्यं रूपमस्या वा । तदुक्तं ब्रह्माण्डपुराणे 'त्रिकोणे वैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुज'मित्यारभ्य 'शैवानां चैव शाक्तानां चक्राणां च परस्परम् । अविनाभावसंबन्धं यो जानाति स चक्रण्यार्ल्यन्तेन शिवशक्त्योरैक्यं यस्मिन्प्रतिपाद्यं स हंसमन्त्रो रूपमस्या वा । उक्तंच 'मुमुभवखण्डे 'शान्तान्तं शक्तिरस्योक्ता तदन्तं बीजमुच्यते । विद्याशक्तिर्भवेद्बीजं मानं एव नचान्यथा । तेनायं परमो मन्त्रः शिवशक्त्यात्मकः स्मृत' इति । शुभहेतिवर्णक्रमे शस्यान्ते पकारस्तदन्ते सकारस्तदन्ते हकार इति तदर्थः । रित्याद्यशिवस्य शक्तयो धूमावत्याद्याः पञ्च । तासामैक्यं समष्टिरेव रूपमस्याः ।

लोकातीता गुणातीता सर्वातीता शमाश्रिता ॥ २२७ ॥
बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी ।

संप्रवदन्ति तज्ज्ञाः ॥ संच्छेदनैर्दहनताडनपीडनैश्च गात्रप्रहारदमनैर्विनिकृन्तनैश्च । यस्येह राग उपयाति न चानुकम्पा ध्यानं तु रौद्रमिति तस्य वदन्ति सन्तः ॥ सूत्रार्थ-मार्गणमहाव्रतभावनानि निर्बन्धमोक्षगमनागतिहेतुचिन्ता । पञ्चेन्द्रियाद्युपशमश्च दया च भूते ध्यानं तु धन्यमिति तत्प्रवदन्ति सन्तः ॥ यस्येन्द्रियाणि विषयैर्न विचर्चितानि संकल्पनाशनविकल्पविकासयोगैः । तत्त्वैकनिष्ठधृतियोगमृतान्तरात्मा ध्यानं तु शुक्लमिति तत्प्रवदन्ति सिद्धाः' इति । एतेषां फलभेदोऽपि भविष्योत्तर एव 'आर्ते तिर्यगधोगतिश्च नियता ध्याने च रौद्रे सदा धन्या देवगतिः शुभं फल-मथो शुक्ले च जन्मक्षयः । तस्माज्जन्मरुजापहे हिततरे संसारनिर्वाहके ध्याने श्वेत-तरे रजःप्रमथने कुर्यात्प्रयत्नं बुध' इति । तत्र धन्याख्यध्यानरूपेति । धर्मशील-त्वाद्धर्मिणी । आनन्दानुभवनित्यत्वादिधर्माणां विशेष्यभूता वा । धर्मं वर्धयतीति धर्मवर्धिनी । तदुक्तं वामनपुराणे 'जितेन्द्रियत्वं शौचं च माङ्गल्यं भक्तिरेव च । शंकरे भास्करे देव्यां धर्मोऽयं मानुषः स्मृतः । ध्यातः साम्ब इमान्धर्मान्वृद्धिं नयति देहिना'मिति 'वृधु छेदन' इति धातोर्ब्रह्माधिष्ठानकं धर्ममात्रं दृश्यजातं छेदय-तीति वा । लोकानिन्द्रलोकादिविष्णुलोकान्तानतीतातिक्रम्य महाकैलासाख्ये पर-शिवपुरे स्थिता । परशिवपुरस्य सर्वलोकातीतत्वं शिवधर्मोत्तरे अर्वाचीनाँल्लो-कान्वर्णयित्वा 'ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपुरं महत्'दित्यारभ्य 'इत्येतदपरं तुभ्यं प्रोक्तं शिवपुरं महत् । देहिनां कर्मनिष्ठानां पुनरावर्तनं स्मृत'मित्यन्तेन कर्मठप्राप्यं शिवपुरं वर्णयित्वा 'ऊर्ध्वं शिवपुराज्ज्ञेयं स्थानत्रयमनुत्तमम् । नित्यं परमशुद्धं च स्कन्दोमाशंकरात्मक'मित्यारभ्य 'ये संप्राप्ताः परस्थानं ध्यानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरे संसारसागरे । सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा महेश्वराः । शिवतुल्यबलोपेताः परं शिवपुरं गता'इत्यन्तम् लोका-ज्जीवान्वाऽतीता । अतएव गुणातीता । सर्वमतीता वा सर्वाञ्शब्दातीता वा । उक्तंच ज्ञानार्णवे 'शब्दातीतं परं ब्रह्म गणनारहितं सदा । आत्मस्वरूपं जानीही'ति । शमः प्रपञ्चोपशम एवात्मा स्वरूपं यस्याः । 'प्रपञ्चोपशमं शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते' इति नृसिंहतापनीये । शं सुखमात्मा यस्या इति वा ॥ २२७ ॥ बन्धूको बन्धुजी-वको वङ्गदेशप्रसिद्धो महावृक्षस्तस्य कुसुमं पुष्पं तस्येव प्रख्या कान्तिर्यस्याः । अत्या-रक्ततमा कान्तिर्यस्या वा । बाला कुमारी । 'त्वं कुमार उत वा कुमारी'ति श्रुतेः । त्रिपुरासिद्धान्तेऽपि 'बाललीलाविशिष्टत्वाद्बालेति कथिता प्रिये' इति । लीला प्रापञ्चिकी क्रीडैव विनोदो यस्याः । पद्मराजस्य भार्या लीलाख्या योगवासिष्ठे प्रसिद्धा तां विशिष्य सत्कर्मसु नोदयतीति वा । लीलादेव्या तपसा सरस्वती तोषिता सा तुष्टा तस्यै ज्ञानं तद्भर्तृजीवनं च प्रादादिति कथायां विस्तरेण वर्णनात् । देवीपुराणे नामनिर्वचनाध्याये लक्ष्मीलालनतो लीले'ति निर्वचनदर्शनाल्लीलेत्येतावन्मात्रस्य भिन्ननामत्वं स्वीकृत्य

सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥ २२८ ॥
सुवासिन्यर्चनप्रीताऽऽशोभना शुद्धमानसा ।
विन्दुतर्पणसंतुष्टा पूर्वजा त्रिपुराम्बिका ॥ २२९ ॥
दशमुद्रासमाराध्या त्रिपुराश्रीवशंकरी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥ २३० ॥
योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।

ब्रह्मजननीत्यनयोरेकनामत्वमित्यपि सुवचम् । शोभनं मङ्गलमस्या इति सुवासिनी-संज्ञा । संज्ञात्वादेव 'केवलमामके'त्यादिना ङीप् । सुमङ्गली 'संज्ञाया'मिति गौरा-द्यन्तर्गणसूत्रेण ङीष् वा । शोभनं मङ्गलं ब्रह्मेति वा । तदुक्तं विष्णुपुराणे 'अशु-भानि निराचष्टे तनोति शुभसंततिम् । श्रुतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदु'-रिति । अत्रिस्मृतौ तु 'प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मङ्गलं प्रोक्त-मृषिभिर्ब्रह्मवादिभि'रित्युक्तम् । सुखकर्तृत्वात्सुखकरी । 'कृञो हेतुं'त्यादिना ताच्छील्ये णिनिः । शोभनेन वेषेणाढ्या युक्ता । सुवासिनी सार्वकालं जीवत्पतिका । सुवासिनीजनाभिन्ना वा ॥ २२८ ॥ सुवासिनीनामर्चनेन प्रीता । आशोभनेति चतुरक्षरं नाम । समन्ततः सौन्दर्यवती । शुद्धं मानसं यस्याः । बिन्दौ सर्वानन्द-मये चक्रे ब्राह्मणादिवर्णचतुष्टयकर्तृकेण क्षीराज्यमध्वासवबिन्दुकरणकेन वा तर्पणेन सम्यक्तुष्टा । 'विन्दुरिच्छु'रिति निपातितबिन्दुपदवाच्यज्ञातॄणां तर्पणेन तृप्त्या संतुष्टा वा । पूर्वं जाता । 'इयमेव सा या प्रथमा व्यौच्छ'दिति 'अहमस्मि प्रथमजा ऋतस्ये'ति श्रुतेः । अबुद्धिपूर्वकाया प्रथमा सृष्टिस्तद्रूपा वा । अष्टमच-क्राभिमानिनीत्रिपुराम्बाख्यदेवतारूपा । त्रयाणां पुराणामवस्थारूपाणामम्बिका जनिका वा । त्रीणि पुराणि यस्य स जीवः । 'पुरत्रये क्रीडति यश्च जीव' इति श्रुतेः तज्जननी वा । यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती'त्यादिश्रुतेः । 'वामा-दीनां पुराणां तु जननी त्रिपुराम्बिके'ति वचनसिद्धा वा ॥ २२९ ॥ संज्ञोभिण्या-दित्रिखण्डान्ता दश मुद्रास्ताभिः करणभूताभिः सम्यक् नित्याहृदयोक्तवासनानुगु-ण्येनाराध्या । पञ्चमचक्राधिष्ठात्री त्रिपुराश्रीनामिका देवी तां वशं कुरुते, सा वशं-करी यस्या इति वा, 'तर्जन्यङ्गुष्ठयोगरूपज्ञानमुद्रारूपा वा, ज्ञानेन मुदं रातीति वा, ज्ञानं चिदंशं मुदमानन्दांशं द्रावयत्यावृणोतीति वा । ज्ञानेन गम्या विषयः, ज्ञानेन प्राप्या वा । उक्तंच कौर्मे देव्यैव 'यत्तु मे निष्कलं रूपं चिन्मात्रं केवलं शिवम् । सर्वोपाधिविनिर्मुक्तमनन्तममृतं परम् ॥ ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पदम् । ज्ञानमेव प्रपश्यन्तो मामेव प्रविशन्ति ते' इति । ज्ञानज्ञेये दृग्दृश्ये स्वरूपमस्याः ॥ २३० ॥ योनौ मुदं राति । नवममुद्रारूपा वा । योनिरेव मुद्रा आच्छादिका यस्य बिन्दोस्तद्रूपा वा । यद्वा गुदमेढ्रान्तरं योनिरित्युच्यते । मन्त्रदोषनिरासार्थ-स्तन्न प्रकारो गुरुमुखैकवेद्योऽस्ति, तद्रूपा वा । त्रिखण्डाख्याया दशम्या मुद्राया ईशी भेनी । त्रयाणां सोमसूर्यानलाख्यमन्त्रखण्डानामीशी वा । त्रयो गुणा

पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी ॥ २२५ ॥
पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी ।

वज्रिण इन्द्रस्य स्त्री शचीरूपा वा । वज्रधारिणी वा । वज्राख्यारत्नैर्भूषिता वा । 'महद्भयं वज्रमुद्यत'मिति श्रुतौ वज्रपदस्य ब्रह्मपरत्वापरिच्छेदकत्वसंबन्धेन तद्वती वा । वामकेश्वरतन्त्ररूपा वामकस्य तन्त्रस्य प्रतिपाद्या वा । वामा वाममार्गरतास्त एव पञ्चयज्ञविलोपकत्वात्कुत्सिता इति वामकाः । वमन्ति जगत्सृजन्तीति वा वामका दक्षाद्यास्तेषामीश्वरी वा । पञ्चसंख्याका यज्ञाः पञ्चयज्ञाः । मध्यमपदलोपी समासः । तेन न 'द्विगो'रिति ङीप् । ते प्रिया यस्याः । ते च 'स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम' इति श्रुतौ कथिताः, स्मृतिषु प्रसिद्धा देवयज्ञब्रह्मयज्ञभूतयज्ञपितृयज्ञमनुष्ययज्ञा वा । पञ्चरात्रागमे 'अभिगमनमुपादानमिज्यास्वाध्याययोग' इत्युक्ता पञ्चविधा पूजा वा । कुलागमे 'केवलो यामलो मिश्रश्चक्रयुग्वीरसंकरः । इति पञ्चविधा पूजे'त्युक्ता वा । नित्यातन्त्रे 'हेतिभिर्मध्यमाद्यं स्याद्वितीयं नवयोनिष्वि'त्यारभ्य 'इति पञ्चप्रकारार्चा प्रोक्ता सर्वार्थसिद्धिदे'त्यन्तेनोक्ता वा । बृहत्तन्त्रकौमुद्यां तन्मूलके मन्त्रमहोदधौ च 'आतुरीसौतकीदौर्बोधीत्रासीसाधनाभावनी'ति कथिता वा । 'अग्निहोत्रे हूयमाना दुग्धादिरूपा आपः सोमद्युपृथिवीपुरुषयोषिद्रूपकुण्डपञ्चके पुनःपुनर्हूयन्ते तदा ता एवापः शरीरभावं भजन्ती'त्युपनिषत्सु रंहल्याद्यधिकरणेषु च स्पष्टोऽयं विषयः । त एते पञ्चयज्ञा वा । 'पचि विस्तार' इति धातोर्घञर्थे कविधानात्पञ्चो विस्तृतो यज्ञो विश्वसृजामयनादिर्वा । सर्वेषामेतेषामेकशेषः । ब्रह्मादयश्चत्वारः प्रेताः पादाः । सदाशिवाख्यः प्रेतः फलकमेतादृशं मञ्चं पर्यङ्कमधिशेते । उक्तंच भैरवयामले बहुरूपाष्टकप्रस्तारे च 'शिवात्मके महामञ्चे महेशानोपबर्हणे । मृतकाश्च चतुष्पादाः कशिपुश्च सदाशिवः । तत्र शेते महेशानी महात्रिपुरसुन्दरी'ति । आचार्यभगवत्पादैरप्युक्तं 'गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपट' इति ॥ २२५ ॥ ब्रह्मादिषु पञ्चसु पञ्चमस्य सदाशिवस्य स्त्री । सूतसंहितायां तस्याप्यम्बासहायोक्तेः 'त्रिषु रुद्रो वरिष्ठः स्यात्तेषु मायी परः शिवः । मायाविशिष्टात्सर्वज्ञात्साम्बः सत्यादिलक्षणः । सदाशिवो वरिष्ठः स्यान्नात्र कार्या विचारणे'ति । पञ्चमीशब्दो वाराह्यां निरूढो वा । सा च यद्यपि ब्राह्म्यादिषु पञ्चमीति पञ्चरत्नदेवतासु चरमेति पञ्चकोशादिचरमदेवतास्विव यौगिक एव स तस्यां भासते तथापि दक्षिणामूर्तिसंहितायां 'पूजयेत्पञ्चमीसुतम् । घटं स्पृष्ट्वा हृदि ध्यात्वा पञ्चमीं परमेश्वरीम् । पञ्चमीशकटं यन्त्रं त्रिषु लोकेषु दुर्लभम्' इत्यादौ वाराह्यामेव बहुतरप्रयोगदर्शनाद्योगरूढोऽप्यवसेयः । मकारेषु पञ्चमस्यानन्दरूपत्वात्तद्रूपा वा । तथाच कल्पसूत्रम् 'आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् । तस्याभिव्यञ्जकाः पञ्च मकारास्तैरथार्चनं' गुप्येत्यादि अतएव पञ्चानां मानां मकाराणां

शाश्वती शाश्वतैश्वर्या शर्मदा शंभुमोहिनी ॥ २२६ ॥
धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।

समाहारः । पञ्चमीति वा । तानि च त्रिपुरसूक्ते 'परिप्लुतं चषमाद्यं फलं चे'त्यस्यामृचि प्रसिद्धानि । दानशुल्कादयो गुरुमुखादवगन्तव्याः । 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'ति श्रुतिप्रसिद्धा योषित् कुण्डे रेतो हविष आहुतिरुक्तयज्ञेषु पञ्चमी तद्रूपा वा । कैवल्याख्या पञ्चमी मुक्तिस्तदभिन्ना वा । पञ्चसंख्यानां भूतानां पृथिव्यादीनामीशी । यद्वा पञ्चधाभूता पञ्चप्रकारा जातेति वा । पञ्चमहाभूतात्मिका वा पञ्चरत्नात्मिका वा वैजयन्तीमाला तदीशी । उक्तंच विष्णुपुराणे 'पञ्चरूपा तु या माला वैजयन्ती गदाभृता । सा भूतहेतुसंघाता भूतमाला भवेद्विजे'ति । अत्र पञ्चरूपेति पदं मुक्तामाणिक्यमरकतेन्द्रनीलवज्रसमानवर्णेति व्याचक्षते । विष्णुरहस्येऽपि 'पृथिव्यां नीलसंज्ञानमब्धौ मुक्ताफलानि च । तेजसः कौस्तुभो जातो वायोर्वैडूर्यसंज्ञकम् । पुष्करात्पुष्परागस्तु वैजयन्त्या हरेरिमे' इति । पञ्चसंख्या गन्धपुष्पधूपदीपनैवेद्याख्या उपचारा अस्याः ॥

अथ परिभाषायामवशिष्टानि पञ्चाशन्नामानि विभजते ॥ **गुणगणरर्धिं खगेशं चतुर्हरन्तं चतुर्दृढामोदम् । गुणिहृदि विभजभवाद्गुरुवर्गं च नवचरणं गदन्तमिति ॥ ३२ ॥** अत्र इतिशब्दः सहस्रसंख्यासमाप्तिपरः । तदितराणि नामाक्षरसंख्यापराणि । पक्षे भवात् परशिवमारभ्यागुरुवर्गं नाथसमूहं खगुरुपर्यन्तं विशिष्य भजेत्यर्थः । गुणगणैः साक्षाद्रविस्वरूपम् । खगानां देवानामपीशं चतुर्विधक्लेशान् जरायुजादियोनिचतुष्टयजन्याहरन्तम् । चतुःसंख्या दृढामोदध्यानसुखाः पुरुषार्था यस्मात्तम् । गुणशीले हृदि इति अनेन प्रकारेण सहस्रनामादिरूपेण गदन्तमुपदिशन्तम् । नवचरणशब्दो नामारम्भे व्याख्यातः ॥ ३२ ॥

शश्वत् पौनःपुन्यं तत्संबन्धिनी । पुनःपुनरभ्यस्यमानेत्यर्थः । नित्या वा । 'शाश्वतस्तु ध्रुवो नित्य' इत्यमरः । 'तेषां सिद्धिः शाश्वती नेतरेषा'मिति श्रुतेः । शाश्वतं नित्यमैश्वर्यं यस्याः । यद्वा ईकारप्रश्लेषेणेशाः जगदीशाः पञ्चप्रेतास्तेष्वश्वताऽश्वत्वं वाहनत्वं येन तादृशमैश्वर्यं यस्याः । पञ्चप्रेतासनारूढेति फलितार्थः । शर्म सुखं दत्ते, शं भावयति भजते वा शंभुः । मितद्वादित्वाड्ड प्रत्ययः । तस्य मोहिनीति षा । शंभुमोहिनी ॥ २२६ ॥ धरा पृथ्वीस्वरूपा सर्वस्य जगतो धारणाद्वा । लकारस्वरूपा वा । 'लकारः पृथिवीदेवी सशैलवनकानना । पञ्चाशत्पीठसंपन्ना सर्वतीर्थमयी परे'त्यादि ज्ञानार्णवे । धरस्य हिमवत्पर्वतस्य सुता । धन्या कृतार्था धनाय हिता वा । धनं लब्धी वा । 'धनगणं लब्धे'ति यत्प्रत्ययः । 'मङ्गलापिङ्गलाधन्ये'ति ज्योतिःशास्त्रप्रसिद्धयोगिनीविशेषरूपा वा । यद्वा चरमकालीनाश्चिन्ता आर्तरौद्रधन्यशुक्लभेदेन चतस्रो भविष्योत्तरपुराणे कथिता यथा 'राज्योपभोगशयनासनसाधनेषु स्त्रीगन्धमाल्यमणिवस्त्रविभूषणेषु । इच्छाभिलाषमतिमात्रमुदेति मोहाद्ध्यानं तदार्तमिति

सर्वे रोगाः प्रणश्यन्ति दीर्घमायुश्च विन्दति।
अयमायुष्करो नाम प्रयोगः कल्पनोदितः ॥ २५६ ॥

पर्यवसानाच्चायन्पठेदिति संप्रदायः ॥ २५५ ॥ इष्टं विशिनष्टि—**सर्वे रोगा इति**। नश्यतिरिह ध्वंसप्रागभावादिसाधारणाभावमात्रपरः। दीर्घायुष्ट्वं अपमृत्युकालमृत्युद्वयाभावौ। चकारात्संपदां ग्रहणम्। तेन रोगसामान्याभावविशिष्टसंपन्नचिरतरजीवित्वं भाव्यं सिध्यति। तेन रोगिण इव नीरोगस्यापि रोगप्रागभावपरिपालनोद्देशेनास्मिन्प्रयोगेऽधिकारः सिद्धः। संकल्पव्यवहारादावुपयोगित्वेन नामधेयं प्रदर्शयति—**अयमायुष्कर इति**। करोतीति करः पचाद्यच्। आयुषः कर आयुष्करः। कस्कादेराकृतिगणत्वाद्विसर्गस्य षत्वम्। नामेत्यव्ययं संज्ञाकृतप्रसिद्ध्यर्थकम्। कल्पनोदितः कल्पे कल्पसूत्रे परशुरामकृते नोदितः सूचितः। कल्पसूत्राणां सर्वेषामितस्ततो विप्रकीर्णपरशाखापठिताङ्गजातोपसंहारेण प्रयोगविधिकल्पनार्थत्वात्तत्र नित्यार्चादिकतिपयप्रयोगकथनेनेतरे प्रयोगास्तत्रानुक्ता अपि सूचिता एवेत्यर्थः। यद्वा कल्पसूत्रतुल्येषु तन्त्रेषु नोदितः कण्ठरवेणोक्तः। अथवा कल्पनेन भाव्यकरणयोः कार्यकारणभावकल्पनेन उदितः समर्थितः। यद्वा कल्पेऽपि प्रलयकालेऽपि नोदितो विहितः। प्रलयाव्यवहितपूर्वकालीनैः साधकैरुत्तरत्र संघातमरणनिश्चयेऽपि दीर्घायुःकामनया कृतोऽयं प्रयोगः प्रलयकालेऽपि तान्त्रक्षतीत्यर्थः। अथवा अयमायुष्कर इत्याकारको नाम्नां प्रयोगः प्रयुज्यमानता। व्यवहार इति यावत्। कल्पनयावयवशक्तिकल्पनया योगरूढिकल्पनया वोदित उक्तः। तेन न्यायतौल्यादुत्तरेऽपि प्रयोगा ज्वरहरादिनामका ऊह्याः। तत्फलं तु संकल्पादावुपयोग इति सिध्यति ॥ ॥ **अथास्य स्पष्टतरः प्रयोगविधिरुच्यते**—चन्द्रतारादिबलविशिष्टे उदयव्यापिपौर्णमासीतिथावहन्येव यथाधिकारं वैदिकं तान्त्रिकं च नैत्यकं कर्म समाप्योपोषितः सायाह्ने पुनः स्नात्वा सायंसंध्यां वैदिकीं तान्त्रिकीं च नित्यपारायणान्तां निर्वर्त्य सम्यगुदिते पूर्णचन्द्रे शुचौ देशे समत्रकमासनं प्रसार्य पूर्वाभिमुखस्तस्मिन्नुपविश्याचम्य मूलेन प्राणानायम्य देशकालौ संकीर्त्य ममान्यस्य वामुकशर्मणोऽमुकगोत्रस्य नीरोगत्वसंपत्तिदीर्घायुःसिध्यर्थं श्रीललितासहस्रनामस्तोत्ररूपमालामन्त्रस्य सकृत्पठनेनायुष्करं प्रयोगमहं करिष्य इति संकल्प्य चन्द्रमण्डलं पश्यन्नुन्मीलितलोचन एव तन्मध्ये साङ्गां सावरणां सतिथिनित्यां सगुरुपङ्क्तिं त्रिपुरसुन्दरीमवयवशो ध्यात्वा स्वाभिन्नां विभाव्य सः 'श्रीललितास्वामिकायै नमः गन्धान्समर्पयामी'त्येवंरूपैर्मन्त्रैः प्रत्यक्षान्गन्धपुष्पधूपदीपनैवेद्योपचारान्प्रकृतिवत्सलक्षणान्निवेद्यानुत्तमपि ताम्बूलं संप्रदायवशान्निवेद्य चन्द्रमण्डले देवीं पश्यन्नेव प्राथमिकान्पञ्चाशच्छ्लोकान्पठित्वा ऋष्यादिन्यासत्रयं विधाय ध्यानश्लोकं पठित्वा यथाधिकारं प्रणवमुच्चार्य सुव्यक्ताक्षरमर्थानुसंधानपुरःसरमत्वरन्सहस्रनाममन्त्रं श्रीमातेत्यादि ललिताम्बिकेत्यन्तं पठित्वान्ते पुनः प्रणवमुच्चार्यर्ष्यादिन्यासत्रयं कृत्वोत्तरभागं तथैव पठित्वा जपं देवीवामहस्ते जलक्षेपपुरःसरं गुह्यातिगुह्येति

ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम् ।
तत्क्षणात्प्रशमं याति शिरस्तोदो ज्वरोऽपि च ॥२५७॥
सर्वव्याधिनिवृत्त्यर्थं स्पृष्ट्वा भस्म जपेदिदम् ।
तद्भस्मधारणादेव नश्यन्ति व्याधयः क्षणात् ॥ २५८ ॥
जलं संमन्त्र्य कुम्भस्थं नामसाहस्रतो मुने ।
अभिषिञ्चेद्ग्रहग्रस्तान्ग्रहा नश्यन्ति तत्क्षणात् ॥ २५९ ॥
सुधासागरमध्यस्थां ध्यात्वा श्रीललिताम्बिकाम् ।
यः पठेन्नामसाहस्रं विषं तस्य विनश्यति ॥ २६० ॥

यथालिङ्गं समर्च्य देवीं स्वात्मत्वेन परिणमय्य चन्द्रबिम्बादृष्टिमवतार्याचम्योत्थाय सामायिकान्संतर्प्यायमायुष्करः प्रयोगः साङ्गो भवतु तेन च त्रिपुरसुन्दरी प्रीयतामिति तदाशिषो गृहीत्वा स्वयमपि भुञ्जीतेति । नित्यकर्माणि कुर्वतामेव नैमित्तिकेष्वधिकारः । उभयानि कुर्वतामेवेदृशेषु काम्येष्वधिकार इति तु तन्त्रान्तरसिद्धोऽर्थो न विस्मर्तव्यः । अस्य कर्मण आवृत्तिरपि क्रियमाणा न दुष्यतीति तूक्तमेव प्राक् ॥ २५६ ॥ एवं सर्वरोगप्रशमनमिति विशेषणचतुष्टयं विविच्य क्रमप्राप्तं सर्वज्वरार्तिशमनं प्रयोगं विवेचयति—ज्वरेणार्तं पीडितं स्पृष्ट्वा हस्तं दत्त्वा न एव तत्क्षणात्सद्यः शिरसस्तोदो व्यथा । ज्वरप्रयुक्तपीडामात्रोपलक्षणमिदम् । प्रयोगविधिस्तु—ज्वराख्यनिमित्तोद्भवदिवसे कृताह्निकः शुचौ देशे इत्यादिसंकल्पान्तं कुर्यात् । संकल्पे यथालिङ्गमूहः । ज्वरहरं प्रयोगमिति नामोल्लेखः । ततः स्वदक्षिणभागे उदङ्मुखं ज्वरार्तं निवेश्य भस्मना मन्त्रेण वा स्नापयित्वा पूर्वभागं पठित्वा ज्वरार्तस्य शिरसि हस्तं दत्त्वा तं तथैव स्पृशन्नेव मध्यभागं पठित्वा हस्तं निष्कास्योत्तरभागं पठित्वा ब्राह्मणभोजनादिकं कुर्यात् । स्वार्थप्रयोगे तु स्वशिरस्येव हस्तदानम् । यावत्फलोदयमावृत्तिरपि संप्रदायसिद्धा, 'आवृत्तिरसकृदुपदेशात्' इत्यधिकरणन्यायसिद्धा च । आवृत्तिपक्षे प्रथमभागं पठित्वा मध्यभागमेव यथासंकल्पमावर्त्य चरमभागं पठेदिति विशेषः । एवमुत्तरत्र प्रयोगविधिरूह्यः ॥ २५७ ॥ ज्वरादिसाधारण्येन रोगमात्रहरं प्रयोगान्तरमाह—**सर्वेति** । सर्वे च ते व्याधयश्च, सर्वेषां व्याधय इति वा । स्पृष्ट्वा स्पृशन्नेव । इदं नामसहस्रं तस्य मन्त्रितस्य भस्मनो धारणादेव उद्धूलनमात्रात् ॥ २५८ ॥ अथ क्रमप्राप्ते दीर्घायुष्यप्रदायकमित्यत्रोक्ते ग्रहविषबाधानाशने उद्दिश्य द्वौ प्रयोगावाह द्वाभ्याम् । संमन्त्र्य कुम्भमुखे हस्तं क्षिपन्नेव स्तोत्रं पठित्वा । मुने अगस्त्य । अभिषिञ्चेत्स्नापयेत् । मन्त्रितेनैव जलेनेति शेषः । ग्रहा बालग्रहाद्याः पिशाचा दुष्टस्थानीया नवग्रहाश्च तैर्ग्रस्तान् । पीडया मुमूर्षुकृतान् ॥ २५९ ॥ श्रीपुरं यत्रयत्रास्ति तत्रतत्रैकः सुधाह्रदोऽस्ति । सगुणब्रह्मोपासकप्राप्यायामपराजिताख्यनगर्यामरण्याख्यौ द्वौ सुधाह्रदौ स्तः । ब्रह्मरन्ध्रेऽप्येकोऽस्ति । तेषां मध्ये विद्यमानत्वेन, यथाधिकारं ध्यात्वा ध्यायन्मनसाभ्यर्च्येति शेषः । विषं स्थावरजंगमोभयरूपम् । अयं च प्रयोगः

वन्ध्यानां पुत्रलाभाय नामसाहस्रमन्त्रितम् ।
नवनीतं प्रदद्यात्तु पुत्रलाभो भवेद्ध्रुवम् ॥ २६१ ॥
देव्याः पाशेन संवद्धामाकृष्टामङ्कुशेन च ।
ध्यात्वाभीष्टां स्त्रियं रात्रौ पठेन्नामसहस्रकम् ॥ २६२ ॥
आयाति स्वसमीपं सा यद्यप्यन्तःपुरं गता ।

प्रायेण न व्यधिकरणफलकः ॥ २६० ॥ पुत्रप्रदमपुत्राणामित्यंशं क्रमप्राप्तत्वाद्विवेचयति—**वन्ध्यानामिति** । अप्रजा-मृतप्रजा-स्त्रीप्रजा-काकवन्ध्यानां संग्रहाय वन्ध्यानामिति बहुवचनम् । पुत्रलाभायेति पुत्रशब्दोऽपत्यमात्रवचनः । 'पुमांस एव मे पुत्रा जायेरन्नि'त्यत्र पुमांस इति विशेषणस्मारस्यात् । 'पौत्री मातामहस्तेने'ति मनुस्मृतिप्रयोगाच्च । पुत्रीशब्दात्तद्धितस्त्रीकारे पौत्रेयीति रूपापत्तेः । अथवा पुत्राश्च दुहितरश्चेति विग्रहे 'भ्रातृपुत्रौ स्वसृदुहितृभ्या'मित्येकशेषे पुत्रा इत्येव रूपं तेषां लाभः पुत्रलाभस्तस्मै । तेन कन्येच्छूनामप्यस्मिन्प्रयोगेऽधिकारः । 'प्रदद्यात् तमस्मै भक्षं प्रयच्छे'दित्यत्र व्यवधारणकल्पनया तेन यजेतेत्यर्थवदिहापि वन्ध्या भक्षयेदित्यर्थः । तेन वन्ध्याया गुरूपास्तिलभे स्वयमपि मन्त्रयित्वा प्राश्नीयादिति सिद्ध्यति । पुत्राणां दुहितॄणां च लाभो ध्रुवं निश्चयेन भवेत् ॥ २६१ ॥ इदानीं पुरुषार्थप्रदायकमिति विशेषणं क्रमप्राप्तत्वात्षष्ठत्रिंशद्भिः श्लोकैर्विवेचयितुकामस्तदन्तर्गते त्रिवर्गे चरमस्यापि पुत्रपदप्रयोगेणेह प्रथमं स्त्रीद्वारोपस्थितत्वात्तत्प्राप्तिफलकं वनिताकर्षणप्रयोगमाह सार्धेन—**देव्या इति** । अत्र राज्ञः पुरुष इत्यादाविव देव्याः शब्दमर्यादया गुणत्वेनान्वयेऽप्यर्थतः प्राधान्यादभीप्सितां स्त्रियं पाशेन सम्यग्बद्धामङ्कुशेन कर्षन्तीं देवीं ध्यायन्पठेदित्यर्थः । मन्त्रजपमात्रे तद्देवताध्यानस्यावश्यकत्वेन प्राप्तत्वात्तदाश्रयेण गुणफलसंबन्धमात्रविधानार्थत्वादस्य वाक्यस्य । नच पठनाश्रयेण पाशाकृष्टस्त्रीध्यानरूपगुणः फलाय विधीयतामिति वाच्यम् । तथापि देवीध्यानस्य विध्यन्तरप्राप्तस्य निरपवादत्वेन फलाय विधीयमानस्य ध्येयरूपगुणस्य विषयितासंबन्धेन ध्यानाश्रितस्यैव सामञ्जस्यात् । ध्यानपाठयोरेककालीनत्वादिविप्रकृष्टसंबन्धस्याप्रयोजनकत्वेनाश्रयिभावसंबन्धायोगयत्वात् । रात्रौ रात्रिमभिव्याप्य पठेत् ॥ २६२ ॥ अन्तःपुरं शुद्धान्तं गता यद्यपि तथापि तादृशादपि स्थलात्समीपमायातीत्यन्वयः । नन्वभीष्टा स्त्री किमिह स्वीया परकीया वा । आद्ये यद्यप्यन्तःपुरं गतेति विरुध्यते । तेन राजमहिषीप्रतीतेः । नच राजकर्तृक एवायं प्रयोगोऽस्तु राजसूयादिवाक्य इवाधिकारिविशेषाश्रयणात् । तस्यान्तःपुरे तु साध्यताया अभावेनाकर्षणवैयर्थ्याच्च । नच कौतुकार्थं प्रवृत्तिरस्तु । यद्यपीति स्वारस्येन दुःसाध्यताप्रतीत्या कुतुकिनोऽधिकाराभावप्रतीत्या अकुतुकिनोऽधिकाराभावाप्रतीतेः । अन्यधर्मस्य विधिविहितत्वायोग इति चेन्न । स्वस्त्रिया एव बलात्कारहरणादिना

राजाकर्षणकामश्चेद्राजावसथदिङ्मुखः ॥ २६३ ॥
त्रिरात्रं यः पठेदेतच्छ्रीदेवीध्यानतत्परः ।
स राजा पारवश्येन तुरंगं वा मतङ्गजम् ॥ २६४ ॥
आरुह्य याति निकटं दासवत्प्रणिपत्य च ।
तस्मै राज्यं च कोशं च दद्यादेव वशंगतः ॥ २६५ ॥

निमित्तेन दुःसाध्यतायामेतद्विधिसार्थक्यात् । अस्तिहि हनुगुण्ठपीठमाहात्म्ये इतिहासः—नारायणाख्यस्य मुनेः चन्द्रवदनाख्या भार्या शक्रात्मजेन सेतुराजेनापहृता मुनिना देवीमाराध्यैव पुनरानीतेति । अथवा परकायाकर्षणस्य धर्माविरोधेनैव फलान्तरं कल्प्यम् । अस्तु वा संभोगार्थमेवाकर्षणम् । तथापि तस्य भावनायां भाव्यत्वेनैवान्वयान्न विधेयत्वम् । तदुक्तं तन्त्रवार्तिके 'फलांशे भावनायाश्च प्रत्ययो न विधायकः । वक्ष्यते जैमिनिश्चात्र तस्य नित्यार्थलक्षणे'ति विहितत्वाभावाच्च न परकीयाभिलाषस्य धर्मत्वम् । तत्करणीभूते प्रकृतिप्रयोगे तु श्येनयाग इव धर्मत्वम् । यानि तु 'सर्वासामेव योषाणां कौलिकः प्रथमः पति'रित्यादीनि श्यामारहस्यकारैर्लिखितानि वचनानि तदर्थनिष्कर्षरीत्या तु धर्मत्वं गुरुमुखादेवावगन्तव्यम् ॥ अत्र त्रिवर्गे मध्यमस्य कामानन्तरमुपस्थितत्वात्तत्फलकेषु भूरिषु प्रयोगेषु राजाकर्षणमाह सार्धद्वयेन—**राजेति** । चेदित्यनेनाकर्षणकामनायां सत्यां तदुद्देशेन प्रयोगकरण एवेदं फलं सिध्यति । उत्तरत्र वक्ष्यमाणानि तु षट्कर्माणि तत्तदुद्देशेन प्रयोगकरणेऽप्यानुषङ्गिकाणि सत्यकामस्यापि सिध्यन्तीति सूचितम् । राज्ञ आवसथो गृहं स्वासनस्थलाद्यस्यां दिशि वर्तते तदभिमुख इत्यर्थः । सामान्यविधानात्प्रागुदङ्मुखत्वयोः प्राप्तयोरयमपवादः ॥ २६३ ॥ त्रिरात्रमित्यत्यन्तसंयोगे द्वितीया । त्रिरात्रपदं चाहोरात्रपरम् । त्रिरात्रमाशौचमित्यादौ तथा दर्शनात् । तेन नित्यकर्मापि संकोच्य लौकिकमप्यावश्यकमात्रमेव कृत्वानवरतमिदं चतुर्विंशतिप्रहरपर्यन्तं पठेदिति सिध्यति । अतएवावृत्तिसंख्याया नियमः । श्रीदेवीध्याने राजानं पाशेन बध्वाङ्कुशेनाकर्षन्त्याः पूर्वोपस्थिताया देव्या ध्याने तत्पर आसक्तः । नचैवं पूर्वप्रयोगेण गतार्थता । तत्रैका यामचतुष्टयात्मिका रात्रिरेव कालः प्राङ्मुखोदङ्मुखत्वयोर्नियमश्च वैकल्पिकः । अत्र तु त्रयोऽहोरात्राः कालः राजगृहदिङ्मुखत्वनियमश्चेति विशेषता । वस्तुतस्तु कालत एवानयोर्वैलक्षण्यम् । आकृष्यमाणदिङ्मुखत्वस्याकर्षणमात्रे आवश्यकतायास्तन्त्रान्तरसिद्धत्वात् । तथाच वामकेश्वरतन्त्रे 'तदाशाभिमुखो भूत्वा त्रिपुरीकृतविग्रहः । बध्वा तु क्षोभिणीमुद्रां विद्यामष्टशतं जपे'दित्यारभ्य 'भ्रमन्तीं भावयेन्नारीं योजनानां शतैरपि' इत्यन्तम् । नित्यातन्त्रेऽपि कुरुकुल्लापटले 'वियां त्रयोदशार्णा तु तद्दिग्वक्त्रिभिर्दिनैः । त्रियमाकर्षये'दित्यादि । ज्ञानार्णवेऽपि 'तदाशाभिमुखो भूत्वा स्वयं देवीस्वरूपक' इत्यादि । एवं दक्षिणामूर्तिसंहितादिकमुदाहार्यम् । यो येन मनसोद्दिष्टः स एव राजेत्यर्थः । चोरवदेकाकी नायातीति द्योतनाय

रहस्यनामसाहस्रं यः कीर्तयति नित्यशः ।
तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने ॥ २६६ ॥
यस्त्विदं नामसाहस्रं सकृत्पठति भक्तिमान् ।
तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः ॥ २६७ ॥
यो वाभिचारं कुरुते नामसाहस्रपाठके ।
निवर्त्य तत्क्रियां हन्यात्तं वै प्रत्यङ्गिरा स्वयम् ॥ २६८ ॥
ये क्रूरदृष्ट्या वीक्षन्ते नामसाहस्रपाठकम् ।
तानन्धान्कुरुते क्षिप्रं स्वयं मार्तण्डभैरवः ॥ २६९ ॥
धनं यो हरते चोरैर्नामसाहस्रजापिनः ।
यत्र कुत्र स्थितं वापि क्षेत्रपालो निहन्ति तम् ॥ २७० ॥

तुरङ्गं वेल्यादि । तस्मै प्रयोक्रे वशंगतः तदाज्ञापरवशः सन् ॥ २६४ ॥ २६५ ॥ अथाकर्षेणेन वशीकरणादिषट्कर्मणामुपस्थितत्वात्तत्प्रयोगानाह सप्तभिः—**रहस्येति ।** नित्यशः नित्यकर्माविरोधेन । यावज्जीवमनवरतम् । मुखालोकमात्रेणेति मात्रपदेन मोहनोद्देश्यकत्वं प्रयोगे व्यावर्त्यते । तेन संकल्पे 'लोकत्रयमोहनार्थं'मित्युल्लेखो न कार्यः । मुह्येत् वशंवदं भवेत् ॥ २६६ ॥ इत आरभ्योत्तरोत्तरमल्पायासान्प्रयोगान्विवक्षुस्तत्र मारणमाह—**यस्त्विति ।** सकृत्पठति नित्यश इत्यनुवर्त्य यावज्जीवं प्रतिदिनमेकवारं पठति । शरभेश्वरस्तदाख्यः शिवस्यावतारः नृसिंहावतारस्य विष्णोरपनयनायेति लैङ्गे कालिकापुराणादौ च प्रसिद्धम् । नारसिंहप्रयोगपरावर्तनाय शरभसालुवाख्यमन्त्रप्रयोगास्तन्त्रेषु प्रसिद्धतराः । तेन विष्णोरपि मारक इति मारकेषूक्तमत्वादिह स एवास्मिन्कर्मणि गृहीतः । तेनेदं ध्वनितं भवति—ईदृशोऽपि बलवान्देवः प्रस्थानान्तरशीलोऽपि श्रीविद्योपासकेनैदंपर्येणानुपासितोऽप्यनेनाविदितोऽप्येतच्छ्रवणसंहाराय स्वयमेव यतते । तस्मात्तन्मात्रोपासकानपेक्ष्य ललितोपासकस्य निरवधिकं माहात्म्यमिति । अन्यथा 'तस्य ये शत्रवः सद्यो नश्यन्ति स्वत एव ते' इत्येव ब्रूयात् । एवमुत्तरत्रापि प्रत्यङ्गिरादिपञ्चकग्रहणे ध्वनिर्विज्ञेयः ॥ २६७ ॥ **यो वेति ।** अभिचारं अदृष्टद्वारकवैरिमरणसाधनक्रियां श्येनयागादिरूपां निवर्त्य परावर्त्य । पराङ्मुखीकृत्येति यावत् । प्रत्यङ्गिरा अथर्वणभद्रकालीदेवता । अथर्वणवेदमन्त्रकाण्डे शौनकशाखायां द्वात्रिंशदृचः । पिप्पलादशाखायां त्वष्टाचत्वारिंशदृचस्तदीया आम्नायन्ते । तत्प्रयोगाश्च नारदतन्त्रे प्रसिद्धाः ॥ २६८ ॥ क्रूरया क्रोधरक्तया दृष्ट्या । मार्तण्डभैरवो नाम शिवस्यैवावतारः कर्णाटकदेशे प्रेमपुरे जातो महाराष्ट्रदेशेऽतीव विस्तृतो भैरालतन्त्रे रुद्रयामले यस्य मन्त्राः प्रयोगाश्च प्रसिद्धाः ॥२६९॥ यश्चोराणामधिपतेः । चोरैः करणकारकैः । क्षेत्रपालः दारुकासुरवधार्थं कालिकावतारोत्तरं तद्वधेऽपि तस्याः कोपशान्तिमजातामालोक्य शिव एव बालो भूत्वा तत्स्तनपानमिषेण क्रोधाग्निं पपौ । सोऽयं

विद्यासु कुरुते वादं यो विद्वान्नामजापिनः ।
तस्य वाक्तम्भनं सद्यः करोति नकुलीश्वरी ॥ २७१ ॥
यो राजा कुरुते वैरं नामसाहस्रजापिनः ।
चतुरङ्गबलं तस्य दण्डिनी संहरेत्स्वयम् ॥ २७२ ॥
यः पठेन्नामसाहस्रं षण्मासं भक्तिसंयुतः ।
लक्ष्मीश्चाञ्चल्यरहिता सदा तिष्ठति तद्गृहे ॥ २७३ ॥
मासमेकं प्रतिदिनं त्रिवारं यः पठेन्नरः ।
भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः ॥ २७४ ॥
यस्त्वेकवारं पठति पक्षमेकमतन्द्रितः ।
मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात् ॥ २७५ ॥

क्षेत्रपालावतारो लेङ्गे प्रसिद्धस्तन्मन्त्राश्च तन्त्रेषु धृताः । तं चोरराजं तन्नाशेन चोराणामुच्चाटनमर्थसिद्धमिति ॥ २७० ॥ विद्यासु चतुर्दशसु । वादपदं जल्पवितण्डयोरुपलक्षणम् । ऋग्वेदे आरण्यके नकुलीवागीश्वर्या मन्त्रः समाम्नातः । भगवता परशुरामेणापि कल्पसूत्र उद्धृतः । प्रपञ्चसारादावेतस्य प्रयोगाः प्रसिद्धाः ॥ २७१ ॥ चतुरङ्गबलं हस्त्यश्वरथपादातरूपं सैन्यम् । दण्डिनी दण्डनाथा या वाराहीतन्त्रेषु प्रसिद्धा । संहरेत् सैनिकानां परस्परविद्वेषणेन कतिपयानामुच्चाटनेन नाशनेन च संभूयैककार्यकारित्वाभावो बलसंहारस्तं कुर्यात् । एवं षड्कर्माण्युक्तानि । तानि च 'शान्तिर्वश्यं स्तम्भनं च विद्वेषोच्चाटमारण'मिति शाबरचिन्तामणावुक्तानि । अत्रान्यान्येवोच्यन्ते परंतु तेषां यथायथान्योन्यमन्तर्भावो द्रष्टव्यः । तदुक्तं तन्त्रराजे 'रक्षा शान्तिर्जपो लाभो निग्रहो निधनं तथा । षड्कर्माणि तदंशत्वादन्येषामपृथक्स्थिति'रिति । अन्तर्भावप्रकारस्तल्लक्षणानि च विस्तरभयान्नोच्यन्ते तानि सौभाग्यरत्नाकरे त्रयोविंशे तरङ्गे द्रष्टव्यानि ॥ २७२ ॥ अथार्थप्रदावेव द्वौ प्रयोगावाह द्वाभ्याम्—**यः पठेदिति** । सकृदित्यनुवर्तते । षण्मासपर्यन्तं प्रत्यहं सकृद्यः पठेत्तद्गृहे सदा यावज्जीवं लक्ष्मीस्तिष्ठति । चाञ्चल्यं हि लक्ष्म्याः स्वभावः । 'स्वभावो दुरतिक्रम' इति हि प्रसिद्धिः । तादृशमपि दोषं परित्यजेदित्यर्थः ॥ २७३ ॥ मासमेकमिति षड्कापवादः । त्रिवारमिति तु सकृदित्यस्यापवादः । एकदैव त्रिः पठेत्संध्याभेदेन वेत्यविशेषः । भारती सरस्वती । अथवा भा प्रतिभा रतिरभिरुचिरास्था च । क्विजन्तान्ङीषि रतीति रूपम् । जिह्वाग्रमेव रङ्गं नृत्यभूमिरिति रूपकं नृत्यान्तरानुगुण्याय । घोषणगुणनिकापूर्वावलोकनपाठनादिकमनपेक्ष्यैव सर्वा अपि विद्या अविस्मृतास्तिष्ठन्ति । अध्ययनं त्वपेक्षितमेव । विद्याप्राप्तौ गुरोरेवासाधारणकारणत्वादिति भावः ॥ २७४ ॥ सिंहावलोकनन्यायेन पुनः कामप्रदं प्रयोगमाह—

---

१ नकुलीमन्त्रश्च 'ओंग्रापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चास्मामिह वादयेत् ।' इति ।

यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः ।
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥ २७६ ॥
यो वेत्ति नामसाहस्रं तस्मै देयं द्विजन्मने ।
अन्नं वस्त्रं धनं धान्यं नान्येभ्यस्तु कदाचन ॥ २७७ ॥
श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति ।
यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः ॥ २७८ ॥

पक्षमिति मासापवादः । एकवारमिति त्रिरावृत्तेः । अतन्द्रितो निद्राप्रमीलादिरहितः । इदं च सर्वत्राप्यावश्यकमप्यस्मिन्प्रयोगेऽत्यावश्यकमिति द्योतनायोक्तं तेन च निशीथेऽयं प्रयोग इत्यपि सूचितम् । तस्य तत्कर्तृकात्तत्कर्मकाद्वा । अत्र मात्रपदाभावेन संकल्पे स्त्रीणां वशीकरणार्थमित्युल्लेखः कार्य इति ध्वन्यते ॥ २७५ ॥ एवमर्थकामावुक्त्वा धर्मप्रदान्प्रयोगान्बहुभिः प्रकारैर्वक्तुमुपक्रममाणः प्रथमप्रयत्नसाध्यं धर्ममाह—**य इति** । जन्ममध्य इत्यनेन यावज्जीवषण्मासैकमासैकपक्षाणामपवादः । एकवारमित्यस्यैवानुवृत्त्या सिद्धावपि मण्डूकप्लुत्या त्रिवारपदानुवृत्तिशङ्का मा प्रसाङ्क्षीदिति सकृदित्यनेन प्रतिप्रसवः । तद्दृष्टिगोचराः तत्कर्तृकचाक्षुषप्रत्यक्षविषयाः सर्वे प्राणिन इति शेषः ॥ २७६ ॥ अथ दानक्रियासंप्रदानकारकनिष्ठपात्रताशरीरघटकत्वेन धर्मप्रदत्वमाह चतुर्भिः—**य इति** । देयमित्यत्र ललितोपासकेनेति शेषः । श्रीदेवीप्रीतिमिच्छतेत्युत्तरग्रन्थानुसारात् । तेनानुपासकेनान्येभ्योऽपि देयं संप्रदानत्वाविशेषादिति सिद्ध्यति । 'प्रवृत्ते शाम्भवीचक्रे सर्वे वर्णा द्विजातय' इति कुलार्णववचनेन ब्राह्मणधर्मातिदेशो न श्रुतिस्मृतिप्राप्तसंप्रदानत्वविषयः, अपितु यागसमयेऽस्पृश्यतादिधर्ममात्रपर इत्याशयेनाह—**द्विजन्मन इति** । ब्राह्मणायेत्यर्थः । अन्नमित्यादिदेयमात्रोपलक्षणम् । अन्येभ्यः सहस्रनामस्त्रनादरशीलेभ्य उपासकाभासब्राह्मणेभ्यः कदाचन श्रुतिस्मृतिविहितार्त्विज्यश्राद्धादिकालेऽपि न दद्यादित्यर्थः । तत्राप्युपास्तिपरा एवावश्यका इत्याशयः ॥ २७७ ॥ मन्त्रराजं श्रीविद्याम् । अत्र त्रयाणां समुच्चये सत्पात्रतां, अन्यतमाभावे तारतम्यं त्रयाणामप्यभावे पात्रत्वाभावश्चेति न्यायत एव सिद्ध्यति । तदयं निष्कर्षः—संप्रदानतावच्छेदकानामेषां त्रयाणां विशेषणानां मध्ये एकैकविशेषणकास्त्रयो द्विद्विविशेषणका अपि त्रयस्त्रिविशेषणक एकस्त्रयाभाववानन्य इत्यष्टविधा ब्राह्मणाः प्रस्तारशैल्या भासन्ते यद्यपि तथापि चक्रराजार्चकत्वस्य मन्त्रराजवेत्तृत्वव्याप्यत्वेन तन्मन्त्रविशेषको न संभाव्यते । अतएव च मन्त्रेतरविशेषणद्वयमात्रकोऽपि खपुष्पमेव । तेन षाड्विध्यमेव ब्राह्मणानाम् । तेषु त्रिगुणक उत्तमः, द्विगुणकौ मध्यमौ । तयोरपि मध्ये मन्त्रवेत्तृत्वचक्रार्चकत्वरूपगुणद्वयशालीनमपेक्ष्य मन्त्रवेत्तृत्वनामकीर्तनरूपगुणद्वयशाली श्रेष्ठः, एकगुणकौ कनिष्ठौ । तयोरपि मध्ये मन्त्रवेदनमात्रगुणको वरीयान् । नामकीर्तनमात्रगुणकः कनिष्ठतरः । मन्त्रराहित्ये नामकीर्तनेऽधिकाराभावेनानधिकारिनिष्ठस्य गुणस्यापि शूद्राधीतवेदवाक्यन्यायेनाप्रयोजकत्वात् । अभावत्रयवांस्तु नैव पात्रमिति विवेकः ।

तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता ।
यः कीर्तयति नामानि मन्त्रराजं न वेत्ति यः ॥ २७९ ॥
पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ।
परीक्ष्य विद्याविदुषस्तेभ्यो दद्याद्विचक्षणः ॥ २८० ॥
श्रीमन्त्रराजसदृशो यथा मन्त्रो न विद्यते ।

॥ २७८ ॥ तस्मै सत्पात्राय प्रयत्नेनापि तस्मा एव देयम् । उत्तमालाभे मध्यमायापि देयमित्यादिरर्थो न्यायलब्धोऽपि विधिरेव । तदुक्तं पुलस्त्यस्मृतौ 'अदृष्टार्थो विधिः प्रोक्तो दृष्टार्थश्च द्वितीयकः । उभयार्थस्तृतीयस्तु न्यायमूलश्चतुर्थक' इति । इममेवार्थं वदन्नान्येभ्यस्तु कदाचनेत्यंशं विशदयति । 'न कीर्तयति नामानि मन्त्रराजं न वेत्ति यः । पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम्' इति । अत्रच त्रिगुणत्रिगुणकातिरिक्तान्पञ्चापि य इत्यनेनोद्दिश्य पशुतुल्यत्वं विधित्सितं तेषां च त्रिगुणत्वावच्छिन्नप्रतियोगिताभाववत्त्वेनानुगमः । एकगुणकद्विगुणकेष्वपि व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य तस्य सुलभत्वात् । सचाभाव उद्देश्यतावच्छेदकः पूर्वार्धेन निरूपितः । तत्र यद्यपि द्वयोरेव गुणयोरभाव उदङ्कितः प्रतीयते तथापि पात्रलक्षणे त्रयाणां विशेषणानामुपादानात्तदनुसारेण पशुलक्षणेऽपि त्रयाणामभाव एव विवक्षितः, परंतु व्यापकाभावेन व्याप्याभावोऽर्थायात इत्याशयेन चक्रराजं नार्चतीत्यंशः कण्ठरवेणोक्तः । मन्त्रवेदनस्य चक्रार्चकत्वव्यापकत्वात् ॥ २७९ ॥ पशुतुल्य इति पशुश्च पशुश्चेति विग्रहेणैकशेषे ताभ्यां तुल्य इति समासः । तत्रैकः पशुशब्दश्चतुष्पात्परः । अन्यश्च निरूढलक्षणया 'विद्याविहीनः पशु'रिति प्रसिद्धपशुपरः । विद्या च श्रीविद्यैव । तदुक्तं ब्रह्माण्डपुराण एव 'न शिल्पादिज्ञानयुक्ते विद्वच्छब्दः प्रयुज्यते । मोक्षैकहेतुविद्यावान्यः स विद्वानितीर्यते । मोक्षैकहेतुविद्या च श्रीविद्या नात्र संशयः' इति । ततश्चोद्दिष्टानां पञ्चानां मध्ये त्रयाणां विद्यावत्त्वेऽपि चक्रार्चननामकीर्तनयोरधिकारसत्त्वेऽप्यकरणाद्विद्यमानाप्यविद्यमानप्रायैव विद्येति तेषां तादृशपशुतुल्यता । नाममात्रपाठिनो भावत्रयवतश्च चतुष्पात्पशुतुल्यतेति विवेकः । तस्मै दत्तं तत्संप्रदानकं दानम् । भावे क्तः । निरर्थकं अर्थरहितम् । अर्थशब्दस्तरतमभावापन्नः फलव्यक्तीराचष्टे । तेन विशिष्टफलाभावः फलसामान्याभावश्चेति पात्रतारतम्येनान्वयितव्यम् । एवमुक्तार्थवैपरीत्ये दण्डं निपात्योपक्रान्तं निगमयत्यर्धेन । तस्मादितिशेषः । विद्याविषये विद्वत्त्वं नाम यावदध्येनोपास्तिशालित्वम् । तच्च ललितार्चननामकीर्तनसाहित्ये सत्येव संपद्यत इति गुणत्रयशीलतां परीक्ष्य तेभ्यो दद्यादित्यर्थः । तेभ्य इति पञ्चमी वा । तेषामेव सत्पात्रत्वादन्येषां तदभावात्पात्र एव दानविधानादन्यत्र तन्निषेधादिति हेतुभ्य इत्यर्थः । अस्मिन्पक्षे न शेषः पूरणीयः । विद्याविदामेव संप्रदानत्वमिति नियमस्तु परीक्षाया दृष्टार्थत्वबलादेव सेत्स्यति ॥ २८० ॥ त्रयाणां च गुणानां परस्परमुपमानोपमेयभावेनोपमाना-

देवता ललितातुल्या यथा नास्ति घटोद्भव ॥ २८१ ॥
रहस्यनामसाहस्रतुल्या नास्ति तथा स्तुतिः ।
लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम् ॥ २८२ ॥
समर्चयेत्सदा भक्त्या तस्य तुष्यति सुन्दरी ।
बहुनात्र किमुक्तेन शृणु त्वं कुम्भसंभव ॥ २८३ ॥
नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु विद्यते ।
तस्मादुपासको नित्यं कीर्तयेदिदमादरात् ॥ २८४ ॥

न्तरविरहद्वारात्युत्तमत्वं ध्वनयंस्तेषां सत्पात्रतावच्छेदकतायां कथन्ताशङ्कामपाकरोति सार्धेन । अत्र यथातथेत्यनयोर्वैपरीत्येनाप्यन्वयो द्रष्टव्यः ॥ २८१ ॥ इदानीमनुपासकस्याप्येतस्तोत्रं धर्मप्रदमित्याह । यस्तु यः कश्चिदपि । उपासकोऽनुपासको वेत्यर्थः । अनुपासकस्य नामकीर्तनेऽधिकाराभावेऽपि तत्पुस्तकार्चनेऽधिकारस्य निरावाधत्वात् ॥ २८२ ॥ सदा यावज्जीवं । तस्य अनुपासकस्यापि किमुतोपासकस्येति भावः । यद्यप्यनेनैव न्यायेन पुस्तकार्चनेनापि तुष्यति किमुत कीर्तनेनेति कैमुतिकन्यायेन कीर्तन एव तात्पर्यम्, तस्मात्कीर्तयेदित्युत्तरत्रोपसंहारो युज्यत इति सुवचं, तथापि 'स्वाध्यायोऽध्येतव्य' इति वचनेऽध्ययनपदस्य गुरुमुखोच्चारणानूच्चारणे शक्तत्वेऽपि तत्करणकार्थज्ञानभाव्यकभावनाविधानपरत्ववदिहापि नामानि कीर्तयेदिति विधेरप्यर्थज्ञानपर्यन्तता निर्विवादा । तेन 'अप्येकं नाम यो वेत्ति धात्वर्थनिगमादिभिः । सोऽपि श्रीललितालोके कल्पकोटीर्वसेन्नर' इति देवीपुराणे, 'अनधीतमविज्ञातं निगदेनैव पठ्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचि'दिति स्मृत्यन्तरेषु च वचनान्यर्थज्ञानाज्ञानयोः प्रशंसानिन्दापराणि संगच्छन्ते । अर्थज्ञानान्तसामर्थ्याभावे तु निगदमात्रपरापि सा भावना भवितुमर्हति । 'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी'ति न्यायात् । अतएव 'योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मे'ति श्रुतावर्थज्ञानप्राप्यफले सकलत्वविशेषणेन शब्दज्ञानमात्रेणापि किंचिद्विकलं फलमस्तीति ज्ञापितम् । ततश्च तुल्यन्यायेन शब्दपाठेऽप्यसमर्थस्य पुस्तकसंग्रहमात्रमपि न्यायलभ्यम् । उच्चारणस्य जन्मान्तरे अर्थज्ञानप्रदत्ववत्पुस्तकसंग्रहस्याप्युच्चारणप्रदत्वं जन्मान्तरे संभवतीति सुवचम् । अतएव तन्त्रराजादिष्वसंप्रदायेनाङ्गहीनापि कृतोपासना जन्मान्तरे साङ्गसंप्रदायशुल्यै कल्पत इत्युक्तम् । तेन पुस्तकार्चनमात्रमपि धर्म एव । सचानुपासकस्याप्यनिषिद्धत्वाज्जन्मान्तरे उपासनाप्राप्त्यर्थं कर्तव्य एव । उपासकस्य तु नामपाठेऽप्यसमर्थस्य नाम पठेदिति विधेर्यावच्छक्तिपरिपालनायावश्यकृतम एव । नच 'कुलपुस्तकानि गोपये'दिति कल्पसूत्रोक्तविधिविरोधादनुपासकस्य कथं पुस्तकार्चनेऽधिकार इति वाच्यम् । तस्यार्थज्ञानविद्वेषकदुर्जनपरत्वेन भाविकोपासनेच्छुसज्जनपरत्वाभावात् । तथासत्यदृष्टार्थतापत्तेरित्यन्यदेतत् । उपासकानां तु नामपाठशक्तानां पुस्तकार्चनमात्रं त्वावश्यकमिति तु निरावाधमेव । अयंच न्याय एतदर्थज्ञानोपायभूतभाष्याध्ययनेऽपि

एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत्सकृत् ।
पद्मैर्वा तुलसीपुष्पैः कह्लारैर्वा कदम्बकैः ॥ २८५ ॥
चम्पकैर्जातिकुसुमैर्मल्लिकाकरवीरकैः ।
उत्पलैर्विल्वपत्रैर्वा कुन्दकेसरपाटलैः ॥ २८६ ॥
अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः ।
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ॥ २८७ ॥

तुल्य इत्याशयेन ग्रन्थान्तेऽस्माभिर्वक्ष्यते । 'अम्ब त्वत्पदयोः समर्पितमिदं भाष्यं त्वया कारितं त्वन्नामार्थविकासकं तव मुदे भूयादथ त्वां भजन् । यो नैनत्परिशीलयेन्न च पठेद्यः पुस्तकस्यापि वा संग्राहं न करोति तस्य ललितोपास्तिर्वृथा जायता'मिति । एवमनुपासकानामपि रक्षकम्, उपासकान्रक्षेदिति किमु वक्तव्यमित्याशयेन मध्य एव निगमयति सार्धेन ॥ २८३ ॥ २८४ ॥ अथात्युत्कृष्टधर्मप्रदं पूर्वोक्तराशिषट्कादिक्रमेण बुद्ध्याप्यपरिच्छेद्यफलकं योगमाह चतुर्भिः—**एभिरिति** । नामसाहस्रैरिति बहुवचनं नाम्नां प्रत्येकं करणत्वद्योतनाय, लक्षपूजादौ पुनःपुनरावृत्तिध्वननार्थं च । नामानि प्रातिपदिकानि सहस्रं येषु श्रीमात्रेनम इत्यादिललिताम्बिकायैनम इत्यन्तेषु चतुर्थीनमोन्तमन्त्रेषु तैर्नामसाहस्रैरिति वा । संप्रदायाच्च पुष्पप्रक्षेपावृत्तिः । तेन 'चतुर्लक्षाणुभिर्वेकं' 'चतुर्भिरधिमादत्ते' इत्यादाविव समुच्चयो माभूत् । अत्र पद्मकह्लारोत्पलानां परस्परवैलक्षण्यमवान्तरजातिभेदेनोह्यम् । तुलस्याः पुष्पैः फुल्लमञ्जरीभिः नतु तत्पत्रैः । सुन्दरीविषये तुलसीनिषेधस्यैतद्वल्लादेव पुष्पपरत्वौचित्यात् । अतएव स्पष्टमुक्तं नीलातन्त्रे 'नानोपहारवलिभिर्नानापुष्पैर्मनोरमैः । अपामार्गदलैर्भृङ्गैस्तुलसीदलवर्जितैः । पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये' इति । यत्तु तत्रैव 'देवीपूजा सदा शस्ता जलजैः स्थलजैरपि । विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसे'ति । तत्र निषिद्धस्वीकारो भक्त्यावश्यकत्वध्वननाय । 'पुष्पाणामप्यलाभे तु तत्पत्रैरर्चयेच्छिवा'मिति कालीपुराणवचनं नित्यकर्मपरम् । काम्ये कर्मणि प्रतिनिध्यभावस्य षष्ठाधिकरणसिद्धत्वात् । सुन्दरीविषये तुलसीनिषेधस्यैतद्वल्लादेव पत्रपरत्वौचित्यात्पत्रान्तरपरं च । पद्मादिषु तु सुसदृशत्वात् पूरणाय कह्लारादीनां ग्रहणं युज्यते । विष्णुना नेत्रकमलस्य तत्पूरणार्थमुपादानस्य लिङ्गपुराणे कथनाल्लिङ्गात् । कदम्बकैः अविशेषाद्विविधैरपि ॥ २८५ ॥ जातिकुसुमैरित्यत्र 'ङ्यापोः संज्ञाच्छन्दसोर्बहुल'मिति ह्रस्वः । जाती मालती । मल्लिका विचकिलम् । करवीरं हयमारः । कुन्दं माध्यम् । केसरं काश्मीरम् । पाटलं श्वेतरक्तं तिलपुष्पसदृशम् ॥ २८६ ॥ सुगन्धिपदमहिफेनादिदुर्गन्धिकुसुमानामेव निरासाय । निर्गन्धानामपि जपादीनां रक्तानां देवीप्रियत्वात् । 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इति समासान्तः । माधवी वासन्ती । मुखपदेन पुंनागवकुलादीनां ग्रहणम् । एतेषामप्यवान्तरतारतम्यमादित्यपुराणकालिकापुराणयोर्द्रष्टव्यम् । फेत्कारिणीतन्त्रे तु

---

१ 'ललिते मा भूद्भवत्यां मतिः' इति पाठः २४० पृष्ठे द्रष्टव्यः.

सा वेत्ति ललितादेवी स्वचक्रार्चनजं फलम् ।
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः ॥ २८८ ॥
प्रतिमासं पौर्णमास्यामेभिर्नामसहस्रकैः ।
रात्रौ यश्चक्रराजस्थामर्चयेत्परदेवताम् ॥ २८९ ॥
स एव ललितारूपस्तद्रूपा ललिता स्वयम् ।

विशेषः 'पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् । दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पयेत् । अधोमुखार्पणं नेष्टं पुष्पाञ्जलिविधिं विना ॥ लक्षपूजादिषु पुनः पुष्पमेकैकमर्पयेत् । समुदायेन चेत्पूजा लक्षपुष्पार्पणं न तदि'ति । अत्र हि द्वन्द्ववत्तदपवादकैकशेषोऽपि साहित्यार्थकः । 'एकादश प्रयाजान्यजती'त्यत्र सहितेष्वेवैकादशत्वस्य निवेशो न प्रातिस्विकमिति सिद्धान्तात् । ततश्च सुगन्धिकुसुमैरित्येकशेषवशान्मल्लिकाकरवीरयोः केतकीमाधव्यादीनां च द्वन्द्ववशाच्च समुच्चयेन करणत्वं मा प्रसाङ्क्षीदिति तदपवादाय पूर्वश्लोकयोर्वाकारः । सोऽपि च प्रतिपुष्पमन्वयितव्य इति ध्वनयितुं द्विस्त्रिः प्रयुक्तः । तथाच निरपेक्षकरणताबोधकतृतीयाविभक्तयोऽपि व्रीहियवन्यायेनानुगृहीता भवन्ति । महेश्वरः पञ्चप्रेतेषु चतुर्थः तस्याप्यसर्वज्ञत्वाद्वक्तुमसामर्थ्ये पूर्वोक्तराशिषङ्कादिगुणनोपायेन मनुष्याणां ज्ञातुं वक्तुं च सामर्थ्याभावः कैमुतिकन्यायेन सिद्ध इति फलस्यानवधिकत्वध्वनिः ॥ २८७ ॥ अतएव सर्वज्ञैकपरिच्छेद्यमित्याह—**सेति** । ब्रह्मादीनामज्ञातृत्वे परिकरालंकारेण हेतुगर्भं विशेषणम् । स्वल्पमेधस इति स्वल्पा मेधा धारणात्मिका बुद्धिर्येषां ते । 'नित्यमसिच् प्रजामेधयो'रिति समासान्तः । ननु राशिषङ्कवेद्यफलकं कठिनतरं प्रयोगमपेक्ष्यास्य पुष्पार्पणप्रयोगस्य सुलभत्वेन ततोऽप्यनवधिफलकत्वे कठिनतरप्रयोगे कस्यापि प्रवृत्त्ययोगादननुष्ठानलक्षणमप्रामाण्यं प्रसज्येतेति चेत् भ्रान्तोऽसि । कठिनतरप्रयोगस्यानिशनित्यादिपदघटितविधिबोध्यत्वेनाकरणे प्रत्यवायबोधनेन नित्यत्वात् । नित्याकरणे आयुष्करादिपुष्पार्पणादिकाम्यप्रयोगेष्वधिकाराभावस्योक्तत्वात् । नित्यस्यापि वचनबलात्काम्यत्वं त्वग्निहोत्रादिन्यायेन न विरुद्धमिति न प्रवृत्तिपराहतता । अथ प्रयोगविधौ विशेषः—'चक्रार्चनारम्भ एवापरिमितपुण्यप्राप्त्यर्थममुककुसुमैर्देवीं पूजयिष्यामीति संकल्प्य आसनपूजोत्तरं पूर्वभागं पठित्वा न्यासत्रयं कृत्वा प्रणवमुच्चार्य द्विताद्यैर्नमोन्तैश्चतुर्थ्यन्तनाममन्त्रैः 'ह्रींश्रींश्रीमात्रेनमः' इत्यादिरूपैरेकैकं पुष्पमेकैकमन्त्रान्ते यथोत्पन्नं तथा विन्दौ विनिक्षिप्य विजातीयपुष्पामिश्रणेन सजातीयैरेव संख्यां पूरयित्वा तदन्ते प्रणवमुच्चार्य न्यासत्रयं कृत्वा फलश्रुतिं पठित्वा पूजाशेषं समापयेदि'ति ॥ २८८ ॥ इत्थमियता प्रबन्धेन त्रिवर्गप्रदत्वमुक्त्वा क्रमप्राप्तं चतुर्थपुरुषार्थप्रदायकत्वमनेकधा दिदर्शयिषुः प्रथमं कैवल्याख्यपञ्चममुक्तिप्रदं प्रयोगमाह द्वाभ्याम्—**प्रतीति** । प्रतिपौर्णमासीति विहाय प्रतिमासमित्युक्तिर्यावज्जीवमित्यर्थबोधाय । तस्यापि प्रयोजनमुत्तरत्र यावज्जीवार्थक-प्रतिमासपदानुवृत्तिः । एभिः पूर्वोक्तान्यतमैः कुसुमैः ॥ २८९ ॥ सकृदर्चनस्य

न तयोर्विद्यते भेदो भेदकृत्पापकृद्भवेत् ॥ २९० ॥
महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम्।

ललितैकवेद्यफलकत्वे पुनःपुनरावृत्तार्चनस्य ललितैकरूपत्वं फलं न्यायलब्धमेवाह—**स एवेति**। परस्परप्रतियोगिकतादात्म्यबोधनायोद्देश्यविधेयभावविपरीत्येनाप्याह—**तद्रूपेति**। वास्तविकभेदे सत्यप्युपमेयोपमालंकारेणाप्येषोक्तिः सुसमर्थेति भ्रमं निरस्यति—**न तयोरिति**। देवीभक्तयोरित्यर्थः। भेदः वास्तविक इति शेषः। नात्र तृतीयसदृशव्यवच्छेदोऽपि तु तादात्म्यमेवेति भावः। वास्तव एव भेदोऽस्त्विति त्वाग्रहिणं दण्डयति—**भेदकृदिति**। देवीभक्तौ परस्परप्रतियोगिकसत्यभेदकृत्। नर्त्यामर्त्यत्वपूज्यपूजकभावादिरूपविरुद्धधर्माधिकरणत्वादिभेदसाधकानुमानप्रयोक्तेत्यर्थः। अद्वैतप्रतिपादकशास्त्रविरोधेन प्राप्यङ्गत्वहेतुकाशुचित्वानुमानप्रयोक्तृवदुपहसनीयतामाह—**पापकृदिति**। हेत्वाभासप्रयोगकृतत्वाच्छास्त्रविरुद्धत्वाच्च पापिष्ठ इत्यर्थः। मरणभ्रमोऽपि 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते' इति श्रुत्यैव निरस्त इति भावः॥ २९० ॥ अथेतोऽपि सुलभं चतुर्विधमुक्तिफलकं प्रयोगमाह **महानवम्यामिति**। यावज्जीवार्थकं प्रतिमासपदं रात्रिपदं चानुवर्तनीयम्। नवरात्रस्य चरमदिवसद्वयं **महानवमी**त्युच्यते। तच्च शिवशक्तिसामरस्यरूपम्। तत्र **सर्वजातीयानां** देवीपूजनेऽधिकारः। **तथाहि**—नवरात्रं द्विविधं, शारदं वासन्तं चेति। 'शरत्काले महापूजा क्रियते या च वार्षिकी' इति मार्कण्डेयपुराणस्थवचने वार्षिकीति पदस्य वर्षस्य वत्सरस्यादौ भवेति सांप्रदायिकैर्व्याख्यानात्, चकारादुभयोः समुच्चयस्य स्वरसतोऽवगमात्, चातुर्मास्याख्यवर्षतौ भवेति व्याख्यायाः शरदो वर्षर्तुत्वापादिकतायाः क्लिष्टत्वात्, प्रतिवर्षं क्रियमाणेति व्याख्यायामपि विशेषणवैयर्थ्यात्, 'वासन्ते नवरात्रेऽपि पूजयेद्रक्तदन्तिका'मिति रुद्रयामले स्पष्टं नवरात्रद्वैविध्यकथनाच्च। देवीभागवते तृतीयस्कन्धे कामबीजोपासकं सुदर्शनं प्रति देवीवाक्यम् 'शरत्काले महापूजा कर्तव्या मम सर्वदा। नवरात्रोत्सवं राजन्विधिवत्परिकल्पय॥ चैत्रे चाश्वयुजे मासि त्वया कार्यो महोत्सवः। नवरात्रे महाराज मम प्रीतिविधायक' इत्यादि। सौभाग्यरत्नाकरे त्वाषाढपौषयोरपि नवरात्रमुक्तम्। तत्र शारदनवरात्रस्याष्टमीनवम्यौ महापूर्वे। तदुक्तं कालिकापुराणे 'आश्विनस्य तु शुक्लस्य या भवेदष्टमी तिथिः। महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरी परा॥ ततोऽनु नवमी या स्यात्सा महानवमी स्मृता। सा तिथिः सर्वलोकानां पूजनीया शिवप्रिये'ति। धौम्योऽपि 'आश्विने मासि शुक्ले तु या स्यान्मूलेन चाष्टमी। सा महत्यष्टमी ज्ञेया तत्र देवी कृतालया'। ब्रह्माण्डपुराणेऽपि 'कन्यासमाश्रिते भानौ या स्यान्मूलेन चाष्टमी। सा महत्यष्टमी ज्ञेया न मुग्धा नवमीयुता'। मूलयोगोक्तिस्तु संभवाभिप्राया। तेन पूर्वाषाढायुतापि महाष्टम्येव। 'मूलऋक्षसमायुक्ता पूजनीया प्रयत्नतः। मूलाभावेऽपि कर्तव्या यदि स्यात्तोयसंयुते'ति वचनात्। तोयं पूर्वाषाढा। अस्या एव नक्षत्रद्वयान्यतरयोगे महानवमी-

अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता ॥ २९१ ॥

त्यपि संज्ञान्तरम् । तदुक्तं नृसिंहप्रासादे 'आश्वयुक्शुक्लपक्षे तु याष्टमी मूलसंयुता । पूर्वयापाढया सार्धमृक्षद्वययुतापि वा । सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभे'ति । भविष्योत्तरेऽपि 'कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता । मूलनक्षत्रसंयुक्ता सा महानवमी स्मृते'ति । विश्वरूपाचार्यैरपि 'आश्वयुक्शुक्लपक्षे तु याष्टमी मूलसंयुता । यदि स्याद्रविविद्धापि सा महानवमी स्मृते'ति । अत्राष्टमीमूलाभ्यां संयुता या तिथिः सा महानवमीति व्याख्यया नवम्येव महानवमीत्यर्थ इति केचिदिति यदुक्तं तद्भविष्योत्तरादिवचनविरोधादनादेयम् । सप्तमीवेधबोधकरविविद्धापदस्य रविवासरयुक्तेत्यर्थवर्णनापत्तेश्च । अनयोश्च परस्परविद्धत्वमपि प्रशस्तम् । तदुक्तं विष्णुधर्मोत्तरे 'अष्टम्या नवमी युक्ता नवम्या चाष्टमी युता । अर्धनारीश्वरप्राया उमामाहेश्वरी तिथि'रिति। भोजराजीयेऽपि 'अष्टम्यां पूज्यते रुद्रो नवम्यां शक्तिरिज्यते । उमाया नवमी प्रोक्ता हरस्य तिथिरष्टमी । द्वयोर्योगे महापुण्या उमामाहेश्वरी तिथिः' इति । तत्रैव सप्तमीवेधाभावो नवमीविद्धाष्टमीग्रहणे हेतुरुक्तः । 'न दिवा न निशापि च विष्टिहता नच सप्तमिशल्यलवोपहता । यदिवाष्टमिशेषभवा नवमी विबुधैरपि पूज्यतमा नवमी'ति । विष्ठ्या सप्तमिशल्यलवेन चोपहता न कार्या । अष्टमीशेषे नवमी चेत्सुराणामपि पूज्या नवमी च न भवतीत्यर्थः । अयमेव प्रकारो वासन्तनवरात्राष्टमीनवम्योर्निर्णयेऽपि नवरात्रप्रदीपे तथाभिधानात् । विश्वरूपाचार्यैरपि नवरात्रद्वयं प्रक्रम्य 'अष्टमीनवमीयुग्मे शिवक्षेत्रे महोत्सवः । शिवशक्त्योः सामरस्यात्पक्षयोरुभयोरपी'त्युक्तेः । शारदो वासन्तश्चेति नवरात्रस्य द्वौ पक्षौ तयोरुभयोरपीति तदर्थात् । अष्टम्यां च देवीपूजोक्ता देवीपुराणे 'आश्वयुक्शुक्लनवमी त्वष्टमी मूलसंयुता । सा महानवमी तस्यां जगन्मातरमर्चयेत्' इति । नवम्यां चोक्ता भविष्योत्तरपुराणे 'नवम्यां श्रीसमायुक्ता देवैः सर्वैः सुपूजिता । जघान महिषं दुष्टमवध्यं देवतादिभिः ॥ लब्ध्वाभिषेकं वरदा शुक्ले चाश्वयुजस्य तु । तस्मात्सा तत्र संपूज्या नवम्यां चण्डिका बुधैः ॥ महत्त्वं हि यतः प्राप्ता अत्र देवी सरस्वती । अतोऽर्थं महती प्रोक्ता नवमीयं सदा बुधै'रिति । इयं च पूजा निशीथ एव । 'आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् । देवीं च पूजयित्वा ये अर्धरात्रेऽष्टमीषु चे'ति देवीपुराणात् । शक्तिरहस्येऽपि 'कन्यासंस्थे रवावीशां शुक्लाष्टम्यां प्रपूजयेत् । सोपवासो निशार्धे तु महाविभवविस्तरै'रिति । विश्वरूपाचार्यैरपि 'अष्टमीरात्रिमासाद्य पूजां गृह्णाति पार्वती । निशार्धे पूजिता देवी वैष्णवी पापनाशिनी । तस्मात्सर्वप्रयत्नेन ह्यष्टम्यां निशि पूजये'दिति । यत्तु भविष्योत्तरे 'तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी । प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह । अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवै'रिति वचनं तत्राहःपदमहोरात्रपरम् । एतद्बलादष्टम्यामहन्येव पूजनमिति त्वन्धानां प्रलापः । नवम्यां तु दिवैव पूजयेदित्याहुः । इदंच पूजाद्वयं प्रत्येकमुत्पन्नमपि परस्परसापेक्षमेव फलजनकम् । 'अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ।

यस्तु नामसहस्रेण शुक्रवारे समर्चयेत् ।
चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ॥ २९२ ॥

पूजयित्वाश्विने मासि विशोको जायते नर' इति भविष्योत्तरवचनेनैकप्रयोगतासूचनात् । 'अष्टमीनवमीयुग्मे'इति पूर्वोक्तवचनाच्च । अतएव नवरात्रात्कर्मान्तरमिदमिति सिद्धान्तः । **अस्यां च पूजायां सर्वजातीयानामधिकारः ।** तदुक्तमेतत्कर्मोपक्रम एव भविष्योत्तरे 'पूजनीया जनैर्देवी स्थानेस्थाने पुरेपुरे । गृहेगृहे शक्तिपरैर्ग्रामेग्रामे वनेवने ॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्विशः । शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च भुवि मानवैः ॥ स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु'त्यादि । शक्तिपरैश्चण्डीपरायणैः । म्लेच्छैः शवरकिरातपुलिन्दादिभिः । अन्यैरनुलोमप्रतिलोमजैः । परंतु स्वकुलाचारमनुरुध्यैव पूजयेत् । तदुक्तं व्रतखण्डे 'यस्य यस्य हि या देवी कुलमार्गेण संस्थिता । तेन तेन च सा पूज्या बलिगन्धानुलेपनैः ॥ नैवेद्यैर्विविधैश्चैव पूजयेत्कुलमातर'मिति । नन्वेवं निर्णीतायामपि महानवम्यां तस्य शब्दस्य कालपरत्वेन प्रकृतविधौ कस्य कालस्य महानवमीपदेनोपादानम् । उक्तरीत्याष्टमीनवम्योर्महानवमीत्वात् । यद्यपि दर्शपूर्णमासनवरात्रादिपदवत्कर्मपरोऽयं महानवमीशब्दस्तदाष्टमीनवमीपूजाद्वयस्यैककर्मत्वेऽपि तस्य वासन्तशारदभेदेन द्वैविध्यात्प्रकृते कस्य कर्मण उपादानम् । नचोभयोरप्युपादानम् । एकधाधिकरणे वैधपदस्यानियतानेकार्थपरताया निरस्तत्वादिति चेत् । अत्र ब्रूमः—महानवमीशब्दस्य कर्मपरत्वे एकस्यैवाग्निहोत्रस्य सायंप्रातर्भेदेनावृत्तिवद्वसन्तशरद्भेदेनावृत्तिमात्राङ्गीकारेणानेकार्थत्वाभावात् । कालपरत्वे तु चत्वारोऽपि काला इह विधौ गृह्यन्ते । एकधाधिकरणे ह्यनियतैकार्थकस्यैव निरासो न पुनर्नियतानेकार्थकस्येत्यदोषात् कथमन्यथैकस्य मन्त्रस्यानेकार्थेषु विनियोगः । नच विधिगतस्यैव पदस्यानेकार्थता न युक्तेति परिभाषास्ति । 'न कलञ्जं भक्षये'दिति विधिवाक्येऽपि कलञ्जपदस्य बहुधा आम्रपरत्वेन भङ्गापरत्वेन कण्ठशोधकौषधपरत्वेन च व्याख्यानदर्शनात् । तस्माद्यावज्जीवमेतेषु चतुर्ष्वपि दिवसेषु चक्रमध्ये बिन्दुस्थानं गच्छतीति तादृशीं श्रीदेवीं त्रिपुरसुन्दरीं यः कश्चन भक्तः स्वस्वकुलानुसारेणार्धरात्रे सहस्रनामभिः पूजयति तस्य चतुर्विधापि मुक्तिः कर एव स्थिता । अतिसुलभेत्यर्थः । तत्रैकदिनेऽर्चकस्य सालोक्यमात्रं, दिनद्वये चेत्सारूप्यमपि, दिनत्रये चेत्सामीप्यमपि, चतुर्ष्वपि दिवसेषु चेत्सायुज्यमिति तारतम्यं तु न्यायत एव लभ्यत इति विविच्य नोक्तम् । अथवा अष्टमीनवमीतिथियुग्मे क्रियमाणकर्मण एकत्वेऽपि नवरात्रचातुर्विध्येन मुक्तिचातुर्विध्यं योज्यमिति दिक् ॥ २९१ ॥ **एवं पार्थक्येन भोगमात्रफलकान्मोक्षमात्रफलकांश्च प्रयोगानुक्त्वा भोगकैवल्योभयफलकं प्रयोगमाह—यस्तु नामेति** त्रिभिः । नामसहस्रेणेत्येकं पदम् । नामेति प्रसिद्ध्यर्थकमव्ययं वा । सहस्रपदमेव प्रकरणान्नामसहस्रपरमित्यपि युक्तम् ।

---

१. 'क्षत्रियैर्नृपैः । वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः' इति पाठान्तरम् ।

सर्वान्कामानवाप्येह सर्वसौभाग्यसंयुतः ।
पुत्रपौत्रादिसंयुक्तो भुक्त्वा भोगान्यथेप्सितान् ॥ २९३ ॥
अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम् ।
प्रार्थनीयं शिवाद्यैश्च प्राप्नोत्येव न संशयः ॥ २९४ ॥
यः सहस्रं ब्राह्मणानामेभिर्नामसहस्रकैः ।
समर्च्य भोजयेद्भक्त्या पायसापूपषड्रसैः ॥ २९५ ॥
तस्मै प्रीणाति ललिता स्वसाम्राज्यं प्रयच्छति ।

शुक्रवारे प्रतिशुक्रवारं, यावज्जीवार्थकपदानुवृत्त्या तथैव पर्यवसानात् ॥ २९२ ॥ इह भूलोक एव । तेनैतज्जन्यपुण्यस्यात्युत्कटत्वं सूचितम् । 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत' इति वचनात् । सर्वैः संततिसंपत्त्यारोग्यविद्याबलादिरूपैः सौभाग्यैः सम्यग्युतः । पुत्रपौत्रादीत्यत्रत्यादिपदेन नप्त्रादिबन्धुभृत्यान्तपरिग्रहः । सर्वसौभाग्यपदेनैव सिद्धे पुनरेतेषां ग्रहणं भोगक्रियांप्रति साहित्येन कर्तृत्वद्योतनार्थम् । पुत्रादिभिः सह भोगान्भुक्त्वेत्यर्थः ॥ २९३ ॥ अन्ते देहपातोत्तरम् । देवयानमार्गेण गत्वेति शेषः । सायुज्यातिदुर्लभत्वविशेषणत्वं कैवल्यत्वद्योतकम् । शिवाद्यैः प्रार्थनीयमिति तु ब्रह्मणा सह मुक्तिरिति ध्वनयितुम् । तथाच कौर्मे 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मिति । अत्र परस्येतिशब्दो ब्रह्मायुःपरः । 'ब्रह्मणः पूर्णमायुर्यद्वर्षाणां शतकं मतम् । तत्परं नाम तस्यार्धं परार्धमभिधीयत' इति वचनात् । एतदनुसारेण प्रकृतेऽप्यन्तपदस्य परस्यान्त इति व्याख्यापि युज्यते । तावत्पर्यन्तं मोक्षे विलम्बस्यादोषत्वात् । भोगमोक्षोभयफलके प्रयोगे ऐहिकभोगोत्तरमामुष्मिकभोगस्यावश्यकत्वात् । अतएव भोगानिति पदमप्यैहिकामुष्मिकभोगद्वयपरं व्याख्येयम् । तादृशद्विविधभोगयोरेव पुत्रादिसाहित्यं न पुनर्मोक्षेऽपि स्वस्वरूपमात्रावस्थानरूपे तस्मिंस्तदसंभवादिति मन्तव्यम् ॥ २९४ ॥ इदानीमीदृशफलापेक्षयाधिकस्याभावादस्मिन्नेव फले पूर्वस्मादल्पदिनसाध्यं प्रयोगान्तरमाह—**यः सहस्रमिति** द्वाभ्याम् । इह यावज्जीवपदादेरनुवृत्तिः । 'एवं यः कुरुते भक्त्या जन्ममध्ये सकृन्नर' इत्यादिभिश्चोदकतः प्राप्तैर्विधिभिरेव निराकाङ्क्षीकृतत्वात् । ब्राह्मणानां च विद्याविदुषामेव नान्येषाम् । 'तदधीते तद्वेदे'ति ब्रह्मपदादपि तथैव सिद्धेः । पायसं पयोबहुलमल्पतण्डुलकं परमान्नम्, अपूपाः पिष्टविकाराः पूरिकादयो बहुविधाः भोजनकुतूहलादिसूदशास्त्रीयग्रन्थेषु विविच्य वर्णिताः षदसंख्या रसा येषु तैः सितानिम्बादिभिस्तन्मिश्रितैरन्यैश्च पदार्थैः । तिक्तस्यापि कारवेल्लफलादेर्भक्षणीयत्वात्षड्रसैरित्युक्तम् ॥ २९५ ॥ स्वस्य साम्राज्यमत्यन्ताभेदः । कैवल्यमित्यर्थः । इदं च 'जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चे'त्यौपनिषदानामधिकरणमनुरुध्योक्तम् । वस्तुतस्तु साम्राज्यशब्दो जगद्व्यापारस्यैव रूढ्याभिधायकः तत्प्रदत्वमेव चेह विविक्षितं, श्रुतहानाश्रुतकल्पनयोरभावात् । अतएव

पूर्वप्रयोगादेतस्य फलाधिक्यमपि । विद्याविदुषां ब्राह्मणानां सहस्रस्याशीराशेरीदृशमेव हि फलं योग्यं भवति । नचैवं सति अनेकैर्भक्तैर्यौगपद्येनेदृशप्रयोगानुष्ठाने सर्वेषामेकस्मिन्काल एव जगद्व्यापारे स्वातन्त्र्यस्यावश्यकतया परस्परवैमत्याज्जगद्विलोपापत्तिरिति तदधिकरणोक्तो दोषः प्रसज्येतेति भेतव्यम् । सृज्यमानप्राणिकर्मानुसारेणैव भगवतः प्रवृत्तिरिति तैरेवाङ्गीकारात् । अन्यथा वैषम्यनैर्घृण्यापत्तेरपरिहार्यत्वात् । तथाच ब्रह्मसूत्रम् 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयती'ति । ततश्च कर्मानुसारेण जायमाना प्रवृत्तिर्बहूनां समनस्कानामप्येकरूपैव संभवेदिति न वैमत्यम् । नच परस्परेच्छानुसारेण व्याप्रियमाणानां स्वातन्त्र्यभङ्गः । स्वेच्छानुसारिप्रवृत्तिमत्त्वरूपस्वातन्त्र्यस्य सर्वेष्वविघातात् । अतएव वासिष्ठरामायणे कुन्ददन्तोपाख्याने माथुराणामष्टानां भ्रातॄणां सप्तद्वीपाया एकस्या एव भुवो युगपदाधिपत्यमम्बावरलब्धं वर्णितं संगच्छते । सृज्यमानप्राणिकर्मानुसारेणापतत आर्थिकस्येच्छासंवादस्य तदविघातकत्वात् । नचेश्वरस्य स्वाभाविकं जगत्साम्राज्यं न शक्रादिपदवत्कर्मजन्यमिति कथमन्यस्य स्वभावोऽन्यं गच्छेदिति वाच्यम् । ईश्वरस्य स्वाभाविकमप्यन्यस्य कर्मजन्यमित्यङ्गीकारे बाधकाभावात्, सालोक्यादिफलेषु तथा दृष्टत्वाच्च । एतेन नित्यसिद्धमीश्वरं प्रकृत्यैव जगदुत्पत्त्यादेराम्नानात्तन्त्रोपासकानामसंनिहितत्वान्न जगद्व्यापारकर्तृत्वं संभवतीति परास्तम् । उपासकानामधिकारस्यागन्तुकत्वेन नित्यसिद्धाधिकारकथनप्रकरणे प्रकृतत्वात्संनिहितत्वयोर्युक्तत्वात् । श्रूयते चोपासकानां साम्राज्यम् 'आप्नोति स्वाराज्यम् । सर्वेऽस्मै देवा बलिमावहन्ति । तेषां सर्वेषु लोकेषु कामचारो भवती'त्यादिश्रुतिषु । नचैतत्सावग्रहसाम्राज्यपरं, संकोचे मानाभावात् । नच 'आप्नोति मनसस्पति'मित्युत्तरश्रुत्येश्वरस्य प्राप्तव्यत्वेन परिशेष एव प्रमाणमिति वाच्यम् । स्वाराज्यरूपेश्वरासाधारणधर्मप्राप्तौ सत्यामभेदेन धर्मिप्राप्तिरेव भवतीत्याशयेन तस्या अपिश्रुतेरस्मदनुकूलत्वात् । एवं 'वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवती'त्यादयः श्रुतयः सर्वा अप्यत्रैवानुकूला नोपनिषदानाम् । स्पष्टमेव चाथर्वणशौनकशाखीया उपासकस्य विश्वसृष्ट्यादिविधायकत्वमामनन्ति 'सर्वं सर्वस्य जगतो विधाता भर्ता विश्वरूपत्वमेती'ति । अथ तादृश उपासकधौरेय ईश्वराद्भिद्यते न वा । भवन्मतेऽपि सायुज्याख्यां चतुर्थीं मुक्तिं गतः कैवल्याख्यां पञ्चमीं मुक्तिं प्रेप्सुर्भिद्यते न वा । नचास्मन्मते तस्य जगद्व्यापाराभावो न तत्सत्त्वासत्त्वाभ्यां भेद इति वाच्यम् । अस्मन्मते जगद्व्यापारवत्त्वेऽपि समनस्कत्वाऽमनस्कत्वाभ्यां भेदसंभवात् । नचोक्ताथर्वणमन्त्रप्रथमार्धे 'परिस्रुता हविषा या वित्तेन प्रसंकोचे गलिते वैमनस्क' इत्यत्र विमनस्कत्वोक्तिरुपासकस्योच्यत इति वाच्यम् । संकोचे प्रगलिते सतीत्युक्त्या 'घृणा शङ्का भयं लज्जे'त्यादिकुलार्णवोक्तपाशाष्टकस्य चित्तवृत्तिविशेषरूपस्यानुदयप्रयुक्तत्वेन तदुक्तेर्गौणत्वात् । यच्च 'भोगमात्रसाम्यलिङ्गाच्चे'तिसूत्रे तैः श्रुतिरुपन्यस्यते 'स यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति ते नो एतस्यै देवतायै सायुज्यं सलोकतां जयती'ति, सापि भेदव्यपदेशपरा सत्युक्तमर्थमेव साधयति । किंच अधिकारः सुखसाधनं न वा । अन्ये-

न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते ॥ २९६ ॥

सर्वलोकानां स्वर्गाद्यधिकारसाधनीभूतेषु कर्मसु प्रवृत्त्यनापत्तिः, आद्ये जगद्व्यापारस्याप्यधिकारत्वाविशेषेण सुखसाक्षात्काररूपभोगमात्रसाम्यादेव लिङ्गान्निरवग्रहमैश्वर्यमुपासकस्य सिद्ध्यतीति कथं तेन हेतुना तदभावः साध्यत इति विचारयतराम् । नचैकोऽधिकारः कथं युगपद्बहूनामुपकाराय स्यादिति वाच्यम् । सत्रयागे एकस्यैव प्रक्षेपस्य बहुयजमानोपकारकत्वस्य, एकस्यैव ब्रह्मलोकस्य युगपदनेकोपासकोपकारतायाश्च दर्शनात् । नचेयं षष्ठीमुक्तिरापद्येतेति वाच्यम् । इष्टत्वात् । युक्तं चैतत् । सालोक्यादिसायुज्यान्तमुक्तिषूत्तरोत्तरोत्कर्षवत्तदुत्तरभूमिकारूपत्वेन कैवल्यानन्तरपूर्वत्वेन चास्या न्यायसिद्धत्वात् । ननु पञ्चविधा मुक्तिरिति तान्त्रिकव्यवहारस्य का गतिरिति चेत् । सूतसंहितादिषु 'मुक्तिश्चतुर्विधा ज्ञेये'त्यादिव्यवहाराणां भवन्मते या गतिः सैव कैवल्यसायुज्ययोः । अवान्तरभेदाविवक्षयेति चेत् सावग्रहनिरवग्रहयोरपि तदविवक्षयेति तुल्यम् । तस्मात्सिद्धमुपासकानां सृष्टिस्थितिलयकर्तृत्वम् । अतएव शैवतन्त्रे 'चित्तस्थितिवच्छरीरकरणबाह्येष्वि'ति सूत्रे वार्तिककारैरुक्तम् । 'एवं स्वानन्दरूपस्य शक्तिः स्वातन्त्र्यलक्षणा । यथेष्टं भावनिर्माणकारणीभवति स्फुट'मिति । 'स्थितिलयौ' इति सूत्रेऽप्येवम् । 'स्वशक्तिप्रचयो विश्व'मिति सूत्रेऽपि 'शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः । इत्यागमदिशा विश्वं स्वशक्तिप्रचयो यथा । शिवस्य तत्समस्यापि तथास्य परयोगिन' इति । तत्सर्वमभिप्रेत्याह—**न तस्येति** । उपनिषदुक्तसर्वोत्तमोपासनाशीलस्यापि 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्याद्युच्चावचफलभोगिनोऽप्येकं दुर्लभं वस्तु जगत्साम्राज्यं वेदान्तिनामाशास्यमवशिष्यत एव । अस्य तु तदपि सुलभमेवेत्यर्थः । अतएवातिरहस्यत्वादेतदितिकर्तव्यता नैतत्प्रकरणे निर्दिष्टा अपितु त्रिशतभोजनप्रकरण एव धर्मान्कथयित्वा तेषामिह वाचनिकोऽतिदेशः कृतः । तदुक्तं तत्प्रकरण एव ब्रह्माण्डपुराणे 'रहस्यनामसाहस्रभोजनेऽप्येवमेव हि । आदौ नित्याबलिं कुर्यात्पश्चाद्ब्राह्मणभोजन'मिति । अस्यार्थः—पूर्वं नित्याबलित्रिशतभोजनाख्यकर्मणोर्यथा पौर्वापर्यमुक्तं एवमेव नित्याबलिसहस्रभोजनयोरपीति ।

अत्रेदं विचार्यते—एवं हि ब्रह्माण्डपुराणे स्मर्यते 'महाषोडशिकारूपान्विप्रानादौ तु भोजये'दिति षोडशब्राह्मणभोजनात्मकं कर्म विधाय 'अभ्यक्तान्गन्धतैलेन स्नातानुष्णेन वारिणे'त्यादिना च तदितिकर्तव्यतां प्रतिपाद्य 'एवं नित्याबलिं कुर्यादादौ ब्राह्मणभोजन'मिति वचनेनास्य कर्मणो नित्याबलिरिति संज्ञां प्रदर्श्य 'त्रिशतैर्नामभिः पश्चाद्ब्राह्मणान्क्रमशोऽर्चये'दिति त्रिशतभोजनाख्यं कर्मान्तरं विधाय तत्पश्चात् 'तैलाभ्यङ्गादिकं दद्याद्विभवे सति भक्तित' इत्यादिना चोच्चावचान्यङ्गानि विधाय 'एवं यः कुरुते भक्त्या जन्ममध्ये सकृन्नरः । तस्यैव जन्म सफलं मुक्तिस्तस्य करे स्थिते'ति फलविधिपूर्वकमुपसंहृतम् । तत्र संशयः किं नित्याबलित्रिशतभोजने समप्रधाने, उत त्रिशतभोजनस्य नित्याबलिरङ्गमिति । यदि

समप्राधान्यं तदा प्रकृतौ कालार्थसंयोगमात्रार्थकादादिपदादनङ्गस्य त्रिंशतभोजन-विकारे सहस्रभोजने नित्याबलेरग्नीषोमीयविकारेष्वाग्नेययागस्येव नातिदेशः । अङ्गाङ्गिभावे तु भवत्यतिदेश इति । तत्र पूर्वपक्षः—श्रुतिलिङ्गादेरङ्गताबोधकस्यादर्शनात्समप्राधान्यमेव द्वयोर्वक्तव्यम् । नच 'एवं नित्यावलिं कुर्यादादौ ब्राह्मणभोजनम् । त्रिंशतैर्नामभिः पश्चा'दिति पौर्वापर्यविधानात् 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते'त्यत्रेवाङ्गाङ्गिभावसिद्धिरिति वाच्यम् । वाजपेयस्य फलवत्त्वेन प्राधान्यात्तत्प्रकरणे पठितस्य बृहस्पतिसवस्य तदङ्गत्वसंभवेऽपि प्रकृते द्वयोरपि फलसंयोगाभावेन प्रकरणिनो निश्चयाभावेनाङ्गाङ्गिभावे विनिगमनाविरहात् विश्वजिन्न्यायेन फलकल्पनस्योभयोरप्याकाङ्क्षाविशेषेण तुल्यतया 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'तिवत्कालार्थस्येव संयोगस्य सिद्धेः । नच 'एवं यः कुरुते भक्त्ये'ति वाक्येन त्रिंशतभोजनेन विधेरानन्तर्यात्फलवत्त्वे बोधिते नित्याबलेः फलवदफलन्यायेन न आमनहोमानामिवाङ्गसिद्धिरिति वाच्यम् । तत्र हि 'वैश्वदेवीं सांग्रहिणीं निर्वपेद्ग्रामकामः' इत्युत्पत्तिविधावेव फलश्रवणेन सांग्रहण्या आमनहोमाङ्गित्वसिद्धावपि प्रकृते भिन्नवाक्योपात्तस्य फलस्याकाङ्क्षावशाद्वाक्यैकवाक्यतयान्वयस्य वक्तव्यतयोभयोरप्याकाङ्क्षावशात्फलसंबन्धसिद्धेः । 'एवं यः कुरुत' इत्यत्रैवंपदेनोभयोरनुवादसंभवात् आनन्तर्यस्योभयाकाङ्क्षातो दुर्बलत्वात् वाचःक्रमवर्तित्वेनावर्जनीयत्वाच्च । अतएवोक्तं 'आनन्तर्यमचोदने'ति । किंच नित्यावलिप्रकरणे विहितानां गन्धतैलाभ्यङ्गादिपायसफलादिनिवेदनान्तानामङ्गानामनुवादेन विभवपरत्वेन व्यवस्थाविधित्रिंशतभोजनप्रकरणे श्रूयमाणः परो वादसापेक्ष इति तन्निर्वाहायानयोः प्रकृतिविकृतिभावकल्पनया नित्याबलिधर्माणां त्रिंशतभोजनेऽतिदेशो वक्तव्यः । तेन प्राकृतानां कामेश्वर्यादिनाम्नां वैकृतैः ककाररूपादिनामभिः शरन्न्यायेन बाधोऽपि संगच्छते । अङ्गस्य हि प्रधानं प्रति प्रकृतित्वमसंभवि, भावनायां हि भाव्यान्वयोत्तरं कारणान्वयस्ततः कथंभावाकाङ्क्षायां धर्माणामन्वय इति भाव्यान्वयात्पाश्चात्योऽङ्गत्वनिर्णयस्ततोऽपि पश्चादतिदेशः 'अङ्गं सदतिदिश्यत' इति न्यायादिति स्थितिः । ततश्च त्रिंशतभोजनकरणकभावनाया भाव्यकरणयोरन्वयोत्तरं तृतीयक्षणे कथंभावाकाङ्क्षाकाल एव नित्याबलेरङ्गत्वं वदता भाव्याकाङ्क्षा वक्तव्या । तदुत्तरक्षणे परस्पराकाङ्क्षालक्षणेन प्रकरणेनोभयोरङ्गाङ्गिभावे सिद्धे त्रिंशतभोजनभावनाया निराकाङ्क्षत्वात्ततोऽपि पश्चात्तनानां नित्याबल्यङ्गानां कथं प्रधानेऽतिदेशसिद्धिः । नहि प्रत्येकं स्वस्ववाक्यैरेऽशत्रयपरिपूर्णयोः पौर्णमासीवैमृधयोरिव वाक्यान्तरेणाङ्गाङ्गिभावबोधः, तादृशवाक्यादर्शनात्, प्रकरणादङ्गाङ्गिभावस्य तूक्तरीत्या संभवात् । नच त्रिंशतभोजनविकृतौ सहस्रभोजनेऽतिदेशाल्लिङ्गादेवाङ्गत्वसिद्धिरिति वाच्यम् । लिङ्गदर्शनमात्रनिर्णयस्यानिर्णायकत्वात् । सहस्रभोजन इति सप्तम्या 'तत्र जयान्जुहुया'दितिवदङ्गित्वबोधकतयान्यत्र प्रधानस्यापि नित्यावलेस्तावन्मात्रं प्रत्येवाङ्गत्वमिति बोधनेनाप्यतिदेशवाक्योपपत्तेश्च । बृहस्पतिसवे तथा दर्शनात् । इयांस्तु विशेषः—तत्र प्रकरणान्तरादुद्भेदः । अत्रतु त्रिंशतीप्रकरण एव दूरस्थानुवादेन द्वादशोपसत्त्ववन्नित्यावलेरङ्गत्वविं-

धानात् 'संनिधौ त्वविभागा'दिति न्यायेन न भेद इति। तस्मान्नित्याबलित्रिशत-भोजनयोः समप्राधान्यमेवेति। सिद्धान्तस्तु—फलविधिवाक्यस्य नित्याबलिवाक्येन सहान्वयस्तूभयाकाङ्क्षामात्राद्वक्तव्यः। त्रिशतभोजनवाक्येन तु सहानन्तर्येणोभ-याकाङ्क्षायां चेति झडिति तेनैव सहान्वये नित्याबलेः फलवदफलन्यायेन प्रधानो-पकारकत्वेनैव भाव्याकाङ्क्षानिवृत्तौ न फलवाक्येनान्वय इति प्रकरणिनिश्चयो निराबाधः। एवंच नामत्रिशतीप्रकरणे कामेश्वर्यादिनामान्तराणां प्रयोगकथनस्या-समञ्जसतापि निरस्ता भवति। नच नित्यावलेस्त्रिशतभोजनंप्रति प्रकृतित्वमप्या-वश्यकम्। 'तैलाभ्यङ्गादिकं दद्याद्विभवे सति भक्तित' इति वाक्ये तैलाभ्यङ्गादेरेव त्रिशतभोजनाङ्गत्वेन विधेयत्वात्। 'अभ्यक्तान्गन्धतैलेने'त्यादिवाक्यानां त्ववा-न्तरप्रकरणान्नित्याबल्यङ्गत्वेनैव विधायकतया तदनुवादेन विभवपरत्वेन व्यव-स्थामात्रविधायकत्वाङ्गीकारे त्रिशतब्राह्मणानां तैलाभ्यङ्गादेरनापत्तेः प्रापकाभा-वात् व्यवस्थायाः पुरोवादानुसारेण नित्याबलावेव सिद्धेः। नच चोदकतः प्राप्तिः प्रकृतिविकृतिभावस्याधुनाप्यसिद्धेः। एतद्बलादेव साधने त्वन्योन्याश्रयः। नचैवं विभ-ववाक्येऽभ्यङ्गविधिस्तदनुवादेन व्यवस्थाविधिश्चेति वाक्यभेदः। 'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी'तिन्यायेन विभवे सत्येव तत्सामर्थ्यस्य न्यायलभ्यतया तदंशेऽनुवादात्। काम्येऽपि यथाशक्त्युपबन्धस्य तान्त्रिकैः फलतारतम्यविधया स्वीकारात्। प्रकृतिविकृतिभावस्वीकारेऽपि वा न प्राकरणिकमङ्गत्वं ब्रूमः येनोक्त-रीत्या विरोध आपद्येत। अपि त्वादिपश्चाद्वाक्येनैवाङ्गत्वं वैमृधपूर्णमासयोरिव विधी-यते इत्यदोषः। तस्मान्नित्याबलित्रिशतभोजनं प्रत्यङ्गमेवेति। नचैवमतिदेशवाक्य एवमेवेत्यनेनैव सर्वाज्ञातिदेशे सिद्धे पुनः 'आदौ नित्याबलिं कुर्या'दिति वाक्यवैय-र्थ्यम्। एवंपदस्य संनिहिततैलाभ्यङ्गादिसंनिपत्योपकारकाङ्गमात्रपरत्वभ्रमनिरासाय तद्विवरणार्थत्वादिति दिक्॥

अत्रायं प्रयोगविधिः। आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीमहात्रि-पुरसुन्दरीप्रीत्यर्थममुकसंख्याकैर्दिवसै रहस्यसहस्रनामभिः सहस्रब्राह्मणान्पूजयन्भोज-यिष्ये तत्पूर्वाङ्गत्वेन नित्यावलिं च करिष्य इति संकल्प्य पुण्याहं वाचयित्वा षोडश-ब्राह्मणान्निमन्त्रयेत्। तेष्वागतेषु पादान्प्रक्षाल्य गन्धतैलेनाभ्यज्योष्णोदकैः स्नपयित्वा-सनेषूपवेश्य तिलकेषु धृतेषु द्वितीयाभिर्नमोन्तैः कामेश्वर्यन्तैः कामेश्वर्यादित्रिपुरसुन्दर्य-न्तैश्चतुर्थ्यन्तैर्नामभिर्जातेषु षोडशमन्त्रेष्वेकैकेन मन्त्रेणैकैकस्मिन्ब्राह्मणे एकैकां तिथिनि-त्यामावाह्य षोडशोपचारैः पदार्थानुसमयरीत्या पूजयेत्। यथा प्रथमब्राह्मणे 'ह्रींश्रींका-मेश्वर्यै नमः कामेश्वरीं प्रतिपत्तिथिनित्यामावाहयामि स्थापयामि पूजयामि तर्पयामि नम' इत्यक्षतान् शिरसि निक्षिप्य द्वितीयब्राह्मणे 'ह्रींश्रींभगमालिन्यै नमः भग-मालिनीं द्वितीयातिथिनित्यामावाहयामि स्थापयामि पूजयामि तर्पयामि नमः' इत्यक्ष-तान्निक्षिप्य तृतीयादिषोडशान्तेष्वेवमेव नित्यक्लिन्नां मेरुण्डां वह्निवासिनीं वज्रेश्वरीं शिवदूतीं त्वरितां कुलसुन्दरीं नित्यां नीलपताकां विजयां सर्वमङ्गलां ज्वालामालिनीं

---

१ द्वितीयादिभिः इति पाठः.

चित्रां त्रिपुरसुन्दरीं च प्राक्संस्थमुदक्संस्थं वावाह्य पुनरनेनैव प्रवृत्तिक्रमेणासनपाद्यार्घ्याचमनस्नानानि कल्पयित्वा वसनाभरणे प्रत्यक्षे दत्त्वा संस्कृतैः सहेतुकैः संतर्प्य गन्धपुष्पधूपदीपान्दत्त्वा सूपापूपशर्कराज्यपायसफलादिभिर्विशेषान्नैर्भोजयित्वा ताम्बूलदक्षिणानमस्कारप्रार्थनाविसर्जनानि कुर्यात् । आसनादिसर्वोपचारेष्वप्यादौ द्वितारं ततस्तत्तन्मन्त्रस्तदन्ते तत्तन्नामानि चतुर्थीनमोन्तानि तत आसनं समर्पयामिनम इत्याकारकाः करणमन्त्रा ऊहनीयाः । अत्र तैलाभ्यङ्गादिकमावश्यकम् । **इति नित्यावलिः** ॥ ॥ अथ द्वितीये तृतीयादौ वा दिवसेऽप्येवमेव सहस्रं ब्राह्मणान्भोजयेत् ॥ ह्रींश्रींश्रीगात्रेनमः । ह्रींश्रींश्रीमहाराज्ञैनमः । इत्यादयो मन्त्राः । श्रीमातरमावाहयामीत्यादिरावाहने मन्त्रशेषः । आसनं समर्पयामिनम इत्यादय आसनादिषु यथालिङ्गं मन्त्रशेषाः । तैलाभ्यङ्गादिकं विभवशालिनामावश्यकं अन्येषां तु यथाशक्तीति विशेषः । पूजारम्भे पूर्वभागस्य समाप्तावुत्तरभागस्य च पाठादिकं पूर्ववदेव, परन्तु पदार्थानुसमयोऽपि प्रतिशतं प्रतिपञ्चाशद्वा प्रकारान्तरेण वा । सौकर्याय तर्पणान्तान्पुष्पान्तान्वोपचारान्प्रवृत्तिक्रमेण दत्त्वा धूपदीपान्सहस्रेभ्यो दद्यादित्यपि युज्यते । अश्वप्रतिग्रहनिमित्तकवारुणचतुःकपालपुरोडाशबाहुल्ये तथा दर्शनात् । सहस्रसंख्याकानां ब्राह्मणानां युगपदलाभे तु लब्धमात्रानेव तान्बहुभिर्दिनैर्भोजयन्संख्यां पूरयेत् । संख्यायाः पृथक्त्वनिवेशित्वाविरोधस्य सहस्रभोजनखण्डव्याख्यानेऽस्माभिः समर्थितत्वात् तत्समाप्तिपर्यन्तं स्वयं नियमवान्भवेत् । यत्तु प्रकृतौ स्मर्यते 'शुक्लप्रतिपदारभ्य पौर्णमास्यवधि क्रमात् । दिवसे दिवसे विप्रा भोज्या विंशतिसंख्यया । दशभिः पञ्चभिर्वापि त्रिभिरेकेन वा दिनैः । त्रिशत्यष्टिः शतं विप्राः संभोज्यास्त्रिशतं क्रमादि'ति तत्र ब्राह्मणानां त्रिंशत्या युगपल्लाभेऽपि प्रत्यहं विंशतिसंख्यानामेव भोजनं मुख्यः कल्पः । पञ्चदश्यामेकैकाक्षरस्यैकैकतिथिनित्यास्वरूपत्वेनैकैकाक्षरघटितानां विंशतिविंशतिनाम्नामपि ततद्देवताकत्वेन तत्तत्तिथावेव तत्तद्देवतापूजनस्य युक्तत्वात् । पञ्चदशदिनपर्यन्तं स्वस्यावकाशाभावे सन्त्यन्येऽनुकल्पाः । एवंच सहस्रनामस्वक्षरक्रमाभावेन कतिपयेषां तत्तत्तिथिनित्यादेवताकत्वे मानाभावेन प्राकृतमुख्यकल्पे प्रयोजकस्य तिथ्यक्षरदैवतैक्यस्य विकृतावभावात्तत्प्रयुक्तस्य पञ्चदशभिरेव दिनैः कर्मसमाप्तिरूपस्य नियमस्यातिदेशो न भवति । अतएव सौर्ये चरौ कपालप्रयोजकपुरोडाशस्याभावान्न कपालानामतिदेशः । तस्मादिह सतिसंभवे प्रयोगविधेर्विलम्बासहिष्णुतयैकस्मिन्नेवाहनि सहस्रभोजनं मुख्यः कल्पः । अनुकल्पेषु प्रकृतौ दशभिः पञ्चभिरित्यनेनैव सिद्धे त्रिशत्षष्टिरिति पुनर्वचनस्य न्यूनाधिकसंख्यापरिसंख्यार्थकत्वात्प्रत्यहं समसंख्या एव ब्राह्मणा भोजयितव्या इत्यंशस्य विधित्सितत्वावगमेनार्थिकत्वाभावादतिदेशे सिद्धे त्रिदिनपक्षस्य साद्यस्कसारस्वतसत्रयोरग्निचयनस्येवासंभवाद्वाधः । शतब्राह्मणानामप्यलाभे तु यथासंभवं विंशतिदिनादिपक्षाः प्रकृतावनुक्ता अपि न्यायत एवोक्तनियमाविरोधेन लभ्यन्त इति यथायथं पूर्वोत्तरतन्त्रपारदृश्वभिरूहनीयम् । अत्र बौधायनसूत्रोक्तसहस्रभोजनेतिकर्तव्यता समुच्चीयत इति तु तद्व्याख्यायामेव निर्णीत-

निष्कामः कीर्तयेद्यस्तु नामसाहस्रमुत्तमम् ।
ब्रह्मज्ञानमवाप्नोति येन मुच्येत बन्धनात् ॥ २९७ ॥
धनार्थी धनमाप्नोति यशोर्थी प्राप्नुयाद्यशः ।
विद्यार्थी चाप्नुयाद्विद्यां नामसाहस्रकीर्तनात् ॥ २९८ ॥
नानेन सदृशं स्तोत्रं भोगमोक्षप्रदं मुने ।
कीर्तनीयमिदं तस्माद्भोगमोक्षार्थिभिर्नरैः ॥ २९९ ॥

मस्माभिः ॥ २९६ ॥ एवं पञ्चत्रिंशता श्लोकैः पुरुषार्थप्रदायकत्वदर्शनेन रहस्यतमत्व-विवेचने समाप्ते क्रमप्राप्तं 'इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायक'मित्युक्त-मर्थं विवेचयति—**निष्काम इति** । निष्कामः विषयकामनारहितः । ब्रह्मज्ञानं जीवब्रह्मणोर्भेदभ्रमनिवर्तकं महावाक्यजन्यमात्ममात्रविषयकं निर्विकल्पाख्यं चर-मवृत्तिरूपमनुभवात्मकं ज्ञानं, येन प्राप्तेन ज्ञानेन बन्धनादन्नादिसिद्धाहन्तामता-दिरूपवासनाजालान्मुच्यते । अयं भावः—नामकीर्तनस्य नित्यप्रयोगारम्भे उपात्त-दुरितक्षयार्थमित्युल्लेखस्य स्थाने यदि श्रीत्रिपुरसुन्दरीप्रीत्यर्थमित्युल्लिख्येत तावतैव ब्रह्मज्ञानलाभ इति । नच कामनोल्लेखे कथं निष्कामप्रयोगतेति वाच्यम् । विषय-कामनोल्लेख एव सकामत्वव्यवहारात् । अतएव शिष्टानां श्रीपरमेश्वरप्रीत्यर्थमित्युल्लि-खिते कर्मणि निष्कामत्वव्यवहारः । दुरितहरप्रयोगस्य त्वनेन प्रसङ्गात्सिद्धिः । 'श्रीमातुः प्रीतये नामसहस्रं यस्तु कीर्तये'दित्यनुक्त्वा 'निष्काम' इत्युक्तेरीदृश-प्रयोगशीलः कदापि विषयकामप्रयोगं न कुर्यादिति ध्वननाय । तदुक्तं 'नित्यनैमि-त्तिकैरेव कुर्वाणो दुरितक्षय'मिति ॥ २९७ ॥ ननु निष्कामप्रयोगशीलस्यापि प्रमा-दादिभिः सकामप्रयोगे प्रवृत्तौ किं स्यादत आह—**धनार्थीति** । विद्यार्थी वेद-शास्त्राद्यपरिमितविद्याकामः ननु श्रीविद्याकामः । तत्प्राप्तेः पूर्वमत्राधिकाराभावेना-नधिकारिणा कृतस्यापि प्रयोगस्याकृतत्वेन निष्फलत्वात् प्रत्युतानर्थस्मरणाच्च । विषयकामनासामान्याभावो हि निष्कामत्वम् । मध्ये विषयकामनायाः सकृदप्युदये तु निष्कामत्वमेव व्याहन्येत । बुद्धिचाञ्चल्येनोभयथापि प्रयोगकरणे तु निष्काम-प्रयोगोऽपि कामनायामेवोपक्षीण इति तत्तत्फलान्येवाप्नोति न ब्रह्मज्ञानमिति भावः । अथवा विद्याशब्दो ब्रह्मज्ञानपर एव । अम्बाप्रीत्यर्थमितिवद्ब्रह्मज्ञानप्राप्त्यर्थमित्यु-ल्लेखेऽपि तल्लभ्यत इत्यर्थः । धनयशसोर्ग्रहणं तु दृष्टान्तार्थम् । यथा धनार्थी धन-माप्नोतीत्यादिरर्थः । एतेनोत्तरोत्तरोत्कृष्टफलप्रयोगप्रस्तावे सर्वोत्तरप्रयोगानन्तरं धनका-मादिप्रयोगकथनमसमञ्जसमिति निरस्तम् ॥ २९८ ॥ ईदृशमिदं स्तोत्रं यं निष्का-मप्रयोगमारभ्य ततश्च्युतोऽपि न प्रत्यवैति प्रत्युत यद्यदिच्छति तत्तदाप्नोत्येव । अतः कथमेतेन सदृशमन्यत्स्तोत्रं स्यादित्यत आह—**नानेनेति** । भोगप्रयोगाच्च्युतस्य मोक्षं मोक्षप्रयोगाच्च्युतस्य भोगमुभयापेक्षस्योभयं तत्राप्यादौ भोगं पश्चान्मोक्षं प्रददातीत्यर्थः । ब्रह्माण्डपुराणेऽप्युक्तम् 'तस्मादशेषलोकानां त्रिपुराराधनं विना । न स्तो भोगापवर्गौ तु यौगपद्येन कुत्रचित् ॥ तन्मनास्तद्गतप्राणस्तद्याजी

चतुराश्रमनिष्ठैश्च कीर्तनीयमिदं सदा ।
स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये ॥ ३०० ॥
कलौ पापैकबहुले धर्मानुष्ठानवर्जिते ।
नामानुकीर्तनं मुक्त्वा नृणां नान्यत्परायणम् ॥ ३०१ ॥

तद्भूतेहकः । तदात्मैक्येन कर्माणि कुर्वेन्मुक्तिमवाप्स्यति । एतद्रहस्यमाख्यातं सर्वेषां हितकाम्यये'ति । अथवा पूर्वश्लोकस्य ब्रह्मज्ञानप्रदत्वव्याख्यापक्षे तत्साधनवैराग्यप्रदत्वमनेन श्लोकेनोच्यते । भोगेभ्यो विषयाभिलाषेभ्यो मोक्षो मोचनं तद्वासनात्यागस्तं प्रददातीत्यादिरर्थः । उक्तंचाष्टावक्रगीतायाम् 'मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज'ेति ॥ २९९ ॥ किं बहुना । तन्त्रोक्तकर्मसु भराभावेन ये श्रौतस्मार्तकर्मस्वेवातीवाचरणादरणशीलास्तेषामप्येतदुपकारकमित्याह—**चतुरे**ति । ब्रह्मचारिगृहस्थवानप्रस्थयतयस्तत्तदवान्तरभेदाश्चतुराश्रमनिष्ठास्तैः स्वस्वधर्माणां सम्यग्यथाशास्त्रमनुष्ठाने क्रियमाणे यदवश्यंभावि वैकल्यं वैगुण्यं तस्य परिपूर्तये समाधानायेति तादर्थ्ये चतुर्थी । चतुराश्रमिणां यानि यानि कर्माणि श्रुतिस्मृतिविहितानि तानि तानि सर्वाणि सर्वाङ्गोपसंहारसमर्थस्यैव फलप्रदानि । सर्वाङ्गोपसंहारश्च प्रायेणाधुनिकानामशक्यतमः । तदिदमस्माभिः प्रदर्शितं शिवस्तवे 'स्वामिन्नङ्गेषु सर्वेष्वपि सुविरचितेष्वेव कर्माणि किंचित्तुच्छं यच्छन्ति नो चेन्निरयदुरवटे संशयं वासयन्ति । मन्त्रैर्यन्त्रार्थबोधान्गुरुकुलनियमान्देशकालार्थशोधाद्गाढं गूढं च तत्त्वात्कथमतिकठिनोपेयुषी शेमुषी नः' इति । ततश्च दुरवगाहाङ्गलोपस्यावश्यकतया तज्जनितपापनिरासद्वारा साद्गुण्यसंपादनायेदं सर्वेषामावश्यकमिति भावः । उक्तंच देवीभागवते तृतीयस्कन्धे देवान्प्रति भगवत्या 'मन्नामोच्चारणात्सर्वे मखेषु सकलेषु च । सदा तृप्ताश्च संतुष्टा भविष्यध्वं सुराः किले'ति । इत्थंच संयोगपृथक्त्वन्यायेनास्य कृत्वर्थपुरुषार्थोभयरूपतासिद्धिः ॥ ३०० ॥

अथ परिभाषायां विंशतिश्लोकान्व्याचष्टे ॥ **नामस्मरणावश्यकतोक्तिः सार्धत्रयोदशश्लोकैः । उपसंहारः सार्धैः पञ्चभिरेकेन सूतोक्तिः ॥३९॥** अत्र चरमश्लोकस्यैकस्य सूतोक्तिरूपताकथनेन ततः पूर्वेषां हयग्रीवोक्तिरूपतैवेति द्योतितम् 'दशभूः सार्धनृपाला' इति वक्तृनिर्णायकश्लोके चरमस्थाने हयग्रीवस्यैव कथनात् तत्परत एतदवधिपर्यन्तमन्यस्य कस्यापि वक्तृत्वेन परिगणनाभावाच्च । तत्रैवाध्युष्टमित्युक्तिस्तु पूर्वभागाभिप्रायेणेत्यविरोधः ॥ ३९ ॥ नन्वङ्गलोपप्रतिसमाधानाय प्रायश्चित्तान्यपि तत्रतत्रैव विहितानीति तैरेव साद्गुण्यसिद्धौ किमनेन सहस्रनामस्तोत्रेणेत्यत आह—**कलाविति** । पापैकबहुले चतुष्पादस्य धर्मस्य पादत्रये पापेन लुप्ते । मुक्त्वेति विनार्थकमन्वयान्तरमखण्डं नतु क्त्वाप्रत्ययान्तम् । मोचनकर्तृकक्रियान्तराभावेन तथात्वायोगात् । स्थितानामिति शेषपूरणेनानयनक्रियैव

---

१ तद्रहस्यकः इति पाठः ।

वा समाधेयम् । नामान्यनादृत्य स्थितानां स्वसाङ्गकर्मानुष्ठानतः पततामित्यर्थः । अन्यत् श्रुतिस्मृतितन्त्रोदितं प्रायश्चित्तं न परायणं नाश्रयः । न वैकल्यपरिपूरकमिति यावत् । नामानुकीर्तनं तु भवति तथा । 'प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ यत्कृत्यं तन्न कृतं यदकृत्यं कृत्यवत्तदाचरितम् । उभयोः प्रायश्चित्तं शिव तव नामाक्षरद्वयं कथितम् ॥ किमन्येन मुनिश्रेष्ठाः प्रायश्चित्तेन कर्मणा । प्रायश्चित्तमघौघस्य देवीनामानुकीर्तन'मित्यादिवचनात् । किंच अत्र तृतीयवचने प्रायश्चित्तस्य कर्मणेति विशेषणेनैतत्सूचितम्—प्रायश्चित्तानामपि कर्मविशेषरूपत्वात्तेषामपि साङ्गानामेव फलजनकत्वं वाच्यम् । साङ्गता तूक्तरीत्या दुःशकैव । तत्रापि प्रायश्चित्तान्तरगवेषणेऽनवस्था । नच नामस्मरणस्यापि प्रायश्चित्तरूपकर्मत्वाविशेषात्साङ्गतायै प्रायश्चित्तान्तरगवेषणं तुल्यमिति वाच्यम् । दुरवगाहाज्ञान्तरनिरपेक्षस्यैव नामस्मरणमात्रस्य पापापनोदकत्वात् । तदुक्तं विष्णुभागवते 'सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा । वैकुण्ठनामग्रहणमशेषाघहरं विदु'रिति । सांकेत्यं पुत्रादिनाम । स्तोभोऽर्थहीनः शब्दः । शिवरहस्येऽपि 'अवशेनापि यन्नाम्नः कीर्तनान्मुच्यते नरः । स कथं न महादेव सेव्यते बुद्धिशालिभि'रिति । देवीभागवते तृतीयस्कन्धे 'अस्पष्टमपि यन्नाम प्रसङ्गेनापि भाषितम् । ददाति वाञ्छितानर्थान्दुर्लभानपि सर्वथे'ति । शक्तिरहस्येऽपि 'मदात्प्रमादादुन्मादाद्दुस्स्वप्नात्स्खलनादपि । कथितं नाम ते गौरि नृणां पापापनुत्तये' इति । मदः सुरापानादिजन्यः । प्रमादोऽनवधानता । उन्मादो भूताद्यावेशः । उत्स्वप्नो निद्रादशायामभिलापः । स्खलनं किंचिद्वक्तुं प्रवृत्तस्य मुखात्तदतिरिक्तशब्दनिःसरणम् । किंच अस्ति हि महाभाष्ये प्रसिद्धः कूपखानकन्यायः—'तृषानिवृत्तिपङ्कलेपनिरासफलकस्य कूपस्य खननेऽपि जायेते एव तृषापङ्कलेपौ, तावपि सिद्धकूपे तज्जन्यजलेन नश्यत एवेति राजन् ङस् पुरुष सु इत्याकारकापशब्दप्रयोगजन्यं पातकं तज्जन्यराजपुरुषेति परिनिष्पन्नरूपप्रयोगेण नश्यतीति स्वीकारात्' । तेन न्यायेन प्रकृतेऽपि नामस्मरणनाश्यतावच्छेदकपापत्वावच्छिन्नत्वाविशेषान्नामस्मरणाङ्गलोपजन्यपातकस्यापि तेनैव नामस्मरणेन नाश इति नानवस्था । अनेनैवाशयेन ग्रन्थान्तेऽस्माभिर्वक्ष्यते 'तथाप्यन्तः सन्तः सदयहृदयानाममहिमाप्यपूर्वस्तस्मान्मे न खलु खलपापोभयभय'मिति । अपूर्वः स्वाङ्गलोपजनितपातकनिवर्तकरूपः पूर्वं प्रायश्चित्तादिकर्मसु क्वाप्यकृप्त इति तदर्थः । नच श्रौतस्मार्तादिप्रायश्चित्तसाङ्गतायै नामकीर्तनस्योपयोगोस्त्विति वाच्यम् । 'तद्धेतोरेवास्तु तद्धेतुत्वं किं तेने'ति न्यायविरोधात् । तदिदं सर्वमुक्तमास्माकीनशिवस्तवे 'वेधा वैधापराधानपि शिव बहुधा तान्समाधातुमाधात्प्रायश्चित्तानि वित्ताधिपजनसुविधेयानि वैषम्यभाञ्जि । कच्छेऽपच्छेदमाप्ते पुनरपि यजनं पूर्णयज्ञान्तराये त्वेकाल्पाज्येन पूर्णाहुतिरिति बहुशस्तत्त्वमेतन्न जाने ॥ कृत्यस्याकरणेऽप्यकृत्यकरणेऽप्युक्तं पुराणादिषु प्रायश्चित्तगणे परं शिवशिवेत्युच्चारणं भक्तितः । कृत्वा कर्म महेश तत्प्रतिसमाधानाय चेत्त्वत्स्मृतिः सादावेव कृता न तारयति किं तस्मात्त्यजामि क्रियाः' इति । कर्मणः

१ 'परंतु' इति पाठः २४० पृष्ठे द्रष्टव्यः.

लौकिकाद्यचनान्मुख्यं विष्णुनामानुकीर्तनम् ।
विष्णुनामसहस्राच्च शिवनामैकमुत्तमम् ॥ ३०२ ॥

समाधानाय प्रायश्चित्तं तस्यापि समाधानान्तरं प्रति समाधानमित्यर्थः । तस्मान्नामानुकीर्तनमेव परायणमिति भावः ॥ ३०१ ॥ ननु नामकीर्तनसामान्यस्य पापक्षयजनकत्वे प्रकृते किमायातमित्याशङ्क्य सर्वेषां पुण्यवन्नाम्नामविशेषेण पापनाशकत्वेऽपि तमोहराणां खद्योताग्निचन्द्रसूर्यादीनां तेजसामिवास्ति तारतम्यं तत्रैवैतदेव सर्वातिशायीति कथनाय सारालंकारेण भूमिकाभेदान्वर्णयति—लौकिकादिति । लौकिकादित्यध्युष्टैः घटपटादिशब्दप्रयोगेऽप्यत्येव पुण्यम् । 'एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवती'ति वचनात्, तादृशशब्दसहस्रोच्चारणमपेक्ष्य विष्णुमार्कादिपुण्यश्लोकमनुजवाचकस्यैकस्य शब्दस्योच्चारणं विशिष्टफलदम् । उक्तंच विष्णुभागवते 'ध्रुवं ब्रह्मऋषीन्सप्त पुण्यश्लोकांश्च मानवान् । उत्थायापररात्रान्ते प्रयताः सुसमाहिताः । स्मरन्ति मम रूपाणि मुच्यन्ते तेंऽहसोखिला'दित्यादि, तादृशनामसहस्रकीर्तनमपेक्ष्येति लौकिकाद्यचनादित्यस्यार्थः । विष्णुनामेति विष्णूनां नामेति विग्रहः । अनन्तसंख्यानां विष्णूनां मध्ये यस्य कस्यचिदन्यतमस्यापि नामैकवचनादेकमपीत्यर्थः । अनुकीर्तनमित्यस्यानुकीर्त्यमानमित्यर्थः । अनुस्तं कीर्तनं यस्येति विग्रहात् । इदंच पदं शिवनामादिपूत्तरत्राप्यनुवर्तते । शिवानां नाम रुद्रेश्वरशिवमहेश्वरसदाशिवानां नाम । वातुलशुद्धे तत्त्वभेदपटले 'शिवमेकं विजानीयात्सादाख्यं पञ्चधा भवेत् । महेश्वरो महासेनः पञ्चविंशतिभेदवा'नित्यादिनान्यत्र च तद्भेदा उक्ता अनुसंधेयाः । **अयंभावः**—विष्णूनामानन्त्येष्वेकैव भूमिका । रुद्रादीनां तूत्तरोत्तरं भूमिका भिद्यन्ते । तास्वप्येकैकस्यां रुद्रादेरानन्त्यमेवेति द्योतनाय विष्णुपदसमानयोगक्षेमगुणिवाचकम् । 'महेश्वरो महासेनः पञ्चविंशतिभेदक' इत्यादिनान्यत्र च तद्भेदा उक्ता अनुसंधेयाः । रुद्रपदमनुक्त्वा सर्वानुस्यूतं शिवपदं प्रयुक्तम् । तेन विष्णुनाम ततः परं रुद्रनाम ततः परमीश्वरीनामेत्याद्या भूमिका उन्नेयाः । इयांस्तु विशेषः । विष्णूनां तरतमभावापन्नत्वेनानन्त्याद्यथाकथंचिदपि तन्नामोच्चारणं समानफलकमेव । शिवानां तु तरतमभावेनाप्यानन्त्यात्परस्परनामसांकर्याच्च तादृशतादृशभूमिकापदार्थानुसंधानपुरःसरं कीर्त्यमानं नाम तथातथोत्तममिति । अथवा विष्णुरप्यादित्यादिगणान्तर्गतत्वादिरीत्याप्यनन्तविध एवेति तथापि नामसंकरेऽर्थानुसंधानत एव विशेषो वेदितव्यः । तत्तदसाधारणशब्दास्तु यथाकथंचित्कीर्त्यमाना अप्युत्तमा एव । अतएव परशिवे शिवादिशब्दा मुख्या इत्युक्तं सूतसंहितायाम् 'नामानि सर्वाणि तु कल्पितानि स्वमायया नित्यसुखात्मरूपे । तथापि मुख्यास्तु शिवादिशब्दा भवन्ति संकल्पनया शिवस्ये'ति । विष्णुनामभ्यो रुद्रादिनाम्नामुत्तमत्वमपि । तत्रैव यमं प्रति शतानन्दमुनेर्वाक्यम् 'शिवरुद्रादिशब्दान् यो विशिष्टान्वेद मानवः । नारायणादिशब्देभ्यस्तं

त्वं परिहर प्रभु'मिति। पराशरपुराणेऽपि 'देवताभ्यः समस्ताभ्यः स्रष्टा ब्रह्मा परः स्मृतः। ब्रह्मणश्च महाविष्णुर्वरिष्ठः सर्वपालकः। विष्णोरपि परः साक्षाद्रुद्रः संहारकारकः' इति। सूतगीतायामपि 'त्रिषु रुद्रो वरिष्ठः स्यात्ततो मायी परः शिवः। मायाविशिष्टात्सर्वज्ञात्साम्बः सत्यादिलक्षणः॥ वरिष्ठो मुनयः साक्षाच्छिवो नात्र विचारणा। शिवाद्वरिष्ठो नैवास्ति मया सत्यमुदीरित'मिति। अत्र मायीतिपदेनेश्वरशिवमहेश्वरसदाशिवा अभेदेन गृहीताः॥ 'ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः। एते पञ्च महाप्रेताः पादमूले व्यवस्थिता' इतीश्वराद्भेदेन मध्ये सदाशिवस्य कीर्तनात्। शिवात्मके महामञ्चे महेशानोपबर्हणे। अतिरम्यतले तत्र कशिपुश्च सदाशिवः॥ भूतकाश्च चतुष्पादा महेशश्च पतद्ग्रहः। तत्रास्ते परमेशानी महात्रिपुरसुन्दरी'ति भैरवयामले कामेश्वरातिरिक्तानां षण्णां कीर्तनात्। भूतका भूत्याः। हृहिणहरिरुद्रेश्वरा इति तदर्थात् बहुरूपाष्टकप्रस्तारादिष्वप्येवमेव। साम्ब इत्यस्य त्रिपुरसुन्दर्यभिन्नः कामेश्वरशिवोऽर्थः सत्यादिलक्षण इति। तानि च कौर्मे 'सत्यं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम्। योगिनस्तत्प्रपश्यन्ति महादेव्याः परं पदम्॥ आनन्दगं परं ब्रह्म केवलं निष्कलं परम्। परात्परतरं तत्त्वं शाश्वतं शिवमव्ययम्॥ अनन्तप्रकृतौ लीनं देव्यास्तत्परमं पदम्। शुभ्रं निरञ्जनं शुद्धं निर्गुणं दैन्यवर्जितम्॥ आत्मोपलब्धिविषयं देव्यास्तत्परमं पद'मिति। एवं स्थितेऽप्येतेषां नामतो रूपतश्चावान्तरभेदे तत्त्वत ऐक्यान्नान्नामपि सांकर्यात्तत्प्रतिपादकपुराणानां पार्थक्याभावाच्च शिवनामैकमिल्येवोक्तम्। अनेनैवाशयेन शक्तिरहस्यादौ 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते। पितामहसहस्राणि विष्णोरेका घटी मता॥ विष्णोर्द्वादशलक्षाणि निमेषार्धं महेशितुः। दशकोट्यो महेशानां श्रीमातुस्त्रुटिरूपका' इत्यादौ विष्णुदेव्योर्मध्ये महेश एवोक्तः। ननु विष्णोरुत्कर्षप्रतिपादकानि वचनानि विष्णुपुराण-विष्णुभागवत-बृहन्नारदीयादिषु भूयांस्येव दृश्यन्त इतिचेत्, सत्यं दृश्यन्ते, परंतु तानि परत्वेन सह तात्त्विकैक्याभिप्रायेणेत्यविरोधः। तदप्युक्तं पराशरोपपुराणे 'वैष्णवेषु पुराणेषु योऽपकर्षस्तु दृश्यते। रुद्रस्यासौ हरस्यायं विभूतेरेव केवल'मिति। तथा सूतसंहितायाम् 'विष्णुप्रजापतीन्द्राणामुत्कर्षं शंकरादपि। प्रवदन्तीव वाक्यानि श्रौतानि प्रतिभान्त्यपि॥ तानि तत्त्वात्मना तेषामुत्कर्षं प्रवदन्ति हि। विष्णुप्रजापतीन्द्रेभ्योरुद्रस्योत्कर्षमास्तिकाः॥ वदन्ति यानि वाक्यानि तानि सर्वाणि हे द्विजाः। प्रवदन्ति स्वरूपेण तथा तत्त्वात्मनापि च॥ नैवं विष्णवादिदेवानामिति तत्त्वव्यवस्थिति'रिति। अत्र रुद्रपदेन सांबः कामेश्वर उच्यते। विष्णवादिदेवानामित्यादिपदेन विष्णुदेव्योर्मध्यपातिनः सर्वेऽपि शिवा उच्यन्ते। तेषां चेयत्तातिरहस्यत्वाद्बहुरुमुखैकवेद्या। नचैवं सति विष्णवादेरविनाशित्वबोधकवचनजातविरोधः। तस्यापि तत्त्वदृष्ट्यैव 'अहं मनुरभवं सूर्यश्चे'त्यादिवामदेववचनवदुपपत्तेः। अस्मदाद्यपेक्षया चिरतरजीवित्वेन स्वरूपतोऽप्युपपत्तेश्च। तदुक्तं मत्स्यपुराणे 'शतायुः पुरुषो यस्तु सोऽनन्तः स्वल्पजन्मनः। जीवतो योऽमृतश्चाग्रे तस्मात्सोऽमर उच्यते। अदृष्टजन्मनिधनेष्वेवं विष्ण्वादयो मताः' इति॥ ३०२॥ एवं कामेश्वरस्याधिक्ये सिद्धे

शिवनामसहस्राच्च देव्या नामैकमुत्तमम् ।
देवीनामसहस्राणि कोटिशः सन्ति कुम्भज ॥ ३०३ ॥
तेषु मुख्यं दशविधं नामसाहस्रमुच्यते ।
रहस्यनामसाहस्रमिदं शस्तं दशस्वपि ॥ ३०४ ॥

तदभेदादेव तच्छक्तेर्देव्याः पूर्वेभ्य उत्तमत्वं सिद्धमेव । परस्परमपि 'शक्त्या विना शिवे सूक्ष्मे नामधाम न विद्यते' इत्यादितन्त्रवचनेषु 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितु'मित्यादिना सौन्दर्यलहर्यां च कथयितुं युक्त्यैव सर्वानुभवसिद्धया शिवोत्कर्षस्य शक्तिमूलकत्वे सिद्धे 'तद्धेतोरेवास्त्विव'ति न्यायेनाम्बाया एव सर्वोत्तमत्वं सिद्ध्यतीत्याशयेनाह—**शिवेति** । देव्यास्त्रिपुरसुन्दर्याः परशिवाभिन्नाया नामेत्यसमस्तोक्तिर्देव्यानन्त्यभ्रमनिरासाय । तेन वातुलशुद्धतन्त्रे 'शिवस्य तु पराशक्तिसहस्रांशसमुद्भवः । पराशक्तेः सहस्रांशादादिशक्तिसमुद्भवः ॥ आदिशक्तिसहस्रांशादिच्छाशक्तिसमुद्भवः । इच्छाशक्तिसहस्रांशाज्ज्ञानशक्तिसमुद्भवः ॥ ज्ञानशक्तिसहस्रांशात्क्रियाशक्तिसमुद्भव' इत्यादिनोक्तानां पराशक्त्यादीनां नामग्रहणम् । देव्याश्च सर्वोत्तमत्वं त्रैपुरेषूपनिपत्कदम्बेषु निवेदयन् देवतायै महत्यै इत्येवासकृद्व्यवहाराच्छिवाद्युत्पादकत्वश्रवणाच्च स्पष्टमेव । कर्मकाण्डेऽपि प्रसङ्गाद्देवतान्तरानुवादप्रसक्तौ सत्यामन्येषां देवानां तत्तदसाधारणसंज्ञयैवानुवादप्रायपाठे 'महत्यै वा एतद्देवतायै रूपं महतीमेव तद्देवतां प्रीणाती'त्यादिव्यवहाराच्च । रुद्रयामलेऽपि 'अनेकजन्मपुण्यौघैर्दीक्षितो जायते नरः । तत्राप्यनेकभाग्येन शिवविष्णुपरायणः ॥ तत्राप्यनेकपुण्यौघैः शक्तिभावः प्रजायते । महोदयेन तत्रापि सुन्दरीभावतां व्रजेत् ॥ तत्रापि च तुरीयाख्या भाग्यैरन्तर्गता भवेत् । नामसंकीर्तनं तस्यास्तत्राप्यतिसुदुर्लभम् ॥ तत्र जन्मनि सा नित्या प्रसन्ना नामकीर्तनात् । जीवन्मुक्तिर्भवेत्तत्र कर्तव्यं नावशिष्यते' इति । एवं स्मृतिष्वपि 'ब्रह्मणो हृदयं विष्णुर्विष्णोरपि शिवः स्मृतः । शिवस्य हृदयं संध्या तेनोपास्या द्विजातिभि'रिति कश्यपादिवचनैः कूर्मपाद्मस्कान्दादिनिखिलपुराणेषु च तत्र तत्र देवीकालिकाब्रह्माण्डमार्कण्डेयादिपुराणेषु बहुशः शक्तिरहस्यदेवीभागवततृतीयस्कन्धादिषु चैदंपर्येण सर्वत्र ज्ञानार्णवकुलार्णवादितन्त्रेषु त्वपरिमिततया वर्णितमिति तद्वेदितॄणां स्पष्टमिति नेह प्रतन्यते ॥ ३०३ ॥ तेषु कोटिषु दशविधं 'एते दश स्तवा गङ्गाश्यामला बालरासभा' इत्यभियुक्तैः संगृहीतप्रकारदशकवत् । अत्र गङ्गाद्यक्षरदशकं सहस्रनामदशकस्याद्याक्षररूपम् । 'मद्वयं भद्वयं चैव त्रत्रयं वचतुष्टयम् । अनापलिङ्गकूस्कं च पुराणानि पृथक्पृथ'गिति देवीभागवतस्थश्लोक इव 'नामैकदेशे नामग्रहण'मिति न्यायसिद्धम् । चरको भकारो ह्रस्व एव । दीर्घपाठस्तु बहुवचनप्रयुक्तः । ततश्च 'गङ्गा भवानी गायत्री काली लक्ष्मीः सरस्वती । राजराजेश्वरी बाला श्यामला ललिता दश' इति तदर्थः । त्रिपुरसुन्दर्या एव तन्त्रभेदेन सहस्रनामदशकमस्तीत्यप्याहुः । शस्तं

तस्मात्संकीर्तयेन्नित्यं कलिदोषनिवृत्तये ।
मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ॥ ३०५ ॥
विष्णुनामपराः केचिच्छिवनामपराः परे ।

प्रशस्तम् ॥ ३०४ ॥ उपसंहरति—**तस्मादिति** । कलिप्रयुक्तो दोषः स्वस्वधर्मसमनुष्ठानवैकल्यं तस्य निवृत्तयेऽङ्गादिपरिपूर्तये । वैकल्यं च नाङ्गलोप एव अपितु प्रधानलोपेऽपि । प्रधानविकल्पत्वाविशेषात्, कलिप्रयुक्तदोषत्वाविशेषाच्च । सोऽपिच प्रायेणाधुनिकानां सर्वेषां कर्मठंमन्यानामपरिहरणीय एव । देवतोद्देशेन द्रव्यत्यागरूपस्य यागस्य मानससंकल्पविशेषात्मकत्वेनाप्रय इदं नममेत्यादिस्पष्टतरशब्दाभिलापमात्रेण तस्या जायमानत्वात् । एवं संध्यावन्दनपदवाच्यं प्रधानं 'असावादित्यो ब्रह्मे'ति मन्त्रार्थानुसंधानमादित्यावच्छिन्नचैतन्यस्य स्वात्मचैतन्येन सहाभेदभावनारूपम् । तच्च शिष्टानां रहस्याभिज्ञानामपि कादाचित्कमेव न सार्वत्रिकमिति प्रधानलोपः सर्वेषामपरिहार्यः । नच तेषामङ्गवैगुण्यनिमित्तकप्रायश्चित्तानुष्ठानेन समाधानम् । अङ्गमात्रलोप एव तेषां विधानात् । प्रधानलोपेतु पुनः करणमेवेति सिद्धान्तात् । इदंतु नामकीर्तनमुभयस्मिन्नपि निमित्ते समाधायकमिति ततोऽप्यस्योत्कर्षः सिद्धः । नन्वेवं सति प्रायश्चित्तशास्त्राणां कर्मकाण्डस्य च वैयर्थ्यमित्याशङ्क्याह—**मुख्येति** । मायामोहितचित्तानामल्पदेवतास्वेव महत्त्वबुद्ध्युदयेन तत्तदुपासने प्रवृत्तिः 'मायोपनेत्रपरिगूहितनेत्रकस्य लेखो महानिव विभाति यदल्पकोपि' इत्यस्माभिः शिवस्तवे कथनात् । ततश्च तादृशचेतोवृत्त्यानन्त्याद्यस्यैव पुंसो यत्रैव रुचिस्तदुद्देशेनैव तानि शास्त्राणि प्रवृत्तानि । दृश्यते च लोकेऽपि कस्यचित्स्थूले गुरुभूत एवोपाये रुचिः कस्यचिल्लघुभूत एवेति । ततश्च तादृशसमस्तजनानुजिघृक्षया तानि तानि शास्त्राणि भगवत्यैव कृतानीति नानर्थक्यम् । सहस्रनामपाठे प्रणाडिकया रुच्युत्पादकत्वादपि सार्थक्यमिति तु गूढोऽभिसंधिः । लघूपाये सत्यपि गुरूपाये जनानां प्रवृत्तिस्तु तत्तत्कर्मानुसारिव्यामोहादेवेति भावः ॥ ३०५ ॥ श्रौतस्मार्तकर्मस्वेव रतानां बहुजन्मभिस्तादृशकर्मजन्यपुण्यपरिपाकेन विष्णुनामसु प्रीतिर्बहूनां संभवतीत्याशयेनाह—**विष्णिवति** । तादृशविष्णुनामकीर्तनेन कतिपयैर्जन्ममिः शिवनामस्वपि कतिपयेषां प्रीतिः संभवतीत्याशयेनाह—**शिवनामपरा इति** । शिवस्य तु द्वित्रिचतुरादिभूमिकाभेदेन बहुविधत्वात्तत्र सतोऽपि परस्परतारतम्यस्य दुरवगाहत्वाद्बहुभिरपि जन्मभिः प्रयत्नत उत्तरां कक्षामधिरूढा अपि मध्य एवावतिष्ठमाना भासन्ते । शिवकक्षेयत्तानिर्णयस्य रहस्यत्वेनाप्रसिद्धत्वात् । अतो बहुतरजन्मभिर्बहुपुण्यसंभारैश्च लभ्यत्वाद्रहस्यतरेषु देवीनामसु प्रीतिर्दुर्लभतरा पर्यवस्यति । अतएवोक्तं ब्रह्माण्डपुराणे 'यस्य नो पश्चिमं जन्म यदि वा शंकरः स्वयम् । तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी'ति । अत्र शंकराणां क्रमेणाभेदानुसंधानरूपोपासनया चरमशंकरतादात्म्यापन्नो यदि वा शंकर इत्यनेन कथ्यते । तादृशी च दशा दु-

न कश्चिदपि लोकेषु ललितानामतत्परः ॥ ३०६ ॥
येनान्यदेवतानाम कीर्तितं जन्मकोटिषु।
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ॥ ३०७ ॥
चरमे जन्मनि यथा श्रीविद्योपासको भवेत्।
नामसाहस्रपाठश्च तथा चरमजन्मनि ॥ ३०८ ॥
यथैव विरला लोके श्रीविद्याचारवेदिनः।
तथैव विरलो गुह्यनामसाहस्रपाठकः ॥ ३०९ ॥

र्लभतरैव याच दुर्लभतरा सा प्रायेणाविद्यमानप्रायैवेत्याशयेनाह—**न कश्चिदपीति**। लोकेषु मनुष्येषु देवेषु दानवादिषु च ॥ ३०६ ॥ इदानीं गूहितमभिप्रायं स्फोटयति—**येनेति**। अन्यासां विष्णुरुद्रेश्वरादीनां देवतानां नाम प्रातिस्विकं जन्मकोटिषु येन कीर्तितं तस्यैव कक्षाक्रमेणोत्तरोत्तरदेवतातादात्म्याच्चरमशिवतादात्म्यापन्नस्यैव विरलतमस्य कस्यचित्पुरुषधौरेयस्य श्रीदेवीनामकीर्तनविषयकश्रद्धाङ्कुरोदयो नान्येषामिति भावः ॥ ३०७ ॥ नन्वीदृशदेवीनामकीर्तनविशिष्टजन्मबाहुल्ये किं प्राप्यमित्याशङ्क्य जन्मान्तरमेवासंभवित्वेन सदृष्टान्तं निरस्यति—**चरम इति**। अस्मिन्नंशे उपमानान्तराभावाद्देवीनाम्नो देवीमन्त्र एवोपमानमित्याशयेन यथा श्रीविद्योपासक इत्युक्तम्। उपासकशब्द उपास्तिपरः। श्रीविद्येति भिन्नपदम्। गुरुदेवतामन्त्रात्मनामैक्यभावनासिद्धिमदभिप्रायेणोपासकपदं तस्या विशेषणम्। तादृश्या एव चरमे जन्मनि लाभात् 'यस्य नो पश्चिमं जन्मे'त्यादि ब्रह्माण्डपुराणवचनात्। अथवा नामसहस्रस्य पाठो यस्मिन्निति व्यधिकरणबहुव्रीहिणोत्तरपदमेव वा पाठकपरम्। उपासकपाठयोरुपमानोपमेयतावच्छेदकयोर्मन्त्रनाम्नोरप्युपमानोपमेयभावः फलति ॥ ३०८ ॥ श्रीविद्यामन्त्रमात्रलाभो नोपास्तिः तस्य सुलभोपायेन पुस्तकादिनापि संभवात्, अपितु तद्विषयकवाह्यान्तरभेदभिन्नयावदाचारपरिज्ञानपूर्वकमनुष्ठानम्। तच्च विरलतरम्। अतएवोक्तं शक्तिरहस्ये 'कौलिके गुरवोऽनन्ताः' इति। श्रौतस्मार्ताचारविषयकग्रन्थानां बहूनामुपलम्भेन तद्विषयकयावज्ज्ञानवतामपि पुरुषाणां बहूनां लाभादेकेनैव गुरुणा द्वित्रैर्वा शिष्यप्रनोरथपूर्तिः। एतदाचारास्तु सामस्त्येन न क्वापि ग्रन्थेषूपनिबध्यन्ते। उपनिबन्धे प्रत्युत योगिनीशापान्नानात्। अतएवोत्तरचतुःशत्यां 'कर्णात्कर्णोपदेशेन संप्राप्तमवनीतल' इत्युक्तं नतु पुस्तकात्पुस्तकान्तरमिति। तस्माद्गुरुमुखेभ्य एव समस्ताचारज्ञानलभ इति तदाशयः। एतदाशयेनैव 'मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत्। ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं श्रये'दित्यभ्यनुज्ञा 'पूर्णाभिषेककर्ता यो गुरुस्तस्यैव पादुके'ति व्यवस्था च संगच्छते। ततश्च मन्त्रमात्रस्य विरलत्वेऽपि स नात्रोपमानमपितु यावदाचारवेदनमेव तथा विरलतमत्वादित्याशयेनोक्तमेवार्थं द्रढयति—**यथैवेति**। विरला विरलतमा इत्यर्थः ॥ ३०९ ॥ एवं प्रत्येकं विरलानां त्रयाणामेकत्र मेलन-

मन्त्रराजजपश्चैव चक्रराजार्चनं तथा ।
रहस्यनामपाठश्च नाल्पस्य तपसः फलम् ॥ ३१० ॥
अपठन्नामसाहस्रं प्रीणयेद्यो महेश्वरीम् ।
स चक्षुषा विना रूपं पश्येदेव विमूढधीः ॥ ३११ ॥
रहस्यनामसाहस्रं त्यक्त्वा यः सिद्धिकामुकः ।
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ॥ ३१२ ॥
यो भक्तो ललितादेव्याः स नित्यं कीर्तयेदिदम् ।
नान्यथा प्रीयते देवी कल्पकोटिशतैरपि ॥ ३१३ ॥
तस्माद्रहस्यनामानि श्रीमातुः प्रयतः पठेत् ।
इति ते कथितं स्तोत्रं रहस्यं कुम्भसंभव ॥ ३१४ ॥
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ।
यथैव गोप्या श्रीविद्या तथा गोप्यमिदं मुने ॥ ३१५ ॥
पशुतुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम् ।
यो ददाति विमूढात्मा श्रीविद्यारहिताय तु ॥ ३१६ ॥
तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान्स्मृतः ।
रहस्यनामसाहस्रं तस्मात्संगोपयेदिदम् ॥ ३१७ ॥

मतीव दुर्लभमिति न्यायसिद्धमेवार्थमाह—**मन्त्रेति** । अपितु निरवधिकस्येति शेषः । नकारेणैवायं समासो नाल्पस्येति नतु नञ् ॥ ३१० ॥ एवं देवताप्रीतिकरत्वं सर्वकामपूरकत्वं चास्यान्वयमुखेनोक्त्वा व्यतिरेकमुखेन निदर्शनालंकाराभ्यां द्रढयति—**अपठन्निति** द्वाभ्याम् । स्पष्टोऽर्थः ॥ ३११ ॥ ३१२ ॥ भक्तावच्छेदकमप्येतदेवेत्यन्वयव्यतिरेकाभ्यामाह—**य इति** । यो नित्यं संकीर्तयेत्स एव भक्तो नान्य इत्यर्थः । 'ये यजमानास्त एव ऋत्विज' इत्यत्रेव यत्तदोर्वैपरीत्येनान्वयः ॥ ३१३ ॥ नामसाहस्रपाठविधिं निगमयंस्तत्फलकथनमुपसंहरति—**तस्मादिति** । प्रयतः शुचिः ॥ ३१४ ॥ उत्तरत्र संप्रदायप्रवर्तनप्रकारं शिक्षयति—**नेति** । भक्तायापि विद्यावेदनरहिताय तत्सहितायाप्यभक्ताय न ब्रूयात् । तथा गोप्यं श्रीविद्या यथा तदभाववते न प्रदर्श्यते तथेदं तद्वतेपि न प्रदर्श्यं किमुत तदभाववत इति भावः ॥ ३१५ ॥ अतएव निषेधस्यार्थेन—**पश्विति** । पशवश्च द्विविधाः पूर्वमुक्ताः । निषेधोल्लङ्घने दण्डमाह—**य इति** । यश्च गृह्णातीति चकारलभ्योऽर्थः ॥ ३१६ ॥ तस्मै दात्रे विद्यारहिताय ग्रहीत्रे च । 'क्रुधद्रुहेर्ष्यासूयार्थानां यंप्रति कोप' इति संप्रदानसंज्ञा । गोपनीयतामुपसंहरत्यर्थेन—**रहस्येति** । रहस्येत्यादिविशेष्यं हेतुगर्भम् । तेन परिकराङ्कुरालंकारः । तस्मात् अनधिकारिणोर्दातृग्रहीत्रोरनर्थप्रदत्वात्

स्वतन्त्रेण मया नोक्तं तवापि कलशीभव।
ललिताप्रेरणादेव मयोक्तं स्तोत्रमुत्तमम्॥ ३१८॥
कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम्।
तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति॥ ३१९॥

सूत उवाच।

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम्।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत्॥ ३२०॥

इति श्रीब्रह्माण्डपुराणे ललितोपाख्याने हयग्रीवागस्त्यसंवादे ललितासहस्रनामस्तोत्रं नाम षट्त्रिंशोऽध्यायः॥ ३६॥

रहस्यत्वाच्च गोपयेदित्यर्थः॥ ३१७॥ ननु यद्विद्यावतेऽपि गोप्यं तन्मह्यं त्वया कथं प्रदर्शितमित्याशङ्कमानमगस्त्यं समाधत्ते हयग्रीवः—**स्वतन्त्रेणेति**। स्वतन्त्रेण पराप्रेरितेन। कलशीति जातिलक्षणो ङीप्। तत्प्रयोगश्च श्लेषेण देवीपुत्रबोधनाय। तदप्युपास्तिबलेन देवीपुत्रभावपर्यन्तां पदवीमुपारूढे वात्सल्येन ललिताम्बाप्रेरणावश्यंभावध्वननाय। 'कलं शुके कलो जीर्णे कलो नादेऽतिमञ्जुले' इति यादवश्चलात्कले शुके नादे वा शेत इति कलशी देवी। सर्वोत्तमत्वाद्वा। 'सर्वोत्तमे चोत्तमाङ्गे कुम्भे च कलशध्वनि'रिति रभसः। ललिताप्रेरणादेव तत्प्रवर्तनाया अनुल्लङ्घनीयत्वात्। अधिकारिविषय एव तत्प्रेरणस्य जायमानत्वाच्च। तेनोपासकाभासायैव न प्रदर्श्यमिति भावः॥ ३१८॥ त्वं तु नोपासकाभासोऽपितु पूर्णोऽधिकारीति ध्वननाय प्रवर्तयति—**कीर्तनीयमिति**। त्वयेति शेषः। निरन्तरं अभेदानुसंधानपूर्वकम्। नचात्र नामकीर्तनविधिरसकृच्छ्रूयमाणोऽभ्यासात्कर्माणि भिन्नादेवेत्येकस्यैवैतावन्ति फलानीति वर्णनमयुक्तमिति वाच्यम्। भावनाभेदमात्रेणापि तदुपपत्तेः, फलस्यानुपादेयत्वेन तद्विशेषोद्देशेन कर्मण एव पुनःपुनर्विधानेऽप्यन्यपरत्वेन तादृशस्य पुनःश्रवणस्याभ्यासरूपत्वाभावात्। 'अपः प्रणयती'ति विधेरर्थवादवैचित्र्यार्थं षड्वारं श्रवणेऽपि कर्मभेदानङ्गीकारात्। अनुपादेयगुणसाचिव्येऽप्यसंनिधेरभावेन प्रकरणान्तरस्यापि शङ्कितुमयोगाच्चेति दिक्॥ ३१९॥ 'प्रहृष्टो वचनं प्राहे'त्यादिनोपक्रान्तमेकेन श्लोकेनोपसंहरति भगवान्सूतः—**इतीति**। आनन्दे स्वात्मानन्दे मग्नं विषयान्तरसंचारराहित्येन तदेकप्रवणं हृदयं चित्तं यस्य सः। पुलका आनन्दजन्यरोमाञ्चा अस्य संजाता इति पुलकितः। तारकादित्वादितच्॥ ३२०॥

अथ परिभाषायां स्वग्रन्थमुपसंहरति—**इति परिभाषामण्डलमुदितं नरसिंहयज्वना विदुषा। सत्संप्रदायगमकं शिवभक्तानन्दनाय शिवम्॥ ४०॥** मण्डलशब्दश्चत्वारिंशत्संख्यात्मकसमूहपरः। विदुषा विद्याष्टादशकविदा श्रीविद्योपासकेन च शिवयोर्भक्तानां सत्संप्रदायं दुर्लभतरमन्वेषमाणा-

नामानन्दनाय । शिवं मङ्गलरूपमिति सर्वं शिवम् ॥ ४० ॥

इति भास्कररायेण कृते सौभाग्यभास्करे ।
जाता फलश्रुतिः श्लोकैः क्षमाख्या द्वादशी कला ॥ १२ ॥

ग्रन्थकृत्प्रशस्तिः ।

श्रीविश्वामित्रवंश्यः शिवभजनपरो भारती सोमपीथी
काश्यां गम्भीरराजो बुधमणिरभवद्भास्करस्तस्य सूनुः ।
मोदच्छाया(संव० १७८५)मितायां शरदि शरदतावाश्विने काल्युक्ते
शुक्ले सौम्ये नवम्यामतनुत ललितानामसाहस्रभाष्यम् ॥ १ ॥

श्रुतिस्मृतिन्यायपुराणसूत्रकोशागमश्रीगुरुसंप्रदायात् ।
निश्चित्य निर्मथ्य कृतापि टीका शोध्यैव सद्भिर्मयि हार्दवद्भिः ॥ २ ॥

प्रमादो मेऽवश्यं भवति मतिमान्द्यादलसतः
पदार्थन्यायानामपि दुरवगाहत्वनियमात् ।
परं त्वन्तः सन्तः सदयहृदया नाममहिमा-
प्यपूर्वस्तस्मान्मे न खलु खलपापोभयभयम् ॥ ३ ॥

अम्ब त्वत्पदयोः समर्पितमिदं भाष्यं त्वया कारितं
त्वन्नामार्थविकासकं तव मुदे भूयादथ त्वां भजन् ।
यो नैनत्परिशीलयेन्न च पठेद्यः पुस्तकस्यापि वा
संग्राहं न करोति तस्य ललिते माभूद्भवत्यां मतिः ॥ ४ ॥

नामैकं मामनयन्नामसहस्राम्बुधेः परं पारम् ।
जलबिन्दुर्भवजलधेर्येषां ते मे जयन्ति गुरुचरणाः ॥ ५ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्र-श्रीमद्वम्भी-
रारायदीक्षितसूरिसूनुना भासुरेत्युपाख्येन भासुरानन्दनाथेतिदीक्षाना-
मशालिना भास्कररायेण प्रणीतं सौभाग्यभास्कराख्यं ब्रह्माण्ड-
पुराणीयश्रीललितारहस्यनामसहस्रभाष्यं संपूर्णम् ।

सम्पूर्णोऽयं ग्रन्थः ।



१ 'तथापि' इति पाठः २३२ पृष्ठे द्रष्टव्यः. २ 'ललितोपास्तिर्वृथा जायताम्' इति पाठः २१९ पृष्ठे द्रष्टव्यः ।